1/19455

1216

140770

अथरघुवंशसटीकप्रारंभः ७३५६

ZZ.b.3.

ॐ नमः॥ श्रीमन्महागणाधिपाय नमः॥ मातापितृभ्यां जगतो नमो वामार्द्धजानये॥ सद्यो दक्षिणदृक्पातसंकुच
द्वामदृष्टये॥१॥ अंतरायतिमिरोपशांतये शांतपावनमचिंत्यवैभवं॥ नं नरं वपुषि कुंजरं मुखे मन्महे किमपि तुं
दिलं महः॥२॥ शरणं करवाणि शर्मदं ते चरणं वाणि चराचरोपजीव्यं॥ करुणामसृणैः कटाक्षपातैः कुरु मामंब
कृतार्थसार्थवाहं॥३॥ वाणीं काणभुजीमजीगणदवाशासीच्च वैयासकीमंतस्तंत्रमरंस्त पन्नगगवीगुंफेषु चा
जागरीत्॥ वाचामाकलयद्रहस्यमखिलं यश्चाक्षपादस्फुरां लोकेभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः
॥४॥ मल्लिनाथकविः सोयं मंदानुजिघृक्षया॥ व्याचष्टे कालिदासीयं काव्यत्रयमनाकुलं॥५॥ कालि
दासगिरां सारं कालिदासः सरस्वती॥ चतुर्मुखोथवा साक्षाद्विदुर्नान्ये तु मादृशाः॥६॥ तथापि दक्षिणावर्त
नाथाद्यैः क्षुण्णवर्त्मसु॥ वयं च कालिदासोक्तिष्ववकाशं लभेमहि॥७॥ भारती कालिदासस्य दुर्व्याख्याविष
मूर्छिता॥ एषा संजीवनी टीका तामद्योज्जीवयिष्यति॥८॥ इहान्वयमुखेनैव सर्वं व्याख्यायते मया॥ नामूलं
लिख्यते किंचिन्नानपेक्षितमुच्यते॥९॥ इह खलु सकलकविशिरोमणिः कालिदासः काव्यं यशसेर्थकृते व्य
वहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कांतासंमिततयोपदेशयुजे इत्यालंकारिकवचनप्रामाण्यात्
काव्यस्यानेकश्रेयःसाधनतां काव्यालापांश्च वर्जयेदित्यस्य निषेधशास्त्रस्य सत्काव्यविषयतां च पश्यन्
रघुवंशाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनभूतविशिष्टेष्टदे
वतानमस्कारस्य शिष्टाचारपरिप्राप्तत्वात्। आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्याशीराद्यन्यत
मस्य प्रबंधमुखलक्षणत्वात् काव्यनिर्माणस्य विशिष्टशब्दार्थस्य प्रतिमूलत्वे विशिष्टशब्दार्थयोश्च शब्दजात
मशेषं तु धत्ते शर्वस्य वल्लभा। अर्थरूपं यदखिलं धत्ते मुग्धेंदुशेखरः॥ इति वायुपुराणसंहितावचनबलेन पार्वती १

3
1947

परमेश्वरयोस्तत्त्वदर्शनप्रतिपिपित्सया तावभिवादयते। वागर्थाविवेति। वागर्थाविवेत्येकपदं इवेन सह समासो
विभक्त्यलोपश्च पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यं॥ एवमन्यत्रापि द्रष्टव्यं॥ वागर्थाविव शब्दार्थाविव संपृक्तौ नित्य
संबंधावित्यर्थः। नित्यसंबंधयोरुपमानत्वेनोपादानात् नित्यः शब्दार्थसंबंध इति मीमांसकाः। जगतो लोकस्य
पितरौ। प्रसूजनयितारावित्यमरः। एतेन सर्वेशित्वयोः सर्वजनकतायां वैशिष्ट्यमिति विशिष्टार्थप्रदानशक्तित्वं प
रमकारुणिकत्वं च सूच्यते। पर्वतस्यापत्यं स्त्री पार्वती तस्यापत्यमित्यण्प्रत्ययः टिड्ढाणञित्यादिना ङीप्।
पार्वती च परमेश्वरश्च पार्वतीपरमेश्वरौ परमशब्दः सर्वोत्तरत्वद्योतनार्थः मातुरभ्यर्हितत्वादल्पस्वरत्वाच्च पार्व
तीशब्दस्य पूर्वनिपातः। वागर्थप्रतिपत्तये परमशब्दः सर्वोत्तरत्वद्योतनार्थः मातुरभ्यर्हितत्वादल्पस्वरत्वाच्च पा

ॐ नमः॥ वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये॥ जगतः पितरौ वंदे पार्वतीपरमेश्वरौ॥१॥

र्वतीशब्दस्य पूर्वनिपातः॥ वागर्थप्रतिपत्तये शब्दार्थयोः सम्यक्ज्ञानार्थं वंदे अभिवादयेत्। अत्रोपमालंकारः स्फु
ट एव तथोक्तं स्वतःसिद्धेन —न्नेन संमतेन च धर्मतः साम्यमन्येन वर्णस्य वाच्यं चेदेकगोचरमिति प्राथिकश्चायमलं
कारः कालिदासोक्तकाव्यादौ भद्रदेवताकस्य सर्वगुरोर्मगणस्य प्रयोगात् शुभताभः सूच्यते तदुक्तं शुभदो भूमि
मय इति चकारस्यामृतबलत्वात् प्रचयगमनसिद्धिः॥१॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

संप्रतिस्वाहंकारंपरिहरति कस्सूर्येत्यादिश्लोकद्वयेन्। प्रभवत्यस्मादितिप्रभवः कारणं। ऋदोरप् अकर्तरि च कारसंज्ञायामितिसाधुः स्सूर्यःप्रभवोयस्यसस्सूर्यप्रभवः वंशः क्व। अल्पोविषयोज्ञेयोर्थोयस्याः साचमतिः प्रज्ञा क्व। द्वौ कशब्दौमहदंतरं सूचयतः। सूर्यवंशमाकलयितुंनशक्नोमीत्यर्थः तथाचतद्विषयप्रबंधनिरूपणंतदुभयामितिभावः। तथाहि दुस्तरंतरितुमशक्यं ईषद्दुःसुषुकृच्छ्रेत्यादिनाखल्प्रत्ययः। सागरंमोहादज्ञानात् उडुपेनप्लवेन उडुपंतुप्लवःपोइत्यमरः। अथवाचर्मावनद्धेनयानपात्रेण चर्मावनद्धमुडुपंप्लवकाष्टंकरंडनादिति संजनाति तीर्षुः तरितुमिच्छुः। तरतेः सनंताडुप्रत्ययः अल्पतरसाधनैरधिकारंभोजनसुखकरइतिभावः॥ इदंचवंशो

कस्सूर्यप्रभवोवंशः क्वचाल्पविषयामतिः॥ तितीर्षुर्दुस्तरंमोहादुडुपेनास्मिसागरं॥२॥
मंदःकवियशप्रार्थीगमिष्याम्युपहास्यतां॥ प्रांशुलभ्येफलेमोहादुद्बाहुरिववामनः॥३॥

त्कर्षकथनंस्वप्रबंधमहत्वार्थमेव। प्रतिपाद्यमहिम्नावाप्रतिबंधोमहत्तरइतिलक्षणात्॥२॥ मंदइति। मंदोमूढः। मंदः स्वानिश्चरेमूढेअल्पज्ञेरोगपीडितेइत्यमरः। तथापिकवियशःप्रार्थी कवीनांयशःकाव्यनिर्माणेनत्तत्प्रार्थनशीलोहंप्रांशुनोन्नतपुरुषेणलभ्येप्राप्येफलेफलविषयेलाभार्थेनउद्बाहुरुच्छ्रितहस्तोवामनोरइसइव। खर्वोह्रस्वश्चवामनइत्यमरः॥ उपहास्यतांउपहासविषयतांत्स्तर्लोर्ण्यदितिण्यत्प्रत्ययः॥३॥

मंदश्चेत्तर्हित्यजतामयंदुराग्रउद्योगइत्यतआह अथवाप्रक्षांतरेपूर्वैः सूरिभिः कविभिर्वाल्मिक्यादिभिः कृतवाग्द्वारे कृतारामायणादिप्रबंधरूपायावाक्सैवद्वारंप्रवेशोयस्य तस्मिन् सूर्यप्रभवेवंशेकुलेजन्मनैवलक्षणःसंतानोवंशः वज्रेणमणिवेधकसूचिविशेषणवज्रंत्वस्त्रीकुलिशशस्त्रयोर्मणिवेधेरत्नभेदे इति केशवः। समुत्कीर्णेविद्धेमणौरत्ने सूत्रस्येवगतिःसंचारोस्तिवर्णनीयेमनुवंशेलब्धप्रवेशस्तद्वर्णनभातिजानीतेसोहमित्यादिभिः पंचभिःश्लोकैः कुलकेनाह। सोयंरघूणामन्वयंवक्ष्येइत्युत्तरेणसंबंधः। किंविधानांरघूणां इत्यत्रउत्तराणिवि

अथवाकृतवाग्द्वारेवंशेस्मिन्पूर्वसूरिभिः॥ मणौवज्रसमुत्कीर्णेसूत्रस्येवास्तिमेगतिः॥४॥
सोहमाजन्मशुद्धानामाफलोदयकर्मणां॥ आसमुद्रक्षितीशानामानाकरथवर्त्मनां॥५॥

शेषणानियोज्यानि। आजन्मआरभ्येत्यर्थः। आङ्मर्यादाभिविध्योरित्यव्ययीभावः नस्यशुद्धानांसुप्सुपेतिसमासः। एवंउत्तरत्रापिद्रष्टव्यं। आजन्मशुद्धानांनिषेकादिसर्वसंस्कारसंपन्नानामित्यर्थः। आफलोदयंकर्मणाआफलसिद्धेयंकर्मयेषांतेतथोक्तास्तेषांप्रालब्धांतर्गामनामिनामित्यर्थः। आनाकंरथवर्त्मयेषांतेषां। इंद्रसहचारिणामित्यर्थः आसमुद्रंक्षीरेरीशानांसार्वभौमानामित्यर्थः। अत्रसर्वत्रआङोनिविध्यर्थत्वंद्रष्टव्यं॥ अन्यथामर्यादार्थत्वेजन्मादिषुशुद्धाभावप्रसंगात्॥५॥

5
1947

यथाविधीति। विधिमनतिक्रम्य यथाविधि साहृश्ये इत्यव्ययीभावः। तथा हुतशब्देन सुप्सुपेति समासः। एवं
यथाकामार्चितेत्यादीनामपि द्रष्टव्यं। यथाविधि हुता अग्नयो यैस्तेषां। यथाकामा नभिलाषमनतिक्रम्य अ
र्चिता अर्थिनो। यथापराधमनतिक्रम्य दंडो येषां यथाकालमनतिक्रम्य प्रबोधिनां प्रबोधनशीलानां चतुर्भि
विशेषणैर्देवतायजनातिथिसत्कारदंडधरत्वप्रजापालनसमयजागरूकत्वानि विवक्षितानि॥ ६॥ त्या
गायेति। त्यागाय सत्पात्रे नियोगस्त्यागस्तस्मै संभृतार्थानां संचितधनानां सत्यायमितभाषिणां शीला
नां न तु पराभवाय। यशसे विजिगीषूणां जेतुमिच्छूनां न त्वार्थग्रहाय। प्रजायै संतानाय गृहमेधि

यथाविधिहुताग्नीनां यथाकामार्चितार्थिनां॥ यथापराधदंडानां यथाकालप्रबोधिनां॥ ६
त्यागाय संभृतार्थानां सत्याय मितभाषिणां॥ यशसे विजिगीषूणां प्रजायै गृहमेधिनां॥ ७॥

नां दारपरिग्रहाणां न तु कामोपभोगाय। अत्र त्यागायेत्यादिषु चतुर्थी च तादर्थ्ये त्यादिनां च तुर्थी समासविधान
ज्ञापकाच्चतुर्थी गृहैर्दारैर्मेधंते संगच्छंत इति गृहमेधिनः। दारेष्वपि गृहाः इत्यमरः। जाया च गृहिणी गृह इति तिहला
युधः मेधृ संगमे मेधा संगमे इति धातोर्णिनिः। एभिर्विशेषणैः परोपकारित्वं सत्यवचनत्वं यशः परत्वे पितृणामा
नृण्यं शुद्धता च विवक्षितानि॥ ७॥

7
1947

शैशवेति। शिशोर्भावः शैशवं बाल्यं। प्राणभृज्जातिवयोवचनेभ्य इति अञ्प्रत्ययः। तस्मिन्वयसि अभ्यस्तवि
द्यानां एतेन ब्रह्मचर्याश्रमो विवक्षितः। यूनो भावो यौवनं। तारुण्यं यौवनं समे इत्यमरः। युवादित्वादण्प्रत्य
यः। तस्मिन्वयसि विषयैषिणां भोगाभिलाषिणां। एतेन गृहस्थाश्रमो विवक्षितः। वृद्धस्य भावो वार्द्धकं
वृद्धत्वं वृद्धमनोज्ञादिभ्यश्चेति वुञ्। वार्द्धकं वृद्धसंघाते वृद्धत्वं वृद्धकर्मणीति विश्वप्रकाशः। संघातर्थे त्र वृद्धा इति वुञ्
वार्द्धकं वृद्धवत्कव्यासामुदिकौ वुञ्। तस्मिन्वार्द्धके वयसि मुनीनां वृत्तिरिव वृत्तिर्येषां तेषां एतेन वानप्रस्थाश्रमो
विवक्षितः। अंते शरीरत्यागकाले योगेन परमात्मध्यानेन। योगः संहनोपायध्यानसंगतियुक्तिष्वित्यमरः। तनुं त्यजंतीति
तिततनुत्यजः। अन्येभ्योपि दृश्यते इति क्विप्। तेषां देहत्यागिनां। एतेन मोक्षभावो विवक्षितः॥ ८॥ रघूणामिति

शैशवेभ्यस्तविद्यानां यौवने विषयैषिणां॥ वार्द्धके मुनिवृत्तीनां योगेनांते तनुत्यजां॥ ८॥
रघूणामन्वयं वक्ष्ये तनुवाग्विभवोपि सन्॥ तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः॥ ९॥

सोहं लघुप्रवेशो तनुवाग्विभवो अल्पवाणीप्रसरोपि सन् तेषां गुणैस्तद्गुणैः आजन्मशुद्धादिभिः कर्तृभिः कर्णमिम
श्रोत्रमागत्य चापलाय युवादित्वात् कर्मण्यञ्। चापलं चपलकर्म अविमृश्यकरणरूपं कर्तुं। क्रियार्थोपपदेत्यादि
ना चतुर्थी प्रचोदितः प्रेरितः सन् रघूणामन्वयं अन्वयप्रबंधं वक्ष्ये॥ ९॥ इति कुलकं॥

संप्रतिस्वप्रबंधपरिक्षार्थंसंतःप्रार्थयते। तमिति। तंरघुवंशाख्यप्रबंधंसदसतोर्गुणदोषयोर्व्यक्तौहेतवःकर्ता
रःसंतःश्रोतुमिच्छंति। तथाहि हेम्नोविशुद्धिर्निर्दोषस्वरूपंपश्यति। श्यामिकापिकालिकापिलोहांतरसं
सर्गात्मकोदोषोवा। अग्नौसंलक्ष्यतेनान्यत्र। तद्वदत्रापि। सएवगुणदोषविवेकाधिकारिणोनान्यइतिभा
वः॥१०॥ वर्णइवस्वाक्षिपति। वैवस्वतइति। मनसःईषिणांमनीषिणांविद्वांसइतियावत्। सेषांदरादित्वा
त्साधुः तेषांमाननीयः। पूज्यः छंदसांवेदानां। छंदःन्यथेचवेदेचेतिविश्वः। प्रणवःॐकारइव। महीक्षियंति

तंसंतःश्रोतुमिर्छंतिसदसद्व्यक्तिहेतवः॥ हेम्नःसंलक्ष्यतेह्यग्नौविशुद्धिःश्यामिकापिवा॥ १०॥
वैवस्वतोमनुर्नाममाननीयोमनीषिणां॥ आसीन्महीभृतामाद्यःप्रणवश्छंदसामिव॥ ११॥
तदन्वयेशुद्धिमतिप्रसूतःशुद्धिमत्तरः॥ दिलीपइवराजेंदुरिंदुःक्षीरनिधाविव॥ १२॥

ईशतेइतिमहीक्षितः। क्षितीश्वराः। क्षिधातोरैश्वर्यत्वात्क्विप्तुगागमश्च। तेषामाद्यःआदिभूतःविवस्वत
सूर्यस्यापत्यंपुमान्वैवस्वतोनामवैवस्वतइतिप्रसिद्धोमनुरासीत्॥ ११॥ तदन्वयइति। शुद्धिरस्यास्तीतिशु
द्धिमान् तस्मिन् तदन्वयेतस्यमनोरन्वयेअतिशयेनशुद्धिमान्शुद्धिमत्तरः। द्विवचनविभज्येत्यादिनातरप्।
दिलीपइतिप्रसिद्धोराजाइंदुरिवराजेंदुःराजश्रेष्ठः। उपमितंव्याघ्रादिनासमासः। क्षीरनिधाविंदुरिव ४
प्रसूतःजातः॥ १२॥

9
1947

व्यूढेति। व्यूढेत्यादित्रिभिःश्लोकैर्दिलीपंविशिनष्टि। व्यूढंविपुलंउरोयस्यसव्यूढोरस्कः उरःप्रभृतिभ्यः कप्
व्यूढंविपुलंभइंस्फारंसमंवरिष्ठंचइतियादवः। वृषस्यस्कंधइवस्कंधायस्यसःतथोक्तःसप्तम्युपमानेत्यादिनाउ
त्तरपदलोपीबहुव्रीहिः। शालोवृक्षइवप्रांशुरुन्नतःशालःप्रांशुःप्राकारवृक्षयोःशालःशार्दूलसर्जतरु
स्मतइतियादवः महाभुजोमहाबाहुः। आत्मकर्मक्षमस्वंव्यापारानुरूपंदेहमाश्रितःप्राप्तः। क्षात्रःक्षत्रःसंबं
धीधर्मइतिस्थितः। मूर्तिमान्पराक्रमइवस्थितइत्युत्प्रेक्षा॥ १३॥ सर्वातिरिक्तेतिसर्वातिरिक्तसारेणास

व्यूढोरस्कोवृषस्कंधःशालप्रांशुर्महाभुजः॥ आत्मकर्मक्षमंदेहंक्षात्रधर्मइवाश्रितः॥ १३॥
सर्वातिरिक्तसारेणसर्वतेजोभिभाविना॥ स्थितःसर्वोन्नतेनोर्वींक्रांत्वामेरुरिवात्मना॥ १४॥
आकारसदृशःप्रज्ञःप्रज्ञयासदृशागमः॥ आगमैःसदृशारंभःप्रारंभसदृशोदयः॥ १५॥

र्वेभ्योभूतेभ्योधिकबलेन। सर्वाणिभूतानितेजसाअभिभवतीतिसर्वतेजोभिभावीतेनसर्वेभ्योन्नतेनात्मना
शरीरेण। आत्मादेहधृतौजीवेस्वभावेपरमात्मनीतिविश्वः। मेरुरिवउर्वींक्रांत्वाआक्रम्यस्थितः। मेरावपिवि
शेषणानितुल्यानि। असाभिश्चसुरेंद्राणांमात्राभिर्निर्मितोनृपः। तस्मादभिभवत्येषःसर्वभूतानितेजसेति
भुवनात्प्राक्सःसर्वतेजोभिभावित्वंज्ञेयं॥ १४॥ आकारेति। आकारेणमूर्त्यासदृशीप्रज्ञायस्यसः। प्रज्ञयासदृ
शागमः। प्रज्ञानुरूपशास्त्रपरिश्रमः। आगमैःसदृशारंभःकर्मयस्यसतथोक्तः। प्रारभ्यतइतिप्रारंभः। कर्म
तत्सदृशउदयःफलसिद्धिर्यस्यसतथोक्तः॥ १५॥

भीमेति। भीमैः कांतैश्च नृपगुणैः तेजःप्रतापादिभिः कुलशीलदाक्षिण्यादिभिश्च सदिलीपः उपजीविनामा श्रितानां यादोभिर्जलचरैः यादांसि जलजंतव इत्यमरः। रत्नैश्चार्णव इव अधृष्यः। अनभिभवनीयश्चाभिगम्यश्चाश्रयणीयश्च बभूव॥१६॥ रेखामात्रमितिनियंतुः शिक्षकस्य सारथेश्च तस्य दिलीपस्य संबंधिन्यः प्रनेमिनां चक्रधाराणां वृत्तिरिव वृत्तिर्व्यापारो यासां ताः चक्रधाराप्रधिनेमिरितियादवः। चक्रस्यांगं यस्यां तं नेमिस्त्री स्यात्प्रधिः पुमानित्यमरः। प्रजाः आमनोर्मनुमारभ्येत्यविधिः पदद्वयं चैतत्। समासस्याविभाषितत्वात् क्षुणादभ्यस्तात् प्रदत्ताच्च वर्त्मनः आरघपद्धतेरध्वनश्च। परमधिकमिंकतस्ततइत्यर्थः रेखाप्रमाणमस्येति रे

भीमकांतैर्नृपगुणैः स बभूवोपजीविनां॥ अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः॥१६॥
रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परं॥ न व्यतीयुः प्रजास्तस्य नियंतुर्नेमिवृत्तयः॥१७॥
प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्॥ सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः॥१८॥

खामात्रं रेखाप्रमाणमीषदपीत्यर्थः। प्रमाणे द्वयसज्जित्यादिना मात्रच् प्रत्ययः परशब्दविशेषणं चैतत्। न व्यतीयुर्नातिक्रांतवत्यः कुशलसारथिप्रेरितारथनेमय इव तस्य प्रजाः पूर्वक्षुण्णमार्गं न जहुरितिभावः॥१७॥ प्रजानामिति। सराजा प्रजानां भूत्यै भूत्यर्थं वृद्ध्यर्थमेवार्थेन सह नित्यसमासः सर्वलिंगता चवक्तव्याग्रहणक्रियाविशेषणं चैतत्। ताभ्यः प्रजाभ्यो बलिं षष्ठांशरूपकरमग्रहीत्। भागधेयः करो बलिरित्यमरः। तथाहि। रविः सहस्रं गुणा यस्मिन्कर्मणि तद्यथा। तथा सहस्रगुणं सहस्रधा उत्स्रष्टुं हार्तुं। उत्सर्जनक्रियाविशेषणं चैतत्। रसमंबु आदत्ते गृह्णाति रसो गंधरसे स्वादे तिक्तादौ विषरागयोः शृंगारादौ द्रवे वीर्ये देहधात्वंबुशारद इति विश्वः॥१८॥

11/1947

संप्रति बुद्धिशौर्यसंपन्नस्य तस्यार्थसाधनेषु परानपेक्षत्वमाह। सेनेति। तस्य राज्ञः सेना परिच्छदः। छादेर्घेद्विपसर्गस्येति। परिकरः उपकरणं बभूव। छत्रचामरादितुल्यमभूदित्यर्थः पुंसि संज्ञायां घः प्रायेणेति घः प्रत्ययः छादेर्घेत्युपसर्गस्येति उपधा ह्रस्वः। अर्थप्रयोजनस्य तु साधनं द्वयमेव शास्त्रेषु अकुंठिता व्याहत बुद्धिः व्याहतेत्यपि पाठः॥ धनुषि आतत आरोपिता मौर्वी च। मौर्वी ज्या सिंजिनी गुण इत्यमरः। नीतिपुरःसवतस्य शौर्यस्य भूदित्यर्थः॥१९॥ राज्यमूलमंत्रसंरक्षणं तस्यास्तीत्याह। तस्येति। संवृतमंत्रस्य गुप्त

सेनापरिच्छदस्तस्य द्वयमेवार्थसाधनं॥ शास्त्रेष्वकुंठिता बुद्धिर्मौर्वी धनुषि चातता॥१९॥
तस्य संवृतमंत्रस्य गूढाकारेंगितस्य च॥ फलानुमेयाः प्रारंभाः संस्काराः प्राक्तना इव॥२०॥

विचारस्य वेदभेदे मंत्र इत्यमरः। शोकहर्षादिसूचकोभ्रूकुट्यादिमुखरागादिराकारेंगितं चेष्टितं हृदयगत विचारो वा। इंगितं हृद्गतो भावो बहिराकार आकृतिरिति सज्जनः। गूढे आकारेंगिते यस्य स्वभावचपलाद्दासपरंपरामुखरागादिलिंगैर्वा तृतीयगामिमंत्रस्य प्रारभ्यत इति प्रारंभः। सामाद्युपायप्रयोगाः प्रागिस्य व्ययेन पूर्वजन्मोच्यते तत्र भावाः प्राक्तनाः सायंचिरमित्यादिना ट्युप्रत्ययः संस्काराः पूर्वकर्मवासना इव फलेन कार्येणानुमेया अनुमातुं योग्या आसन्। अत्रयाज्ञवल्क्यः। मंत्रमूलं यतो राज्यमनो मंत्रसुरक्षितं कुर्याद्यथा तन्न विदुः कर्मणामा फलोदयमिति॥२०॥

मू॰टी॰ ६ सं॰

संप्रतिसामाद्युपायान्वितेर्वात्मरक्षादिकंकृतवानित्याह जुगोपेति। अत्रस्तः अभीतःसन्नूत्रासोपाधिमं
तरेणैव त्रिवर्गसिद्धेःप्रथमंसाधनत्वादेवात्मानंशरीरंजुगोपरक्षितवान्। अनातुरः अरुग्णएवधर्मं
संकृतंभेजे। अर्जितवानित्यर्थः। अगृध्नुरगर्धनशीलएवार्थमाददेस्वीकृतवान्। त्रसिगृधिधृषिक्षिपःक्नु
रितिक्नुःप्रत्ययः असक्तः असक्तिरहितएवसुखमन्वभूत्॥२१॥ परस्परविरुद्धानामपिगुणानांतत्रसा
हचर्यमासीदित्याह। ज्ञानेति। ज्ञानेपरवृत्तांतज्ञानेसत्यपिमौनंवाग्नियमनंयथाहकामंदकः नान्योपभाषी

जुगोपात्मानमत्रस्तोभेजेधर्ममनातुरः॥ अगृध्नुराददेसोर्थानसक्तःसुखमन्वभूत्॥२१॥
ज्ञानेमौनंक्षमाशक्तौत्यागेश्लाघाविपर्ययः॥ गुणागुणानुबंधित्वात्तस्यसप्रसवाइव॥२२॥

वचनंमौनव्रतचरिष्णुतेति। शक्तौप्रतीकारसामर्थ्येपिक्षमाअपकारसहनं। अत्रबाणाच्यः शक्ता
नांभूषणंक्षमेति त्यागेवित्तरणेसतिश्लाघायाविकत्थनस्यविपर्ययोभावः अत्राहमनुः नदत्त्वा
परिकीर्त्तयेदितिइत्थंतस्यगुणाःज्ञानादयःगुणैर्विरुद्धैर्मौनादिभिरनुबंधित्वात्सहचरित्वात्सह ६
प्रसवोजन्मयेषांतेसप्रसवाः सोदराइवअभूवन्विरुद्धाअपिगुणास्तस्मिन्नविरोधेनैवस्थिताइत्य
र्थः॥२२॥

13/1947

द्विविधंवृद्धत्वंज्ञानतोवयसाच। तत्रतस्यज्ञानेनवृद्धत्वमाह। अनाकृष्टस्येतिविषयैःशब्दादिभिःअना
कृष्टस्यातश्चीकृतस्यविद्यानांवेदचेदानांपारेदृश्वनःपरमंतंदृष्टवतःदृशेःक्वनिप्भूतेर्धर्मरतिर्यस्यतस्यराज्ञः
रजसाजरयाविनाविस्तृताजरेस्त्यमरःषिद्भिदादिभ्योङ्प्रत्ययः जरायाजरसन्यतरस्यामितिजरसादेशः
वृद्धत्वंवार्द्धकमासीत्तूतस्ययूनोपिविषयवैराग्यादिज्ञानगुणसंपन्यात्ज्ञानतोवृद्धत्वमासीदित्यर्थः
न्यायस्तुचतुर्विधवृद्धत्वमितिकृत्वाअनाकृष्टस्येत्यादिविशेषणत्रयेणवैराग्यज्ञानशीलवृद्धत्वा

अनाकृष्टस्याविषयैर्विद्यानांपारदृश्वनः॥ तस्यधर्मरतेराशीद्वृद्धत्वंजरसाविना॥२३॥
प्रजानांविनयाधानाद्रक्षणाद्भरणादपि॥ सपितापितरस्तासांकेवलंजन्महेतवः॥२४॥

दीन्युक्तानीत्यवोचत्॥२३॥ प्रजानामिति। प्रजायंतइतिप्रजाःजनाःउपसर्गेचसंज्ञायामितिड
प्रत्ययः तासांविनयस्यशिक्षायाआधानात्करणात्तन्मार्गवर्त्तमानादितियावत्। भरणादन्नपाना
दिभिःपोषणात्। अपिसमुच्चयेसराजापिताभूत्तासांपितरस्तुजन्महेतवोजन्ममात्रकर्त्तारःकेव
लमुत्पादकाएवाभूवन्जननमात्राएवपितॄणांव्यापारःसदाशिरक्षणादिकंसएवकरोतीतितस्मिन्पि
तृत्वोपदेशःआहुश्चसपितायस्तुपोषकइति॥२४॥

र· म· टी·
७

स्थित्याइति। दंडमर्हतीति दंड्यादिभ्योयइतियप्रत्ययः अदंड्यान्दंडयन्राजादंड्यांश्चैवाप्यदंडयन्। अयशोमहदाप्नोतिनरकंचैवगच्छतीतिशास्त्रवचनं तान्दंड्यानेवस्थित्यैलोकमर्यादायैदंडयतःशिक्ष यतएवप्रसूतयएवपरिपरिणेतुः दारान्परिगृह्णतः मनीषिणोविदुषस्तस्यार्थकामावपिधर्मार्थयै वास्तांजातौ अस्तेर्लिङ्‌ अथकामसाधनयोर्दंडविवाहयोर्लोकस्थापनप्रजोत्पादनरूपधर्मार्थत्वे नानुष्ठानादर्थकामावपिनाधर्मशेषतामापादयन्सराजाधर्मोधर्मोत्तरोभूदित्यर्थः आहगौतमः यथा शक्तिधर्मार्थकामेभ्यस्तेषुधर्मोत्तरःस्यादिति।।२५।।दुदोहेतिसराजायज्ञाययज्ञंकर्तुंभुवंदुदोह

स्थित्यैदंडयतोदंड्यान्परिणेतुःप्रसूतये।। अप्यर्थकामौतस्यास्तांधर्मएवमनीषिणः।।२५।।
दुदोहगांसयज्ञायसस्यायमघवादिवं।। संपद्विनिमयेनोभौदधतुर्भुवनद्वयं।।२६।।

करग्रहेणैवरिक्तांचकारेत्यर्थःमघवादेवेंद्रः सस्यायसस्यंवर्द्धयितुंदिवंस्वर्गंदुदोह द्युलोकान्महीलोके वृष्टिमुत्पादयामासेत्यर्थः क्रियार्थोपपदस्येत्यादिनाचतुर्थी एवंउभौसंपदोपदोविनिमयेनपरस्परभा दानप्रतिपादानाभ्यांभुवनद्वयंदधतुःपुपुषतुः राजायज्ञैरिंद्रलोकमिंद्रश्चोदकेनभूलोकंपुपोषेत्यर्थः उक्तंचदंडनीतौराजात्वर्थान्समाहृत्यकुर्यादिंद्रमहोत्सवं।। प्रीणितोमघवाहृस्तुमहतींवृष्टिमा वहेदिति।।२६।।

नकिलेति। राजानोन्येनृपाःरक्षितुर्भयेभ्यस्त्रातुस्तस्यराज्ञोयशोनानुययुः। किलनानुचक्रुः खलु कुतः यद्यस्मात्कारणात्तस्करताचौर्यपरस्वेभ्यः स्वविषयभूतेभ्योव्यावृत्तासतिश्रुतौवाचकेशब्दे स्थितापवृत्ताअपहार्यतराभावात्तस्करशब्दएवापहृतइत्यर्थः अथवात्यंतासत्यप्यर्थेज्ञानशब्दःक रोतीतिन्यायेनशब्देस्थितास्फुरितारूपतोस्तीत्यर्थः।।२७।।द्वेष्यइति। शिष्टोजनोद्वेष्यःशत्रुरप्यार्तस्यरो गिणःऔषधंयथाऔषधमिवतस्यसंमतोनुमतःआसीत्दुष्टजनःप्रियोपिप्रेमास्पदीभूतोपिसंउरगक्षि

नकिलानुययुस्तस्यराजानोरक्षितुर्यशः।।व्यावृत्तायत्परस्वेभ्यःश्रुतौतस्करतास्थिता।।२७।।
द्वेष्योपिसंमतःशिष्टःतस्यार्तस्ययथौषधं।।त्याज्योदुष्टःप्रियोप्यासीद्दृष्टांगुलिमिवाहिना।।२८।।
तंवेधाविदधेनूनंमहाभूतसमाधिना।।तथाहिसर्वेतस्यासन्परार्थैकफलागुणाः।।२९।।

तासर्पदष्टांगुलीमिवकिंबहुनाहृदुमपिदुष्टालनइतिन्यायात्त्याज्यआसीत्तस्यशिष्टएवबंधुर्दुष्टएवशत्रु रित्यर्थः।।२८।।तस्यपरोपकारत्वमाह। तमिति। वेधांगुलीवोरक्षतातइतपाठः स्रष्टाप्रजापतिर्वेधाइत्यमरः तं दिलीपंसमाधीयतइतिसमाधिः। कारणसामग्रीमाहभूतानांयःसमाधिस्तेनविदधेससर्ज। नूनंध्रुवं इत्युत्प्रेक्षा तथाहितस्यसर्वेगुणाः रूपरसादिमहाभूतगुणावदेवपरार्थपरप्रयोजनमेवैकमुख्यंफलंयेषांतथो क्ताःआसन् महाभूतगुणोपमानेनकारणगुणाः।कार्येसंमतीतिन्यायःसूचितः।।२९।।

स· १

७

15/1947

सइतिवेलाःसन्तुइकूलोपिवारिधेरितिविश्वः। ताएववप्रवलयाः।प्राकारवेष्टायस्याःसाहृयोर्वप्रमस्त्रियांप्राकारो
वणःसानुप्रचीनंप्रांततोवृत्तिरित्यमरः परितःखातापरिखादुर्गवेष्टनं खातंखेयंतुपरिखेत्यमरः अनेकापिहृस्वंतेद
त्यपिशब्दात्रवनेडप्रत्ययः अपरिःपरिखाःसंपद्यमानाःकृताःपरिखीकृताःसागरायस्यास्तां अभूततद्भावेच्विः
अविद्यमानमन्यस्यराज्ञःशासनंयस्यास्तां अनन्यशासनामुर्वीमेकपुरीमिवशशास अन्यायासेनशासितवानित्यर्थः
॥३०॥ तस्येतितस्यराज्ञःमगधवंशेजातामगधवंशजासतम्यांजनेर्डइतिडप्रत्ययः एतेनाभिजात्यमुक्तं दाक्षिण्यं
परछंदानुवर्तित्वइतिविश्वः तेनरूपप्रसिद्धंतेनाम्नाअध्वरस्ययज्ञस्यदक्षिणादक्षिणाख्यापत्नी वसुदक्षिणाइ

सवेलावप्रवलयांपरिखीकृतसागरां॥ अनन्यशासनामुर्वींशशासैकपुरीमिव॥३०॥
तस्यदाक्षिण्यरूढेननाम्नामगधवंशजा॥ पत्नीसुदक्षिणेत्यासीदध्वरस्येवदक्षिणा॥३१॥
कलत्रवंतमात्मानमवरोधेमहत्यपि॥ तयामेनेमनस्विन्यालक्ष्म्याचवसुधाधिपः॥३२॥

तिप्रसिद्धापत्नीआसीत् अत्रश्रुतिः यज्ञोगंधर्वस्तस्यदक्षिणाप्सरसइतिदक्षिणायादाक्षिण्यंनामश्रुत्वि
जोदक्षत्वंप्राप कलत्वंतेदक्षुंतदक्षिणांप्रतिगृह्यातिश्रुतेः॥३१॥ कलत्रवंतमिति वसुधाधिपोअवरोधेअंतःपुरवर्गे
महतिसत्यपिमनस्विन्याहृदचितयापतिचित्रानुवृत्यादिनिबंधक्षमेत्यर्थः तयासुदक्षिणयालक्ष्म्याच आत्मानंक
लत्रवंतंभार्यावंतंमनेकलत्रंश्रोणिभार्ययोरित्यमरः वसुधाधिपइत्यनेनवसुधायांचेतिगम्यते॥३२॥

८

17
1947

तस्यामिति। आत्मानुरूपायांतस्यांआत्मनोजन्मयस्यासौआत्मजन्मापुत्रस्तस्मिन्समुत्सुकः षड्गाआत्मनोजन्म
निपुत्ररूपेणास्तीतिसमुत्सुकः सन्आत्मावैपुत्रनामासीतिश्रुतेः विलंबितंफलंपुत्ररूपंयेषांतैर्मनोरथैःकदामेपुत्रो
मेभवेत्योदिशाभिःकालंनिनायनिर्गमयामास॥३३॥ संतानेति। संतानःसंततौगोत्रेस्यादपत्येसुरद्रुमइतिविश्वः। तेनादि
लीपेनसंतानार्थःप्रयोजनंयस्यतस्मैसंतानार्थविधयेअनुष्ठानायस्वभुजादवतारिताअपरोपिताजगतोगुर्वीधूर्भारः

तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः॥ विलंबितफलैःकालंसनिनायमनोरथैः॥३३॥
संतानार्थायविधयेस्वभुजादवतारिता॥ तेनधूर्जगतोगुर्वीसचिवेषुनिचिक्षिपे॥३४॥
गंगाभगीरथेनेवपूर्वेषांपावनक्षमां॥ इच्छतासंततिंतेनन्यस्तामंत्रिषुकोशलाः॥३५॥
अथाभ्यर्च्यविधातारंप्रयतौपुत्रकाम्यया॥ तौदंपतीवसिष्ठस्यगुरोर्जग्मतुराश्रमं॥३६॥

सचिवेषुनिचिक्षेपेनिहिता॥३४॥ अथधुरोवतारणानंतरंपुत्रकाम्यया आत्मनःपुत्रेच्छया काम्यश्चेतिपुत्रशब्दात्का
म्यच्प्रत्ययः। अप्रत्ययादितिपुत्रकाम्यधातोरकारप्रत्ययः। ततष्टाप्तथातौदंपतीराजदंतादिषुजायाशब्दस्यदमितिनि
पातनात्साधुःप्रयतौभूतौविधातारंब्रह्माणंअभ्यर्च्यसखलुपुत्रार्थिभिरुपास्यतइतिमात्रिकाःगुरोःकुलगुरोः
।वसिष्ठस्याश्रमंजग्मतुःपुत्रप्राप्त्युपायापेक्षयेतिशेषः॥३६॥

स्निग्धेति। स्निग्धो मधुरो गंभीरो निर्घोषो यस्य तं एकस्यंदनं रथं। प्रावृषि भवः प्रावृषेण्यः प्रावृषएण्य इति एण्य प्रत्ययः।
तं प्रावृषेण्यं पयोवाहं मेघं विद्युदैरावताविव आस्थितौ आरूढौ जग्मतुरिति पूर्वेण संबंधः इरा आपः सुरा भूर्वाक् सु
रा प्रकस्यादित्यमरः इरावान्समुद्रः तत्र भवो ऐरावतोऽभ्रमातंगः अभ्रमातंगत्वात् तत्स्वार्थभूत्वात् अभ्ररूपत्वादि
ति क्षीरस्वामी अतएव मेघारोहणं विद्युत्साहचर्यं घटने विद्युदैरावत ऐरावतमाद्वर्या देव ऐरावती संज्ञा एरावत स्त्री
एरावनीति क्षीरस्वामी तस्मात्स्कृतं विद्युदैरावताविवेति एकरथारोहणेन तथा कार्यमिद्धि बीजं दंपत्यो रत्यंतं सौमनस्यं
सूचयति॥ ३७॥ माभूदिति। पुनः कथंभूतौ दंपती आश्रमपीडा माभूत्स्त्विति हेतोः। माङिसुङित्याशीरर्थे लुङ्। नमाङ्

> स्निग्धगंभीरनिर्घोषमेकस्यंदनमास्थितौ॥ प्रावृषेण्यं पयोवाहं विद्युदैरावताविव॥ ३७॥
> माभूदाश्रमपीडेति परिमेयपुरस्सरौ॥ अनुभावविशेषात्तु सेनापरिवृताविव॥ ३८॥
> सेव्यमानौ सुखस्पर्शैः शालनिर्यासगंधिभिः॥ पुष्परेणूत्करैर्वातैराधूतवनराजिभिः॥ ३९॥

योगइत्यडागमनिषेधः परिमेयपुरस्सरौ परिमितपरिचरौ अनुभवविघातुतेजोविशेषात् सेनापरिवृताविवस्थि
तौ॥ ३८॥ सेव्यमानाविति। पुनः कथंभूतौ। सुखः शीतलत्वात्प्रियः स्पर्शो येषां तैः शालनिर्यासगंधिभिः सर्ज १
तरुनिस्यंदगंधवद्भिः शालः सर्जतरुः स्मृत इति राश्वतः उत्किरंति उत्क्षिपंति उत्किराः। इगुपधज्ञाप्रीकिरः कः प्रत्ययः। पु
ष्परेणूनां उत्किराः तैराधुनाः माद्यादीष्कंपिता वनराजयो यैस्तैर्वातैः सेव्यमानौ। अनेन शैत्यं सौरभ्यं मांद्यं च विवक्षितं॥ ३९

19/1447

मनइति रथनेमिस्वनोन्मुखैः मेघध्वनिशंकया उन्नमितमुखैरित्यर्थः॥ शिखंडिभिर्मयूरैः द्विधाभिन्नाः षड्जविकृतिभेदे
न आविष्कृतावस्थायां अच्युतभेदेन वा स्वरगो द्विविधः। तत्सदृश्यात्। केकापि द्विधाभिन्ना इत्युच्यते अतएव ह ख
ड्जसंवादिनीरिति। षट्स्थानेभ्यो जातः षड्जः तदुक्तं नासाकंठउरस्तालुजिह्वादंतांश्च संस्पृशन् षड्जः संजाते
यस्मात्तस्मात् षड्ज इति स्मृतः। स च तंत्रीकंठजन्मस्वरविशेषः। निषादर्षभगांधारषड्जमध्यमधैवताः पंचमश्चेत्य
मी सप्त तंत्रीकंठोत्थिताः स्वरा इत्यमरः। षड्जेन संवादिनीः सदृशीः तदुक्तं मातंगेन खड्जमयूरो वदतीमनोभिरामाः म

> मनोभिरामाः शृण्वंतौ रथनेमिस्वनोन्मुखैः॥ खड्जसंवादिनीः केकाद्विधाभिन्नाः शिखंडिभिः॥ ४०॥
> परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु॥ मृगद्वंद्वेषु पश्यंतौ स्यंदनाबद्धदृष्टिषु॥ ४१॥

नसः प्रियः केमुद्दिकायांति ध्वनंति केकाः मयूरवाण्यः केकावाणी मयूरस्येत्यमरः। ताः केकाः शृण्वंतावितिश्लोकार्थः
॥ ४०॥ परस्परेति विश्रंभाददूरं समीपं यथा भवति तथा उज्झितं वर्त्म यैस्तेषु स्यंदनाबद्धदृष्टिषु कौतुकवशात्
रथासक्तदृष्टिषु मृग्यश्च मृगाश्च पुमान्स्त्रियेत्येकशेषः एषां द्वंद्वेषु मिथुनेषु स्त्रीपुंसौ मिथुनं द्वंद्वमित्यमरः
परस्पराक्ष्णोः सादृश्यं पश्यंतौ द्वंद्वशब्दसामर्थ्यात् मृगीषु सुदक्षिणाक्षिसादृश्यं दिलीपाक्षिसादृश्यं मृगेषु च विवे
क्तव्यं॥ ४१॥

श्रेणीबंधात्पंक्तिबंधाद्धेतोः अस्तंभां आधारस्तंभरहितां तोरणं बहिर्द्वारं। तोरणोस्त्री बहिर्द्वारमित्यमरः। तत्रयास्
कविरुच्यते तां तोरणस्रजं वितन्वद्भिः कुर्वद्भिरित्यर्थः उत्प्रेक्षाव्यंजकेवशब्दप्रयोगाभावेपिगम्योत्प्रेक्षेयं क
लनिह्रादैः अव्यक्तमधुरध्वनिभिः सारसैः पक्षिविशेषैः करणैः क्वचिदुन्नमिताननौ सारसो मैथुनीकामीगोनर्दःपु
ष्कराह्वयइतियादवः॥ ४१॥ पवनस्येति। प्रार्थनासिद्धिं शंसितः। अनुकूलत्वादेवमनोरथसिद्धिसूचकस्यपवनस्यानु

श्रेणीबंधाद्वितन्वद्भिरस्तंभां तोरणस्रजं॥ सारसैः कलिनिह्रादैः क्वचिदुन्नमिताननौ॥ ४१॥
पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः॥ रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ॥ ४२॥
सरसीष्वरविंदानां वीचिविक्षोभशीतलं॥ आमोदमुपजिघ्रंतौ स्वनिश्वासानुकारिणं॥ ४३॥

कूलत्वात् गंतव्यदिगभिमुखत्वात् तुरगोत्कीर्णैरजोभिः अस्पृष्टान्यलकादेव्यावेष्टनमुष्णिषश्च राज्ञोय
योस्तौ तथा कोशिरसा वेष्टनशोभिनायुत इति वक्ष्यतिच॥ ४२॥ सरसीष्विति। सरसीषु वीचिविक्षोभशीत
लं श्वनिश्वासमनुकर्तुं शीलमस्येति स्वनिश्वासानुकारिणं॥ एतेनतयोरुत्कृष्टस्त्रीपुंसयोर्जातित्वमुक्तं अर
विंदानामामोदमुपजिघ्रंतौ घ्राणेनगृह्णंतौ। ४३। ३०

21
1947

ग्रामेष्विति। आत्मविसृष्टेषु स्वदत्तेषु यूपो नाम संस्कृतपशुबंधाय दारुविशेषः। यूपाएव चिह्नानि येषां तेषु। अमो
घाः सफलाः यज्वानां विधिनेष्टवतां यज्वानुविधिनेष्टवानित्यमरः। सुयजोङ्वनिबित्यत्ययः। आशिषः आशीर्वादाः
अर्घः पूजाविधिनर्थः इत्यं अर्घ्यं पादार्घाभ्यां चेति यत्प्रत्ययः। षड्जि स्वर्घ्यमार्घ्यार्धोपाद्यं पादायवरिणीत्यमरः।
अर्घव्ययमित्यमरः॥ ४४॥ हैयंगवीनमिति। ह्यस्तनं गोदोहोद्भवं घृतं हैयंगवीनं ह्यः पूर्वे द्युः तत्तु हैयंगवीनं स्यात्
ह्योगोदोहोद्भवं घृतमित्यमरः। हैयंगवीनं संज्ञायामिति निपातः। तत्सद्यो घृतमादाय उपस्थितान् घोषवृद्धान्

ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनां॥ अमोघाः प्रतिगृह्णंतावर्घ्यानुपदमाशिषः॥ ४४॥
हैयंगवीनमादाय घोषवृद्धानुपस्थितान्॥ नामधेयानि पृच्छंतौ वन्यानां मार्गशाखिनां॥ ४५॥
कुलकं॥ काम्यभिक्षा तयोरासीद्व्रजतोः शुद्धराशयोः॥ हिमनिर्मुक्तयोर्योगे चित्राचंद्रमसोरिव॥
॥ ४६॥

घोष आभीरपल्लीस्यादित्यमरः। वन्यानां मार्गशाखिनां नामधेयानि पृच्छंतौ दुह्याचीत्यादिना पृच्छतेर्द्विकर्मक
त्वं॥ ४५॥ व्रजतोर्गच्छतोः शुद्धवेषयोरुज्ज्वलनेपथ्ययोः सुदक्षिणादिलीपयोर्हिमनिर्मुक्तयोश्चित्राचंद्रमसो
रिवयोगे सति कापि अनिर्वाच्या अभिक्षाशोभा आसीत्। अभिख्या नामशोभयोरित्यमरः। आतश्चोपसर्ग
इत्यङ्प्रत्ययः। चित्रा नक्षत्रविशेषः। शिशिरापगमे चैत्र्यां पूर्णचंद्रमसोरिवेत्यर्थः॥ ४६॥

तत्रेति।प्रियदर्शस्त्वकर्मकंयस्यसौप्रियदर्शनः।दर्शनीयइत्यर्थः।भूमिपतिःपत्न्येतत्तदद्भुतंवदर्शयन् लंघि
तमपिवाध्वानंनबुबुधेनज्ञातवान्बुधःसौम्यःउपमाउपमानंयस्येतिविग्रहः।इदंविशेषणंदर्शयन्निभ्युपमा
योगितयेतस्यैयस्यज्ञातत्वसूचनार्थं॥४७॥ सइति।दुःप्रापयशाःदुःशापमन्युदुर्लभंयशोयस्यसतथोक्तः
श्रांतवाहनः दूरोपगमनात्श्रांतयोग्यः महिष्याः सखामहिषीसख राजाहःसखिभ्यष्टजितिटच् प्रत्ययः महा
यानेरेनिरपेक्षइतिभावः सराजासायशोसायंकालेसंयमिनीनियमवतस्तस्यमहर्षेर्वसिष्ठस्याश्रमंप्रापत्प्राप

तत्रभूमिपतिःपत्न्येदर्शयन्प्रियमात्मानः॥अपिलंघितमध्वानंबुबुधेनबुधोपमः॥४७॥
सादुःप्रापयशाःप्रापदाश्रमंश्रांतवाहनः॥सायंसंयमिनस्तस्यमहर्षेर्महिषीसखः॥४८॥
वनांतरादुपावृत्तैःसमित्कुशफलाहरैः॥पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः॥४९॥

पृषादित्यादिनाड्॥४८॥तमाश्रमंविशिनष्टि वनांतरादिति वनांतरादन्यस्माद्वनांतरादुपावृत्तैःप्रत्यागतैःसमिध
श्चकुशाश्चफलानिचआहर्तुंशीलमेषामितिसमित्कुशफलाहरास्तैःआङि ताच्छील्यइतिहरतेराङ्पूर्वादच्प्रत्ययः
अदृश्यैर्दर्शनायोग्यैरग्निभिर्वैतानिकैःप्रत्युद्यातास्तैस्तपस्विभिःपूर्यमाणंप्राप्यागच्छतामाहिताग्नीना
मग्नयःप्रत्युद्यांतीतिश्रुतेः तथाह वामपितरंप्रोषितवासंपुत्राः प्रत्याधावंते बहवाएतमग्नयः प्रत्याधावंशक
लं दारुणिवाहरन्तितियथैवतत्पुत्रेभ्यआहरन्तितादृगितिविज्ञायते॥४९॥

23
1943

आकीर्णमिति।नीवाराणांभागएवभागधेयः भागअंशः नामरूपभागेभ्योधेयइतिप्रत्ययोवक्तव्यःस्वाभिधेयप्रत्यय
तस्योचितैःअतएवउटजानांपर्णशालानांद्वाररोधिभिःद्वाररोधकैःमृगैः ऋषिपत्नीनांअपत्यैरिवाकीर्णव्याप्तं॥५०॥
सेकांतइति सेकांतेवृक्षमूलसेचनावसानेमुनिकन्याभिःसक्तीभिः आलवालेषुजलावाप्यधेषुयदंबुत्स्यायीनां
स्यादालवालमावालमावापइत्यमरः।विहगानांपक्षिणांविश्वासायविश्रंभाय समौविश्वासविश्रंभावित्यमरः त
त्क्षणेसकक्षणेउज्झितावृक्षाः यस्मिन्तंअल्पार्थेकःप्रत्ययः॥५१॥आतपेति आतपस्यात्ययेअपगमनेसति

आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः॥अपत्यैरिवनीवारभागधेयोचितैर्मृगैः॥५०॥
सेकांतेमुनिकन्याभिस्तत्क्षणोज्झितवृक्षकं॥विश्वासायविहंगानामालवालांबुपायिनां॥५१॥
आतपात्ययसंक्षिप्तनीवारासुनिषादिभिः॥मृगैर्वर्तितरोमंथमुटजांगणभूमिषु॥५२॥
अभ्युद्गताग्निपिशुनैरतिथीनाश्रमोन्मुखान्॥पुनानंपवनोद्धूतैर्धूमैराहुतिगंधिभिः॥५३॥

संक्षिप्ताराशीकृतानीवारास्तृणधान्यानियासुतासु नीवारास्तृणधान्यानीत्यमरः उटजानांपर्णशालानांअंग
णभूमिपर्णशालोटजोस्त्रियामित्यमरः।अंगणंचत्वराजिरमित्यमरः।निषादिभिरुपविष्टैर्मृगैर्वर्तितरोमंथोचर्वितच
र्वणंयस्मिन्आश्रमेतं॥५२॥अभ्युत्थितेति अभ्युत्थिताःहोमयोग्याइत्यर्थः समिधंप्रावाहुतीर्जुहोतीतिवचनात्
तेषाअग्नीनांपिशुनैःसूचकैःपवनोद्धूतैःआहुतिगंधोयेषामस्तीत्याहुतिगंधिनःतैःधूमैराश्रमोन्मुखानतिथिन
पुनानंपवित्रीकुर्वाणं॥५३॥

अथेति। अथाश्रमप्राप्त्यनंतरं राजा यंतारं सारथिं धुरं वहंतीति धुर्याः युग्याः धुरो यत् ढकाविति यत्प्रत्ययः। धुर्याधुर्यधौ रेयधुरीणाश्च धुरंधरा इत्यमरः। धुर्यान् अश्वान् विश्रमय विनीतश्रमान् कुर्वित्यादिना आज्ञाप्य तां पत्नीं रथात् अवरोपयत् अवतारितवान् स्वयं चावततार॥ ५४॥ तस्मा इति। सभायां साधवः साधं न्याः सभार्या यइति यत्प्रत्ययः उत्तमेंद्रियाः अत्यंतनियमितेंद्रियाः मुनयः सभार्याय गोप्त्रे रक्षकाय नयः शास्त्रमेव चक्षुस्तत्त्वावेदकं प्रमाणं यस्य तस्मै नयचक्षुषे अतएवार्हते प्रशस्ताय पूज्यायेत्यर्थः। अर्हः प्रशंसीयामिति शतृप्रत्ययः तस्मै राज्ञे अर्हणां पूजां चक्रुः पूजा

अथ यंतारमादिश्य धुर्यान्विश्रमयेति सः॥ तामवारोपयत्पत्नीं रथादवततार च॥ ५४॥
तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेंद्रियाः॥ अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे॥ ५५॥
विधेः सायंतनस्यांते स ददर्श तपोनिधिं॥ अन्वासितमरुंधत्या स्वाहयेव हविर्भुजं॥ ५६॥

नमस्यापचितिः सपर्यार्चार्हणाः समाः। वरिवस्या तु शुश्रूषा परिचर्याप्युपासनम्॥ इत्यमरः॥ ५५॥ विधेरिति सायंतनस्य सायंभवस्य सायंचिरमित्यादिना ट्युप्रत्ययः। विधेर्जपहोमाद्यनुष्ठानस्य अवसाने अरुंधत्या अन्वासितं पश्चादुपवेशनेनोपासितं कर्मणि क्तः उपसर्गवशात्सकर्मकत्वं अन्वास्यैतामित्यादिवदुपपद्यते तपोनिधिं वसिष्ठं स्वाहया स्वाहा देव्या अथ याज्ञेयी स्वाहा च हुतभुक्प्रियेत्यमरः अन्वासितं हविर्भुजमग्निमिव ददर्श। समित्पुष्पकुशाग्न्यंबुमृदन्नाक्षतपाणिकः जपं होमं च कुर्वाणो नाभिवाद्यो द्विजो भवेदिति अनुष्ठानस्य मध्ये अभिवादननिषेधाद्विधेरंते स ददर्शेत्युक्तं अन्वासितं चात्र पतिव्रताधर्मत्वेनोक्तं न तु कर्मांगत्वेन कर्मविधेरंत इति कर्मणः समाप्त्यभिधानात्॥ ५६॥ ३२

25
1947

तयोरिति। मागधी मगधराजपुत्री राज्ञी सुदक्षिणा राजा च तयोररुंधतीवसिष्ठयोः। पादान्जगृहतुः पादग्रहणमभिवादनं गुरुपत्नी गुरुश्च कर्त्तारौ सन्नवसन्नौ तौ सुदक्षिणादिलीपौ कर्मभूतौ प्रीत्या हर्षेण प्रतिनन्दतुः आशीर्वादादिभिः संभावयांचक्रतुरित्यर्थः॥ ५७॥ तमिति। मुनिरतीत्यर्थं साधु आतिथ्यं। अतिथिभ्य इति प्रत्ययः आतिथ्यस्य क्रियया शांतो रथक्षोभेण यः परिश्रमः सो स्य तं तथोक्तं राज्यमेवाश्रमस्तत्र मुनिं मुनितुल्यमित्यर्थः। तं दिलीपं राज्ये कुशलं पप्रच्छ प्रच्छ तस्माद्द्विकर्मकत्वमित्युक्तं यद्यपि राज्यशब्दः पुरोहिता

तयोर्जगृहतुः पादान्राजा राज्ञी च मागधी॥ तौ गुरुर्गुरु
पत्नी च प्रीत्या प्रतिननंदतुः॥ ५७॥ तमातिथ्यक्रियाशांत
रथक्षोभपरिश्रमं॥ पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः॥ ५८॥

दिष्वंगत्वात् राजकर्मवचनः। तथाप्येवं सप्तांगवचनः उपपन्नं न तु शिवं सप्तस्वंगेष्वित्युत्तराविरोधात्॥ तथाह मनुः स्वाम्यमात्यपुरं राष्ट्रं कोशदंडौ तथा सुहृत्॥ सप्तैतानि समस्तानि लोकेऽस्मिन्राज्यमुच्यते॥ इति तत्र ब्राह्मणं कुशलं पृच्छेत् क्षत्रबंधुमनामयं वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव चेति मनुवचने सत्यपि तस्य राज्ञो महानुभावाद्ब्राह्मणोचितः कुशलप्रश्न एव कृत इत्यनुसंधेयं अतएवोक्तं राज्याश्रममुनिरिति॥ ५८॥

अथेति अथप्रश्नानंतरंविजितारिपुरः विजितशत्रुनरः वदनोवक्तॄणांवरः यतश्चनिर्धारणमितिषष्ठी
अर्थपतिः राजाथर्वणोवेदस्यनिधेः तस्यमुनेः पुरोरग्रेअर्थ्यांअर्थादनपेताधर्मपथ्यर्थन्यायादनपेतइति
यत्प्रत्ययः वाचमाददेवक्तुमुपक्रांतवानित्यर्थः अथर्वनिधेरित्यनेनपुरोहितकृत्याभिज्ञत्वातूत्रकृतका
र्यनिर्वाहकत्वंमुनेरस्तीतिसूच्यते यथाहकामंदकः। त्रय्यांचदंडनीत्यांचकुशलस्यात्पुरोहितः। अ
थर्वविहितंकुर्यान्नित्यंशांतिपौष्टिकं॥ ५९॥ उपपन्नमिति हेगुरोसप्तस्वंगेषुस्वाम्यत्यादिषु स्वाम्यमात्य

अथाथर्वनिधेस्तस्यविजितारिपुरः पुरः॥ अर्थ्यामर्थपतिर्वाचमाददेवदतांवरः॥ ५९॥
उपपन्नंननुशिवंसप्तस्वंगेषुयस्यमे॥ दैवीनांमानुषीणांचप्रतिहर्तात्वमापदां॥ ६०॥

सुहृत्कोशराष्ट्रदुर्गबलानिच। सप्तांगानीत्यमरः शिवंकुशलं उपपन्नंननुयुक्तमेव ननुरवधारणेप्रश्नाव
धारणानुज्ञानुनयामंत्रणेनन्वित्यमरः अत्रमित्याह यस्यदैवीनांदेवेभ्यआगतानांदुर्भिक्षादीनांमानुषी
णांमनुष्येभ्यआगतानांचोरभयादीनांउभयत्रापिततआगतइत्यण् टिड्ढाणञित्यादिनाङीप् आप
दांव्यसनानांत्वंप्रतिहर्तावारयितासि अत्राहकामंदकः हुताशनोजलंव्याधिर्दुर्भिक्षंमरणंतथा इतिपंच
विधंदैवंमानुषंव्यसनंततः आयुक्तेभ्यश्चोरेभ्यः परेभ्योराजवल्लभात् पृथिवीपतिलोभाच्चनराणांपंचधाभ
यं॥ ६०॥

27
1945

तत्रमानुषप्रतिकारमाह। तवेति। मंत्रान्कृतवान्मंत्रकृत् सुकर्मपापमंत्रपुण्येषुकृञ इतिक्विप् दूरात्सरोक्षएवम्
शामितारिभिः मंत्रकृतोमंत्राणांद्रष्टुः प्रयोक्तुर्वातमंत्रैः कर्तृभिः दृष्टंप्रत्यक्षंयल्लक्ष्यंतन्मात्रंभिंदंतीतिदृष्टलक्ष्यभि
दोमेशराः प्रत्यादिश्यंतइवव्यर्थमेवसमर्थाः किमेभिः पिष्टपेषकैरितिनिराक्रियंतइवेत्युत्प्रेक्षामत्वादेशो निराकृ
तिरित्यमरः तन्मात्रसमर्थ्यादैवनः पौरुषंफलतीतिभावः॥ ६१॥ संप्रतिदैवीकापत्प्रतीकारमाह हविरितिहे
होतस्त्वयाविधिवदग्निषावर्जितंप्रसंहविरादिकंकर्तृअवग्रहोवर्षप्रतिबंधकोइत्यच्प्रत्ययः। तेनविशोषिणां
विशुष्यतांसस्यानांवृष्टिर्भवतिवृष्टिरूपेणसस्यानुजीवयतीतिभावः अत्रमनुः अग्नौप्रास्ताहुतिः सम्य

तवमंत्रकृतोमंत्रैर्दूरात्संशमितारिभिः॥ प्रत्यादिश्यंतइवमेदृष्टलक्ष्यभिदः शराः॥ ६१॥
हविरावर्जितंहोतस्त्वयाविधिवदग्निषु॥ वृष्टिर्भवतिसस्यानामवग्रहविशोषिणां॥ ६२॥
पुरुषायुषजीविन्योनिरातंकानिरीतयः॥ यन्मदीयाः प्रजास्तस्यहेतुस्त्वद्ब्रह्मवर्चसं॥ ६३॥

गादित्यमुपतिष्ठति॥ आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततः प्रजाइति॥ ६२॥ पुरुषेति। आयुर्जीवनकालः पुरु
षायुषंवर्षशतमित्यर्थः शतायुर्वैपुरुषइतिश्रुतिः॥ अचतुरादिसूत्रेणअच्प्रत्ययांतोनिपातः मदीयाः प्रजाः पुरुषायुषं
जीवंतिइतिपुरुषायुषजीविन्यः निरातंकाः निर्भयाः आतंकोभयमाशंकेतिहलायुधः निरीतयः अतिवृष्ट्यादि
रहिताइतियत् तस्यसर्वस्यत्वद्ब्रह्मवर्चसंव्रताध्ययनसंपत्तिरेवहेतुः व्रताध्ययनसंपत्तिरित्येनब्रह्मवर्चसमि
तिहलायुधः ब्रह्मणः वर्चोब्रह्मवर्चसंब्रह्महस्तिभ्यांवर्चसइत्यच्प्रत्ययः अतिवृष्टिरनावृष्टिर्मूषकाः
शलभाः शुकाः प्रत्यासन्नाश्चराजानः षडेताइतयस्मृताइतिकामंदकः॥ ६३॥

त्वयेति। ब्रह्मयोनिः कारणं यस्य तेन ब्रह्मपुत्रेण गुरुणा त्वयैवं उक्तप्रकारेण चिंत्यमानस्यानुध्यायमानस्य अत एव निरापदो व्यसनहीनस्य मे संपदः सानुबंधाः सानुस्यूतयः अविच्छिन्ना इति यावत् कथं न स्युः स्फुरेवेत्यर्थः॥६४॥ संप्रत्यागमने प्रयोजनमाह किंत्विति। तव एतस्यां वध्वां स्नुषायां वधूर्जाया स्नुषा चेत्यमरः अदृष्टा सदृशी अनुरूपा प्रजा येन तं सद्वीपा रत्नानि सूयत इति रत्नसूरपि तत्सूद्विषेत्यादिना क्विप् मेदिनी नावति न प्रीणाति अवतिधातोः रक्षणगतिप्रीत्याद्यर्थेषु उपदेशात् इव प्रीणते रत्नसूरपीत्य

त्वयैवं चिंत्यमानस्य गुरुणा ब्रह्मयोनिना॥ सानुबंधाः कथं न स्युः संपदो मे निरापदः॥६४॥
किं तु वध्वां तवैतस्यामदृष्टसदृशप्रजं॥ न मामवति सद्वीपा रत्नसूरपि मेदिनी॥६५॥
नूनं मत्तः परं वंश्याः पिंडविच्छेददर्शिनः॥ न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः॥६६॥

नेन सर्वरत्नेभ्यः पुत्ररत्नमेव श्लाघ्यमिति सूचितं॥६५॥ तदेव प्रतिपादयति नूनमिति मत्तः परं मदनंतरं पवंश्यास्तत्सिल पिंडविच्छेददर्शिनः पिंडदानविच्छेदमुत्प्रेक्षमाणाः वंशे भवा वंश्याः पितरः स्वधेत्यव्ययं पितृभ्यो न्नेववर्तते तस्याः संग्रहे तत्पराः आसक्ताः संतः श्राद्धे पितृकर्मणि पिंडदानं निवापः स्यात् श्राद्धं तत्कर्म शास्त्रत इत्यमरः प्रकामभुजः पर्याप्तिभोजिनो न भवंति कामं प्रकामं पर्याप्तमित्यमरः भिर्दुनास्थाप दूनं कियदपि संग्रहंतीति भावः॥६६॥

29/1947

तत्परमिति। मत् मत्तः परं अन्यं मदनंतरं अन्याराद्दिना पंचमी दुर्लभं मत्वा मया आवर्जितं दत्तं पयः पूर्वपितृभिः स्वनिश्वासैः दुःखजैः कवोष्णमीषदुष्णं यथा तथा उपभुज्यते कवोष्णमिति कुशब्दस्य कवादेशः कोष्णं कवोष्णं मंदोष्णं कदुष्णं त्रिषु तत्त्वदुतीत्यमरः॥६७॥ सोहमिति। इज्यायागः इजयो भावे क्यपिति क्यप् इज्यया विशुद्धात्मा विशुद्धचेतनः प्रजालोपेन संततस्यभावेन निमीलनः॥ सोहं लोक्यत इति लोकः न लोक्यत इत्यलोकः लोकश्चासावलोकश्चेति लोकालोकाचलश्चक्रवाल इव लोकालोकश्चक्रवाल इत्यमरः। प्रकत इति प्रकाशः देवऋणादि

मत्परं दुर्लभं मत्वा नूनमावर्जितं मया॥ पयः पूर्वैः स्वनिश्वासैः कवोष्णमुपभुज्यते॥६७॥
सोहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः॥ प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः॥६८॥
लोकांतसुखं पुण्यं तत्तपोदानसमुद्भवं॥ संततिः शुद्धवंश्या हि परत्रेह च शर्मणे॥६९॥

मोचनात्। न प्रकाशत इत्यप्रकाशः पितृणामृणमोचनात् पचाद्यच् अस्मीति शेषः लोकालोकोप्यंतः सूर्यसंपर्कात् बहिस्तमोव्याप्तत्वात् प्रकाशाप्रकाशश्चेति मंतव्यं॥६८॥ ननु तपोदानादिसंपन्नस्य किमपत्यैरित्यत्राह लोकांतरेति सद्भवत्यस्मादिति समुद्भवः कारणं तपोदानेन समुद्भवो यस्य तत्तपोदानसमुद्भवं पुण्यं सत् लोकांतरे पअलोके सुखं सुखकरं शुद्धवंशे भवाः शुद्धवंश्या संततिश्च परत्र इह लोके शर्मणे सुखाय शर्मशातसुखानि चेत्यमरः भवतीति शेषः॥६९॥

तयेति। विधातः स्रष्टः तया संतत्या हीनं अनुपत्यं मां स्नेहात् प्रेम्णा स्वयमेव सिक्तं जलकेन वर्द्धितं बंध्यं अफलं बंध्योफलो ऽवकेशीत्यमरः। अयमेव वृक्षकं वृक्षपोतमिव पश्यन्नु कथं न दूयसे परि। तप्यसे विधातरित्यनेन समर्थोप्युपेक्षस इति गम्यते॥७०॥ असह्यमिति। भगवन् मे मम अत्यंतं ऋणं पैतृकमृणं अनिर्वाणस्य मज्जनरहितस्य निर्वाणे निर्वृतौ मोक्षे विनाशे गजबंधने इति यावत्। दंतिनो गजस्य अरुः मर्म तुदतीति अरुंतुदं मर्मस्पृक् व्रणो ऽस्त्रिया मीर्मर्मरुः अरुंतुदस्तु मर्मस्पृगित्यमरः। विध्वरुषोस्तुद इति खश्प्रत्ययः अरुर्द्विषदित्यादिना मुमागमः। आलानं

तयाहीनं विधातर्मां कथं पश्यन्न दूयसे॥ सिक्तं स्वयमिव स्नेहाद्वंध्यमाश्रमवृक्षकं॥७१॥
असह्यपीडं भगवन्नृणमंत्यमवेहि मे॥ अरुंतुदमिवालानमनिर्वाणस्य दंतिनः॥७२॥
तस्मान्मुच्ये यथा तात संविधातुं तथार्हसि॥ इक्ष्वाकूणां दुरापे ऽर्थे त्वदधीना हि सिद्धयः॥७३॥

गजबंधनस्तंभे असह्यासोढुमशक्या पीडा दुःखं यस्मिन् तत् अवेहि दुःसहं दुःखजनकं विद्धीत्यर्थः निर्वाणोस्थानशयनानि त्रीणि गजकर्माणीति पालकाव्ये तदुक्तं ऋणं देवस्य यागेन ऋषीणां पाठकर्मणां। संतत्या पितृलोकानां शोधयित्वा परिव्रजेत्॥७२॥ तस्मादिति। हे तात तस्मात् पैतृकात् ऋणात् यथा मुच्येमुक्तो भवति कर्मणि लिट् तथा संविधातुं अर्हसि। हि यस्मात् कारणात् इक्ष्वाकूणामिति शेषषष्ठी। न लोकेत्यादिना तद्योगे षष्ठीनिषेधात्॥७३॥

31/1997

इतीति। इति राज्ञा विज्ञापितः ऋषिर्ध्यानेनास्तिमितलोचनो मीलिताक्षः सन् क्षणमात्रं सुप्तमीनो ह्रद इव तस्थौ। स इति। स मुनिः प्रणिधानेन चित्तैकाग्र्येण भावितात्मा शुद्धात्मा भर्तुर्नृपस्य संततिस्तंभकारणं संतानप्रबंधकारणं अपश्यत्। अथानंतरमेनं नृपं प्रति बोधयत्। स्वदृष्टं ज्ञापितवानित्यर्थः। ततामिति। गतिबुद्धीत्यादिना कर्मत्वं। पुरेति। पुरा पूर्वं शक्रं इंद्रमुपस्थाय संसेव्य उर्वीं प्रतियास्यतो गमिष्यतः तव पथि कल्पतरुच्छायायामाश्रिता सुरभिः कामधेनुरासीत्। तत्र स्थितेत्यर्थः॥७५॥ तत्र किमित्यत आह धर्मलोपभयाद्राज्ञीमृतुस्नाता

इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः॥ क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः॥७४॥
सोपश्यत्प्रणिधानेन संततेस्तंभकारणं॥ भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत्॥७५॥
पुरा शक्रमुपस्थाय तवोर्वीं प्रतियास्यतः॥ आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि॥७६॥
धर्मलोपभयाद्राज्ञीमृतुस्नातां च संस्मरन्॥ प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचरः॥७७॥

तां च स्मरन्। ऋतुः पुष्पं रज इति यावत्। ऋतुः स्त्रीकुसुमे चेत्यमरः। ऋतुनिमित्तेन स्नातां राज्ञीं सुदक्षिणां धर्मस्य ऋतुत्वाभिगमनलक्षणस्य लोपात् भ्रंशाद्भयं तस्मात् संस्मरन् ध्यायन्। मृदं गां दैवतं विप्रं घृतं मधु चतुःपथं प्रदक्षिणानि कुर्वीत विज्ञातांश्च वनस्पतीन् इति शास्त्रात्। प्रदक्षिणक्रियार्हायां प्रदक्षिणाकरणयोग्यायां तस्यां धेन्वां साधु प्रदक्षिणादि सत्क्रियां नाचरितवानसि व्यासक्तो हि विस्मरंतीति विभावः। ऋतुकालाभिरामेन मनुः ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदेति मनुवचनाकरणे दोषमाह पाराशरः ऋतुस्नातां तु यो भार्यां स्वस्थः सन्नोपगच्छति। बालगोघ्नःपराधेन विध्यते नात्र संशय इति॥७७॥

अवजानास्तीति। यस्मात् कारणात् मां अवजानासीतिर अतःकारणात् मत्प्रसूतिमनाराध्य असेवित्वा
तेतवप्रजानभविष्यतीति सासुरभिस्त्वांशशापशप् आक्रोशे॥७८॥ कथंतस्याभिर्नश्रुतमित्याह। सशा
पइतिहेराजन् सशापत्वयनश्रुतः सारथिनाचश्रुतः श्रवणेहेतुमाह क्रीडार्थमागताउद्दामानः उच्छृखला दिग्ग
जायस्मिन् तथोक्ते आकाशगंगायामंदाकिन्यः श्रोतसिप्रवाहेनदतिधावतिसति॥७९॥ अथप्रस्तुतेकिमा

अवजानासिमांयस्मादतस्तेनभविष्यति॥ मत्प्रसूतिमनाराध्यप्रजेतित्वांसशापसा॥७८॥
सशापोनत्वयाराजन्नचसारथिनाश्रुतः॥ नदत्याकाशगंगायाश्रोतस्युद्दामदिग्गजे॥७९॥
इप्सितंतदवज्ञानाद्विद्धिसार्गलमात्मनः॥ प्रतिबध्नातिश्रेयःपूज्यपूजाव्यतिक्रमः॥८०॥

यातमित्यत्राह इप्सितमिति तदवज्ञानात् आत्मनः स्वस्य आप्तुमिष्टं इप्सितंमनोरथं। आप्तोतेंसनंतात् क्तः
ईकारश्चसार्गलंप्रतिबंधंविद्धिजानीहि। पूज्यपूजायाव्यतिक्रमोअतिक्रमणंश्रेयः प्रतिबध्नाति।
॥८०॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥

33/1947.

तर्हिगत्वातामाराधयामिचाकथंचिदागमिष्यतीत्यानकर्तव्येत्याह। हविषइति। सासुरभीरिदानीं दीर्घसत्रंचि
रकालसाध्यायागविशेषोयस्यतस्यप्रचेतसोहविषेदध्यादिहविरर्थंभुजंगपिहितद्वारं भुजंगरुद्धद्वारंततोदुःप्र
वेशंपातालमधितिष्ठति। पातालेतिष्ठतीत्यर्थः अधिशीङ्स्थासांकर्मेतिकर्मत्वं॥८१॥ तर्हिकागतिरित्याह
सुतामितितस्याःसुरभेरियंनदीयानांसुतांसुरभेःप्रतिनिधिंकृत्वाशुचिःसहपत्न्यावर्ततइतिसपत्नीकःस

हविषेदीर्घसत्रस्यसाचेदानींप्रचेतसः॥ भुजंगपिहितद्वारंपातलंमधितिष्ठति॥८१॥
सुतांतदीयांसुरभेःकृत्वाप्रतिनिधिंशुचिः॥ आराधयसपत्नीकः सावांकामंविधास्यति॥ ॥८२॥
इतिवादिनएवास्यहोतुराहुतिसाधनं॥ अनंद्यानंदिनीनामधेनुराववृतेवनात्॥८३॥
सत्वंप्रतिनिधिंतस्यामदीयांवत्समातरं॥ आराधयसपत्नीकःप्रीताकामदुघाहिसा॥८४॥

नृइतश्चैकमत्ययःहियस्मात्कारणात्कासाप्रीतातुष्टासतीकामान्दोग्धीतिकामदुघाभवतिदुहःकप्घश्चे
तिकप्प्रत्ययः॥८२॥ इतीति। इतिवादिनोवदतएवहोतुर्वनशीलस्यअपूत्नितिन्तप्रत्ययःअस्यमुन्भेराहुती
नांसाधनंकारणंनंदयतीतिव्युत्पस्यानंदिनीनामअनिंद्याअगर्ह्यप्रशस्ताधेनुःवनादावचृतेप्रत्यागता अव्याक्षे
पोभविष्यंत्याःकार्यसिद्धेर्हिलक्षणमितिभावः॥८३॥

 संप्रतिधेनुंविशिनष्टि। ललाटेति। पल्लववत्स्निग्धाचासौपाटलाचसंध्यामेतद्विशेषणंयोज्यं ललाटेउद योयस्यसललाटोदयस्तं आभुग्नंईषद्वक्रंउदितश्चेतिनिष्टांतत्वंस्यनत्वंश्वेतरोमाण्येवअंकस्तंबिभ्रतीनवं
शशिनंबिभ्रतीसंध्येवस्थिता॥८५॥ कोष्णेनेति। किंचिदुष्णेनकवोष्णमितिचकारात्। कादेशः। अवभृथा
दपिअवभृतस्नानादपिमध्येनशुद्धेनवत्सस्यालोकनेनप्रदर्शनेनप्रवर्त्तिनाप्रवहताप्रस्रवेनक्षीराभि
स्यंदनभुवनमभिवर्षतीषिंचतीकुंडमिवऊधः आपीनंयस्याःसाकुंडोध्नीकधस्तत्क्लीबमापीनमित्यमरः

ललाटोदयमाभुग्नंपल्लवस्निग्धपाटला॥ बिभ्रतीश्वेतरोमांकंसंध्येवशशिनंनवं॥८५॥
भुवंकोष्णेनकुंडोध्नीमेध्येनावभृथादपि॥ प्रस्रवेनाभिवर्षंतिवत्सालोकप्रवर्तिना॥८६॥
रजःकणैःखुरोद्धूतैःस्पृशद्भिर्गात्रमंतिकात्॥ तीर्थाभिषेकजांशुद्धिमादधानामहीपतिः॥
॥८७॥

ऊधसोनङित्यनङादेशःबहुव्रीहेरूधसोङीपीतिङीप्॥८६॥ रजःकणैरितिखुरोद्धूतैरंतिकात्। गात्रंस्पृश
द्भिःइत्यंतिकेभावद्वितीयाचेतिचकारात्संबमीसृजसांकणैःमहीक्षियंतेइतिमहीक्षित्तस्यतीर्थाभिषेकेणाशु
द्धतिमादधानाकुर्वाणाएतेनैवायमन्यस्नानमुक्तमनुनाअग्नेयंभस्मनास्नानमवगाह्यंतुवारुणंआपोहिष्ठेति
चब्राह्मवायव्यंगोरजस्मितिं॥८७॥

35/1947

निमित्तज्ञः शकुनज्ञः तपोनिधिर्वसिष्ठः तांपुण्यंदर्शनंयस्याःसाधेनुंदृष्ट्वाआशंसितंमनोरथंनपुंसकेभा
वेक्तः तत्रावंध्यंसफलंआशंसितावंध्यंअवंध्यमानोरथमित्यर्थः॥याजयितुंयोग्यंयाज्यंपार्थिवंपुनरब्रवीत्
॥९०॥ अदूरेतिहेराजन् आत्मनःकार्यस्यासिद्धिं अदूरवर्त्तिनींशीघ्रभाविनींविगणयविद्धि यतःकारणात्क
ल्याणीमंगलमूर्तिःबाह्वादिभ्यश्चेतिङीप् इयंधेनुःनाम्निकीर्तितेकथितेसत्येवउपस्थिता॥८८॥ वन्यवृत्ति
रितिवनेभवंवन्यंकंदमूलफलादिकंवृत्तिराहारोयस्यतथाभूतःसन्इमांगांशश्वत्सदाआप्रसादादविच्छेदेने

तांपुण्यदर्शनांदृष्ट्वानिमित्तज्ञस्तपोनिधिः॥ याज्यमाशंसितावंध्याप्रार्थनंपुनरब्रवीत्॥९०॥
अदूरवर्त्तिनींसिद्धिंराजन्विगणयात्मनः॥ उपस्थितेयंकल्याणीनाम्निकीर्तितएवयत्॥८८॥
वन्यवृत्तिरिमांशश्वदात्मानुगमनेनगां॥ विद्यामभ्यसनेनेवप्रसादयितुमर्हसि॥८९॥
प्रस्थितायांप्रतिष्ठेथाःस्थितायांस्थामाचरेः॥ निषण्णायांनिषीदास्यांपीतांभसिपिबेरपः॥९०॥

र्थः॥आत्मनस्तवकर्तुरनुगमनेनअनु नुसरणेनअभ्यसनेनविद्यामिवप्रसादयितुंप्रसन्नंकर्तुमर्हसि॥८९
गवानुसरणप्रकारमाह। प्रस्थितेति। यांप्रतिष्ठेथाः प्रयाहिस्तमवस्थाविभ्यस्थआत्मनेपदंस्थितायांनि
वृत्तगतिकायांस्थितिमाचरेःस्थिति। कुरुतिष्ठेस्त्यर्थः निषण्णायांउपविष्टायांनिषीदउपविशविध्यर्थेलोट्
पीतंअंभोययातस्यांपीतांभसि। सत्यामपःपिबेःपिब॥९०॥

र॰ मू॰ टी॰
१८

वधूरिति। वधूर्जाया भक्तिर्भक्तिमती प्रयता सती गंधादिभिरर्चिता मेनां गां प्रातः आ तपोवनात् अन्वेतु अनुगच्छतु आङ्मर्यादायां पदद्वयं चैतत् सायमपि प्रत्युद्व्रजेत् प्रत्युद्गच्छेत् विध्यर्थे लट्॥ ९१॥ इतीति। इत्यनेन प्रकारेण आत्मा प्रसादात् प्रसादपर्यंतं आङ्मर्यादाभिविध्योरित्यस्य वैभाषिकत्वादसमासे त्वं अस्याधेन्वाः परिचर्यापरः शुश्रूषापरो भव। तव अविघ्नमस्तु विघ्नस्याभावस्तत् अव्ययं विभक्तीत्यादिना अर्थाभावेऽव्ययीभावः। पितेव पुत्रीणां स१

वधूर्भक्तिमती चैनामर्चितामा तपोवनात्॥ प्रयता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि॥ ९१॥
इत्या प्रसादादस्यास्त्वं परिचर्यापरो भव॥ अविघ्नमस्तु ते भूयाः पितेव धुरि पुत्रिणाम्॥ ९२॥
तथेति प्रतिजग्राह प्रीतिमान् सपरिग्रहः॥ आदेशं देशकालज्ञः शिष्यः शासितुरानतः॥ ९३॥

सत्पुत्रवतां प्रशंसायामिति णिनिप्रत्ययः। भूयः ग्रिस्छेयासि ते स्वाशीरर्थे लिङ्। एर्लिङीत्याकारस्येकारादेशः त्वसद्शो भव पुत्रोऽस्त्विति भावः॥ ९२॥ तथेति। देशकालज्ञः देशोऽग्निसंनिधिः कालोऽग्निहोत्रावसान समयः। वसिष्ठ देशकालौ सन्ध्यमार्षज्ञानमव्याहतं इति जानन्। अत एव प्रीतिमान् शिष्यो तेवासी राजा सपरिग्रहः सपत्नीकः पत्नीपरिजनादानमूलशापपरिग्रहा इत्यमरः आनतो विनयनम्रः सन् शासितुर्गुरोर्वसिष्ठस्य देशं आज्ञां तथेति प्रतिजग्राह स्वीचकार॥ ९३॥ १८

37/1947.

अथेति। अथ प्रदोषे रात्रौ दोषज्ञो रात्रौ विद्वान्। विद्वान् विपश्चिद्दोषज्ञ इत्यमरः। सूनृतवाक् सत्यप्रियवाक् प्रियं सत्यं च सूनृतमिति हलायुधः स्रष्टुः स्रष्टुः ब्रह्मपुत्रो मुनिः अनेन प्रकृतिकार्यनिर्वाहकत्वं सूचयति उज्झित श्रियं विशांपतिं मनुजेश्वरः द्वौ विशौ वैश्यमनुजावित्यमरः। संवेशाय स्वापाय विससर्ज। स्यान्निद्रा शयनं स्वापः संवेश इत्यमरः॥ ९३॥ सत्यामिति कल्पवित् व्रतप्रयोगाभिज्ञो मुनिः तपः सत्यामपि तपसे वराजयोग्याहार संपाद

अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिं॥ सूनुः सूनृतवाक् स्रष्टुर्विससर्जोर्जितश्रियं॥ ९३॥
सत्यामपि तपः सिद्धौ नियमापेक्षया मुनिः॥ कल्पवित् कल्पयामास वन्यामेवास्य संविधाम्॥ ९४॥

सामर्थ्ये सत्यपीत्यर्थः। नियमापेक्षया तदा प्रभृत्येव व्रतचर्यापेक्षया अस्य राज्ञो वन्यामेव संविधीयते नयेति संविधा कुशादिशयनसामग्रीं। आतश्चोपसर्ग इत्यकप्रत्ययः। अकर्तरि च कारके संज्ञायामिति कर्मणि घञ्। कल्पयामास संपादयामास॥ ९४॥ ॥ ९२॥ ९२॥ ९२॥ ९२ ९२

र॰ मू॰ टी॰ १९

निर्दिष्टामिति। सराजाकुलपतिनामुनिकुलेश्वरेणवसिष्ठेननिर्दिष्टांपर्णशालांअध्यास्याधिष्ठायतस्याधिष्ठानंकृत्वे
त्यर्थः॥ अधिशीङ्स्थासांकर्मणिइति।प्रयतोनियतपरिग्रहःपत्नीद्वितीयोस्यसतथोक्तः कुशाग्रशयनेसंवि
ष्टःसुप्तःसन्नतस्यवसिष्ठस्यशिष्याणामध्ययनेनयेनापररात्रौवेदपाठेनवेदितमवसानंयस्यास्तांनिशांनिनायनिर्ग स १

निर्दिष्टांकुलपतिनासपर्णशालामध्यास्यप्रयतपरिग्रहद्वितीयः॥ तच्छिष्याध्यय
निवेदितावसानांसंविष्टकुशशयनेनिशांनिनाय॥९५॥ इतिप्रथमसर्गः॥ ५ ॥

मयामासजपररात्रावध्ययनेमनु॰ निशांतेनपरितोब्रह्माधीत्यपुनःस्वपेदितिगौतमश्चमहर्षणीहन्तमेतत्
मोब्रह्मगस्त्रिदशापतिःप्रहर्षणीयं॥९५॥ ॥ ॥ ॥ ५ ॥ ५
इतिश्रीमल्लिनाथविरचितायांरघुवंशव्याख्यायांप्रथमसर्गः॥ १९

39
1947

र॰ वं॰ टि॰ ३ स॰ २

श्रीगणेशाय नमः ॥ श्रीलक्ष्मीनारायणाभ्यां नमः ॥ अथेति । अथ निशातिक्रमणानंतरं यशोधनः प्रजानामधिपः प्रजेश्वरः प्रभाते प्रातःकाले जायया सुदक्षिणया प्रतिग्राहिते प्रतिग्राहिते स्वीकारिते गंधमाल्ये यया सा जाया प्रतिग्राहिता ध्यात्वा जाया प्रतिग्राहितगंधमाल्यां तां तथोक्तां पीतं पानमस्या अस्तीति पीतः पीतवानित्यर्थः । अर्शआदिभ्योऽजित्यच् प्रत्ययः । पीता गावो भुक्ता ब्राह्मणा इति श्रीमहाभाष्ये दर्शनात् । पीतः प्रतिबद्धः वत्सो यस्याः तां तां तथोक्तां ॥ ऋषेः वसिष्ठस्य धेनुं वनाय वनं गंतुं मुमोच ॥ क्रियार्थोपपदस्येत्यादिना चतुर्थी ॥ जायापदसामर्थ्यात्सुदक्षिणायाः पुत्रजननयोग्यत्वं अनुसंधेयं ॥ तथाहि ॥ पतिर्जायां प्रविशति गर्भो भूत्वा स मातरं ॥ तस्यां पुनर्नवो भूत्वा दशमे मासि जायते ॥ तज्जाया जाया भवति यदस्यां जायते पुनरिति ॥

अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगंधमाल्यां ॥ वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच १

तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया ॥ मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् २

यशोधन इत्यनेन पुत्रवत्कीर्तिलोभात् राजानं गोरक्षणे प्रवृत्त इति गम्यते ॥ अस्मिन्सर्गे वृत्तमुपजातिः ॥ अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ता इति ॥ १ ॥ तस्या इति ॥ पांसवो दोषाः आसां संतीति पांसुलाः स्वैरिण्यः । स्वैरिणी पांसुला च ३
स्यादित्यमरः । सिध्मादिभ्यश्चेति लच् प्रत्ययः । अपांसुलानां पतिव्रतानां धुरि अग्रे कीर्तनीया परिगणनीया । मनुष्येश्वरधर्मपत्नी सुदक्षिणा । खुरन्यासैः पांसवो यस्य स तं खुरन्यासपवित्रपांसुं ॥ रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः इत्यमरः । अत्र श्रुतिः । अपांसुरेतामिति श्रुतेः । तस्याः धेनोः मार्गं स्मृतिर्मन्वादिवाक्यं श्रुतेर्वेदस्यार्थमभिधेयमिवान्वगच्छत् । अनुसृतवती च यथा स्मृतिः श्रुतिलक्षितमेवार्थमनुसरति । तथा सापि गोः खुरक्षुण्णमेव मार्गमनुससारेत्यर्थः ॥ धर्मपत्नीत्यत्र अश्वघासादिवत्तादर्थ्ये षष्ठीसमासः प्रकृतिविकारभावात् । पांसुलपथट्टनादपि । अ पांसुलानामिति विरोधालंकारो ध्वन्यते ॥ २ ॥ ॥ ॥ ॥

41/1947

निवर्त्येति । दयालुः कारुणिकः ॥ स्याद्दयालुः कारुणीक इत्यमरः । स्पृहिगृहीत्यादिना आलुच् प्रत्ययः । यशोभिः सुरभिः सुगंधिः यान्मनोज्ञेपि इति विश्वः । सः राजा दयितां निवर्त्य सौरभेयीं कामधेनुसुतां नंदिनी । धरंतीति धराः । पचाद्यच् पयसां धराः स्त्रीस्तनौ द्वौ पयोधरावित्यमरः । अपयोधराः पयोधराः संपद्यमानाः पयोधरीभूताः अभूततद्भावे च्विः । कुगतिप्रादय इति समासः । पयोधरीभूताश्चत्वारः समुद्राः यस्यास्तां । अनेकमन्यपदार्थ इत्यनेकपदग्रहणसामर्थ्यात्त्रिपदी बहुव्रीहिः । गोरूपस्य धरामुर्वीमिव जुगोप ररक्ष । भूरक्षणप्रयत्नेनैव ररक्षेति भावः ॥ ३ ॥ व्रतायेति । व्रताय धेनोरनुचरेण न तु जीवनायेति भावः । तेन दिलीपेन शेषो अव

निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ॥ पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीं ३

व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः ॥ न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ४

आस्वादवद्भिः कवलैस्तृणानां कंडूयनैर्दंशनिवारणैश्च ॥ अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत् ५

शिष्टोऽप्यनुयायिवर्गः । अनुचरवर्गो न्यषेधि निवर्तितः । शेषत्वं सुदक्षिणापेक्षया कथं तर्हि आत्मरक्षणमत आह । न चेति । तस्य दिलीपस्य शरीररक्षा च अन्यतः पुरुषान्तरतो न हि यस्मात्कारणात् मनोः प्रसूयत इति प्रसूतिः ॥ स्ववीर्यगुप्ता स्ववीर्येणैव रक्षिता न हि स्वनिर्वाहकस्य परापेक्षेति भावः ॥ ४ ॥ आस्वादवद्भिरिति । सम्राट् मंडलेश्वरः । येनेष्टं राजसूयेन मंडलेश्वरस्य च यः । शास्ति यस्याज्ञया राज्ञः स सम्राडथ राजकमित्यमरः । स राजा आस्वादवद्भिः स्वादयुक्तैः रसवद्भिरित्यर्थः । तृणानां कवलैः ग्रासैः कंडूयनैः खर्जनैः ॥ दंशानां वनमक्षिकाणां निवारणैश्च ॥ दंशस्तु वनमक्षिकेत्यर्थः ॥ अव्याहतैरप्रतिहतैः स्वैरगतैः स्वैरगमनैः स्वच्छंदगमनैश्च ॥ तस्याः धेन्वाः समाराधनतत्परोऽभूत् ॥ तदेव परं प्रधानं यस्येति तत्परः ॥ ५ ॥ ॥ ॥ ॥ ॥

स्थितइति॥ भूपतिस्तांगांस्थितांसतींस्थितःसन्॥ स्थितिरूर्ध्वावस्थानं॥ प्रयातांप्रस्थितां॥ उच्चलितःप्रस्थितःनि
षुषीं निषण्णामुपविष्टामित्यर्थः॥ भाषायांसदवसश्रुवइतिक्वसुप्रत्ययः॥ उगितश्चेतिङीप्॥ आसनबंधेउपवेशने
धीरः॥ स्थितःउपविष्टस्संनित्यर्थः॥ जलमाददानांपिबंतींजलाभिलाषीपिबन्नित्यर्थः॥ इत्थंछायेवान्वगच्छतुअनु
सृतवान्॥६॥ संन्यस्तइति॥ न्यस्तानिपरिहृतानिचिन्हानिछत्रचामरादीनियस्यास्तांतथा॥ भूतामपितेजोविशेषेणप्रभावा
तिशयेनानुमितांसर्वथाराजाएवायंभवेदित्यूहितांराज्यलक्ष्मींदधानः॥ सराजाअनाविष्कृतदानराजिःबहिरप्रकटितम

स्थितःस्थितानुच्चलितःप्रयातांनिषेदुषीमासनबंधधीरः॥ जलाभिलाषीजलमाददानांछायेवतांभूपति
रन्वगच्छत्॥६॥ संन्यस्तचिह्नामपिराज्यलक्ष्मीतेजोविशेषानुमितांदधानः॥ आसीदनाविष्कृतदानराजिरंतर्म
दावस्थइवद्विपेंद्रः॥७॥ लताप्रतानोद्ग्रथितैःसकेशैरधिज्यधन्वाविचचारदावं॥ रक्षापदेशान्मुनिहोमधे
नोर्वन्यान्विनेष्यन्निवदुष्टसत्वान्॥८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

दरेखः॥ अंतर्गतामदावस्थायस्यसतथाभूतोद्विपेंद्रइवआसीत्॥७॥ लतेति॥ लतानांवल्लीनांप्रतानैःकुटिलतंतुभिः
उद्ग्रथिताः॥ येकेशास्तैरुपलक्षितः॥ इत्थंभूतलक्षणेतृतीयाराज्याअधिरूढंअधिज्यंधनुर्यस्यसाअधिज्य
धन्वासन्॥ धन्वनश्चेत्यनङादेशः॥ मुनिहोमधेनोःरक्षापदेशात्रक्षाव्याजात्वन्यान्वनेभवान्दुष्टसत्वान्दुष्टजंतून्इ
त्येपुण्यवसायेपुसत्वमस्त्रीतुजंतुष्वित्यमरः॥ विनेष्यन्शिक्षयन्निवदावंवनंविचचार॥ वनेचवनवह्नौचदवोदाव
इहेष्यतइतियादवः॥ वनेसंचचारेत्यर्थः॥ देशकालाध्वगंतव्यः॥ कर्मसंताद्यकर्मणामितिदावस्यकर्मत्वं॥८॥ ॥

43
1943

विसृष्टेत्यादिभिःषड्भिश्लोकैःतस्यमहामहिनयाद्रुमादयोपिराजोपचारंचक्रुरित्याह॥ विसृष्टेति॥ विसृष्टाःपार्श्वानु
चराःपार्श्ववर्त्तिनोजनाःयेन॥ तस्यपाशभृतावरुणेनसमस्यतुल्यस्यानुभावोनेनसंचितः॥ तस्यराज्ञःपार्श्वयोःद्रु
माःउन्मदानांउत्कटमदानांवयसानांखगानां॥ खगबाल्यादिनोर्वयइत्यमरः॥ विरावैरालोकशब्दंवाचकंआलोकयेति
शब्दमित्यर्थः॥ उदीरयामासुरिवअवदन्नेत्युत्प्रेक्षा॥९॥ मरुदिति॥ मरुत्प्रयुक्ताःवायुनाप्रेरिताःबाललताःआरात्समी
पेभिवर्तमानं॥ आराद्दूरसमीपयोरित्यमरः॥ मरुतःवायोःसखामरुत्सखोग्निःसइवभातीतिमरुत्सखाभः आतश्चोप
सर्गेइतिप्रत्ययः॥ अर्च्यंपूज्यंतंप्रसूनैःपुष्पैःपौरकन्याःपौराश्चताःकन्याश्चऔचार्थैर्लाजैराचारलाजैरिवावाकि

विसृष्टपार्श्वानुचरस्यतस्यपार्श्वद्रुमाःपाशभृतासमस्य॥ उदीरयामासुरिवोन्मदानामालोकश
ब्दंवयसांविरावैः॥९॥ मरुत्प्रयुक्ताश्चमरुत्सखाभंतमर्च्यमारादभिवर्त्तमानं॥ अवाकिरन्बा
ललताःप्रसूनैराचारलाजैरिवपौरकन्याः॥१०॥ धनुर्भृतोप्यस्यदयार्द्रभावमाख्यातमंतःक
रणैर्विशंकैः॥ विलोकयंत्योवपुरापुरक्ष्णांप्रकामविस्तारफलंहरिण्यः॥११॥ ॥ ९ ॥

रन्॥ तस्योपरिनिक्षिप्यवंत्यइत्यमरः॥ मरुत्वाहिसखायमागतंमुपचरतीतिभावः॥ लाजाःपुंभूम्निचाक्षताइत्यमरः॥ प्र
सूनंकुसुमंसममित्यमरः॥१०॥ धनुर्भृतइति॥ धनुरस्यराज्ञःअनेनभयसंभावनादर्शिता॥ तथापिविशंकैःनिर्भीतैः
अंतःकरणैःचित्तवृत्तिभिः॥ दययाकृपारसेनआर्द्रोभावोअभिप्रायोयस्यतद्दयार्द्रभावंतदाख्यातंदयार्द्रभावमेत
दित्याख्यातमित्यर्थः॥ भावःसत्तास्वभावाभिप्रायचेष्टात्मजन्मास्वित्यमरः॥ तथाविधंवपुर्विलोकयंत्योहरिण्यःअ
क्ष्णांप्रकामविस्तार––स्यात्यंतविशालतायाःफलमापुः॥ विमलकलुषीभवच्चचेतःकथयत्युपहितैषिणंरिपुंवे
त्तिन्यायेनस्वांतःकरणवृत्तिप्रामाण्यादेवविश्रब्धंददृशुरित्यर्थः॥ ११॥ ॥

र-वं-२
२

सइति। मारुतपूर्णरंध्रैः अतएव कूजद्भिः स्वरवद्भिः कीचकैः। वेणुविशेषैः वेणकीचकाः तेस्युर्ये स्वनंत्यनिलोद्धता इत्यमरः॥ वंशः सुषिरवाद्यविशेषः वंशादिकं तु सुषिरमित्यमरः॥ विशिष्टवाचकानां सति विशेष्यपरत्वं॥ उच्चैरापादितं वंशस्य कृत्यं कार्यं यस्मिन्कर्मणि तथा कुंजे पुनि कुंजकुंजौ वा क्लीबे लतादिपिहितोदर इत्यमरः॥ वनदेवताभिः उद्गीयमानं उच्चैर्गीयमानं स्वं यशः सुश्राव श्रुतवान्॥ वाक्यतु रसरंध्रत्वेन स्वरजननयोग्यतापरं बंहितादीनां गजादि प्रयोगनियमो वा करिकलभादिवदुक्तदोषेणेति कश्चित् वेणुमात्रेपि ---------- कीचक इत्यन्यः॥१२॥ पृक्त इति। गिरिनिर्झराणां प्रवाहाणां प्रवाहो निर्झरो झर इत्यमरः॥ सुषारैः सीकरैः। तुषारैर्हिमसीकराविस्यमरः॥ पृक्तः संपृक्तः स२

> सकीचकैर्मारुतपूर्णरंध्रैः कूजद्भिरापादितवंशकृत्यं॥ सुश्राव कुंजेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः॥१२॥ पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकंपितपुष्पगंधी॥ तमातपक्लांतमनातपत्रमाचारपूतं पवनः सिषेवे॥१३॥ शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः॥ ऊनं न सत्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने॥१४॥ ॥

॥अनोकहा — वृक्षाणां आकंपितपुष्पाणि तेषां यो गंधः सो — स्तीति तथोक्तः॥ पुष्पगंधोर्ईषत्कंपितपुष्पगंधवान्पवनो वायुः॥ अनातपत्रं व्रतार्थं परिहृतछत्रं अतएव आतपक्लांतं आचारेण पूतं शुद्धं तं नृपं सिषेवे। आचारपूतत्वात्स राजा जगत्पावनस्य पवनस्यापि सेव्यः आसीत् इति भावः॥१३॥ शशामेति। गोप्तरि तस्मिन् — न्द्रिवनं गाहमाने प्रविशति सति॥ वृष्ट्या विनापि दवाग्निर्वनाग्निः॥ दवदावौ वनानल इति हैमः॥ शशाम। फलानां पुष्पाणां च वृद्धिः॥ विशिष्यत इति विशेषा भं तिशयिता आसीत्॥ कर्मार्थे घञ्प्रत्ययः॥ सत्वेषु जंतुषु सप्तमी॥ अधिकोऽप्रबलो व्याघ्रादिः ऊनं दुर्बलं हरिणादिकं न बबाधे न पीडितवान्॥१४॥ १

45
1947

संचारपूतानीति॥ पल्लवस्य रागो वर्णः। पल्लवरागः॥ रागोनुरक्तो मात्सर्ये क्लेशादौ लोहितादिषु इति शाश्वतः॥ सइव ताम्रा पल्लवरागताम्रा पतंगस्य सूर्यस्य प्रभा कांतिः॥ पतंगः पक्षिसूर्ययोरिति शाश्वतः॥ मुनेश्च धेनुः दिगंतराणि दिगवकाशान् अंतरमवकाशावधीत्यमरः॥ संचारेण पूतानि शुद्धानि कृत्वा दिवांते सायंकाले निलयाय जस्तमयाय धेनुपक्षे आलयाय गंतुं प्रचक्रमे॥१५॥ तामिति मध्यलोकपालः भूमिपालः॥ देवतापित्रतिथीनां क्रियाः यागश्राद्धदानानि तान्येव अर्थः प्रयोजनं यस्यां स्तां धेनुं अन्वक् अनुपदं ययौ॥ सतां मतेन सद्भिर्मान्येन॥ गतिबुद्धित्यादिना वर्तमाने क्तः॥ क्तस्य च वर्तमान इति षष्ठी॥ तेन राज्ञा उपपन्ना आयुक्ता सा धेनुः॥ सतां मतेन विधिना अनुष्ठानेन उपपन्ना साक्षात्प्रत्यक्षा गुरुदैव शास्त्रोक्तो

> संचारपूतानि दिगंतराणि कृत्वा दिनांते निलयाय गंतुं॥ प्रचक्रमे पल्लवरागताम्रा प्रभा पतंगस्य मुनेश्च धेनुः॥१५॥ तां देवतापित्रतिथिक्रियार्थामन्वग्ययौ मध्यमलोकपालः॥ बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना॥१६॥ सपल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि॥ ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन्॥१७॥

पुअर्थेषु आस्तिक्यबुध्या विश्वासः॥ श्रद्धेति वेदांतवचनात् आस्तिक्यबुद्धिरिव बभौ॥१६॥ सपल्वलेति॥ स राजा पल्वलेभ्यः अल्पजलाशयेभ्यः उत्तीर्णानि निर्गतानि वराहाणां यूथानि कुलानि येषु तानि॥ बर्हाण्येषां संतीति बर्हिणः मयूराः॥ मयूरो बर्हिणो बर्हीत्यमरः॥ फलबर्हाभ्यामिनच्प्रत्ययः॥ आवासवृक्षाणां उन्मुखाः बर्हिणः येषु तानि श्यामायमानानि वराहबर्हिणादिमलिनानि श्यामानि न भवंति तानि श्यामायमानानि॥ लोहितादिडाज्भ्यः क्यषिति क्यष्प्रत्ययः क्यषीत्यात्मनेपदेशानच्॥ मृगैरध्यासिताः शाद्वलाः येषु तानि॥ शादाः शष्पाणि संति येषु शाद्वलाः शष्पश्यामदेशाः शाद्वलाः शाद हरित इत्यमरः॥ शादः कर्दमशष्पयोरिति विश्वः॥ नडशादाड्ड्वलच् इति ड्वलच्प्रत्ययः॥ वनानि पश्यन्सन् ययौ॥१७॥

र. वं. टि.
४

आपीनेति॥ गृष्टिस्सकृत्प्रसूता गौः। सकृत्प्रसूता गौर्गृष्टिरिति हलायुधः॥ नरेंद्रश्च यथाक्रमं॥ आपीनमूधः ऊधस्तु क्लीबमापीनमित्यमरः॥ आपीनभारोद्वहनेप्रयत्नात् वपुषो गुरुत्वात् आधिक्याच्च॥ अंचिताभ्यां चारुभ्यां गताभ्यां गमनाभ्यां तपोवनावृत्तेः पंथा नं तपोवनावृत्तिपथं॥ ऋक्पूरित्यादिना — रप्रत्ययः समासांतः अलंचक्रतुः भूषितवंतौ स २
॥१८॥ वसिष्ठेति। वसिष्ठधेनोरनुयायिनमनुचरं वनांदावर्तमानं प्रत्यागतं दिलीपं वनिता सुदक्षिणा निमेषेण अलसा मंदा पक्ष्मणां पंक्तिर्यस्याः सा निमेषालसतीत्यर्थः॥ लोचनाभ्यां कराभ्यां उपोषिताभ्यामिव उपवासो भोजननिवृत्तिस्तद्वद्भ्यामिव वसतेः कर्तरि क्तः पपौ॥ यथोपोषितौ तित्तृष्णया जलमधिकं पिबाति॥ तद्वदतितृष्णया अधिकं व्यलोकयदित्यर्थः॥

आपीनभारोद्वहनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषो नरेंद्रः॥ उभावलंचक्रतुरंचिताभ्यां तपोवनावृत्तिपथं गताभ्यां॥१८॥ वसिष्ठधेनोरनुयायिनं तमावर्त्तमानं वनिता वनांतात्। पपौ निमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिव लोचनाभ्यां॥१९॥ पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या॥ तदंतरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या॥२०॥ प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता॥ प्रणम्य चानर्च विशालमस्याः शृंगांतरं द्वारमिवार्थसिद्धेः॥२१॥ ८॥ १॥

॥१९॥ पुरस्कृतेति॥ वर्त्मनि मार्गे पार्थिवेन पृथिव्याः ईश्वरेण तस्येश्वरात्यण्प्रत्ययः॥ पुरस्कृता अग्रतः कृता धर्मस्य पत्नी धर्मपत्नी धर्मार्थपत्नीत्यर्थः॥ अश्वघासादिवत् तादर्थ्ये षष्ठीप्रत्युद्गता सा धेनुस्तदंतरे तयोः दंपत्योः मध्ये दिनक्षपयोः दिनरात्र्योः मध्यगता संध्येव विरराज॥२०॥ प्रदक्षिणीकृत्येति॥ अक्षतानां पात्रेण सह वर्तत इति साक्षतपात्रं हस्तो यस्याः सा सुदक्षिणा॥ पयस्विनीं प्रशस्तक्षीरां तां धेनुं प्रदक्षिणीकृत्य प्रणम्य च अस्याः धेन्वाः विशालं शृंगांतरं शृंगमध्यं अर्थसिद्धेः कार्यसिद्धेः द्वारमिव प्रवेशमार्गमिव॥ आनर्च्य अर्चयामास॥ अर्चतेर्भौवादिकाल्लिट्॥२१॥ ४

६२/१९५१

वत्सोत्सुकेति। सा धेनुः वत्सोत्सुका अपि वत्से उत्कंठिता अपि स्तिमिता निश्चला सती सपर्यां पूजां प्रत्यग्रहीत्॥ इति हेतोः तौ दंपती ननंदतुः॥ पूजास्वीकारस्यानंदहेतुत्वमाह। भक्त्येति। भक्त्येष्वनुरागो भक्तिः। तयोपपन्नेषु युक्तेषु विषयेषु तद्विधानां तस्याः धेनोः विधेव विधा प्रकारो येषां तेमहतामित्यर्थः॥ प्रसादचिह्नानि लिंगानि पूजास्वीकारादीनि पुरः फलानि पुरोगतानि प्रत्यासन्नफलानि येषां तानि अवलंबितफलसूचकलिंगदर्शनादानंदो युज्यत इत्यर्थः॥२२॥ गुरोरिति। भुजोच्छिन्नरिपुर्दिलीपः सदारस्य सह दारैः रुंधत्या सह वर्तमानस्य गुरोः उभयोरपीत्यर्थः। पादौ निपीड्य अभिवंद्य साध्यं संध्यायां विहितं विधिं अनुष्ठानं च समाप्य दोहावसाने निषण्णां आसीनां दोग्ध्रीमेव दोहनशीलामेव॥ तृन्निति तृन्प्रत्ययः। पुनर्भेजे सेवितवान्। दोग्ध्रीमिति निरूपपदप्रयो
वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननंदतुस्तौ॥ भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरःफलानि २२ गुरोः सदारस्य निपीड्य पादौ समाप्य सांध्यं च विधिं दिलीपः॥ दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णां २३ तामंतिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः॥ क्रमेण सुप्तामनु संविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत्॥२४ इत्थं व्रतं पालयतः प्रजार्थं समं महिष्या महनीयकीर्तेः॥ सप्तव्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य॥२५ अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः॥ गंगाप्रपातांतविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश॥ २६
गात्कामधेनुत्वं गम्यते २२ तामिति। गोप्ता रक्षकः। गृहिणीसहायः। पत्नी द्वितीयः। सन् उभावपीत्यर्थः। अंतिके न्यस्ताः बलिप्रदीपाः यस्यास्तां तथोक्तां पूर्वोक्तां निषण्णां धेनुं अन्वास्य अनुपविश्य क्रमेण सुप्तां अनु अनंतरं संविवेश सुष्वाप प्रातः सुप्तोत्थितां अनु उदतिष्ठत्॥ उत्थितवान्॥ अत्रानुशब्देन धेनुराजव्यापारयोः पौर्वापर्यमुच्यते॥ क्रमशब्देन धेनुव्यापाराणामित्यपौनरुक्त्यं कर्मप्रवचनीययुक्ते द्वितीया॥२४॥ इत्थमिति। इत्थं अनेन प्रकारेण। प्रजार्थं संतानाय महिष्या समं अभिषिक्तपत्न्या सह॥ कृताभिषेका महिषीत्यमरः॥ व्रतं पालयतः धारयतः महनीया पूज्या कीर्तिर्यस्य तस्य दीनानां उद्धरणे विमोचने उचितस्य नृपस्य त्रयो गुणा आवृत्तयो येषां तानि त्रिगुणानि त्रिरावृत्तानि सप्त दिनानि एकविंशति दिनानि व्यतीयुः॥२५॥ ॥

अन्येद्युरिति॥ अन्यस्मिन्दिवसेह्यविंशेदिवसे॥ सद्यःपरुत्परारिस्यादिनानिपातनाद्व्ययं॥ अत्रान्द्याद्याधपूर्वेद्युरीस्या
दोपूर्वोत्तरापरात्॥ नथाधारान्यान्यतरेतराधूर्वेद्युराद्ययइस्यमरः॥ मुनिहोमधेनुरात्मानुचरस्यनृपस्यभावंअभिप्रायंद्
ढभक्तित्वं॥ भावोभिप्रायआशयोइतियादवः॥ जिज्ञासमानाज्ञातुमिच्छति॥ ज्ञाश्रुस्मृदृशांसनइत्यात्मनेपदेशानचे
॥ प्रपतत्यस्मिन्निति प्रपातः प्रपतनप्रदेशः तस्यांते समीपे निरूढानि जातानि पुष्पाणि शष्पाणि बालतृणानि यस्मिन्तत्॥

इत्थंव्रतंपालयतःप्रजार्थंसमंमहिष्यामहनीयकीर्तेः॥ सप्तव्यतीयुःस्त्रिगुणानितस्यदिना
निदीनोद्धरणोचितस्य॥२५॥ अन्येद्युरात्मानुचरस्यभावंजिज्ञासमानामुनिहोमधेनुः॥ गंगाप्र
पातांतनिरूढशष्पंगौरीगुरोर्गह्वरमाविवेश॥२६॥ सादुःप्रधर्षामनसापिहिंस्रैरित्यद्रिशोभा
प्रहितेक्षणेन॥ अलक्षिताभ्युत्पतनोनृपेणप्रसह्यसिंहःकिलतांचकर्ष॥२७॥ तदीयमाक्रं
दितमार्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घं॥ रश्मिष्विवादायनगेंद्रसक्तांनिवर्तयामासनृपस्य

शष्पं बालतृणं घासइस्यमरः॥ गौरीगुरोः पार्वतीपितुः गह्वरं गुहां आविवेश प्रविवेश॥२६॥ सेति॥ साधेनुः हिंस्रैः
व्याघ्रादिभिः मनसापि दुःप्रधर्षा दुर्धर्षेति हेतोः अद्रिशोभायां प्रहितेक्षणेन दत्तदृष्टिना नृपेण अलक्षिताभ्युत्पतन
माभिमुख्येन उत्पतनं यस्य स सिंहः तां धेनुं प्रसह्य हठात्॥ प्रसह्य तु हठार्थकमित्यमरः॥ चकर्ष किलेत्यलीके॥
॥२७॥ तदीयमिति॥ गुहानिबद्धेन प्रतिशब्देन प्रतिध्वनिना दीर्घं तस्याः इदं तदीयं आक्रंदितं आर्तघोषणं आ तेषा ५
पन्नेषु साधोर्हितकारणो नृपस्य॥ नागेंद्रसक्तां दृष्टिं रश्मिषु प्रग्रहेषु किरणप्रग्रहौ रश्मीस्यमरः आदायेव निवर्त
यामास॥२८॥

49
1947

सपाटलेति॥ धनुर्धरः सनृपः पाटलायां श्वेतरक्तवर्णायां गवितस्थिवांसं संस्थितं॥ क्वसुश्चेति क्वसुप्रत्ययः॥ केसरि
णं सिंहं॥ सानुमतोद्रेः धातोर्गैरिकस्य विकारा धातुमयी तस्यामधित्यकायां ऊर्ध्वभूमौ॥ उपत्यकाद्रेरासन्नाभूमिरू
र्ध्वमधित्यकेत्यमरः॥ उपाधिभ्यां त्यकन्नासन्नारूढयोरित्यकप्रत्ययः॥ प्रफुल्लो विकसितः॥ फुल्लु विकसन इति धातोः॥
पचाद्यच्॥ लोध्राख्यं द्रुममिव ददर्श॥ प्रफुल्लमित्यकारपाठे ञिफला विशरण इति धातोः कर्तरि क्तः॥ उत्परस्यातइत्युर

सपाटलायांगवितस्थिवांसंधनुर्धरःकेसरिणंददर्श॥ अधित्यकायामिव
धातुमय्यांलोध्रद्रुमंसानुमतःप्रफुल्लं॥२९॥ ततोमृगेंद्रस्यमृगेंद्रगामी
वधायवध्यस्यशरंशरण्यः॥ जाताभिषंगोनृपतिर्निषंगादुद्धर्तुमैच्छ
त्प्रसभोद्धृतारिः॥३०॥ ॥ ॥ ॥ ॥ ॥

देशः॥२९॥ ततः सिंहदर्शनानंतरं मृगेंद्रगामी सिंहगामी शरणे रक्षणे॥ शरणं रक्षितोरित्यमरः शरणं रक्षेग्रह इ
तियादवः॥ शरणे साधुः शरण्यः तत्र साधुरिति प्रत्ययः॥ प्रसभेन बलात्कारेण उद्धृता अरयो येन स नृपतिः रा
ज्ञा जाताभिषंगो जातपराभवः सन्॥ अभिषंगः पराभव इस्यमरः॥ वध्यस्य वधार्हस्य॥ दंडादिभ्यो य
दिति यत्प्रत्ययः मृगेंद्रस्य वधाय निषंगात्तूणीरात्॥ तूणोपासंगतूणीर इस्यमरः॥ शरं उद्धर्तुं ऐच्छत्॥३०॥ ॥

वामेति॥ प्रहर्तुस्तस्य वामेतरः करः दक्षिणोतरः नखप्रभाभिरा भूषितानि विच्छुरितानि कंकस्य पक्षिविशेषस्य पत्राणि यस्य तस्मिन्॥ कंकः पक्षिविशेषस्यात्गुप्ताकारे युधिष्ठिरे इति विश्वः॥ कंकस्तु कंकट इति यादवः॥ सायकस्य पुंख एव कर्तव्याख्ये मूलप्रदेशे॥ कर्तरी पुंख इति यादवः॥ सक्तांगुलिः सन्॥ चित्रार्पितारंभः चित्रलिखितशरोद्धरणोद्योग इवाभवत् स्थितस्तिष्ठत॥ ३१॥ बाहुरिति॥ बाहोः प्रतिष्टंभेन प्रतिबंधेन विरुद्धमन्युः रुद्धरोषो राजा मंत्रौषधीभ्यां रुद्धवीर्यः प्रतिबद्धशक्तिः भोगी सर्प इव॥ भोगी राजभुजंगयोरिति विश्वः॥ अभ्यर्णे आसन्नं मागस्कृतमपराधकारिणं अस्पृशद्भिः स्वतेजोभिरदह्यत॥ अभिक्षेपाद्यसहनं तेजः प्राणात्ययेष्विति यादवः॥ ३२॥ ॥ ॥ ॥ ॥

वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकंकपत्रे। सक्तांगुलिः सायकपुंख एव चित्रार्पितारंभ इवाव तस्थे॥ ३१॥ बाहुप्रतिष्टंभविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः॥ राजा स्वतेजोभिरदह्यतांतर्भोगीव मंत्रौषधिरुद्धवीर्यः॥ ३२॥ तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुं॥ विस्मापयन्विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः॥ ३३॥ ॥ ॥ ॥ ॥

तमिति। निगृहीता पीडिता धेनुर्येन स सिंहः आर्याणां सतां गृह्यं वश्यं॥ पदास्वैरिबाह्यापक्षेषु चेति क्यप्रत्ययः॥ मनुवंशस्य केतुं चिह्नं केतुवद्व्यावर्तकं भूपालेषु सिंह इव उरु सत्त्वं महाबलं स्वे आत्मनो वृत्तौ बाहुस्तंभरूपे व्यापारे॥ अभूतपूर्वत्वाद्विस्मितं कर्तरि क्तः तं दिलीपं मनुष्यवाचा करणेन पुनर्विस्मापयन् विस्मयं आश्चर्यं प्रापयन् निजगाद॥ स्मिङ् ईषद्धसने इति धातोर्णिचि वृद्धौ अयादेशे शतृप्रत्यये च सति विस्मापयन्निति रूपं प्रसिद्धं॥ विस्मापयन्निति पाठे पुगागममात्रं वक्तव्यं॥ तच्चिंत्यं॥ स्मयतेरिति हेतुभयविवक्षामेवेति॥ भीस्म्योर्हेतुभय इति॥ आत्मनेविस्मापयत इति स्यात्॥ तस्मान्मनुष्यवाचा विस्मापयन्निति रूपं प्रसिद्धं॥ करणविवक्षायां न कश्चिद्दोषः॥ ३३॥ ॥ ॥

६

57
1947

अलमिति॥ हे महीपाल तव श्रमेणायासेनालं पर्याप्तं मांप्रत्यस्त्रग्रहणेन श्रमो न कार्यः॥ अत्र गमानसाधनक्रियापेक्षया श्रमस्य करणत्वात्तृतीया॥ उक्तं च॥ इत्यर्थः॥ साध्याभावात् श्रमो न कार्यः॥ न केवलं श्रमेणौ क्रियानिमित्तं करणभावस्यापि तद्दिगम्यमानां प्रति॥ अलं भूषणपर्याप्तिशक्तिवारणवाचकमित्यमरः॥ कमिति श्रमो न क्रियतामित्यत्राह॥ किमिति न पात इत्याहतः॥ अस्मिन्मयि सार्वविस्तृतस्य॥ प्रयुक्तं प्रक्षिप्तमप्यस्त्रं वृथा निष्फलं स्यात्॥ असंभूतवि लिङ्॥ बलीयसाम यानिर्जितमित्यत्राह॥ प्रेरितास्त्रेण बहवो निहता इत्यत्राह॥ तथाहि॥ पादपानामुन्मूलने उत्पाटने शक्तिः सामर्थ्यं यस्य तत्तथोक्तं॥ मारुतस्य वायोः रंहो वेगः शिलोच्चये अद्रौ न मूर्छति न प्रगल्भते न प्रसरति

अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात्॥ न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्छति मारुतस्य॥ ३४॥ कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठं॥ अवेहि मां किंकरमष्टमूर्तेः कुंभोदरं नाम निकुंभतुल्यं॥ ३५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तीत्यर्थः॥ मूर्छा मोहसमुच्छ्राययोर्वृद्धिः॥ अद्रेः उन्मूलनशक्तो वृद्धिं न लभत इति तात्पर्यार्थः॥ ३४॥ कुतस्तवेदृशं सामर्थ्यमित्यत्राह॥ कैलासेति॥ भो राजन् कैलासवत्गौरं शुभ्रं वृषं आरुरुक्षोः आरोढुमिच्छोः॥ चामीकराभं शुभ्रं च गौरमाहुर्मनीषिणः इति शाश्वतः॥ अष्टौ मूर्तयो यस्य तस्याष्टमूर्तेः शिवस्य पादार्पणं पादन्यासः स एव अनुग्रहः प्रसादस्तेन पूतं शुद्धं पृष्ठं यस्य सतं॥ इशो मे पृष्ठे चरणं न्यस्य मारोहतीति भावः॥ निकुंभो गणभेदः कुंभकर्णपुत्रः तत्समं कुंभोदरं नाम किंकरं भृत्यं मां अवेहि जानीहि॥ अवेहीत्यत्र पररूपं न वृद्धिः॥ अवनिश्च तथा वायुश्च यजमानजलाग्नयः॥ सूर्यश्चंद्रो नभश्चेता अष्टौ शंकरमूर्तयः॥ ३५॥ ॥ ॥ ॥ ॥ ॥ ॥

पृथिवी सलिले तेजो वायुराकाशमेव च॥ सूर्याचन्द्रमसौ सोमयाजी चेत्यष्टमूर्तयः॥ १॥ अत्र स्थितौ सिंहत्वे च का रणं आह॥ अमुमिति॥ भो नृप अमुं देवदारुं पुरोऽग्रे पश्यसीति काकुः॥ असौ देवदारुः वृषभो ध्वजे यस्य तेन शिवेन पुत्री कृतः पुत्रभावं नीतः पुत्रत्वेन स्वीकृतः अमुं तत्तु ज्ञातवेषि॥ कथमित्यत्राह॥ यो देवदारुः स्कंदस्य मातुः गौर्याः हेमः कुंभा एव स्तनौ ततो निर्गतानां पयसां पानीयानां रसं जानातीति रसज्ञः स्वादज्ञः स्कंदपक्षे हेमकुंभाविव स्तनौ इति विग्रहः पयसां क्षीराणां पयः क्षीरं पयोंबु जेत्यमरः पुत्रोपि क्षीररसज्ञः स्यात्॥ उदकदानादिना तथा वर्धित इत्यमरः॥ स्कंदमातृग्रहणेन कार्तिकेयसाम्यं॥ स्कंदसमप्रेमास्पदमिति भावः॥ अर्द्धर्चादिपाठादर्धर्चाः पुंसि चेति देवदारोः पुंस्त्व

अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोसौ वृषभध्वजेन॥ यो हेमकुंभस्तननिःसृतानां स्कंदस्य मातुः पयसां रस
ज्ञः॥ ३६॥ कंडूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य॥ अथैनमद्रेस्तनया शुशोच सेनान्यमालीढ
मिवासुरास्त्रैः॥ ३७॥

मपि॥ यथात्रैव शर्शसुर्देवदारव इति॥ ३६॥ कंडूयमाने॥ नेति॥ कटं कपोलं॥ कटः श्रोणौ क्रियाकारे कलिंगे जे तिशायेश वे॥ समये गजगंडे च विपिनस्यां च कटीमने टतिविश्वः॥ कंडूयमानेन घर्षिता कंडूयादिभ्यो यक्॥ ततः शानच्॥ वने साधुः वन्य स्तेन द्विपेन कदाचित् अस्य देवदारोः त्वग्वल्कलं उन्मथिता उन्मूलिता॥ अथ त्वगुन्मथनानंतरं॥ अद्रेस्तनया गौरी अ सुरास्त्रैर्दैत्यप्रहरणैरालीढं व्याप्तमित्यर्थः॥ सेनां नयतीति सेनानी स्कंदः॥ सत्सूद्विषेत्यादिना क्विप्॥ एरनेकाच इति यण्॥ पार्वतीनंदनः स्कंदः सेनानीरित्यमरः॥ तमिव एनं देवदारुं शुशोच॥ शुचेः सकर्मकत्वं तु प्रयोगात्॥ रुदेः रुदाररूदेवनदभ्यंतरंग इति॥ भट्टिप्रयोगवदा पूर्वत्वात्सकर्मकत्वमिति कश्चित्॥ ३७॥ ॥ ॥ ॥ ॥

53
1947

तदा तत्कालः प्रभृतिरादिर्यस्मिन्कर्मणि तत्तथा॥ तदाप्रभृत्येव ततआरभ्येव वनद्विपानां वनकरीणां त्रासार्थं भया र्थं शूलभृता शंभुना अंकं समीपमागताः प्राप्ताः सत्त्वाः प्राणिनो वृत्तिर्जीवितं यस्मिन्तत्॥ अंकसमीपउत्संगे चिन्हे ला नापराधयोरिति केशवः॥ सिंहत्वं व्याघ्रत्वं विधाय अस्मिन्नद्रिकुक्षौ गुहायां अहं व्यापारितो नियुक्तः॥ सिंहेन गजा भीष्यंत इति सिंहत्वं कृतमित्यर्थः॥ २८॥ तस्येति॥ परमेश्वरेण प्रदिष्टो निर्दिष्टः कालो भोजनवेला यस्याः सा तदा का लेयमेव स्यो कालः समयतृष्णयोरिति शाश्वतः॥ मृतिर्वा यस्याः सा उपस्थिता प्राप्ता एषा गोरूपा शोणितपारणा भोज नं सुरद्विषः राहोश्चंद्रमसः इयं चांद्रमसी इंदुसंबंधिनी सुधेव अमृतमिव क्षुधितस्य बुभुक्षितस्य मे मम तस्ये अलंपर्या

तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ॥ व्यापारितः शूलभृता विधाय सिंहत्वमंकागत
सत्ववृत्ति॥ ३८॥ तस्यालमेषक्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण॥ उपस्थिता शोणितपारणा मे
सुरद्विषश्चांद्रमसी सुधेव॥ ३९॥ स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान्दर्शितशिष्यभक्तिः॥ श
स्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति॥ ४०॥

प्ता॥ नमः स्वस्तीत्यादिना चतुर्थी॥ उपोषितस्य भोजनं पारणं उपवासध्वनिः॥ भोजनहेतुत्वाद्गौरेव पारणेति कृत्स्ने रिति क श्चित॥ ३९॥ स इति॥ स एवमुपायशून्यस्त्वं लज्जां विहाय त्वत्को निवर्तस्व॥ बुध्यागच्छ यतो भवान् गुरोः दर्शिता प्रकाशि ता शिष्यभक्तिः शिष्यकर्तव्या भक्तिर्येन स तथोक्तोऽस्ति॥ इत्यनेनापराधपरिहारः॥ ननु गुरोर्धेनुमुपेक्ष्य कीर्तिभाक् कथ यामीत्याशंक्याह॥ शस्त्रेणेति॥ यद्रक्ष्यं रक्षायोग्यं वस्तु शस्त्रेण युधेन॥ शस्त्रमायुधलोहयोरित्यमरः॥ अशक्या रक्षा यस्य तत् अशक्यरक्ष्यं रक्षितुमशक्यमित्यर्थः॥ तद्रक्ष्यं न स्यमपि शस्त्रभृतां अस्त्रधारिणां यशो न क्षिणोति न हिनास्ति अशक्यार्थे प्रतिविधानं न दोषायेति भावः॥ क्षिहिंसायामिति भौवादिकस्य प्रयोगः तानादिकस्य पाणिन्याचार्य मतेऽपि

[illegible] ४०

इतीति॥ पुरुषाणामधिराजो नृपः इति प्रगल्भं मृगाधिराजस्य सिंहस्य वचो निशम्य श्रुत्वा॥ गिरिरस्यास्तीति लोमादित्वा
च्छः॥ गिरिशेः यति उपभोगे न तनूकरोति शीतं तनूकरेणाद्यस्मात् स्याती रातो तुपसर्गे कः॥ गिरौ वलंदसीति लंदस्य पिभाषायाम
सुज्यंते॥ जाधुक्षुक्षणिवदितिक्षीरस्वामिनोक्तात्॥ गिरिशस्येश्वरस्य प्रभावेन माहात्म्येन प्रत्याहतास्त्रः कुंठितास्त्रः सन्॥
आत्मनि स्वस्मिन्विषये बज्ञापमानं समीपस्थमप्यरिं वारयितुमसमर्थ इत्येवं रूपां शिथिलीचकार तत्याजेत्यर्थः॥ अभ्र
तत्त्वावेश्चिः॥ श्रौ वेनिदीर्घः॥ न तु नात्येत्यर्थः॥ अवज्ञातो दमितिति निवेदनमापेत्यर्थः॥ समाने पुक्षत्रियाणामभिमानो
मसबेश्वरं प्रतीतिभावः॥ ४१॥ प्रतीति। स एव पूर्वः प्रथमः प्रतिबंधो यस्य यस्मिन्नपूर्वसंगे इषुप्रयोगे वितथप्रयत्नो विफ

इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य। प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां
शिथिलीचकार॥ ४१॥ प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वसंगे वितथप्रयत्नः॥ जडीकृतस्त्र्यंबकवी
क्षितेन वज्रं मुमुक्षन्निव वज्रपाणिः॥ ४२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

लप्रयासो तएव वज्रं कुलिशं मुमुक्षन् मोक्तुमिच्छन्॥ अवकं लोचनं नेत्र त्र्यक्षं नयनानां बकेक्षणाक्षणीतिहलायुधः॥ त्री
ण्यंबकानि यस्य सत्र्यंबको हरस्तस्य वीक्षितेन वीक्षणेन जडीकृतः निष्पंदीकृतः॥ वज्रपाणौ यस्य स इदृकू दृष्टि लो
वं स वज्रपाणिः इंद्रः॥ प्रहरणार्थेभ्यः परेनिष्ठासप्तम्यो भवतः इति वक्तव्यमिति प्राणेः सप्तम्यंतस्योत्तरनिपातः॥
स इव स्थितः नृपः एनं सिंहं प्रत्यब्रवीत्॥ चकारः प्रथम श्लोकाक्षेपः॥ शिथिलीचकारेत्यनेन समुच्चयः॥ प्रत्याहेतिपा
ठे प्रत्युवाचेत्यर्थे व्ययं॥ बाहुं सवज्रं शक्रस्य क्रुद्धस्यास्तंभयत्प्रभुरिति महाभारते॥ ४२॥ कस्येयं तरुणि प्रपापथकिनः किं पीयते ९
स्यां पयोधे नूनामथमादिषं बधिरे वारः कथमंगलः॥ सोमीवाथशनेश्वरो मृतमिदं तत्तेधरे दृश्यते श्रीमत्सांबविलाससुंदरसा
रवेयद्रोचते तोसिव॥

55/1947

संरुद्धेति। भोमृगेंद्र संरुद्धचेष्टस्य प्रतिबद्धव्यापारस्य मम तद्वचो महाक्यं कामं हास्यं परिहसनीयं यद्वचः सत्वं मदीयेने
त्यादिकं अहं विवक्षुः वक्तुमिच्छुरस्मि॥ तर्हि तूष्णीं स्थीयतामित्याशंक्य ईश्वरकिंकरत्वात्सर्वज्ञस्त्वं न हास्यामित्याह॥ अं
तरिति॥ हि यतः प्राणभृतां अंतर्गतं हृद्गतं मन्तृत्या बहिरप्रकाशितमेव सर्वं भावं वेद वेत्सि॥ विदोलटो वेति लटादेशः॥ अतो
भिधास्येवक्ष्यामि॥ तद्यद्वचोहं विवक्षुरित्यर्थः॥ वच इति प्रकृतं कर्म संबध्यते॥ अन्येत्वीदृग्वचनमाकर्ण्यासंभावितार्थमेतादित्यु
पसंहरति॥ अतस्त्वमौनमेव भूषणं त्वं तु वाङ्मनसोरेकविधएवार्थमिति जानासि॥ अतोभिधास्ये यद्वाक्यमहं विवक्षुरित्यर्थः ४३
मान्य इति। प्रत्यवहारः प्रलयः॥ स्थावराणां नगशैलादीनां जंगमानां मानुषादीनां सर्गस्थितिप्रत्यवहारेषु हेतुः स ईश्वरो मे मान्यः

संरुद्धचेष्टस्य मृगेंद्र कामं हास्यं वचस्तद्यदहं विवक्षुः॥ अंतर्गतं प्राणभृतां हि वेद सर्वं भवान्भावमतोभिधास्ये ४३
मान्यः स मे स्थावरजंगमानां सर्गस्थितिप्रत्यवहारहेतुः॥ गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयं ४४
स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद॥ दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः॥ ४५
अथांधकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन्। यः स भूतेश्वरपार्श्ववर्ती किंचिद्विहस्यार्थपतिं बभाषे ४६

पूज्यः॥ अलंघ्यशासन इत्यर्थः॥ शासनं च सिंहत्वं अंकागतसत्ववृत्तीत्येवंरूपं॥ तर्हि विसृज्य गम्यतामिति तेनेत्याह। गुरोरिति। पु
रस्तादग्रे नश्यदिदं॥ आहिताग्नेः गुरोः इदं धनमपि गोरूपं अनुपेक्षणीयं॥ आहिताग्नेरिति विशेषणेन अनुपेक्षाकारणं हविः
साधनत्वं सूचयति॥ ४४॥ स त्वमिति॥ सोंकागतसत्ववृत्तिः त्वं मदीयेन देहेन शरीरस्य वृत्तिं जीवनं निर्वर्तितुं संपादयितुं प्रसीद
॥ दिनावसानोत्सुको माता ममागमिष्यतीति उत्कंठितो बालवत्सो यस्याः सा महर्षेरियं धेनुर्विसृज्यतां विमुच्यतां॥ ४५॥
अथेति। अथ भूतेश्वरस्य पार्श्ववर्ती सिंहः स गिरेर्गह्वराणां गुहानां दरवातबिलेगुहेत्यमरः॥ अंधकारं ध्वांतं दंष्ट्रामयूखैः शक
लानि खंडानि कुर्वन् छिंदन्नित्यर्थः॥ किंचिद्विहस्यार्थपतिं नृपं भूयो बभाषे। हासे कारणं अल्पस्य हेतोर्बहु हातुं त्यक्तुमिच्छन् इत्यादि भक्ष्य
माणं द्रष्टव्यं॥ ४६॥

र॰मू॰टी॰ १

एकातपत्रमिति॥ एकातपत्रं एकछत्रं॥ जगतः प्रभुत्वं स्वामित्वं॥ नवंवयो यौवनं॥ इदं कांतरम्यं॥ वपुश्चेत्येवं बहु॥ अल्प स२
स्यस्वहेतोल्पेनकारणेन॥ अल्पफलायेत्यर्थः॥ षष्ठीहेतुप्रयोग इति षष्ठी॥ हातुंत्यक्तुमिच्छं स्त्वमेममविचारे कार्याकार्य
विमर्शेमूढोमंदः॥ प्रतिभासि॥४७॥ भूतेति॥ तवभूतेषु अनुकंपादयास्ति॥ कृपादयानुकंपास्यादित्यमरः॥ कृपेववर्त्तते
चेदित्यर्थः॥ तर्हित्वदंतेनतवविनाशेसति॥ इयमेकागौः स्वस्तिक्षेममस्यास्तीति स्वस्तिमतीभवेत्॥ जीवेदित्यर्थः॥ स्वस्त्या
शीः क्षेमपुण्यादावित्यमरः॥ हेप्रजानाथत्वंजीवन्सन् पुनः पितेव॥ प्रजाः उपप्लवेभ्यः विघ्नेभ्यः शश्वत्सदापुनः सदार्थयोः
शश्वदित्यमरः॥ पारिरक्षसि॥ स्वप्राणव्ययेनैकधेनुरक्षणाद्वरंजीवितमेव॥ जीवितः शश्वत्पुनः जगत्त्राणमित्यर्थः॥४८॥

एकातपत्रंजगतः प्रभुत्वंनवंवयः कांतमिदं वपुश्च॥ अल्पस्यहेतोर्बहुहातुमिच्छन्विचारमूढः प्रतिभा
सिमेत्वं॥४७॥ भूतानुकंपातवचेदियंगौरेकाभवेत्स्वस्तिमतीत्वदंते॥ जीवन्पुनः शश्वदुपप्लवेभ्यः
प्रजाः प्रजानाथपितेवपासि॥४८॥ अथैकधेनोरपराधचंडाद्गुरोः कृशानुप्रतिमाद्बिभेषि॥ शक्यो
स्यमन्युर्भवताविनेतुंगाः कोटिशः स्पर्शयताघटोध्नीः॥४९॥

नधर्मलोपाद्भियंप्रवृत्तिः किंतुगुरुभयादित्याह॥ अथेति॥ अथपक्षांतरेएकैवधेनुर्यस्यतस्मादयंकोपकारणोपन्यास
इतिविज्ञेयं॥ अतएवापराधेगवापेक्षालक्षणेसतिचंडादतिकोपनात्॥ चंडस्त्वत्यंतकोपनइत्यमरः॥ अतएवकृशानु
प्रतिमाउपमायस्यतस्मात्॥ अधिकल्पाद्गुरोर्बिभेषि॥ इतिकाकुः॥ भीत्रार्थानांभयहेतुरितिअपादानत्वात्पंचमी॥ अ १
अल्पवित्तस्यधनहानिरतिदुःसहेतिभावः॥ अस्यगुरोःमन्युःक्रोधः॥ मन्युर्दैन्येक्रतौक्रुधीत्यमरः॥ घटाइवऊधां
सियाताः घटोध्नीः॥ ऊधसोनङिःत्यनङादेशः॥ बहुव्रीहेरूधसोङीष्॥ कोटिशः गाः स्पर्शयिताप्रतिदयीता॥
विश्राणनंवितरणंस्पर्शनंप्रतिपादनमित्यमरः॥ भविताविनेतुमथनेतुंशक्यः॥४९॥ ॥ ॥ ॥

57/1997

तद्रक्षेति॥ तत्तस्मात्कारणात्कल्याणपरंपराणांभोक्तारं॥ कर्मणिषष्ठी॥ ऊर्जोबलमस्यास्तीतिऊर्जस्वलं ज्योतिष्मंत॥
ज्योत्स्नातमिस्रेत्यादिनाचवलच्प्रत्ययांतोनिपातः॥ आत्मदेहंरक्ष॥ ननुगामुपेक्ष्यात्मदेहरक्षणेस्वर्गहानिःस्या
तूनेत्याह॥ महीति॥ संस्थंसमृद्धंराज्यमहीतलस्पर्शनमात्रेणाभिन्नंभूतलसंबंधमात्रेणाभिन्नं ऐंद्रं संबंधिमात्रेणपदं
स्थानमाहुः॥ स्वर्गान्नभिन्नइत्यर्थः॥५०॥ एतावदिति॥ मृगेंद्रेएतावदुक्त्वाविरतेमूकीभूतेसतिगुहागतेनास्यासिं
हस्यप्रतिस्वनेनाशिलोच्चयोपिश्रैलोपि॥ अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाइत्यमरः॥ प्रीत्यातमेवार्थंउच्चैर
भाषतेवेत्युत्प्रेक्षा॥ भाषिरयंब्रुविसमानार्थत्वाद्द्विकर्मकः॥ ब्रुविस्तावद्विकर्मकेषुपठितः॥ तदुक्तं॥ दुहियाचिरुधिप्र

तद्रक्षकल्याणपरंपराणांभोक्तारमूर्जस्वलमात्मदेहं॥ महीतलस्पर्शनमात्रभिन्नमृद्धंहिराज्यंपदमैंद्रमा
हुः॥५०॥ एतावदुक्त्वाविरतेमृगेंद्रेप्रतिस्वनेनास्यगुहागतेन॥ शिलोच्चयोपिक्षितिपालमुच्चैः प्रीत्यातमेवार्थमभाष
तेव॥५१॥ निशम्यदेवानुचरस्यवाचंमनुष्यदेवः पुनरप्युवाच॥ धेन्वातदध्यासितकातराक्ष्यानिरीक्ष्यमाणः सु
तरांदयालुः॥५२॥

किन्वियामुपयोगानिमित्तमपूर्वविधौ॥ ब्रुविशासिगुणेनवयत्सचतेदेतेकीर्तितमाचरितंकविनेति॥५१॥ निशम्येति॥
देवानुचरस्येश्वरस्यकिंकरस्यसिंहस्यवाचंनिशम्यमनुष्यदेवोराजापुनरप्युवाच किंभूतः सन्॥ तेनासिंहेनयदध्यासितंत
दाक्रमणं॥ नपुंसकेभावेक्तः॥ तेनकातरेअक्षिणीयस्याःसाबहुव्रीहौसक्थ्यक्ष्णोः स्वांगात्षच्॥ षिद्गौरादिभ्यश्चेतिङीष्॥ किं
वाबक्ष्यतीतिभीत्येवशंकितयेत्यर्थः॥ धेन्वानिरीक्ष्यमाणः अतएवसुतरांदयालुः सन्॥ सुतरामित्यत्रद्विवचनविभज्योप
पदेतरबीयसुनावित्यादिनासुशब्दात्तरप्कि मेत्तिङव्ययेत्यादिनाआमुप्रत्ययः॥ तद्धितश्चासर्वविभक्तिरित्यव्ययसं
ज्ञा॥५२॥ किमुवाचेत्याह॥

र॰मू॰टी॰ क्षतादिति। अणु हिंसायामिति धातोः संपदादित्वात् क्विप्॥ गमादीनामिति वक्तव्यत्वादनुनासिकलोपे तुगागमो स२
१० बेति क्षतमिति रूपं सिद्धं॥ क्षतात् आ शात् त्रायत इति क्षत्रं॥ सुपीति योगविभागात्कप्रत्ययः॥ तामेवताव्युत्पत्तिं कविरर्थतो
मुक्तामति क्षतादित्यादिना॥ उदग्रः उन्नतः क्षत्रस्य क्षत्रवर्णस्य शब्दो वाचकः क्षत्रशब्द इत्यर्थः॥ एकेनैकातपत्रमित्या
दिना साम्यं॥ क्षतात् आ शात् त्रायत इति व्युत्पत्त्या भुवनेषु रूढः॥ किल प्रसिद्धः खलु॥ नाश्वकर्णादिवत्केवलं रूढः॥ किंतु
पंकजवद्योगरूढ इत्यर्थः॥ अतः किमित्यत आह॥ तस्य क्षत्रशब्दस्य विपरीतवृत्तेर्विरुद्धव्यापारस्य क्षतात्राणमकुर्वतः॥
पुंसो राज्येन किं॥ उपक्रोशमलीमसैर्निंदामलिनैः॥ उपक्रोशो जुगुप्सा च कुत्सा निंदा च गर्हणे इत्यमरः॥ ज्योत्स्नादित्वेत्या

क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः॥ राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा॥५३
कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनां॥ इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयास्यां॥५४॥

दिना मलिमसशब्दो निपातितः॥ तैः प्राणैर्वा किं॥ निंदीतस्य सर्वमप्यर्थमित्यर्थः॥ अनेनैकातपत्रमित्यादिना श्लोकद्वयेनोक्तं॥ तत्रो
त्तरमिति वेदितव्यं॥५३॥ अथैकधेनोरित्यत्रोत्तरमाह॥ कथमिति॥ अनुनयः क्रोधापनयः॥ चकारो वाकारार्थः॥ महर्षेरनुनयो
न्यासां पयस्विनीनां दोग्ध्रीणां विश्राणनाद्दानात्कथं नु शक्यः कथं क्रोधापनयं कर्तुं शक्यत इत्यर्थः॥ न शक्यत इत्यर्थः॥ अत्र हेतु
माह॥ इमां गां सुरभेः कामधेनोः पंचमीविभक्तेरिति पंचमी अनूनामन्यूनामेवेहि जानीहि॥ तर्हि कथमस्याः परिभवोऽभूदित्या ३०
ह॥ रुद्रौजसेति॥ अस्यां गवि त्वया कर्ता प्रहृतं तु प्रहारस्तु॥ नपुंसके भावे क्तः॥ रुद्रौजसा ईश्वरसामर्थ्येन न तु तवेत्यर्थः॥ स
प्तम्यधिकरणे चेति सप्तमी॥५४॥ तर्हि किं चिकी—र्षितमत आह॥

59/1947

सेयमिति। सेयं गौर्मया निष्क्रीयतेऽनयेति निष्क्रयः॥ तेन भवतः सकाशात्॥ पंचम्यास्तसिल्॥ मोचयितुं न्या
य्या न्यायादनपेता युक्तेत्यर्थः॥ धर्मपथ्यर्थन्यायादनपेत इति यत्प्रत्ययः॥ एवं सति तव पारणा भोजनं विहता न स्यात्॥ मुनेः
क्रियार्थः होमादिः सेवार्थः प्रयोजनं सम्यगलुप्तो भवेत्॥ स्वप्राणव्ययेनापि स्वामिगुरुधनं संरक्ष्यमिति भावः॥५५॥ अत्र भवानेवप्र
माणमित्याह॥ भवानिति॥ परवान्स्वामिमान् त्वमपि इदं वक्ष्यमाणमवैति वेत्ति॥ भवता अनुभूयत एवेत्यर्थः॥ शेषमथमप्र
श्नः कथमित्यत्राह॥ हि यस्माद्धेतोः॥ हि हेताववधारणे॥ इत्यमरः॥ न वरेव दारौ विषये महान्प्रयत्नः॥ महता यत्नेन रक्ष्यत इत्यर्थः॥
इदं शब्दोक्तमर्थं दर्शयति॥ स्थातुमिति॥ रक्ष्यवस्तु विनाश्य विनाशं गमयित्वा स्वयमक्षतेनाव्रणेन नियुक्तेने तिरोषः॥ नियोक्तुः स्वामि

सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः॥ न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः॥५५॥
भवानपीदं परवानवैति महान्हि यत्नस्तव देवदारौ॥ स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन॥५६॥
किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः॥ एकांतविध्वंसिषु मद्विधानां पिंडेष्वनास्था खलु भौतिकेषु॥५७
संबंधमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनांते॥ तद्भूतनाथानुग नार्हसि त्वं संबंधिनो मे प्रणयं विहंतुं॥५८॥

नोऽग्रे स्थातुं न शक्यं॥५६॥ सर्वथा चेतदपरिहार्यमित्याह॥ किमिति॥ किमपि किं वा अहं तव अहिंस्यः अवध्यो मतश्चेन्नाहं मनुष्यः शरीरे
यशएव शरीरं तस्मिन्दयालुर्भव॥ ननु मुख्यमुपेक्ष्यामुख्यशरीरे कोऽभिनिवेश अत आह॥ एकांतेति॥ मद्विधानां मादृशानां विवेकिनां ए
कांतविध्वंसिषु अवश्यं विनाशिषु भौतिकेषु पृथिव्यादिभूतविकारेषु पिंडेषु अनास्था अनपेक्षा आस्था आलंबनास्थानयत्नापेक्षा क
थ्यत इति विश्वः॥५७॥ सौहार्ददिहमनुसरणीयोऽस्मीत्याह॥ संबंधमिति॥ संबंधः सख्यं आ आभाषणमालापपूर्वकारणं यस्य
तं आहुः॥ स्यादाभाषणमालाप इत्यमरः॥ स वाक्संबंधो वनांते संगतयोः नौ आवयोः वृत्तो जातः न तु ततः॥ हे भूतनाथानुग शि
वानुचर एतेन तन्महत्त्वं सूचयति॥ अतएव संबंधिनो मित्रस्य मे प्रणयं याच्ञां प्रणयस्त्वमी॥ विश्रंभयाच्ञाप्रेमाण इत्यमरः॥ विहंतुं
नार्हसि॥५८॥ ॥ ॥ ॥

तथेति। तथेतिपथात्वंवदसितथाहंकरिष्यामिइतिगामुक्तवतेवाचंवदतेहरयेसिंहाय॥ कपोसिंहेसुवर्णेचवर्णेविष्णौहरिं
विदुरितिशाश्वतः। सद्यस्तत्क्षणेप्रतिषंभाच्चिर्बधादिमुक्तबाहुर्दिलीपःन्यस्तशस्त्रः सन्नूत्य क्तायुधः सन्नूस्वदेहमामिषस्यप
लस्य। पललंक्रव्यमामिषमित्यमरः॥ पिंडंकवलमिवउपानयत्॥ समर्पितवान्॥ एतेनानिर्मलत्वमुक्तं॥ ५९॥ तस्मिन्निति॥
तस्मिन्क्षणेउग्रंसिंहंनिपातितंपवनंउत्पश्यतःउत्प्रेक्ष्यमाणतर्कयतोवाऽधोमुखस्याधोमुखस्यप्रजानांपालयितुःराज्ञःउ
पर्युपरिष्टात्॥ उपर्युपरिष्टादितिनिपातः॥ विद्याधराणांदेवविशेषाणांहस्तान्मुक्ताउष्पवृष्टिःपपात॥ हस्तेमुक्तेत्यर्थः ६०॥

तथेतिगामुक्तवतेदिलीपः सद्यःप्रतिष्टंभविमुक्तबाहुः॥ सन्यस्तशस्त्रोहरयेस्वदेहंउपानयत्पिंड
मिवामिषस्य॥ ५९॥ तस्मिन्क्षणेपालयितुःप्रजानामुत्पश्यतःसिंहनिपातमुग्रं॥ अवाङ्मुखस्यो
परिपुष्पवृष्टिःपपातविद्याधरहस्तमुक्ता॥ ६०॥ उत्तिष्ठवत्सेत्यमृतायमानंवचोनिशम्योत्थितमुत्थि
तःसन्॥ ददर्शराजजननीमिवस्वांगामग्रतःप्रस्रविणींनसिंहं॥ ६१॥ तंविस्मितंधेनुरुवाचसाधोमायांम
योद्भाव्यपरीक्षितोसि॥ ऋषिप्रभावान्मयितांतकोपिप्रभुःप्रहर्तुंकिमुतान्यहिंस्राः॥ ६२॥ ॥

उत्तिष्ठेति॥ राजाअमृतमिवाचरतिअमृतायमानं॥ उपमानादाचारइतिक्यप्॥ ततःशानच्॥ उत्थितमुत्पन्नंहेवत्सउत्ति
ष्ठेतिवचोनिशम्यश्रुत्वाउत्थितःसन्नूअस्तेशानृप्रत्ययः॥ अथतोयेप्रस्रवःक्षीरःश्राबोस्यास्तीतिप्रस्रविणींतांगांस्वांज
ननीमिवददर्शसिंहंनददर्श॥ ६१॥ तमिति॥ विस्मितमाश्चर्यंगतंकर्तरिक्तः॥ तद्दिलीपंधेनुरुवाच॥ हेसाधोमयामायामुद्भा
व्यकल्पयित्वापरीक्षितोसि॥ ऋषिप्रभावादंतकोपियमोपिमयिप्रहर्तुंनप्रभुः॥ नसमर्थः॥ अन्येहिंस्राःघातुकाःशरारुर्घा
तुकोहिंस्रइत्यमरः॥ नमिकंपीत्यादिनारप्रत्ययः॥ किमुत। सुतुनप्रभवतइतियोज्यं। बलवत्सुष्ठुकिमुतस्वस्तीवच्चनिर्भरइत्यमरः
॥ ६२॥

61/1945

भक्त्येति। हेवत्सगुरौभक्त्यामय्यनुकंपयाचतेतुभ्यंप्रीतास्मिक्रियाग्रहणमपिकर्त्तव्यमितिचतुर्थी॥ वरंदेवेभ्यो वरणीयवर
णीयमर्थं॥ देवदत्तेवरश्रेष्ठेत्रिषुक्लीबेमनाकृप्रियेइत्यमरः॥ वृणीष्वस्वीकुरुष्व॥ तथाहि॥ मांकेवलानांपयसांप्रसूतिकार
णं॥ नावेहि॥ नविद्धि॥ किंतुप्रसन्नांमांकामदोग्धीतिकामदुघामवेहि॥ दुहःकपूघश्चेतिकप्रत्ययः॥ ६३॥ ततइति॥ ततस्त
दनंतरंमानितार्थीस्वहस्तार्जितोवीरइतिशब्दोयेनसः॥ एतेनास्पदात्वंदैन्यसहिष्णुत्वंचोक्तं॥ सराजाहस्तौसंधायांजलिंअं
जलिंबध्वेत्यर्थः॥ सुदक्षिणायांवंशस्यकर्त्तारंप्रवर्त्तयितारंअतएवरघुकुलमितिप्रसिद्धं॥ अनंताकीर्तिःस्थिरयशसंतनयंय
याचे॥ ६४॥ संतानकामायेति॥ सापयस्विनीगौः॥ संतानंकामयतइतिसंतानकामः॥ कर्मण्यण्॥ तस्मैराज्ञेतथेतिकाम्यतइ

भक्त्यागुरौमय्यनुकंपयाचप्रीतास्मितेपुत्रवरंवृणीष्व॥ नकेवलानांपयसांप्रसूतिमवेहिमांकाम
दुघांप्रसन्नां॥ ६३॥ ततःसमानीयसमानितार्थीहस्तौस्वहस्तार्जितवीरशब्दः॥ वंशस्यकर्त्तारमनं
तकीर्तिंसुदक्षिणायांतनयंयाचे॥ ६४॥ संतानकामायतथेतिकामंराज्ञेप्रतिश्रुत्यपयस्विनीसा॥
दुग्ध्वापयःपत्रपुटेमदीयंपुत्रोपभुंक्ष्वेतितमादिदेश॥ ६५॥ वत्सस्यहोमार्थविधेश्चशेषमृषेरनु
ज्ञामधिगम्यमातः॥ औधस्यमिच्छामितवोपभोक्तुंषष्ठांशमुर्व्याइवरक्षितायाः॥ ६६॥ ॥

कामोवरः॥ कामार्थेष्वित्र॥ तंप्रतिश्रुत्यप्रतिज्ञायहेपुत्रमदियंपयःपत्रपुटेपत्रनिर्मितपात्रेदुग्ध्वोपभुंक्ष्वपिबेतितमादि
देश॥ ६५॥ वत्सस्येति॥ हेमातः॥ वत्सस्यवत्सस्यानिपतस्यशेषंवत्सपीतावशिष्टमित्यर्थः॥ होमएवार्थस्तस्यविधेर
नुष्ठानंतस्यशेषंहोमावशिष्टमित्यर्थः॥ तवऊधसिभवंऔधस्यंक्षीरं॥ शरीरावयवाद्येतियत्प्रत्ययः॥ रक्षितायाःउर्व्याः
षष्ठांशंषष्ठभागमिवऋषेःअनुज्ञांअधिगम्यउपभोक्तुंपातुमिच्छामिअभिलषामि॥ ६६॥ ॥ ॥ ॥

इत्थमिति॥ क्षितीशेन विज्ञापिता वसिष्ठधेनुः प्रीततरा पूर्वं शुश्रूषया प्रीता संप्रत्यनया विज्ञापनया प्रीततरा अति संतुष्टा बभूव॥ तदन्विता तेन दिलीपेनान्विता हैमवता तुहिमवतः संबन्धिनः कुक्षेः गुहायाः सकाशात् अश्रमेण ना यासेन श्रमं प्रत्याययावागता॥ ६७॥ तस्या इति॥ प्रसन्नेन्दुरिव मुखं यस्य सः नृपः नृपाणां गुरुर्दिलीपः महर्षिचिह्नैः मु खरागादिभिः अनुमितमभ्यर्हितं तस्याः धेनोः प्रसादं अनुग्रहं प्रहर्षचिह्नैरेव ज्ञातं पुनरुक्तं ये वाचा गुरवे विज्ञाप्य पश्चात्प्रियायै सुदक्षिणायै शशंस कथयामास॥ कथितस्य कथनं पुनरुक्तिः॥ न चैवेह तदस्ति किंतु चिह्नैः कथित प्रायत्वा त्पुनरुक्तमिवास्थितमित्युत्प्रेक्षा॥ ६८॥ स इति॥ अनिंदितात्मा अगर्हितस्वभावः॥ सत्क वत्सलः प्रेमवान्॥ स वत्सलः॥ व

इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव॥ तदन्विता हैमवताच्च कुक्षेः प्रत्याययावा श्रममाश्रमेण॥ ६७॥ तस्याः प्रसन्नेंदुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य॥ महर्षिचिह्नानुमि तं प्रियायै शशंस वाचा पुनरुक्तयेव॥ ६८॥ स नंदिनीस्तन्यमनिंदितात्मा सद्वत्सलो वत्सनि पीतशेषं॥ पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः॥ ६९॥ प्रातर्यथोक्तव्र तपारणांते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य॥ तौ दंपती स्वां प्रतिराजधानीं संप्रेषयामास वशी वसिष्ठः॥ ७०॥

सां साभ्यां कामबल इति लच्प्रत्ययः॥ वसिष्ठेन कृताभ्यनुज्ञः कृतानुमतिः सन्॥ वत्सस्य हुतस्य चावशेषं पीतहुतावसिष्ट नंदिन्याः स्तन्यं क्षीरं शुभ्रं मूर्तं परिच्छिन्नं यश इवातितृष्णः सन्॥ पपौ॥ ६९॥ प्रातरिति॥ वशी वसिष्ठः॥ प्रातर्यथोक्तस्य व्रत स्य गोसेवारूपस्य पारणांते तस्याः अंते प्रास्थानिकं प्रस्थानकाले भवं तत्कालोचितमित्यर्थः॥ कालाठ्ठञिति ठञ्प्रत्ययः यथा कथंचिद्गुणवृत्त्यापि काले वर्तमानत्वादस्य य इष्यत इति वृत्तिकारः॥ स्वास्ति इयते प्राप्यते अनेनेति स्वस्त्ययनं शुभा वहमाशीर्वादं प्रयुज्य तौ दंपती सुदक्षिणादिलीपौ स्वां राजधानीं पुरीं प्रति प्रस्थापयामास॥ ७०॥ ॥श्रीरेव॥ ॥

65
1997

प्रदक्षिणीकृत्येति॥ नृपः हुतं अश्नातीति हुताशोऽग्निस्तं॥ कर्मण्यण्॥ भर्तुर्मुनेरनंतरं भर्तुः प्रदक्षिणानंतरमित्यर्थः॥ अरुंधतीं च धेनुं सवत्सां च प्रदक्षिणीकृत्य प्रगतो दक्षिणं प्रदक्षिणं॥ तिष्ठद्गुप्रभृतीनि चेत्यव्ययीभावः॥ तत्सन्निहितस्य यः॥ अप्रदक्षिणं प्रदक्षिणं संपद्यमानं कृत्वा प्रदक्षिणीकृत्य॥ सद्भिर्मंगलैः प्रदक्षिणादिभिर्मंगलाचारैः उदग्रतरप्रभावः सन्॥ प्रतस्थे॥ ७१॥ श्रोत्रेति॥ धर्मपत्नीसहितः सहिष्णुः॥ व्रतादिदुःखसहनशीलो नृपः॥ श्रोत्राभिरामध्वनिना मार्गं अ नुद्धातः पाषाणादिप्रतीघातरहितः॥ अतएव सुखयतीति सुखस्तेन रथेन स्वेन पूर्णेन सफलेन मनोरथेनेव ययौ॥ मनोरथ

प्रदक्षिणीकृत्य हुतं हुताशमनंतरं भर्तुररुंधतीं च॥ धेनुं सवत्सां च नृपः प्रतस्थे सन्मंगलोद ग्रतरः प्रभावः॥ ७१॥ श्रोत्राभिरामध्वनिना रथेन स धर्मपत्नीसहितः सहिष्णुः॥ ययावनु द्धातसुखेन मार्गं स्वेनेव पूर्णेन मनोरथेन॥ ७२॥ तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थ व्रतकर्शिताङ्गं॥ नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनां॥ ७३॥ ॥ ॥

क्षि ध्वनिः श्रुतिः॥ अनुद्धातः प्रतिबंधनिवृत्तः॥ ७२॥ तमिति॥ अदर्शनेन प्रवासनिमित्तेन आहितौत्सुक्यं जनितदर्शनेच्छं व्र तेन नियमेन कर्षितं अंगं यस्य तं दिलीपं नवोदयं प्रजाः तृप्तिमनाप्नुवद्भिः अतृप्तैर्नेत्रैरौषधीनां नाथं चंद्रमिव पपुः अत्यास्थया ददृशुरित्यर्थः॥ चंद्रपक्षे अदर्शनं कलाक्षयनिमित्तं प्रजार्थं लोकहितार्थं व्रतं देवताभ्यः कलादाननियमः॥ तं च सोमं पपुः देवाः पर्यायेणानुपूर्वश इति व्यासः॥ उदयं आविर्भावं अन्यत्समानं॥ ७३॥ ॥ ॥

३२

र॰ सू॰टी॰ पुरंदरेति॥ पुरः। पुराण्यसुराणां नगराणि दारयतीति पुरंदरः॥ शक्रः॥ पूः सर्वयोर्दारिसहोरिति खच्प्रत्ययः स॰२
९२ ॥ वाचंयमपुरंदरौ वेति मुनागमः॥ तस्य श्रीरिव श्रीर्यस्य सन्नृपः पौरैर्नागरिकैरभिवंद्यमानः उत्पताकं मुहुर्बद्धध्व
जं॥ पताका वैजयंती स्यात्केतनं ध्वजमस्त्रियामित्यमरः॥ पुरं प्रविश्य भुजंगेंद्रसमानसारे तुल्यबले सारो बले स्थिरांशे
च न्याय्ये क्लीबे वरे त्रिषु इत्यमरः॥ भुजे भूयः भूमेर्धुरं आससर्ज समर्पितवान्॥७४॥ तथेति॥ अथ द्यौः सुरवर्त्म
द्यौः स्वर्गसुरवर्त्मनो रिति विश्वः॥ अत्रेर्महर्षेर्नयनात्समुत्थं उत्पन्नं नयनसमुत्थं॥ आतश्चोपसर्गे क इति कप्रत्ययः

पुरंदरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिवंद्यमानः॥ भुजे भुजंगेंद्रसमानसारे भूयः
स भूमेर्धुरमाससर्ज॥७४॥ अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वह्नि
निष्ठ्यूतमैशं॥ नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोकपालानुभावैः
॥७५॥

तज्ज्योतिरिव चंद्रमिवेत्यर्थः॥ अत्रिदृग्जः स्यादत्रिनेत्रप्रसूतश्चेति हलायुधः॥ चंद्रस्यात्रिनेत्रोद्भूतत्वमुक्तं हरिवंशे॥ नेत्रा १२
भ्यां परिसुस्राव दशधा द्योतयन्दिशः॥ तं गर्भं दश धा भ्रष्टं दिशो देव्यो दधुस्तदा॥१॥७५॥ समेत्य धारयामासुन चैता
स्तमशक्नुवन्॥ सताभ्यः सहसैवाद्य दिग्भ्यो गर्भप्रभान्वितः॥ २॥ पपात भावयंल्लोकाञ्छितांशुः सुरभावन इति॥ सुरस
रिद्गंगा वह्निना निष्ठ्यूतं निक्षिप्तं॥ वकारस्य ऊठ्॥ ष्ठिवुनिरसने ष्ठ्यूतं निष्ठ्यूतविधक्षिप्तेरिताः॥ समाइत्यमरः॥ ऐशं तेजः स्कंदमिव

65/1993

श्रीगणेशायनमः॥ ॥उपाधिगम्योप्यनुपाधिगम्यः समावलोक्योप्यसमावलोक्यः। भावोपियोभूदभवः शिवोयंजगत्यपायाद्दपिनः सपायात्॥ १॥ राज्ञीगर्भमाह्वत्तेत्युक्तंसंप्रतिगर्भलक्षणंवर्णयितुंप्रस्तौति अथेति अथगर्भधारणानंतरंसुदक्षिणाउपस्थितोदयंप्राप्तकालंगर्भरूपस्थितंमनोरथं भावेलक्षणः उत्सवीजनो हीक्षणानांदृष्टीनांकौमुदीसुखंचंद्रिकाप्रादुर्भावंयद्वाकौमुदीदीपोत्सवतिथिः तदुक्तंभविष्योत्तरेकौमुदीथिर्यां मोदंतेजनायस्यातेनासौकौमुदीमतेति तस्याःमुखेप्रारंभः अतएवकेचित्कौमुदीसुखंमितिपाठंपठंति इक्ष्वा

अथेप्सितंभर्तुरुपस्थितोदयंसखीजनोद्वीक्षणकौमुदीसुखं॥ निदानमिक्ष्वाकुकुलस्यसं
ततेः सुदक्षिणादोहदलक्षणंदधौ॥ १॥ ततोविशांपत्युरनन्यसंततेर्मनोरथंकिंचिदिवो
दयोन्मुखं॥ अनन्यसौहार्दरहस्यसौत्सदंप्रियंप्रमेदेप्रकृतिप्रियंवदा॥ २॥ ॥

कुकुलस्यसंततेरविच्छेदस्यनिदानंमूलकारणंनिदानंत्वादिकारमित्यमरः। एवंविधंदोहदलक्षणंगर्भचिह्नंवस्थमाणं दधौ। स्वहृदयेनगर्भहृदयेनद्विहृदयागर्भिणी। यथाहवाग्भट्टः। मातृजंह्यस्यहृदयंमातुश्चहृदयंतत्संबंधंतेनगर्भिण्याः चेच्छंश्रद्धाभिमानमिति। तत्संबंधित्वाद्गर्भोदोहदमित्युच्यते साचतद्योगात्दोहदिनीति। तदुक्तंसंग्रहेद्विहृदयानारीदो हदिनामाचक्षतइति। अत्रदोहदलक्षणस्येप्सितत्वेनकौमुदीसुखत्वेनचनिरूप्यमाणत्। रूपकालंकारःअस्मिन्सर्गे वंशस्थंवृत्तं। ततोतुवंशस्थमुदीरितंजराविति॥ ३॥ ॥२॥ ॥ ॥ ॥ १

69
1945

लक्षिता=

संप्रतिक्षामताख्यंगर्भलक्षणंवर्णयति। शरीरेति। शरीरस्यदाक्षार्थ्यात्। असमग्रभूषणापरिमिताभरणालोध्र पुष्पवत् पांडुनामुखेनउपलक्षितासासुदक्षिणाविचेयाल्पाल्पतारकायस्यांसातथोक्ताविरलनक्षत्रेत्यर्थः तनुप्रकाशेनअल्पकांतिनाशशिनाउपकल्पितार्इषदसमाप्तप्रभातःप्रभातकल्पाप्रभातादिषन्न्यूनाइत्यर्थः तिसिलादिष्वाकृत्वसुचेति प्रभातशब्दस्यपुंवद्भावः शर्वरीवालक्ष्यत शरीरसादादिगर्भलक्षणेवाग्भट्टः

शरीरसादादसमग्रभूषणामुखेनसालक्ष्यतलोध्रपांडुना॥ तनुप्रकाशेनविचेयतारकाविभातकल्पा
शशिनेवशर्वरी॥ ३॥ मुखेनसाकेतकपत्रपांडुनाकृशांगयष्टिःपरिमेयभूषणा॥ स्थिताल्पतारां
करणेंदुमंडलांविभातकल्पांरजनींव्यडंबयत्॥ ४॥ तदाननंमृत्सुरभिक्षितीश्वरोरहस्युपाघ्रा
यनतृप्तिमाययौ॥ करीवसिक्तंपृषतैःपयोमुचांशुचिव्यपायेवनराजिपल्वलं॥ ५॥ ५ ॥

क्षामतागरिमाकुक्षौमूर्छाछर्दिररोचकं। जृंभाप्रसेकोवदनेरोमराज्यःप्रकाशनमिति॥ ३॥ ४॥ तदिति। सःक्षितीश्वरो रहसिमृत्सुरभिमृदासुगंधितस्याः आननमुपाघ्रायतृप्तिंनआययौ। कथमिवशुचिव्यपायेग्रीष्मावसानेशुचिः शुद्धेनुपहतेश्रृंगाराषाढयोः सितेग्रीष्मेउपवहे पिस्यादुपाधोशुद्धमंत्रिणीतिविश्वः। पयोमुचांमेघानांपृषतै विरभिःपृषतिबिंदुपृषताःइत्यमरः॥ ५॥

दोहदलक्षणेमद्धक्षणेद्वैतरमुत्प्रेक्षते दिवमिति। हियस्मादिगंतविश्रांतरथः चक्रवर्ती तस्याः सुतः तत्सुतः मरु
त्वानिंद्रः इंद्रोमरुत्वान्मघवाबिडौजाःपाकशासनइत्यमरः। दिवं स्वर्गमिवभुवंभोक्ष्यते। भोजोनवनइत्यात्मनेपदं
अतः प्रथमंसासुदक्षिणातथाविधेभुविकारेमद्रूपे अभिलषतइभिलाषोभोग्यवस्तु तस्मिन्कर्मार्थेघिञ्प्रत्ययः
॥रस्यंतेस्वाद्यंतेइतिरसाः भोग्यार्थाः अन्येचतेरसाश्च तान्विहायमनोबबंधानिदधावित्यर्थः। दोहदहेतुकस्य

दिवंमरुत्वानिवभोक्ष्यतेमहींदिगंतविश्रांतरथोहितत्सुतः॥ अतोभिलाषेप्रथमंतथावि
धेमनोबबंधान्यरसान्विलंघ्यसा॥ ६॥ नमेह्रियाशंसितकिंचिदीप्सितंस्पृहावतीवस्तुषुके
षुमागधी॥ इतिस्मपृच्छत्यनुवेलमादृतःप्रियासखीरुत्तरकोसलेश्वरः॥ ७॥ ॥ ॥

क्षणस्यपुत्रभूतगर्भस्त्वचकमुत्प्रेक्षा॥ ६॥ नमेति। मगधस्यराज्ञोपत्यस्त्रीमागधीसुदक्षिणा। ध्यञ्मगधकालिंगसु
रंसमादणीत्यणप्रत्ययः। ह्रियाकिंचित्किंमपिईप्सितमिष्टं मेमह्यंनशंसतिनाचष्टे केषुवस्तुषुस्पृहावतीत्यनुवेल
मनुक्षणमादृतःसन् कर्त्तरिक्तः अदृतौसादरोचितावित्यमरः। प्रियासखीः सहचरीः उत्तरकोशलेश्वरोदिलीपः
पृच्छतिस्मपप्रच्छलट्स्मयोगेभूतार्थेलट् सखीनांविश्रंभभरमित्वादितिभावः॥ ७॥ ॥ ५ ॥

71
1947

उपेत्येति। दोहदंगर्भिणीमनोरथः दोहदंदोहलंसञ्जालालसंचमनसंस्मृतमितिहलायुधः सासुदक्षिणादोहदेनदुः
खशीलतांदुःखस्वभावतामुपेत्यप्राप्ययद्वस्तुवव्रेआचकांक्षेदात्दृतमानी तंभर्त्रेतिशेषः कुतः हियस्मादस्यभूपतेः
इष्टंवस्तुत्रिदिवेस्वर्गेपिअनासाद्यमप्राप्यंनाभूत् किंयांचयानेत्याह। अधिज्यधन्वनइति अमरेंद्राणामप्यास्कंद
समर्थस्येत्यर्थः। नहिवीरपत्नीनामलभ्यंकिंचिदस्तिइतिभावः अत्रबाहुजः। यादृशोध्योविदाह्यतेश्रद्धाचविविधा

उपेत्यसादोहदुःखशीलतांयदेववव्रेतदपश्यदाहृतं॥ नहीष्टमस्यास्त्रिदिवेपिभूपतेरभू
दनासाद्यमधिज्यधन्वनः॥ ६॥ क्रमेणनिस्तीर्यचदोहदव्यथांप्रचीयमानावयवाररा ज
सा॥ पुराणपत्रापगमादनंतरंलतेवसन्नद्धमनोज्ञपल्लवा॥ ७॥ ५॥ ॥ ॥

त्मकेति। एतेनपत्नीमनोरथपूरणमकरणेदृष्टदोषसंभवात्॥ नतुराज्ञः स्त्रीलोल्यात्। तदुक्तं देयमप्यहितंतस्यैहितोप
हितमल्पकं। श्रद्धाविधाताद्गर्भस्यविकृतिक्षतिरेवच। अन्यच्च। दोहदस्याप्रसादेनगर्भोदोषमवाप्नुयादिति॥ ६॥
क्रमेणेति। सासुदक्षिणाक्रमेणदोहदस्यव्यथांनिस्तीर्यप्रचीयमानावयवासतीपुराणपत्रापगमादनंतरंसन्नद्धाः संजाताः
नस्यप्रत्वात्पनोज्ञाःपल्लवायस्याःसालतेवरराज॥ ७॥ ५॥ ॥ ॥ ॥

लक्षणांतरंवर्णयति दिनेष्विति दिनेषुदोहदादिनेषुगच्छत्सुसत्सु नितांतपीवरमतिगुरुत्तरमासमंतात् नी
लेमुखेचंचुकेयस्यतन्नदीयंस्तनद्वयंभ्रमरैरवलीढयोरतिव्याप्तयोःसुजातयोःसुंदरयोःपद्मकुड्मलयोःश्रियं
तिरश्चकार अत्रवाग्भटः अश्लेषतास्तनौसंसक्तौकृष्णचंचुकाविति॥८॥निधानेति नृपःससत्वांआपन्नस
त्वांगर्भिणीमित्यर्थः महिषींनिधानंनिधिगर्भेयस्यास्तांसागरांबरांसागरएवअंबरंवस्त्रंयस्यास्तां अंबरं

दिनेषुगच्छत्सुनितांतपीवरंतदीयमानीलमुखंस्तनद्वयं॥तिरश्चकारभ्रमराबलीढ
योस्सुजातयोःपंकजकोशयोःश्रियं॥८॥निधानगर्भामिवसागरांबरांशमीमिवाभ्यं
तरलीनपावकां॥नदीमिवांतःसलिलांसरस्वतींनृपःससत्वांमहिषीममन्यत॥९॥

व्योमवस्त्रयोरितिविश्वः समुद्रवसनामित्यर्थः तामिवाभ्यंतरेलीनःपावकोयस्यास्तांशमीमिवशमितरोव
ह्निरस्तीतिपुत्रलिंगंशमीगर्भादग्निंदधाति॥अंतर्गतसलिलांसरस्वतींनदीमिवामन्यत एनेनगर्भस्यभाग्यव २
त्वतेजस्वित्वपवित्रत्वानिविवक्षितानि॥ ९॥ ॥ ॥ ॥ ॥

73/1947

प्रियेति धीरःप्रियानुरागस्यमनःसमुन्नतेरौदार्यस्यभुजेनभुजबलेनार्जितानांनतुवाणिज्यादिनादिगं
तेषुसंपदांचधृतेःपुत्रोमेभविष्यतीतिसंतोषस्य धृतिर्योगांतरेधैर्येधारणाध्वरसत्कष्टिष्विति विश्वः सदृशीर
नुरूपाः पुमान्सूयतेऽनेनेतिपुंसवनंतदादिर्यासांताःक्रियाःयथाक्रमंक्रममनतिक्रम्यव्यधत्तकृतवान् आदि
शब्देनानवलोभनसीमंतोन्नयनेह्यते अथमासिद्वितीयेतृतीयेवापुंसवनंयदाहःपुंसानक्षत्रेणचंद्रमायुक्त
स्यादितिपाराशरःचतुर्थेनवलोभनमित्याश्वलायनःषष्ठमेवासीमंतोन्नयनमिति याज्ञवल्क्यः॥१०॥सुरेंद्रे

प्रियानुरागस्यमनस्समुन्नतेर्भुजार्जितानांचदिगंतसंपदां॥यथाक्रमंपुंसवनादि
काःक्रियाःधृतेश्चधीरःसदृशीर्व्यधत्तसः॥१०॥सुरेंद्रमात्राश्रितगर्भगौरवात्प्रयत्नमु
क्तासनयागृहागतः॥तयोपचारांजलिखिन्नहस्तयाननंदपारिप्लवनेत्रयानृपः॥११॥

ति गृहागतोनृपःसुरेंद्राणांलोकपालानांमात्राभिरंशैराश्रितस्यानुप्रतिष्ठितस्यगर्भस्यगौरवात् भारात् प्रयत्नेनमु
क्तासनयाआसनादुत्थितयेत्यर्थः उपचारस्यांजलावंजलिकरणेनाखिन्नहस्तयापरिप्लवनेत्रयातरलाक्ष्यातयासुद
क्षिणया चंचलंतरलंचैवपारिप्लवपरिप्लवइत्यमरः ननंद सुरेंद्रमात्राश्रितेत्यत्रमनु अष्टाभिश्चसुरेंद्राणांमात्राभिर्निर्मि
तोनृप॥११॥

कुमारेति कुमारभृत्याबालचिकित्सासंज्ञायांसमजनिषधेत्यादिनाक्यप् तस्याकुशलैराप्तैर्हितैर्भिषग्भि
र्वैद्यैः गर्भस्यग र्भणीभरणेपोषणे गर्भहेभ्रातिभ्रमेतिशाश्वतः भृञोमनिन्प्रत्ययः अनुष्ठितेकृतेसति काले
दशमेमासि अन्यत्रग्रीष्मावसानेप्रसवस्यगर्भमोचनस्योन्मुखीमासन्नप्रसवामित्यर्थः स्याद्उत्पादेफलेपुष्पे
प्रसवोगर्भमोचनइत्यमरः प्रियांभर्त्रीएतस्याःसंजातान्याभिताांतदस्यसंजातंतारकादिभ्यइतच्प्रत्ययः दि
वमिवपतिः पतीतसद्दृष्टःसन्ख्यातेदृष्टेप्रतीतः स्याज्जातेस्वकुलेनेबुधेददर्श गर्भकर्मणीतिपाठेगर्भाधा

कुमारभृत्याकुशलैरधिष्ठिते भिषग्भिराप्तैरथगर्भवे
श्मनिपतीप्रतीतप्रसवोन्मुखीप्रियांददर्शकालेदिवमभ्रिता
मिव॥३२॥ग्रहैस्ततःपंचभिरुच्चसंश्रियैरसूर्यगैःसूचितभाग्यसंपदं

नप्रतीतोवैचित्र्यभागः॥३२॥ग्रहैरिति शच्यारिंद्राण्यासमा पुलोमजाशचीन्द्राणीत्यमरः सासुदक्षिणासम
येप्रसूतिकालेसति दशमेमासीत्यर्थः दशमेमासिजयतइतिश्रुतेः उच्चसंस्थितैःतुंगस्थानगैरसूर्यगैरनस्त
मितैर्यैःकश्चिद्यथासंभवंपंचभिर्ग्रहैरविराशिश्चानिगुरुशिनैःशुक्रादिभिःसूचिताभाग्यसंपत्यस्यतंपुत्रंत्रीणि
प्रभावमंत्रोत्साहात्मकानिसाधनान्युत्पादकानियस्याःसात्रिसाधनशक्तिःशक्तयस्तिस्रप्रभावोत्साहमंत्रजा ४
इत्यमरः अक्षयमर्थमिवास्रूतसुषुवे

णिगर्भविमोचनेइत्य दादिषुपद्यतेतस्माद्धेतोःकर्तरिलिट् अत्रेदमनुसंधेयं अजवृषभमृगांगनाकुलीराझ
षवणिजौचदिवाकरादितुंगाद्दशशिखिमनुयुक्तिथींद्रियांशैस्त्रिनवकविंशतिभिश्चतेस्तनीचाः इतिसूर्यादी
नांसप्तानांग्रहाणांमेषवृषभादयोराशयःश्लोकोक्तक्रमविशिष्टाउच्चस्थानानिस्वस्वतुंगापेक्षयासप्तमस्थाना
निनीचानितत्रोच्चेष्वपिदशमादयोराशित्रिंशांशायथाक्रममुच्चेषुपरमोच्चानीचेषुपरमनीचाइतिजातश्लोका
र्थः अत्रांशस्त्रिंशोभागः यथाहनारदः त्रिंशद्भागात्मकंलग्नमिति सूर्यस्यास्तातिहियदृणामस्तमयोनाम

असूतपुत्रंसमयेशचीसमात्रिसाधनाशक्तिरिवार्थमक्षयं॥३३॥

तदुक्तंलघुमानसे रविणास्तमयोयोगोवियोगस्तूदयोभवेदिति तेचस्वोच्चस्थाः फलंनास्तंगाः नापिनीचगाः
तदुक्तंराजमृगांकेस्वोच्चेपूर्णंसुहृद्भ्यपादांद्विशल्यंशुभंखेचरेनीचस्थापिचास्तगोवानकिंचित्स्यादन्यूनंत्रिकोणेद
दातीति।तादिदमाह कविउच्चसंस्थितैरसूर्यगैरिति एवंसातियस्यजन्मकालेपंचप्रभृतयोग्रहास्कोच्चस्थाः दे
वतुल्योभतीतितदुक्तंरुद्रयामथिमुखिप्रकृष्टभार्याराजप्रतिरूपकाश्चराजानानः एकांद्वित्रिचतुर्भिर्जायंते तः
परंदिव्याइतितादिदमाहपंचभिरिति॥३३॥

75
1947

LIBRARY OF THE BOMBAY BRANCH OF THE

दिशइति तत्क्षणंतस्मिन्क्षणे अत्यंतसंयोगेद्वितीया दिशः प्रसेदुः प्रसन्नाः बभूवुः मरुतो वाताः सुखाः मनोहराः ववुः वातिस्म अग्निःप्रदक्षिणार्चिःसन् हविरादद्देस्वीचकार। इत्थंसर्वेषुभशंसिषु भसूचकंबभूव तथाहि तादृशांरघुप्रकाराणांभवोजन्मलोकाभ्युदयायभवतीतिशेषः ततोदेवा पिसंतुष्टाइत्यर्थः॥१४॥ अरिष्टेति अरिष्टंसूतिकायहमित्यमरः अरिष्टशय्यायांपरितः सर्वतः अभितः

दिशःप्रसेदुर्मरुतोववुःसुखाःप्रदक्षिणार्चिर्हविरग्निराददे॥ बभूवसर्वंशुभशंसि
तत्क्षणंभवोहिलोकाभ्युदयायतादृशां॥१४॥ अरिष्टशय्यांपरितोविसारिणासुज
न्मनस्तस्यनिजेनतेजसा॥ निशीथदीपासहसाहतत्विषोबभूवुरालेख्यसमर्पिताइव॥१५

परितः समयानिकषाहाप्रतियोगेपिचदृश्यतइतिद्वितीया विसारिणासुजन्मनस्तस्याशिशोर्निजेननैसर्गिकेणतेजसासहसाहतत्विषोनिशीथे अर्द्धरात्रे अर्द्धरात्रंनिशीथौद्वावित्यमरः दीपाः आलेख्येचित्रे समर्पिताइवबभूवुः निशीथशब्दोदीपानांप्रभाधिक्यसंभावनार्थः॥१५॥

77/1947

जनायेति भूपतेरमृतसंमिताक्षरं अमृतसमानाक्षरं सरूपसमसंमिता इत्याहदंडी कुमारजन्मपुत्रोत्पत्तिंशंसतेकथयतेशुद्धांतचरायअंतःपुरचारिणेजनायत्रयमेवादेयमासीत् किंतत् शशिप्रभंछत्रमुभेचामरेच छत्रादीनांराज्ञः धानांगत्वादितिभावः॥१६॥ निवातेति निवातोनिर्वातप्रदेशःनिवातावाश्रयावातावित्यमरः तस्यपद्मंतद्वत्स्तिमितेननिष्पंदेनचक्षुषा कांतंसुताननंपिबतःतृष्णयपश्यतोनृपस्यगुरुरुत्कटः

जनायशुद्धांतचरायशंसतेकुमारजन्मामृतसंमिताक्षरं॥ अदेयमासीत्त्रयमेव
भूपतेःशशिप्रभंछत्रमुभेचचामरे॥१६॥ निवातपद्मस्तिमितेनचक्षुषानृपस्यकां
तंपिबतःसुताननं॥ महोदधेःपूरइवेंदुदर्शनाद्गुरुःप्रहर्षःप्रबभूवनात्मनि॥१७॥

प्रहर्षकर्त्ताइंदुदर्शनाद्गुरुमीहोदधेःपूरोजलौघइवआत्मनिशरीरेनप्रबभूवस्थातुंनशशाक अंतर्नमातिस्मेतियावत् नह्यल्पाधारधिकंमीयतइतिभावः यद्वाहर्षआत्मनिस्वस्मिन्विषयेनप्रबभूव आत्मानंनियंतुं नशशाककिंतुबहिर्निर्जगामेत्यर्थः॥१७॥

सइति। सदिलीपसूनुः तपस्विनापुरोधसावसिष्ठेन तपस्वित्वादनुष्ठितं कर्मसुवीर्यस्यादितिभावः तपोव
नादेत्याखिलेजातकर्मणिजातस्यकर्तव्येसंस्कारविशेषेकृतेसतिप्रयुक्तः संस्कारः शाणोल्लेखनादि
र्यस्यसतथोक्तः आकरोद्भवः खनिप्रभवः खनिःस्त्रियामाकरस्यादित्यमरः मणिरिवाधिकंबभौ वसिष्ठ
मंत्रप्रभावातेजिष्ठोऽभूदित्यर्थः अत्रमनुः प्राङ्नाभिजन्मनात्पुंसोजातकर्माविधीयत॥इति॥१८॥सुखेति

सजातकर्मण्यखिलेतपस्विनातपोवनादेत्यपुरोधसाकृते॥दिलीपसूनुर्मणिरा
करोद्भवःप्रयुक्तसंस्कारइवाधिकंबभौ॥१८॥सुखश्रवामंगलतूर्यनिःस्वनाःप्रमो
दनृत्यैःसहवारयोषितां॥नकेवलंपद्मनिमागधीपतेःपथिव्यजृंभंतदिवौकसामपि॥१९॥

सुखयतीतिसुखश्रवःश्रवणंयेषांतेसुखश्रवाः श्रुतिसुखाइत्यर्थः मंगलतूर्यनिःस्वनाःमंगलवाद्यध्वनयः वा
रयोषितांवेश्यानां वारस्त्रीगणिकावेश्येत्यमरः प्रमोदनृत्यैःसहमागधीपतेर्दिलीपस्यसद्मनिकेवलंगृहेए
वनव्यजृंभंतकिंतुद्यौरोकोयेषांतेदिवौकसः पृषोदरादित्वात्साधुः तेषांपथ्याकाशेव्यजृंभततस्यदेवांश
त्वाद्देवोपकारित्वाच्चइंदुभयोनेदुरितिभावः॥१९॥

६

79/1943

नेति रक्षतुः सम्यक्पालनशीलस्य शलेतृन् तस्यअतएवचौराद्यभावात् संयतोबद्धः नबभूव ना
स्तिस्माभाभूत किंतेनातआह वीति सुतजन्मनाहर्षितः संतोषितः सन्यंबद्धंविसर्जयेद्विमोचयेत्किं
तुसराजातदापितृणांऋणाभिधानाद्बंधनात्स्वयमेकएवेत्यर्थः केवलमेकंयथायथाकेवलंकृत्स्नाएकस्य
केवलश्चावधारितइतिशाश्वतः मुमुचेकर्तरिलिट् स्वयमेवमुक्तइत्यर्थः अस्मिन्नर्थेएषवान्ऋणोयःपु
त्रीतिश्रुतिःप्रमाणं॥२०॥श्रुतस्येतिअर्थवित्शब्दार्थज्ञः पार्थिवअयमर्भकःश्रुतस्यशास्त्रस्यांतंपारं

नसंयतस्तस्यबभूवरक्षितुर्विमोचयेद्यंसुतजन्महर्षितः॥ऋणाभिधानात्स्वयमेवकेवलं
तदापितृणांमुमुचेसबंधनात्॥२०॥श्रुतस्ययायादयमंतमर्भकस्तथापरेषांयुधिचेति
पार्थिवः॥अवेक्ष्यधातोगमनार्थमर्थविच्चकारनाम्नारघुमात्मसंभवं॥२१॥

यायात् तथासंयामेत्वदिपरेषांशत्रूणांमंतंयायात् यांतुशक्नुयादित्यर्थः शकिलिङ् चेतिशक्यार्थेलिङ्इति
धातोः अगिरविलघुगत्यर्थाः इतिरघिधातोगमनार्थमर्थं विविदित्वाद्वेक्ष्यालोच्यात्मसंभवपुत्रंनाम्नार
घुंचकार रघिवद्योर्नलोपश्चेत्युस्प्रत्ययपाठंमूलंलघुचलांगुलीनांचारोनापद्यतइतिवैकल्पिकेरेपादेदो
कृतेरघुरितिसिद्धंअत्रशंखःअशौचेतव्यतिक्रांतेनामकर्मविधीयतइति॥२१॥

पितुरिति।सरघुः समग्रसंपदः पितुः प्रयत्नाच्छुभैः मनोहरैः शरीरावयवैः हरिदश्वदीधितेः सूर्यरश्मेः अनुप्रवे
शात् बालचंद्रमाइवदिनेप्रतिदिनं नित्यवीप्सयोर्द्विवचनं वृद्धिंपुपोष अत्रसंहितावचनंसलिलमयेशशि
नि रवेर्दीधितयोमूर्छितास्तमोनैशंक्षपयंतिदर्पणोदरनिहिताइवमंदिरस्यां, तरिति॥२२॥

पितुःप्रयत्नात्ससमग्रसंपदः शुभैःशरीरावयवैर्दिनेदिने॥पुपोषवृद्धिंहरिदश्वदीधिते
रनुप्रवेशादिवबालचंद्रमाः॥२२॥उमावृषांकौशरजन्मनायथायथाजयंतेनशचीपुरं
दरौ॥तथान्रपःसाचसुतेनमागधीननंदतुस्तत्सदृशेनतत्समौ॥२३॥ ॥७२॥

उमेति उमावृषांकौशरजन्मनाकुमारेणयथाननंदतुः शचीपुरंदरौजयंतेनजयंताख्येनसुतेन जयंतःपाक
शासनिरित्यमरः यथाननंदतुः यथातत्समौ ताभ्यांउमावृषांकाभ्यांशचीपुरंदराभ्यांचसमागधीन्रपश्च
तत्सदृशेनताभ्यांकुमारजयंताभ्यांसदृशेननंदतुः मागधीव्याख्याता॥२३॥ ७

81/1947

रथांगेति।रथांगनाम्नीचरथांगनामाचरथांगनामानौचक्रवाकौ पुमांस्त्रियेत्येकशेषः तयोरिवतयोर्दंपत्यो
र्भावबंधनंहृदयाकर्षकंपरस्पराश्रयोअन्योन्यविषयंप्रेमबभूव तदेकेनकेवलेनताभ्यामन्येनवाएको
मुख्यान्यकेवलइत्यमरः।सुतेनविभक्तमपिकृतविभागमपिपरस्परयोपरिपर्यहीयतवृत्तेकर्मकर्तरिलिङ्.
अहत्रिमात्स्वयमेवोपचितमित्यर्थः यदेकाधारं वस्तुतदाधारद्वयेविभज्यमानंहीयते अत्रतयोःप्रागे

रथांगनाम्नोरिवभावबंधनंबभूवयत्प्रेमपरस्पराश्रयं॥विभक्तमप्येकसुतेनतत्त
योःपरस्परस्योपरिपर्यहीयत॥२४॥उवाचधात्र्याप्रथमोदितंवचोययौतदीयामव
लंब्यचांगुलीं॥अभूच्चनम्रःप्रणिपातशिक्षयापितुर्मुदंतेनततानसोर्भकः॥२५॥

केकविषयंप्रेमसंप्रतिद्वितीयविषयलाभेपिमहीयत प्रत्युतोपचितमेवाभूदितिभावः॥ २४ ॥ उवाचेति
सोर्भकःशिशुःपोतःपाकोर्भकोडिंभः पृथुकः शावकः शिशुरित्यमरः धात्र्याउपमात्रा धात्रीजनन्या
मलकीवसुमत्युपमातृष्विति विश्वः प्रथममुदितान्युपदिष्टानिवचांस्युवाच तदीयामंगुलीमवलंब्यय
यौचप्रणिपातस्याशिक्षयाउपदेशेननम्रोभूदितियत्तेनपितुर्मुदंततान॥ २५ ॥ ॥ ७५ ॥

तमिति। शरीरस्पर्शयोगजैः सुखैः त्वचिलगिंद्रिये अमृतं निषिंचंतं वर्षंतमिव तं पुत्रमंकमारोप्यानंदाविर्भावादुपां
तयोः प्रांतयोः संमीलितलोचनः सन् नृपश्चिरात्सुतस्पर्शरसज्ञतां ययौ रसः स्वादः॥ २६॥ अमंस्तेति
स्थितेरभितामर्यादापालकः सन्नृपः पराध्यैजन्मना उत्कृष्टजन्मना अनेन रघुणा अन्वयं वंशं प्रजानां पतिर्ब्र
ह्मा गुणाः सत्वादयः तेष्वग्र्येण मुख्येन सत्वेन वर्तिते व्याप्रीयत इति गुणाग्र्यवर्तिना स्वस्य मूर्तिभेदेनाव

तमंकमारोप्य शरीरयोगजैः सुखैर्निषिंचंतमिवामृतं त्वचि॥ उपांतसंमीलितलोचनो नृप
श्चिरात्सुतस्पर्शरसज्ञतां ययौ॥ २६॥ अमंस्त चानेन पराध्यैजन्मना स्थितेरभेत्ता स्थिति
मंतमन्वयं॥ स्वमूर्तिभेदेन गुणाग्र्यवर्तिना पतिः प्रजानामिव सर्गमात्मनः॥ २७॥

तारविशेषण विष्णुना आत्मनः स्वर्गमिव सृष्टिमिव स्थितिमंतं प्रतिष्ठावंतं अमंस्त मन्यते स्मनुदात्तत्वादिङ् प्रतिबोध
अत्रोपमानोपमेययोरितरेतर विशेषणानीतरेतरयोज्यानि तत्र रघुपक्षे गुणाः विद्याविनयादयः गुणे प्रधाने रू
पादौ मौर्व्यां सूदे द्वकोदरे स्तंभे सत्वादि रूपादि विद्यादि हरितादि ग्रिति विश्वः शेषं सुगमं॥ २७॥ ९

83/1949

स इति। चूडाकार्या द्विजातीनां सर्वेषामेव धर्मतः प्रथमेऽब्दे तृतीये वा कर्तव्या श्रुतिचोदनादिति मनुस्मरण
त्तृतीये वर्षे वृत्तचौलो निष्पन्नचूडाकर्मा सन् उलयोरभेदः स रघुः प्राप्ते तु पंचमे वर्षे विद्यारंभं च कारयेदि
ति वचनात्पंचमे वर्षे चलकाकपक्षकैश्चलशिखंडिकैः बालानां च शिखा प्रोक्ता काकपक्षः शिखंडकः
इति हलायुधः सवयोभिः स्निग्धैः स्निग्धो वयस्यः सवया इत्यमरः आमात्यपुत्रैरन्वितः सन् लिपे
संचाशोद्ग्रहणाम्निकायाः मातृकायाः यथावद्ग्रहणेन सम्यग्बोधेनोपायभूतेन वाङ्मयं शब्दजातं नवेद्यमुख

स वृत्तचौलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः॥ लिपेर्यथावद्ग्रहणेन वाङ्म
यं नदीमुखेनेव समुद्रमाविशत्॥ २८॥ अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गु
रुप्रियं॥ अवंध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति॥ २९॥ ५॥

द्वारं मुखं तु वदने मुख्ये ताम्रे द्वाराभ्युपाययोरिति यादवः तेन कश्चिन्मकरादिः समुद्रमिवाविशत् प्रविष्टः ज्ञात
व्यः नित्यर्थः॥ २८॥ अथेति गर्भाष्टमे हि कुर्वीत ब्राह्मणस्योपनयनं गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे वि
श इति मनुस्मरणात् अथ गर्भैकादशाब्दे विधिवदुपनीतं गुरवः प्रियाः यस्य तं गुरुप्रियमेनं रघुं पश्चिमतो वि
द्वांसो गुरवो विनिन्युः शिक्षितवंतः ते गुरवोऽस्मिन्नर्भके रघौ अवंध्ययत्नाश्च बभूवुः तथाहि क्रिया शि
क्षाक्रियानुनिष्कृतौ शिक्षाचिकित्सोपायकर्मस्विति यादवः वस्तु निपात्रे भूते उपहिता प्रयुक्ते सति प्र
सीदति फलति क्रिया हि द्रव्यं विनयति नाद्रव्यमिति कौटिल्यः॥ २९॥ ॥५॥ ॥ ५

धियतइति अत्रमंदकः शुश्रूषाश्रवणंचैवग्रहणंधारणंतथा ऊहापोहार्थविज्ञानंतत्वज्ञानंचधीगुणाइ
तिअन्वीक्षिकी त्रयीवार्तादंडनीतिश्चशाश्वती विद्याश्चेताश्चतस्रस्तु लोकसंस्थितिहेतवः उदारधीः स
रघुः समग्रैः धियोगुणैः चत्वारोर्णवाउपमायासांताश्चतुर्वर्णवोपमाः तद्धितार्थेतिरपदसमानः चतस्रो
विद्याहरितांदिशांईश्वरः सूर्यः पवनातिपातिभिर्हरिद्भिर्निजाश्वैः हरितुकभिवर्णेचतृणवाजिविशेषयो
रितिविश्वः चतस्रदिशइवक्रमात्ततार चतुरर्णवोपमत्वांदिशामितिद्रष्टव्यं॥२०॥ त्वचमिति॥ कानिशेरव
मास्तानिचर्माणिब्रह्मचारिणः वसीरन्नानुपूर्वेणक्षौमादिकानिचेतिमनुस्मरणात् मेध्यांशुद्धांरौर

धियःसमग्रैःसगुणैरुदारधीःक्रमाच्चतस्रश्चतुरर्णवोपमाः॥ततारविद्यापवनातिपातिभि
र्दिशोहरिद्भिर्हरितामिवेश्वरः॥२०॥त्वचंसमेध्यांपरिधायरौरवीमशिक्षतास्त्रंपितुरेवमं
त्रवत्॥नकेवलंतद्गुरुरेकपार्थिवः क्षितावभूदेकधनुर्धरोपिसः॥ २१॥ ॥

वीरुरुसंबंधिनी रुरुर्महाकृष्णसारइतियादवः त्वचंचर्मपरिधायवसित्वामंत्रवत् समंत्रकंअस्त्रमग्नियादिकंपि
तुरेवोपाध्यात् अशिक्षतअभ्यस्तवान् आख्यातोपयोगइतिअपादानसंज्ञापितुरेवेत्यवधारणमुपपादयतित
द्गुरोःयेकः अद्वितीयःपार्थिवः केवलंपृथिवीश्वरएवनाभूत् किंतुक्षितौएकधनुर्धरोप्यभूत्॥२१॥ ॥ १

85
1441

महोक्षतमिति रघुःक्रमाद्यौवनेनभिन्नशैशवोनिरस्तशैशवः सन्महान्उक्षामहोक्षः महर्षभः अचतुरेत्या
दिनासूत्रेणनिपातनादकारत्वांतस्यभावः तत्तांस्पृशन्गच्छन्वत्सतरइवदम्यइवादम्यवत्सतरौसमावित्यमरः
द्विपेंद्रभावंमहागजत्वंश्रयन्भजन्कलभः करिपोतइवगांभीर्येणचापलेनमनोहरंवपुःपुपोषयथासंक्रांतयो
वनोमहर्षभकरिपोतौअततुंतनुभारंपुष्णीतस्तनूद्दयमपीत्यर्थः॥२२॥ अथेति गोनादित्येबलिवर्द्दे
क्रतुभिदोषभेदयोः स्त्रीतुस्याद्दिशिभारत्याभूमौचसुरभावपि पुंस्त्रियोः स्वर्गवज्रांबुरश्मिदृग्बाणलोम
स्वितिकेशवः गावोलोमानिकेशादीयंतेखंड्यंतेयस्मिन्नितिव्युत्पत्त्यागोदानंनामब्राह्मणादीनांषोडशादि

महोक्षतांवत्सतरःस्पृशन्निवद्विपेंद्रभावंकलभःश्रयन्निव॥रघुःक्रमाद्यौव
नभिन्नशैशवःपुपोषगांभीर्यमनोहरंवपुः॥२२॥अथास्यगोदानविधेरनंतरंवि
वाहदीक्षांनिरवर्तयद्गुरुः॥नरेंद्रकन्यास्तमवाप्यसत्पतिंतमोपहंदक्षसुताइवाबुधः॥२३॥

षुवर्षेषुकर्तव्यंकेशांताख्यंकर्मोच्यते तदुक्तंमुनिना केशांतषोडशेवर्षेब्राह्मणस्यविधीयतेराजन्यबंधोर्द्वाविंशेवै
श्यस्यत्र्यधिकेततः अथगुरुः पितागुरुःगीष्पतौपित्राद्यावित्यमरः अस्यरघोर्गोदानविधेरनंतरंविवाहदीक्षां
निरवर्तयत् कृतवानित्यर्थः अथनरेंद्रकन्यास्तंरघुंदक्षस्यसुताः रोहिण्यादयः तमोपहंतमोनुदंचंद्रमिव
तमोनुदे ग्निचंद्रार्कइतिविश्वः तंसत्पतिमवाप्यबभुः रघुरपितमोनुत् अत्रमनुः वेदानधीत्यवेदौवावेदं
वापियथाक्रमं अविप्लुतब्रह्मचर्योगृहस्थाश्रममाविशेदिति॥२३॥ ॥ ॥ ॥

र॰ मू॰ टी॰ संप्रति यौवराज्ययोग्यतामाह। युवेति। युवायुगो नाम धुर्यस्कंधमतः सच्छिद्रप्रांतायानांगदारुविशेषः। स३
३० यानाद्यंगे युगः पुंसि युगयुग्मे कृतादिष्वित्यमरः युगवद्व्यायतौ दीर्घौ बाहू यस्य सः अंसावस्य स्त इत्यंसलो
बलवान् मांसलश्चेति वृत्तिकारः बलवान्मांसलोंसल इत्यमरः। तत्सांसोयां कामबल इति वल प्रत्ययः
कपाटवक्षाः द्वारहृदयः परिणद्धकंधरः विशालग्रीवा। परिणाहो विशालतेत्यमरः रघुः वपुषः प्रकर्षा
दधिक्यात् यौवनकृतात् गुरुं पितरमजयत् तथापि विनयात् नम्रत्वेन नीचैरल्पको दृश्यत अनौद्धत्याविव

युवायुगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकंधरः॥ वपुःप्रकर्षादजयद्गुरुं रघु
स्तथापि नीचैर्विनयाद्दृश्यत॥ २४॥ ततः प्रजानां चिरमात्मनाधृतां नितांतगुर्वीं लघ
यिष्यता धुरं॥ निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक्॥ २५॥

क्षितं॥ २४॥ संप्रति तस्य यौवराज्यमाह ततइति ततः आत्मना चिरं धृतां नितांतगुर्वीं अतो गुरुवचनांङीप् प्रजानां धु
रं प्रजापालनप्रयासं लंघयिष्यता लघु करिष्यता तत्करोति तदाचष्ट इति लघुशब्दात् णिच् ततो लृट् इति सच्चेतिशत्र
त्प्रत्ययः नृपेण दिलीपेन सोऽरघुः निसर्गेण स्वभावेन संस्कारेण शास्त्राभ्यासजनितवासनया च विनीतो नम्र इति हेतो
युवराज इति शब्दं भवतीति तनयो क्तः भजो ण्वि इति ण्विप्रत्ययः चक्रे कृतः द्विविधो विनयः स्वाभाविकः कृतकश्चेति
कौटिल्यः तदुभयसंपन्नत्वात्पुत्रं युवराजं चकारेत्यर्थः अत्र कामंदकः विनयोपग्रहात् भूत्यै कुर्वीत नृपतिः सुतान्
अविनीतकुमारं हि कुलमाशु विशीर्यते विनीतमौरसं पुत्रं यौवराज्येऽभिषेचयेदिति॥ २५॥ ८५॥ ५॥ ३०

83
1945

नरेंद्रेति गुणान् विनयादीन् सौरभ्यादींश्चाभिलषतीति गुणाभिलाषी राज्यलक्ष्मीः पद्मासना च नरेंद्रो दि
लीप एव मूलायतनं प्रधानस्थानं तस्मात् पदात् अनंतरं संनिहितं युवराज इति संज्ञा संजाता यस्य स युवराजसं
ज्ञितस्तत् तारकादित्वादितच् प्रत्ययः आत्मनः पदं स्थानं आस्पदं प्रतिष्ठायामिति निपातः स रघुरित्यास्पदं कमला
च्छिरोत्पन्नात् नवावतारं चिरोत्पन्नमुसलमिवांशिनागकेन्द्र च्छियो निषूनिरंजतीतिभावः॥ २६॥

नरेंद्रमूलायतनादनंतरं तदास्पदं श्रीर्युवराजसंज्ञितं॥ अगच्छदंशेन गुणाभिला
षिणी नवावतारं कमलादिवोत्पलं॥ २६॥ विभावसुः सारथिनेव वायुना घनव्य
पायेन गभस्तिमानिव॥ बभूव तेनातितरां सुदुःसहः कटप्रभेदेन करीव पार्थिवः॥ २७॥

विभावसुरिति सारथिना सहायभूतेन एतद्विशेषणमुत्तरवाक्येष्वप्यनुसंजनीयं तेन वायुना विभावसुः
वह्निरिव चित्रभानुर्विभावसुरित्यमरः घनव्यपायेन शरत्समयेन सारथिना गभस्तिमान् सूर्य इव करी
गंडः करटो मदो दानमित्यमरः तस्य प्रभेदः स्फुटनं मदोदय इत्यर्थः तेन करीव पार्थिवो दिलीपः तेन रघुणा
अतितरामत्यंत सुदुःसहः सुदुःसहो बभूव॥ २७॥ ॥८७॥ ॥८७॥ ॥८७॥

नियुज्येति। शतक्रतुः इंद्रः उपमायस्यसः शतक्रतूपमः सदिलीपः शतंवैबल्याराजपुत्रादेव आ
शापालइत्यादिश्रुत्याराजसुतैरनुद्रुतमनुगंतंधनुर्धरंरघुंहोमंगाणांरक्षणेनियुज्यएकेनक्रतुना अन्यूर्ण
एकोनंक्रतूनामश्वमेधानांशतमपविघ्नमपगतंविघ्नंयथातथाआप॥ ३८॥ ततइति। ततः परनेकोनश
क्रतुप्राप्त्यनंतरंयज्वनाविधिवदिष्टतातेनादिलीपेनपुनः पुनरपिमखायमखंकर्तुंक्रियार्थेत्यादिनाच

नियुज्यतंहोमतुरंगरक्षणेधनुर्धरंराजसुतैरनुद्रुतं॥ अन्यूर्णमेकेनशतक्रतूपमः
शतंक्रतूनामपविघ्नमापसः॥ ३८॥ ततः परंतेनमखाययज्वनातुरंगमुत्सृष्टम
नर्गलंपुनः॥ धनुर्भृतामग्रतएवरक्षितांजहारशक्रः किलगूढविग्रहः॥ ३९॥

तुर्थीउत्सृष्टमुक्तमनर्गलमप्रतिबंधव्याहतस्वैरगतिमित्यर्थः अपर्यावर्त्तयंतोऽश्वमनुसरतीत्यामस्तंबस्मर
णात् तुरगंधनुर्भृतांरक्षकाणांअग्रतएवशक्रोगूढविग्रहः सन्नुजहार किलकिलेत्यैतिह्यं॥ ३९॥ ३३
॥ ५ ॥ ५ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ५ ५ ५ ५ ५

89/1943

विषादेति तत्कुमारसैन्यंसेनाचसपदिविषादः इष्टनाशतक्रतोमनोभंगंतदुक्तंविषादश्चेतसोभंगरुपायाभा
वनाशयोरिति तेनलुप्ताप्रतिपत्ति कर्त्तव्यज्ञानंयस्यतत्तथोक्तं वि स्मितंअश्वनाशस्याकस्मिकत्वा
त् आश्चर्यविष्टसस्थितंतस्थो अथश्रुतप्रभावायदृच्छयास्वेच्छयाआगतानंदिनीनामवसिष्ठधेनुश्च
ददृशे रघोःस्वप्रसादलब्धत्वात्तदनुजिघृक्षयेतिभावः चकारोअविलंबसूचको॥ ४०॥ ॥

विषादलुप्तप्रतिप्रतिपत्तिविस्मितंकुमारसैन्यंसपदिस्थितंचतत्॥ वसिष्ठधेनुश्च
यदृच्छयागताश्रुतप्रभावाददृशेथनंदिनी॥ ४०॥ तदंगानिष्यंदजलेनलोचनेप्रमृज्य
पुण्येनपुरस्कृतः सतां॥ अतींद्रियेष्वप्युपपन्नदर्शनोबभूवभावेषुदिलीपनंदनः॥ ४१॥

तादिति। सतांपुरस्कृतः पूजितः सदिलीपस्यनंदनोरघुःपुण्येनतस्यानंदिन्या पदंगतस्यनिष्यंदोद्रवः सएव
जलंमूत्रमित्यर्थः तेनलोचनेप्रमृज्यशोधयित्वाअतींद्रियेष्विंद्रियमतिक्रांतेषु अत्यादयः क्रांताद्यर्थेद्वितीय
इतिसमासः द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषुपरवल्लिंगताप्रतिषेधाद्विशेष्यनिघ्नत्वं भावेष्वपिस्वरूपपन्नदर्श
नः सम्यक्साक्षात्कारवबभूव॥ ४१॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥

सइति। सनरदेवसंभवः रघुः पुनः पुनः सूतनिषिद्धचापलंनिवारितोद्धत्यंरथस्यरश्मिभिः प्रग्रहैः किरणप्रग्र हौरश्मित्यमरः संयन्तंबद्धमश्वंहरंतंपर्वतपक्षाणांशातनंछेदकंदेवमिंद्रंपूर्वतः पूर्वस्यांदिशिददर्श।। ४२।। स ३
शतैरिति सरघुस्तमश्वहर्तारंअनिमेषवृत्तिभिर्निमेषव्यापारशून्यैरक्ष्णांशतैः हरिभिर्हरिद्वर्णैः हरिर्वाच्यवद्रा ख्यातोहरित्कपिलवर्णयोरितिविश्वः। वाजिभिरश्वैश्चहरिभिंद्रविदित्वाज्ञात्वा हरिवात्ताकचंद्रमरीचिक्षितिवि

स्वेदांबुनामार्जयपुत्रलोचनेममैवएनेहतुरंगमीक्षसे।। धेन्वानिशम्येतिवचःसमीरितंमुदंपरा मापदिलीपनंदनः।।४१।। सपूर्वतःपर्वतपक्षशातनंददर्शदेवंनरदेवसंभवः।। पुनःपुनःसूतनि -- चापलंहरंतमश्वंरथरश्मिसंयुतं।।४२।। शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिंविदित्वाहरिभि श्ववाजिभिः।। अवोचदेनंगगनस्पृशारघुःस्वरेणधीरेणनिवर्त्तयन्निव।।४३।। मखांशभाजांप्रथमो मनीषिभिस्त्वमेवदेवेंद्रसदानिगद्यसे।। अजस्रदीक्षाप्रयतस्यमद्गुरोःक्रियाविघातायकथंप्रवर्त्तसे।।४४।।

श्वः एतमिंद्रंगगनस्पृशाव्योमव्यापिनाधीरेणगभीरेणस्वरेणध्वनिनैवनिवर्तयन्निवावोचयत।।४३।। हेदेवेंद्रमनी षिभिस्त्वमेवमखांशभाजांयज्ञभागभुजांप्रथमःसदानिगद्यते। तथाप्यजस्रदीक्षायांप्रयतस्यमद्गुरोःक्रिया विघातायक्रतुनाशायक्रियाविहंतुमित्यर्थः तुमर्थाचभाववचनादितिचतुर्थ्यै कथंप्रवर्त्तसे।।४४।। ६९।। ३२

91
1945

त्रिलोकेति त्रयाणांलोकानांनाथस्त्रिलोकः तद्धितार्थेत्यादिनोत्तरपदसमासः तेनत्रैलोक्यनियामकेनादि व्यचक्षुषाअतींद्रियार्थदर्शिनात्वयामरवद्विषः क्रतुविघातकः सदानियम्याः ननुशिक्ष्याः खलु सततंधर्मचा रिणांकर्मस्थक्रतुषुस्वयमंतरायोविघ्नोभवसिचेत् तर्हिविधिरनुष्ठानंच्युतःक्षतः लोकसत्कर्मकथैवास्तमि यादित्यर्थः।।४६।। तदितिहेमघवंस्तत्तस्मात्कारणात् क्रतोरश्वमेधस्यांगसाधनमध्यंश्रेष्ठममुंतुरंगंप्रतिमोक्तुंप्र

त्रिलोकनाथेनसदामखद्विषस्त्वयानियम्याननुदिव्यचक्षुषा।। स्वचेत्स्वयंकर्मसुधर्म चारिणांत्वमंतरायोभवसिच्युतोविधिः।।४६।। तदंगमग्र्यंमघवन्महाक्रतोरमुंतुरंगं प्रतिमोक्तुमर्हसि।। पथश्रुतेर्दर्शयितारईश्वरामलीमसामाददतेनपद्धतिं।।४७।।

तिदातुमर्हसि नथाहि श्रुतेः पथोदर्शयितारःसन्मार्गदर्शकाः ईश्वराःमहांतः मलीमसांमलिनांपा द्धतिंनाददतेनस्वीकुर्वते असन्मार्गंनावलंबतइत्यर्थः मलीमसंतुमलिनंकच्चरंमलदूषितमित्यमरः।।
।।४७।। ।। ।। ।। ।। ।। ।। ।।

 इतीति इतिरघुणासमीरितंप्रगल्भोवचंनिशाम्याकर्ण्यदिवौकसः स्वर्गौकसः दिवौस्वर्गेंतरिक्षेचेतिविश्वः तेषामधिपतिर्देवेंद्रः रघुप्रभावात्सविस्मयः सन्नथंनिवर्त्तयामास उत्तरंप्रतिवक्तुंप्रचक्रमेच॥४८॥ यदिहेराजन्यकुमारक्षत्रियकुमार मध्याभिषिक्तोराजन्योबाहुजःक्षत्रियोविराडित्यमरः॥ ॥ ॥

इतिप्रगल्भंरघुणासमीरितंवचोनिशम्याधिपतिर्दिवौकसां॥ निवर्त्तयामासरथंसविस्मयः प्रचक्रमेचप्रतिवक्तुमुत्तरं॥४८॥ यदात्थराजन्यकुमारतत्तथायशस्तुरक्ष्यंपरतोयशोधनैः॥ जगत्प्रकाशंतदशेषमिज्ययाभवद्गुरुर्लंघयितुंममोद्यतः॥४९॥

यद्वाक्यमात्थब्रवीषिब्रुवः पंचानामित्यादिनाआत्थादेशः तत्तथासत्यं किंतुयशोधनैरस्मादृशैः परतः शत्रुतोयशोरक्ष्यं ततःकिमतआह भवद्गुरुस्त्वत्पिताजगत्प्रकाशंलोकप्रसिद्धं अशेषंसर्वंममतद्यशः इज्यया यागेनलंघयितुंतिरस्कर्तुमतिक्रमितुमुद्यतः उद्युक्तः॥४९॥ ॥ ॥ ३२

43
1947

किंतद्यशइत्यत्राह हरिरिति पुरुषेषूत्तमइतिपुरुषोत्तमः सप्तमीसमासः ननिर्द्धारणइतिषष्ठीसमासप्रतिषेधात् कर्मधारयेतुसन्महत्परमोत्तमोत्कृष्टः पूज्यमानैरित्युत्तमपुरुषइतिस्यात् तथाहरिर्विष्णुरेकएवपुरुषोत्तमः स्मृतःयथात्र्यंबकःशिवएवमहेश्वरःस्मृतःअपरःपुमान्नतथास्मृतः तथामांमुनयः शतक्रतुंविदुः वदंति विदोलटोवेतिरेरुरादेशः नोस्माकंहरिहरयाममचेत्यर्थः एषःत्रितयेपिशब्दोद्वितीयंप्रतिगच्छतीतिद्वितीयगामीनहि द्वितीयत्रकारणेगमिगम्यादीनामुपसंख्यानात्समासः॥५०॥ अत्रइति यतोहमेवशतक्रतुरतस्त्वदीयस्यपितुरयंशततमोश्वः कपि

हरिर्यथैकः पुरुषोत्तमःस्मृतोमहेश्वरस्त्र्यंबकएवनापरः॥ तथाविदुर्मांमुनयःशतक्रतुंद्वितीयगामीनहिशब्दएषनः॥५०॥ अतोयमश्वःकपिलानुसारिणापितुस्त्वदीयस्यमयापहारितः॥ अलंप्रयत्नेनतवात्रमानुगाःपदंपदव्याःसगरस्यसंततेः॥५१॥ ॥ ॥

लानुसारिणाकपिलमुनितुल्येनमयाअपहारितः स्वार्थेणिच् यथासगरराजस्कताःपूर्वमश्वमन्वेषयंतोश्वापहर्त्तायमितिवदंतः कपिलेनमारितास्तथात्वमापिमयानश्यसेइतिकपिलानुसारिणेतिसूचयति॥ तवात्राश्वविषयेप्रयत्नेनालं प्रयत्नोकामारीत्यर्थः निषिद्धस्यनिषेधप्रतिकारणत्वात्तृतीयासगरस्यराज्ञःसंततेः संतानस्यपदव्याः पदमानिधाःमानिधेहिनिपूर्वाद्धधातेर्लुट् नामाङ्भोगइत्यडागमप्रतिषेधःमहास्कंदनंतेविनाशमूलंभवेदितिभावः॥५१॥

ततइति ततस्तुरगस्यरक्षितारघुः प्रहस्यहास्यंकृत्वा अपभयोनिर्भयःसन् पुरंदरंइंद्रंपुनर्बभाषेकिमिति हेदे
वेंद्रतेएषः अश्वामोचनरूपः स्वर्गोनिश्चयोयदि स्वर्गस्वभावनिर्मोक्षनिश्चयाध्यायस्तर्हिपिस्यमरः तर्हिशस्त्रग्र
हणंभवान् रघुमामनिर्जित्यकृतमनेनेतिकृतीकृतकृत्योनखलुइष्टादिभ्यश्चेतिइनिप्रत्ययः रघुग्रहणादा

ततःप्रहस्यापभयःपुरंदरंपुनर्बभाषेतुरगस्यरक्षिता।।गृहाणशस्त्रंयदिसर्गएषते
नखल्वनिर्जित्यरघुंकृतीभवान्।।५२।।सएवमुक्त्वामघवंतमुन्मुखःकरिष्यमाणः
सशरंशरासनं।।अतिष्ठदालीढविशेषशोभिनावपुःप्रकर्षेणविडंबितेश्वरः।।५३।।

त्मनोदुर्जयत्वंसूचयति।।५२।।सइति रघुरुन्मुखःसन् मघवंतमिंद्रमेवमुक्त्वाशरासनंचापंसशरंकरिष्यमाणः करि
ष्यन् आलीढेनआलीढाख्येनस्थानभेदेनविशेषशोभिना अतिशयशोभिनावपुःप्रकर्षेणदेहौन्नत्येनविडंबितेश्वरः
अनुकृतपिनाकीसन् अतिष्ठत् आलीढलक्षणंयादवः धन्विस्थानानिपंचैवतत्रवैशाखमास्त्रियां त्रिवितस्त्यं
तरापादौमंडलंतोरणाकृति अन्वर्थंस्यात्समपदमालीढंतुततोग्रतः दक्षिणेवाममाकुंच्यप्रत्यालीढंविपर्यय
इति।।५३।। ।।९५।। ।।९५।। ।। ।। ।। ।। ।।

95
1947

रघोरिति रघोरवष्टंभमयेनस्तंभरूपेण अवष्टंभः सुवर्णेचस्तंभप्रारंभयोरपीतिविश्वः पत्रिणाबाणेनहृदिहृ
दयेक्षतोविद्धः अतएवामर्षणोऽसहनःक्रुद्धइत्यर्थः गोत्रभिदिंद्रोपिसंभावनीयेचौरेपिक्षोत्रक्षोणीधरेमतइति
विश्वः नवांबुदानीकस्यवृंदस्यमुहूर्तंक्षणमात्रंलांछनेचिन्हभूतेधनुषिदिव्येधनुषीत्यर्थः अमोघमवंध्यंसा
यकंसमधत्तसंहितवान्।।५४।।दिलीपेति भीमानांभयंकराणामसुराणांशोणितेरुधिरेउचितः सइंद्रमुक्तः

रघोरवष्टंभमयेनपत्रिणाहृदिक्षतोगोत्रभिदप्यमर्षणः।।नवांबुदानीकमुहूर्तलांछनेधनुष्य
मोघंसमधत्तसायकं।।५४।।दिलीपसूनोःसबृहद्भुजांतरंप्रविश्यभीमासुरशोणितोचितः।।पपावना
स्वादितपूर्वमाशुगःकुतूहलेनवमनुष्यशोणितं।।५५।।हरेःकुमारोपिकुमारविक्रमःसुरद्विपास्फा
लनकर्कशांगुलौ।।भुजेशचीपत्रलताक्रियोचितेस्वनामचिन्हंनिचखानसायकं।।५६।। ।।

आशुगःसायकः दिलीपसूनोरघोःबृहद्भुजांतरंवक्षःप्रविश्यानास्वादितंपूर्वंपूर्वमनास्वादितंसुप्सुपेतिसमासः मनु
ष्यशोष्यशोणितंकुतूहलेनेवपपौ।।५५।।हरेरितिकुमारस्यविक्रमइवविक्रमोयस्यसतथोक्तःसप्तःस्युपमानपूर्वस्येत्या
दिनासमासः कुमारोपिसुरद्विषस्यैरावतस्यास्फालनेनकर्कशाःअंगुलयोतस्यतस्मिन्शच्याःपवित्राविशेषकैरंकितेश
चीपवित्रविशेषकांकितेहरेरिंद्रस्यभुजेस्वनामचिन्हंस्वनामांकितंसायकंविचखाननिखातवान् निःकंटकराज्यमात्म
स्यायंमहानभिभवइतिभावः।।५६।। ।।९५।। ।।९५।। ।।९५।। ।।९५।।

जहारेति अन्येनमयूरपत्रिणामयूरपत्रवताशरीरेणशक्रस्येंद्रस्यमहाशनिध्वजंमहांतमशनिरूपंध्वजंचहार सश
क्रःसुरश्रियःप्रसत्यबलात्कृतकेशानांव्यपरोपणादवतारणात्छेदनादिवतस्मैरघवेभृशंअत्यर्थंचुकोप तंहंतुमियेषे
त्यर्थः क्रुधद्रुहेत्यादिनासंप्रदानत्वाच्चतुर्थी॥९७॥तयोरिति जयैषिणोरन्योन्यकांक्षिणोस्तयोरिंद्ररघ्वोर्गरुत्मंतपक्षव
तः गरुत्पक्षछदाःपत्रमित्यमरः आश्यांदंष्ट्रायांविषंयेषांते आशीविषाः सर्पाःपृषोदरादित्वात्साधुः आशीरुरगदंष्ट्रा

जहारचान्येनमयूरपत्रिणाशरेणशक्रस्यमहाशनिध्वजं॥चुकोपतस्मैसभृशंसुरःश्रियःप्रसत्यकेशव्य
परोपणादिव॥९७॥ तयोरुपांतस्थितसिद्धसैनिकंगरुत्मदाशीविषभीमदर्शनैः॥ बभूवयुद्धंतु
मलंजयैषिणोरधोमुखैरूर्ध्वमुखैश्चसायकैः॥९८॥ ॥ ॥ ॥ ॥

यामित्यमरः॥तइवभीमदर्शनाःसपक्षाःसर्पाइवदृश्यमानाभयावहाइत्यर्थःतैरधोमुखैरूर्ध्वमुखैश्चधन्विनोस्सयथोदेशाव
स्थितत्वादितिभावः पत्रिभिर्बाणैरुपांतस्थितास्ततस्थादेवाःइंद्रसैनिकाश्चरघोर्यस्मिन्नयोक्तंतुमलंसकुलंयुद्धंबभूव॥९८॥ ३६

97/1945

अतीति वासवः अतिप्रबंधेनातिसांतत्येनप्रहिताभिःप्रयुक्ताभिःअस्त्रवृष्टिभिर्दुःप्रसहस्यतेजसः प्रतापस्या
श्रयांतरंरघुंअंबुदोद्भिःस्वतश्चुतंनिर्गतंवह्निमिवनिर्वापयितुंनशशाकनसमर्थोबभूव रघोरपिलोकपालात्मक
स्येंद्रांशसंभवत्वादितिभावः॥९८॥ततइति ततोरघुहरिचंदनांकितेप्रकोष्ठेमाणिबंधेप्रमथ्यमानार्णवइवधी
रंगंभीरंनदतीतितथोक्तां वध्रिन्यासोतीतिविडंबव्यापकर्माजास्येयेतस्यविडौजसः इंद्रस्यपृषोदरादित्वा

अतिप्रबंधप्रहितास्त्रवृष्टिभिस्तमाश्रयंदुष्प्रसहस्यतेजसः॥शशाकनिर्वापयितुंनवास
वःस्वतश्च्युतंवह्निमिवाद्भिरंबुदः॥९८॥ततःप्रकोष्ठेहरिचंदनांकितेप्रमथ्यमानार्णवधीर
नादिनीं॥रघुःशशांकार्धमुखेनपत्रिणाशरासनज्यामलुनाद्बिडौजसः॥९९॥सचापमुत्सृ
ज्यविरूढमत्सरःप्रणाशनायप्रबलस्यविद्विषः॥महीध्रपक्षव्यपरोपणोचितंस्फुरत्प्रभामंड
लमस्त्रमाददे॥६०॥

साधुःशरासनज्यांधनुर्मौर्वींशशांकस्यार्द्धस्यदंउः सइवमुखंफलंयस्यतंतेनपत्रिणाअलुनाद्छिनत्॥९९॥सइ
ति विरूढमत्सरःप्ररूढवैरः सइंद्रश्चापमुत्सृज्यप्रबलस्यविद्विषःशत्रोःप्रणाशनायवधायमहींधारयंतीतिमहीध्राः
पर्वताःमूलविभुजादित्वात्कप्रत्ययः॥तेषांपक्षव्यपरोपणेपक्षछेदेउचितंस्फुरत्प्रभामंडलमस्त्रंवज्रमायुधमाद
दे॥६०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रघुरिति रघुस्तेनवज्रेणवक्षसिभृशंताडितः सन् सैनिकानामश्रुभिः सहभूमौपपात तस्मिन्पतितेसतिरघुरित्यर्थः निमेषमात्रात्तद्व्यथांवज्रदुःखमवधूयातिरस्कृत्यसैनिकानांहर्षनिःस्वनाः अस्येजातैः सहोत्थितश्च तस्मिन्नुत्थितेहर्षात्सिंहनादांश्चक्रुरित्यर्थः॥ ६१॥ तथापीति वज्राघातेपिशस्त्रव्यवहारेणयुद्धव्यापारेणनिष्ठुरेक्रूरेविपक्षभावेशत्रावचिरंतस्थुषंस्थितवतः। तस्यरघोर्वीर्यातिशयेनवृत्रंहतवान् अत्मणवृत्रेषुक्षिप् तुतोषगस्त्वयंवीरंजा

रघुर्भृशंवक्षसितेनताडितः पपातभूमौसहसैनिकाश्रुभिः॥ निमेषमात्रादवधूयतद्व्यथांसहोत्थितःसैनिकहर्षनिःस्वनैः॥ ६१॥ तथापिशस्त्रव्यवहारनिष्ठुरेविपक्षभावेचिरमस्यतस्थुषः॥ तुतोषवीर्यातिशयेनवृत्रहापदंहिसर्वत्रगुणैर्निधीयते॥ ६२॥ असंगमद्रिष्वपिसारवत्तयानमेत्वदन्येनविसोढुमायुधं॥ अवेहिमांप्रीतमृतेतुरंगमात्किमिच्छसीतिस्फुटमाहवासवः॥ ६३॥

नातीतिभावः कथंशत्रोः संतोषोतआह गुणैः सर्वत्रशत्रुमित्रोदासीनेषुपदमंघ्रिर्निधीयते गुणैः सर्वत्रसंक्रतइत्यर्थः। गुणाः शत्रूनप्यावर्जयतीतिभावः॥ ६२॥ असंगमितिसारवत्तया ऽद्रिष्वप्यसंगमप्रतिबंधंमेआयुधंवज्रंत्वदन्येनविसोढमतोमांप्रीतंसंतुष्टमवेहि तुरंगमादृतेतुरंगमंवर्जयित्वा। अन्याराद्इतरर्तेदिक्शब्दइत्यादिनापंचमी किमिच्छसीतिस्फुटंवासवः आह तुरंगमान्यद्दास्यामीतिभावः॥ ६३॥ ॥ ॥ ॥ ॥ ॥ ॥ ३६

99/1947

ततइति ततोनरेंद्रसूनुः रघुःनिषंगात् तूणीरादसमग्रंयथातथोद्धृतंस्फुवर्णपुंखद्युतिभिः रंजिताःअंगुलयोयेनतामिषुंप्रतिसंहरन् निवर्तयन् नात्रनिहरंतंप्रहरेदितिनिषेधाक्षितिभावः प्रियंवदतीतिप्रियंवदः प्रियवशेवदः खजितिखच्प्रत्ययः अरुर्द्विषदित्यादिनामुमागमः सुरेश्वरंप्रत्यवदत् ननुप्रहरेत्इतिभावः॥ ६४॥ अमोच्यमितिहेप्रभोइंद्रअश्वममोच्यंमन्यसेयदितर्हिअजस्रदीक्षायांप्रयतः समद्गुरुः मममापित्ताविधिनैवकर्मणे

ततोनिषंगादसमग्रमुद्धृतंसुवर्णपुंखद्युतिरंजितांगुलिं॥ नरेंद्रसूनुःप्रतिसंहरन्निषुंप्रियंवदंप्रत्यवदत्सुरेश्वरं॥ ६४॥ अमोच्यमश्वंयदिमन्यसेप्रभोततः समाप्तेविधिनैवकर्मणि॥ अजस्रदीक्षाप्रयतः समद्गुरुः क्रतोरशेषेणफलेनयुज्यतां॥ ६५॥ यथाचवृत्तांतमिमंसदोगतस्त्रिलोचनैकांशतयादुरासदः॥ तवैवसंदेशहराद्विशांपतिःशृणोतिलोकेशतथाविधीयतां॥ ६६॥

समाप्तेसतिक्रतोर्यत्फलंतेनफलेनाशेषेणकृत्स्नेनयुज्यतांयुक्तोस्तु अश्वमेधसमग्रफललाभेकिमश्वेनेतिभावः॥ ६५॥ यथेति सदोगतः स—एदृगंतास्त्रिलोचनस्येश्वरस्यैकांतयाअष्टानामन्यतमत्वात्त्वाद्दुरासदोमाहशैःदुःप्रायोविशांपतिर्यथिमंवृत्तांतंतवसंदेहराद्वार्ताहरीदेवश्रृणोतिच लोकेशहेइंद्रतथाविधीयतां॥ ६६॥ ॥

तथेति मातलि सारथिरिंद्रः रघोः संबंधिनं काममनोरथं तथेति तथास्त्विति शुश्रूवा भाषायां सदवसुचइति स२
कसुप्रत्ययः यथागतं ययौ सुदक्षिणासूनुरपि नातिप्रमत्ताः विजयलोभेप्यश्वनाशाभातिहृष्टः सन् नयर्थ
स्य नशब्दस्य सुप्सुपेति समासः नृपस्य सदो गृहं न्यवर्तत ॥ ६७ ॥ तमिति हरेरिंद्रस्य शासनहारिणा पुरुषेण प्र

तथेति कामं प्रतिशुश्रुवान् रघोर्यथागतं मातलिसारथिर्ययौ ॥ नृपस्य नातिप्रमनाः
सदोगृहं सुदक्षिणासूनुरपि न्यवर्तत ॥ ६७ ॥ तमभ्यनंदत्प्रथमं प्रबोधितः प्रजेश्वरः
शासनहारिणा हरेः ॥ परामृशन्हर्षचलेन पाणिना तदीयमंगं कुलिशव्रणांतिकं ॥
॥ ६८ ॥ इति क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः ॥ समारुरु
क्षुर्दिवमायुषः क्षये ततान सोपानपरंपरामिव ॥ ६९ ॥ ॥ ॥ ॥

थमं प्रबोधितो ज्ञापितः वृत्तांतमिति शेषः प्रजेशो दिलीपः हर्षचलेन पाणिना कुलिशव्रणांकि तस्य रघोरिदं
तदीयमंगं शरीरं परामृशं तं रघुमभ्यनंदत् स्तोषीत् ॥ ६८ ॥ इतीति महनीयशासनः पूजनीयाज्ञः क्षितीश इति महाक्र
तूनामश्वमेधानां नवभिरधिकां नवतिं एकोनशतं आयुषः क्षये दिवं स्वर्गं समारुरुक्षुः आरोढुमिच्छुः सोपानानां परंपरां
पंक्तिमिव ततान ॥ ६९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ३७

101/1945

अथेति अथ विषयेभ्यो व्यावृत्तात्मा निवृत्तचित्तः स दिलीपो यथाविधि यथाशास्त्रं यूने स्नवे नृपतिककुदं
राजचिन्हं ककुदत्ककुदं श्रेष्ठवृषांसे राजलक्ष्मणीति विश्वः सितातपवारणं सितछत्रं दत्वा तया देव्या सुद
क्षिणया सह मुनिवनतरुच्छायां शिश्रिये श्रितवान् वानप्रस्थाश्रमं स्वीकृतवानित्यर्थः तथाहि गलितव
यसां वृद्धानामिक्ष्वाकोः गोत्रापत्यानां तद्राजसंज्ञिकत्वात् अणि लुक् इदं वनगमनं कुलव्रतं हि देव्या स

अथ स विषयाव्यावृत्तात्मा यथाविधि स्नवे नृपतिककुदं दत्वा यूने सितातप
वारणं मुनिवनतरुच्छायां देव्या तया सह शिश्रिये गलितवयसामिक्ष्वा
कूणामिदं हि कुलव्रतं ॥ ७० ॥ इति रघुवंशे महाकाव्ये का
लिदासकृतौ संजिनी समाख्यायां तृतीयः सर्गः ॥ ३ ॥ ॥

हेत्यनेन सपत्नीकवानप्रस्थाश्रमपक्षः उक्तः तथा याज्ञवल्क्यः सुतविन्यस्तपत्नीकस्तया वानुगतो वनं वानप्र-
स्थो ब्रह्मचारी साग्निः सोपानसोव्रजेदिति हरिणीवृत्तमेतत् ॥ ७० ॥ इति श्रीमहोपाध्यायकोलाचलम
ल्लिनाथसूरिविरचितायां रघुवंशव्याख्यायां संजीवनीसमाख्यायां तृतीयः सर्गः ॥ ३ ॥ ॥ ॥

र. म्. टी.

१८

स३

१८

103
1947

३९

105
1948

॥श्रीगणेशायनमः॥ ॥शारदाशारदांभोजवदनावदनांबुजे सर्वदासर्वदास्माकंसंनिधिंसन्निधिंक्रियात् १
सइति सरघुः गुरुणापिभायदत्तंराज्यंराज्ञः प्रजापालनात्मकं पुरोहितादित्वाद्यत् प्रतिपद्यः प्राप्यदिनांते सा
यंकाले सवित्रामित्रेणनिहितंतेजः प्रतिपद्यहुताशनोग्निरिवाधिकंबभौ सौरंतेजः सायमादित्योऽस्तंयद
ग्निमनुप्रविशति अग्निंवाआदित्यः सायंप्रविशतीत्यादित्यश्रुतिप्रमाणात् १ दिलीपेति दिलीपानंतरराज्येप्रति
ष्ठितमवस्थितंतंरघुंनिशम्याकर्ण्यपूर्वंदिलीपकालेराज्ञांहृदयेप्रकर्षेणधूमोऽस्यसंजातः प्रधूमितोग्निःसंतापाग्निरुत्थि

सराज्यंगुरुणादत्तंप्रतिपद्याधिकंबभौ दिनांतेनिहितंतेजःसवित्रेवहुताशनः १
दिलीपानंतरंराज्येतंनिशम्यप्रतिष्ठितं पूर्वंप्रधूमितोराज्ञांहृदयेग्निरिवोत्थितः २
पुरुहूतध्वजस्येवतस्योन्नयनपंक्तयः नवाभ्युत्थानदर्शिन्योननंदुःसप्रजाःप्रजाः ३

तइवप्रज्वलितइतिपूर्वाभ्यधिकःसंतापोऽभूदित्यर्थः राजकर्तृकस्यापिनिशमनस्याप्रावपचारान्नसमानकर्तृ
कत्वविरोधइत्यर्थः २ पुरुहूतेति पुरुहूतध्वजः इंद्रध्वजः सकिलवृष्ट्यर्थंराजभिः पूज्यतइत्युक्तंभविष्यो
त्तरे एवंयःकुरुतेयात्रामिंद्रकेतोर्युधिष्ठिर पर्जन्यःकामवर्षस्याराष्ट्रेतस्मिन्नसंशयइति पुरुहूतध्व
जस्येवतस्यरघोर्नवाभ्युत्थानमभ्युन्नमभ्युदयंचनवाभ्युत्थानदर्शिन्यः ऊर्ध्वप्रस्थिताउल्लसिताउल्लसिता
श्चनयनपंक्तयोयासांताःससंतानाःप्रजाःप्रजास्तासंततौजनइत्युभयत्राप्यमरसिंहः ननंदुः॥ ३ ॥ १

103
1947

सममिति द्विरदइव द्विरदेश्चवागच्छतीतिद्विरदगामिनाकर्तर्युपमानेसप्यजातातिणन्च तेनरघुणासमं
युगपदेवद्वयंसमाक्रांतमधितं किंतुद्वयांपितुरागतंपित्र्यं पितुर्यदितियत्प्रत्ययः सिंहासनमखिलंअरीणां
मंडलंराष्ट्रंच ४ अथसिंहासनारोपणानंतरं तस्यलक्ष्मीसंनिधानमाह छायेति अत्ररघोस्तेजोविशेष
णास्वयंसंनिहितयालक्ष्म्याछत्रधारणंकृतमित्युत्प्रेक्षते पद्मालक्ष्मीः लक्ष्मीः पद्मा कमलाश्रीर्हरिप्रियेत्यर्थः
सास्वयमदृश्याकिलाकिलेतिसंभावनायां सत्वीछायामंडललक्ष्येणकांतिपुंजानुमेयेननतुस्वरूपतोदर्श
न छायामंडलमित्यनातपत्रार्तदृश्यते छायासूर्यप्रियाकांतिः प्रतिबिंबमनातपइत्युभयत्राप्यमरः

सममेवसमाक्रांतंद्वयंद्विरदगामिना तेनसिंहासनंपित्र्यंमखिलंचारिमंडलं ४
छायामंडललक्ष्येणतदृश्याकिलस्वयं पद्मापद्मातपत्रेणभेजेसाम्राज्यदीक्षितं ५
परिकल्पितसांनिध्याकालेकालेचवंदिषु स्तुत्यंस्तुतिभिरर्थ्याभिरुपतस्थे
सरस्वती॥ ६॥

तेनपद्मातपत्रेणपद्ममेवातपत्रंतेनकरणभूतेनसाम्राज्यदीक्षितंसामज्येसाम्राज्येकर्मणिमंडलाधिपत्येदी
क्षितमभिषिक्तं तमेतं अन्यथाकथमेतादृशीकांतिसंपत्तिरितिभावः ५ संप्रतिसरस्वतीसांनिध्यमाहपरिकल्पि
तेति सरस्वतीकालेकालेसर्वदापियोग्याकालेषुनित्यवीप्सयोरितिवीप्सायांद्विर्वचनं वंदिषुपरिकल्पितसांनिध्य
कृतसान्निधानासतीस्तुत्यंस्तोत्रार्हंरघुमर्थ्याभिः अर्थादनपेताभिः धर्मपथ्यर्थन्यायादितियत्प्रत्ययः स्तुतिभिः
स्तोत्रैरुपतस्थे देवताबुध्यापूजितवतीत्यर्थः देवतार्चनात्संचनाद्विष्णुः पृथिवीपतिरितिवालोकपालात्मकत्वा
द्वेत्यनुसंधेयंएवंचसतिउपाद्देवपूजासंगतकरणमित्रकरणपथिष्विति वर्त्तमानादात्मनेपदंसिध्यति॥ ६॥

मन्विति वसुंधरामनुप्रभृतिभिर्मत्वादिभिर्मान्यैः पूज्यैराजभिः भुक्तापिभुक्तेवेत्यर्थः यद्यपीत्यवधार
णे अप्यर्थेयदिवार्थेस्यादितिकेशवः तथापितस्मिन्राज्ञिः अन्यः पूर्वोयस्याः सा अन्यपूर्वानभवतीत्य
नन्यपूर्वा अनन्योपभुक्तेवासीत् तत्प्रथमपथिकेवानुरक्तेवतीत्यर्थः ७ अत्रकारणमाह्सदेति हियस्मा
त्कारणात्सरघुः युक्तदंडतयायथापराधदंडतयासर्वस्यलोकस्यमनआददेजहारकथमिवअतिशीतोत्युस्नोवा
तभवतीतिनातिशीतोष्णः नअर्थस्यनशब्देस्यस्कस्कपेवेतिसमासः दक्षिणोदक्षिणादिग्भवोनभस्वान्वायुरिव
मलयानिलइवेत्यर्थः युक्तदंडतयेस्यत्रकामंदकः उद्वेजयतितृक्ष्णेननमृदुनापरिभूयते दंडेनन्पतिसततस्मा

मनुप्रभृतिभिर्मान्यैर्भुक्तायद्यपिराजभिः तथाप्यनन्यपूर्वेवतस्मिन्नासीद्वसुंधरा ७
समयेतसमक्रांतंद्वयंद्विरदगामिना तेनसिंहासनंपित्र्यमखिलंचारुमंडलं ॥ ८ ॥
नयविद्भिर्नवेराज्ञिसदसच्चोपदर्शितं पूर्वएवाभवत्पक्षः तस्मिन्नाभवदुत्तरः ९

युक्तदंडः प्रशास्यतइति मंदेति तेनरघुणाप्रजाः गुरोर्दिलीपविषयेसहकारोतिसौरभश्वतः आम्रश्चतोरसालो
सौसहकारोतिसौरभोइत्यमरः तस्यफलेनपुष्पोद्गमेषुपुष्पादयइवततोपिगुणाधिकतयाहेतुनामंदोत्कंठाः
अल्पोत्सुकाः कृताः गुणान्तरोश्चउत्तरोविषयः पूर्वविस्मारयतीतिभावः ॥ ८ ॥ नयविद्भिरिति नयविद्भिर्नीतिशास्त्र
ज्ञैः नवेतस्मिन्राज्ञिपूर्वः पक्षएवसंक्रांतस्त्यर्थः उत्तरः विषयेतमधिकस्थेत्यर्थः सधर्मयुद्धादिकंअसत्कूटयुद्धा
दिकंउपदर्शितंतस्मिन्राज्ञिशोभात् सदसतोमध्येसदेवाभवंतथ्यंनाशतमतमित्यर्थः पक्षः साधनयोग्यार्थः प–
पार्श्वगरुत्साध्यसहायबलभिधित्यमरः ॥ ९ ॥ २

पंचानामिति पृथिव्यादीनांपंचानांभूतानामपिगुणाः गंधादय उत्कर्षमतिशयपुपुषुः अत्रोत्प्रेक्षते तस्मि
न्नेतवेमहीपालेसतिसतिसर्ववस्तुजातं नवमिवाभवत् तदेवभूतजात मिदानीमपूर्वमिवाभावादितिभावः
॥१०॥ यथेति यथाप्रल्हादयतीतिप्रल्हादनश्चंद्रः इंदुः नाचतिधातोरौणादिकोरप्रत्ययः प्रल्हादनादाह्लादना
त् अन्वथोनुगतार्थनामकः अभूत् यथातपतीतितनयः सूर्यः नद्यादित्वात्प्रत्ययः प्रतापात्संतापजननात्
अन्वर्थः अनुगतार्थनामकोभूत् तथैवसराजात् यद्यपिराजतेदीप्यतइति यक्प्रत्ययांतः ननुरंजतेः

पंचानामपिभूतानामुत्कर्षंपुपुषुर्गुणाः नवतस्मिन्महीपालेसर्वंनवमिवाभवत् १०
यथाप्रल्हादनाच्चंद्रः प्रतापात्तपनोयथा तथैवसोभूदन्वर्थोराजाप्रकृतिरंजनात् ११
कामंकर्णांतविश्रांतेविशालेतस्यलोचने चक्षुष्मत्तातुशास्त्रेणसूक्ष्मकार्यार्थदर्शिना १२

तथाविधूतानामनेकार्थत्वांद्रंजनाद्राजेत्युक्तंकविना अनेकार्थत्वंधातूनामित्युक्तितिक्षायामित्यादि सूत्रप्रामाण्या
दूहनीयां ११ काममिति विशालेतस्यरघोर्लोचने कामंकर्णांतयोर्विश्रांतेकर्णप्रांतगतेस्यातां अतएवचक्षुष्मता
तुचक्षुफलमित्यर्थः सूक्ष्माकार्यार्थात् विचारनिर्णीततत्कर्तव्यार्थान् दर्शयतीति सूक्ष्मकार्यार्थदर्शीतस्यशा
स्त्रेणशास्त्रदृष्टिरेवदृष्टिः संतुविवेकीतिभावः १२ ॥ ॥ ॥ ॥ ॥

109/1947

लब्धेति लब्धप्रशमनमिति अथ लब्धस्य राज्यस्य प्रशमनेन परिपंथिनाम सुरंजनप्रतीकाराभ्यां स्थिरीकर
णेन स्वस्थः तथा चोक्तं राज्यस्याचिरलब्धस्य शमनं परिपंथिनं रंजनप्रतीकाराभ्यां लब्धप्रशसनं विदुरिति त
तः स्वस्थः स्वस्मिन्तिष्ठतीति स्वस्थः तं तस्मात् द्वितीयं चित्तं परं रघुं पंकजलक्षणा पद्मचिन्हा श्रियो पि विशेषणमेतत्
एतद्द्वितीया पार्थिवी श्रीः राजलक्ष्मीरिव समुपस्थिता प्राप्ता १३ निर्दष्टेति निंशेषं दष्टाः कर्तरिक्तः अत एव ल
घुभिर्मेघैर्मुक्तवर्त्मा त्यक्तमार्गः अत एव सुदुःसहस्तस्य रघोर्भानोः प्रतापः पौरुषमातपश्च प्रतापौ पौरुषातपावित्यु

लब्धप्रशमनं स्वस्थमथैनं समुपस्थिता पार्थिवश्रीर्द्वितीयेव शरत्पंकजलक्षणा १३
निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः १४
वार्षिकं संजहारेंद्रो धनुर्जैत्रं रघुर्दधौ प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ १५

भयत्रापि यादवः युगपद्दिशो व्यानशे व्यतः १४ वार्षिकमिति इंद्रः वर्षासु भवं वार्षिकं वर्षमिति तमित्यर्थः वर्षाभ्य
ष्ठगिति ठक्प्रत्ययः धनुः संजहार संहृतवान् रघुर्जैत्रं जयशीलं जतृशब्दात्तृन्नंतात् प्रज्ञाद्यश्चेति स्वार्थे णप्रत्ययः धनुर्दधौ
हि यस्मात् तौ इंद्ररघू प्रजानामर्थस्य वृद्धिलक्षणस्य साधने विषये पर्यायेण उद्यते कार्मुके याभ्यां तौ पाठांतरे तु परे पर्यायेण   २
उद्यमश्च विश्रमश्च ययोस्तौ पर्यायोद्यमविश्रमौ द्वयोः पर्यायहरणादिति भावः १५ ॥ ॥ ॥

111/1945

पुंडरीकमिति पुंडरीकं सितांभोजमिवातपत्रं यस्य सः पुंडरीकातपत्रः विलसंति काशा तिकाशाख्यतृणकु
सुमान्येव चामराणि यस्य स तथोक्तः ऋतुः शरदृतुः तं रघुं पुंडरीकनिभातपत्रकाशनिभचामरैर्विडंबयामास
अनुचकार तस्य रघोः श्रियं पुनः शोभां तु न प्राप शोभासंपत्ति पद्मासु लक्ष्मीश्रीरिव दृश्यत इति शाश्वतः १६
प्रसादेति प्रसादे तप्रसन्नतया सुखं सुखेतस्मिन्रघौ विशदप्रभे निर्मलकांतौ चंद्रे चेति द्वयोर्विषये चक्षुष्मतां प्री

पुंडरीकातपत्रस्तं विलसत्काशचामरः ऋतुर्विडंबयामास न पुनः प्राप तच्छ्रियं १६
प्रसादसुमुखे तस्मिंश्चंद्रे च विशदप्रभो तदा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः १७
हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु विभूतयस्तदीयानां पर्यस्ता यशसामिव १८

तिरनुरागः तदा समरसा समास्वादा आसीत् तुल्यभोग्येति यावत् रसो गंधरसे स्वाद इत्यमर १७
हंसेति सहंसा श्रेणीषु पंक्तिषु तारासु नक्षत्रेषु संतीति मुद्वत्सु वारिषु च कुमुद्वात्कुमुदप्राये इत्यमरः कुमु
दनड्वेतसेभ्यो मतुप् तदीयानां रघुसंबंधिनां यशसां विभूतयः पर्यस्ता इव प्रसारिताः किमु अन्यथा कथमे
षामेतिधवलिमेति भावः १८ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इक्षुच्छायेति इक्षूणांछायाइक्षुच्छायाबाहुल्यइतिनपुंसकत्वं तत्रनिषण्णाइक्षुच्छायानिषादिन्यः इक्षूणांछाये
तिविग्रहः अन्यथाबाहुलेश्चनपुंसकत्वप्रसंगात् शालीन्गोपयंतिरक्षयंतीतिशालिगोप्यः शालिपालिकाः स्त्रियः
कर्मण्यण् टिड्ढाणञिताहिनाङीप् गोप्तुरक्षकाम्यरघोः गुणेभ्यउदयोयस्यतद्गुणोदयंगुणोत्पन्नंआकुमारंकुमा
रमारभ्यकथोद्घातंकथनारंभोयस्येतत्कुमारैरपिस्तूयमानमित्यर्थः यशोजगुःगायंतिस्म अथवाकुमारस्यस्वर्तः
रघोः याःकथाइंद्रविजयादयः तत्ततआरभ्यकुमारकथंतत्राप्यभिविधावव्ययीभावः आकुमारकथोद्घातमितिपा
ठेकुमारस्यसततस्तस्यकथाभिश्चरितैरुद्भूतंयद्यशः तदारभ्ययभोजगुरितिव्याख्येयं १९ प्रससादेतिमहौजसःकुं

इक्षुच्छायानिषादिन्यस्तस्यगोप्तुर्गुणोदयं आकुमारकथोद्घातंशालिगोप्योजगुर्यशः १९
प्रससादोदयादंभःकुंभयोनेर्महौजसः रघोरभिभवाशंकिचुक्षुभेद्विषतांमनः॥ २०
मदोदग्राःककुद्मंतःसरितांकूलमुद्रुजाः लीलाखेलमनुप्रापुर्महोक्षास्तस्यविक्रमं २१

भयोनेरगस्त्यस्यअगस्त्यःकुंभसंभवइत्यमरः उदयादंभःप्रससादप्रसन्नंबभूवरघोःउदयादभिभवाशंकिद्विषतां
मनःचुक्षुभेकालुष्यंप्राप अगस्त्योदयेसतिजलंप्रसीदतीतिप्रसिद्धिः अत्रवराहमिहिरः उदयेचमुनेरगस्त्य
नाम्नःकुसमायोगमलप्रदूषितानिहृदयानिसतामिवस्वभावात्पुनरंबूनिभवंतिनिर्मलानि॥ २०॥ मदेति मदोद
ग्राःमदोद्धताःककुदेषामस्तीतिककुद्मंतःमहाककुदइत्यर्थः यवादित्वान्मकारस्यवत्वाभावः कूलमुद्रुजाइत्ये
कंपदंसरितांनदीनांकूलान्युद्रुजंतिपीडयंतीतिकूलमुद्रुजाः महांतःउक्षाणःमहोक्षाः अचतुरादीनासाधुःलीलाखे
लंविलासयुक्तंतस्यरघोःसहवतःपरभंजकस्यविक्रमंशौर्यमनुप्रापुःअनुचक्रुः॥ २१॥ ॥ ॥ ॥ ४

113/1947

प्रसवैरिति मदवगंधोयेषांतेमदगंधिभिःउपमाचेतिसमासांतरकारप्रत्ययःसप्तवर्णानांवृक्षविशेषाणांसप्त
पर्णोविशालत्वक्शारदोविशदच्छदइत्यमरः प्रसवैःपुष्पैराहताःतस्यरघोर्नागाःगजाःगजोपिताग्मतंगाइत्यमरः
अस्त्रयएवआहतनिमित्तयास्पर्द्धयेव परोत्कर्षासहिष्णुत्वमस्त्यापरिकीर्तितमितियादवःसप्तधैवप्रसुस्रुवुः मदं
वहप्रतिगजगंधाभिमानादितिभावः कराःकटाभ्यांमदश्रुतिपाकुलकाव्ये कराभासारंप्राभ्यामित्यर्थः २२
सरितइति सरितोगाधाःतलस्पर्शाः कुर्वतीपथ्यः कुर्वंतीपथःमार्गाश्चआश्यानकर्दमान्शुष्कपंकान्कुर्वती
र्वती संयोगाद्यानोधातोर्यतइतिनिष्ठायानत्वंशरत्शरदृतुःतंरघुंशक्तेःउत्साहशक्तेःप्रथमंप्राग्यात्रायैचोद

प्रसवैःसप्तपर्णानांमदगंधिभिराहताः अस्त्रयेवतन्नागाःसप्तधैवप्रसुस्रुवुः॥ २२॥
सरितःकुर्वतीगाधाःपथश्चाश्यानकर्दमात् यात्रायैचोदयामासतंशक्तेःप्रथमंशरत् २३
तस्मैसम्यग्घुतोवन्हिर्वाजिनीराजनाविधौ प्रदक्षिणार्चिर्व्याजेनहस्तेनेवजयंददौ २४

यामासप्रभुमंत्रसंपन्नस्यशरत्त्वयमुत्साहोमुसादयामासेत्यर्थः २३ तस्माइतिवाजिनामश्वानांनीराजनाविधौनी
राजनाख्येशांतिकर्मणिअत्रवराहमिहिरःभगवतिजलधरपक्ष्मक्षयाकरार्कैःकमलनाभेउन्मीलयतितुरंगभक्
ग्नीराजनंकुर्यादिति सम्यग्विधिवद्धुतोसमिधोवन्हिःप्रदक्षिणंनिधडुपभृतीतिचेत्यव्ययीभावःप्रादक्षिण्येयद
र्चिर्ज्वालातस्यव्याजेनहस्तेनेवतस्मैजयंददौ उक्तंचमहायात्रायां स्वाहावशानसमयेस्वयमुज्वलातिरिद्धःप्रद
क्षिणकृतोहुतभुपस्यांगंदिवाकरसुराचलचारुहाराप्टथ्वीसमुद्ररशनांवराकरोतीति वाजिग्रहणंगजादी
नामप्युपलक्षणंतेषामपिनानाराजनाविधानात्॥ २४॥

सेतिस्रतोमूलंस्वानिवासस्थानंप्रत्यंतः शुद्धपार्ष्णिःउद्धृतपृष्ठशत्रुः सेनयारक्षितपृष्ठदेशोवाअययाा
न्वितः अयः शुभावहोविधिरित्यमरः सरघुः षड्विधंमूलभृतादिरूपः मूलंभृतश्रेणिसुहृद्द्विषदाटविकं
बलमित्यमरः आदायदिशांजिगीषयाजेतुमिच्छयाप्रतस्थे अत्रकामंदकः पुरःप्रसर्पन्विशुद्धपृष्ठप्राप्नो
तितीव्रखुलपार्ष्णिर्भेदीयास्यान्पुरारक्ष मणंकडुर्गमिनेकमुख्यंचबलंविदध्यात् देवताभ्यर्चाविद्वांश्चप्र
शस्तग्रहतारकाः षड्विधंतुबलंव्युह्यद्विषतोभिमुखंव्रजेत् २५ अवाकिरन्नितिवयसोरुद्धाःपौरयोषितःप्रय

सगुप्तमूलप्रत्यंतः शुद्धपार्ष्णिरयान्वितः षड्विधंबलमादायप्रतस्थेदिग्जिगी
षया॥२५॥अवाकिरन्वयोवृद्धाःतजालैःपौरयोषितः पृषतैर्मंदरोद्धूतःक्षीरो
मयइवाच्युतं २६ सययौप्रथमंप्राचींतुल्यःप्राचीनबर्हिषा अहितानलिनो
द्धूतैस्तर्जयन्निवकेतुभिः २७ रजोभिस्यंदनोद्धूतैर्गजैश्चघनसन्निभैः ॥भुव
स्तलमिवव्योमकुर्वन्व्योमेवभूतलं॥ २८॥ ॥ ॥ ॥ ॥

तिराजैराचारलमंदरोद्धूतैःपृषतैर्बिंदुभिःक्षीरोर्मयःअच्युतंविष्णुमिवाकिरन्प्राक्षिपन् २६ सइति प्राचीन
बर्हिषाइंद्रेणप्राचीनबर्हिर्मिषाउइतितुल्यः अथवातेनस्ताकश्चिन्महाराजःतेनतुल्यःरघुः अनिलेनानुकूल
वातेनउद्धूतैः पुरःसारितैःकेतुभिर्ध्वजैःअहितान्रिपून्तर्जयन्निवप्रथमंप्राचींप्रतिययौ २७ रजोभिरितिकिंकुर्वन्स्यं
दनोद्धूतैःरजोभिः घनसंनिभैः वर्णतः क्रियातः परिणामाणतोगरुतुल्यैर्गजैश्चयथाक्रमंआकाशंभुवस्तलमिवभूतलंव्योमेवकुर्वन्ययाविति पूर्वेणसंबंधः॥ २८॥ ॥ ॥ ॥ ॥ ॥

115/1947

मरुद्विति सरघुः शक्तिमत्वात्समर्थत्वात्गुरुपृष्ठानिनिर्जलपृष्ठनिर्जलस्थलानि समानौमरुधन्वानावित्यमरः
उदंभांसिउद्धृतजलानिचकार नाव्याःभिस्तार्यनदीः नाव्यंत्रिलिंगनौतार्यइत्यमरः सुखेनतारितुंशक्याःचकार
विपिनानि अटव्यरण्यंविपिनमित्यमरः प्रकाशानिनिर्वृक्षाणिचकारातस्यागम्यंनास्तीतिभावः॥२९॥ प्रतापइति
अग्रेप्रतापतेजोविशेषः सप्रतापः प्रभावश्चयत्तेजकोशदंडजमित्यमरः ततःसेनाकलःतदनंतरंपरागोधूलिः परा

मरुपृष्ठान्युदंभांसिनाव्याःसुप्रतरानदीः विपिनानिप्रकाशानिशक्तिमत्वाच्चकारसः २९
प्रतापोग्रेततःशब्दंपरागस्तदनंतरं ययौपश्चाद्रथानीकंचतुस्कंधेवसाचमूः॥ ३०॥
ससेनांमहतींकर्षन्पूर्वसागरगामिनीं बभौहरजटाभ्रष्टांगंगामिवभगीरथः॥ ३१॥

गःपुष्परजासिधूलिरथानियपोरपीतिविश्वःपश्चाद्रथानीकंरथसमूहइत्येवंप्रकारेणहस्त्यश्वरथपादातयुक्तासाचमूः
चतुस्कंधेवचतुर्व्यूहेवबभौ स्कंधावस्त्रप्रकांडेचसेनासमुदायेपिचेत्यमरः ३० सइति सेनांमहतींपूर्वसागरगामिनींक
र्षन्रघुः हरस्यजटाभ्रष्टांगंगांपूर्वसागरगामिनींकर्षन्भगीरथइवबभौसापिपूर्वसागरगामिनींभगीरथोनामकश्चिकपि
लदग्धानांसागराणांनस्तात्पावनायहरकिरिटाद्गंगाप्रवर्तयिताराजातसंबंधाद्गंगाप्रवर्तयिताराजातसंबंधाद्गंगाभागीरथी
तिगीयते ३१

त्याजितैरिति फलं लोभ वृक्षपक्षे प्रसवं च त्याजितैस्त्यजेर्णिजंताद्द्विकर्मकादप्रधाने कर्मणि क्तः उत्खातैः स्वपदाच्च्यावि
तैः बहुधा मग्नैररणैर्जितैरन्यत्र छिन्नैर्नृपैः पादपैश्च दंतिनो गजस्येव तस्य रघोर्मार्गः उल्बणः प्रकाशः आसीत् प्र
काशं प्रकटं स्पष्टमुल्बणं स्फुटमित्यादवः २२ पौरस्त्यानिति जयाजयशीलः स रघुरेवं पुरे भवः अग्रे भवाः पौरस्त्याः प्राच्या
न्दक्षिणपाश्चात्पुरस्तस्त्यगिति त्यक् प्रत्ययः तांस्तान्सर्वानित्यर्थः वीप्सायां द्विरुक्तिः जनपदान्देशानाक्रमन्
तालीवनैः श्यामं महोदधेः उपकंठं अंतिकाभ्यर्णेत्यमरः २३ अनम्राणामिति अनम्राणं कर्मणि षष्ठी समुद्धर्तुं

त्याजितैः फलमुत्खातैः भग्नैश्च बहुधा नृपैः तस्यासीदुल्बणो मार्गः पादपैरिव दंतिनः॥ २२॥
पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी प्राप तालीवनश्याममुपकंठं महोदधेः॥ २३॥
अनम्राणां समुद्धर्तुं तस्मात्सिंधुरयादिव आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीं॥ २४॥

मूलयितुं तस्माद्रघोः सकाशात् भिन्नार्थवां भयहेतुरित्यपादानत्वं सिंधुरया नदीवेगाद्विव देशेन दविशेषे ह्नौ सिंधुर्नासा
ति स्त्रियामित्यमरः सुह्मैः सुह्मदेशीयैः सुह्मेदयः शब्दाः जनपदवचनाः क्षत्रियमाचक्षते वैतसीं वेतससंबंधिनीं वृ
त्तिं त्राणेतिमित्यमरः आश्रित्यात्मा संरक्षितः अत्र कौटिल्यः बलीयसाभियुक्तो दुर्बलः सर्वत्रानुप्रणतो वेतस
मर्मातिष्ठेदिति॥ २४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

117
1947

वंगानिति नेता नायकः अधिभूर्नायको नेतेत्यमरः स रघुः नौभिः साधनैरुत्खातान् समुन्नद्धान् वंगान्नरा
शः तरसा बलेनात तरसा बलरंहसीतियादवः उत्सरवायन्त्यगंगायाः स्रोतसां प्रवाहाणामंतरेषु मध्येषु
जयस्तंभान्निचखान स्थापितवान् २५ आपादेति आपादपद्मं अंघ्रिपर्यंतं प्रणताः अतएव खानः पर्व
पश्चात्प्रतिरोपिताः अधस्थ स्थापिताः ते वंगाः कलभाः शालिविशेषा वनेज्यापादपद्मं मूलपादपर्यंतं उ
त्खातप्रतिरोपिताः उत्खातप्रतिरोपिताश्च रघुं फलैर्धनैरन्यत्र सस्यैः संवर्द्धयामासुः फलं फलैर्धनेवाजानि
ष्पत्तौ भोगलाभ इति विश्वः २६ स इति स रघुः बद्धद्विरदाः एव सेतवो यैस्तैः स्त्यैः कपिशा नाम नदीं नाम्भिति केचित्स

वंगानुत्खाय तरसा नेता नौसाधनोद्यतान् निचखान जयस्तंभान्गंगास्रोतोंतरेषु स २५ आपादप
द्मप्रणताः कलमा इव ते रघुं फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः २६ स तीर्त्वा कपिशां सैन्यै
र्बद्धद्विरदसेतुभिः उत्कलैर्दर्शितपथः कलिंगाभिमुखो ययौ २७ स प्रतापं महेंद्रस्य मूर्ध्नि तीक्ष्णं
न्यवेशयत् अंकुशं द्विरदस्येव यंता गंभीरवेदिनः २८

उतिनीत्वा उत्कलैः राजभिर्दर्शितपथः दर्शितमार्गः सन् कलिंगाभिमुखो ययौ २७ स इति स रघुः महेंद्रस्य कुलपर्वतविशेष
स्य महेंद्रो मलयः सह्यः शक्तिमानृक्षपर्वतः। विंध्यश्च पारियात्रश्च सप्तात्र कुलपर्वता इति विष्णुपुराणे मूर्ध्नि तीक्ष्णं दुःस
हं प्रतापयतां सादीं गंभीरवेदिनो गजविशेषस्य द्विरदस्य मूर्ध्नि तीक्ष्णं निशितमंकुशमिव न्यवेशयत् निक्षिप्तवान् त्वग्भेदा
च्छोणितस्रावान्मांसस्य च्यवनादपि आत्मानं यो न जानाति स स्याद्गंभीरवेदभिति राजपुत्रीयो चिरकालं नयो चे
ति शिक्षां परिचितामपि गंभीरवेदी विज्ञेयः स गजो गजवेदिभिरिति मृगचर्मणीये॥ २८॥ ॥ ॥

प्रतिजग्राहेति गजसाधन कलिंगः कलिंगानांराजाकालिंगः अस्त्रैरायुधैस्तंरघुंपक्षाणांछेदेउद्यतंशक्रंशिला
वर्षीपर्वतइवप्रतिजग्राह अभियुक्तवान् ३९ द्विषामिति काकुत्स्थोरघुः तत्रमहेंद्राद्रौद्विषांनाराचदुर्दिननाराचा
नांरूचिकाकृतिकणविशेषाणांदुर्दिनलक्षणयावर्षमुच्यते मेघच्छन्नेह्निदुर्दिनमित्यमरः विषह्यसहित्वा सन्मंगल
स्नातइवमंगलविजयार्थमभिषिक्तइवजयश्रियंप्रतिपेदेयच्चुसर्वौषधिस्नानंतन्मांगल्यमुदीरितमितियादवः ४०
तांबुलीनामिति तत्रमहेंद्राद्रौयुध्यतंइतियोधाःपचाद्यच् रचिताःकल्पिताः आपानभूमयःपानयोग्यप्रदेशाः

प्रतिजग्राहकालिंगस्तमस्त्रैर्गजसाधनः पक्षच्छेदोद्यतंशक्रंशिलावर्षीवपर्वतः ३९
द्विषांविषह्यकाकुत्स्थस्तत्रनाराचदुर्दिनं सन्मंगलस्नातइवप्रतिपेदेजयश्रियं ४०
तांबुलीनांदलैस्तत्ररचितापानभूमयः नालिकेरासवंयोधाःशात्रवंचपपुर्यशः ४१
गृहीतप्रतिमुक्तस्यसधर्मविजयीनृपः श्रियंमहेंद्रनाथस्यजहारतुमेदिनीः ४२

आपानंपानगोष्ठिकेत्यमरः येस्तेस्तयोक्ताः संतः नालिकेर मद्यंतांबूलवल्लीनांदलैःपपुः शात्रवंशत्रुसंबंधियशश्च
पपुः शत्रोर्देशाक्रमणेनतदीयंयशोपितत्रजह्रुरित्यर्थः गृहीतेति धर्मविजयीधर्मार्थविजयशीलः सनृपोरघुः
गृहीतश्चासौप्रतिमुक्तस्तस्यमहेंद्रनाथस्यकालिंगस्यश्रियंसंपत्तिंजहार धर्मार्थमितिभावः नमेदिनींतु
जहारशरणागतवात्सल्यादितिभावः॥ ४२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ततइति ततःप्राचीविजयानंतरंफलवताक्रमुकशालिनाफलितक्रमुकश्रेणिमताव्रीह्यादित्वादितिप्रत्ययः वेलायाः
समुद्रकूलस्यतटेनैवोपातेनैवअगस्त्येनचरिताशांदक्षिणांदिशंअनाशास्यजयः अयत्नसिद्धत्वात् अप्रार्थनी
यजयः सन्ययौ अस्योदक्षिणामाशामाश्रित्यनभसिस्थितं वरुणस्यात्मजयोगीविंध्यवातापिमर्दनइति
मत्स्यपुराणे ४३ सइति सरघुर्गजानांदानेनसुगंधिनासुरभिगंधिनागंधस्येत्यादिनाइकारः सेनायांसमवे
तायेसैन्यास्तेसैनिकाश्चतइत्यमरः सैन्यानांपरिभोगेनकावेरीनामसरितंसरितांपत्युःसमुद्रस्यशंकनीया
मिवाकरोत् संभोगलिंगदर्शनाद्भर्तुरविश्वासोभवतीतिभावः ४४ बलैरिति विजिगीषोर्जेतुमिच्छोर्गताध्वन

ततोवेलातटेनैवफलवत्क्रमुकमालिना अगस्त्यचरितामाशामनाशास्यजयोययौ ४३
ससैन्यपरिभोगेनगजदानसुगंधिना कावेरींसरितांपत्युःशंकनीयामिवाकरोत् ४४
बलैरध्युषितास्तस्यविजिगीषोर्गताध्वनः मरीचोद्भ्रांतहारिताःमलयाद्रेरुपत्यकाः ४५
ससंजुरश्वक्षुण्णानामेलानामुत्पतिष्णवः तुल्यगंधिषुमत्तेभकटेषुफलरेणवः॥ ४६

स्तस्यरघोः बलैः सैन्यैः बलंशक्तौबलंसैन्यइतिशाश्वतः मरीचैमरीचवनेषुउद्भ्रांताहारिताः पक्षिविशेषायास्
ताःतेषांविशेषाद्धारितोमद्गुःकारंडवप्लवइत्यमरः मलयाद्रेरुपत्यकाआसन्नभूमयःउपत्यकाद्रेरासन्नाभूमिरितिअमरः
आध्युषिताःउपत्यकास्त्रषिताःउपत्यकास्त्राषितमित्यर्थःउपान्वध्याङ् सइतिकर्मता: ४५ ससंजुरिति अश्वैःक्षु
ण्णानांएवालसतानांउत्पतनशीला अलंकृतित्यादिनाइष्णुच्प्रत्ययः फलरेणवःफलरजांसितुल्यगंधिषुसमानगं
धिषुतेनसहेत्यादिनाबहुव्रीहिः मत्तेभानांकटेषुगंडेषुससंजुःसक्ताःगजगंडकटिःकटइत्यमरः॥ ४६ ।

119
1947

भोगीति चंदनानांचंदनद्रुमाणांभोगिवेष्टनमार्गेसर्पवेष्टनानांनिम्नेषुसमर्पितंत्रिपदच्छेदिनांपादशृंखलच्छे
दिनामपित्रिपदीपादबंधनमितिपादः कवीणांश्रीविरूभववेयेवंग्रीवाबंधनरज्वादिकयावाभ्याणास्यणप्रत्ययः
नात्रसत् अस्रस्तमभूत् उद्भ्रोलजीतिपरस्मैपदं पृषादित्वादत् अनिदितामितिनलोपः ४७ दिशीति
दक्षिणस्यादिशिरवेरपितेजोमंदायतेजोमंदंभवति लोहितादित्वात्मनेपदं दक्षिणायनवेजोमांद्यादिभिभा
वःतातस्यामिवदिशिपांड्याः पांडूनांजनपदानांराजानः पांड्याः पाड्योणवक्तव्यः रघोः प्रतापन्नविषेहिरेन
सोढवतः सूर्यविजयिनोपिजितिवामितिनायकस्यमहानुत्कर्षोगम्यते ४८ ताम्रपर्णीति तेपांड्याः ताम्रपर्णी

भोगिवेष्टनमार्गेषुचंदनानांसमर्पितं तास्रंसत्करिणांग्रैवत्रिपदिच्छेदनामपि ४७ दिशिमंदा
यतेतेजोदक्षिणस्यांरवेरपि तस्यामेवरघोःपांड्याःप्रतापंनविषेहिरे ४८ ताम्रपर्णीसमेतस्यमु
क्तासारंमहोदधेः तेनिपत्यंददुस्तस्मैयशस्वमिवसांचितं ४९ सनिर्विश्ययथाकामंतटेघालीढचं
दनौ स्तनाविवदिशस्तस्याशैलौमलयदर्दुरौ ५० ॥ ॥ ॥ ॥

नद्याःसमेतस्यसमंतगस्यमहोदधेः संचितंमुक्तासारं मौक्तिकवरं सारोबलेस्थिरांसेचिनाप्येक्लीबवरेषित्य
मरः स्वंस्वकीयंचित्तंयशइवतस्मैरेघ्यानिपत्यप्रणिपत्यददुः यशसः शुभ्रत्वादौपम्यं ताम्रपर्णीसंगमेमौक्तिको
त्पत्तिरितिप्रसिद्धिः ४९ सइति असह्येति असह्यविक्रमोस्सरघुः तटेषुसानुपुरस्थलीनवदनोव्याप्तचंदनद्रुमौरस
नपक्षेव्याप्तचंदनानुलेपनौ तस्याः दक्षिणस्याःदिशस्तनाविव स्थितौमलयदर्दुरौनामशैलौयथाकामंयथेष्टंनि
र्विश्यउपभुज्यनिर्वेशोभृत्तिभागयोरित्यमरः उदकास्यसंतीतिउदन्वान् उदधिः उदन्वानुदधिःसिंधुरित्यमरः उद
न्वानुदधौवेतिनिपातितः तेनदूरात्मूलंदूरतस्यक्तंधौकांति स्यादिनासमासःपंचम्यास्तोकादिभ्यइतिपंचमीस्वस्तां
शुकमेदिन्यानितंबमिवस्थितंसह्यंसह्याद्रिमलंघयत्सासःअतिक्रांतोवा ५० ॥५॥ ॥५॥ ॥

६

121/1947

तस्येति अपरांतानांपाश्चात्यानांजनपदानांजयेउद्यतैउद्युक्तैः अपरांतास्तुपाश्चात्यास्याइतियादवः विसर्पिद्भिर्गच्छद्भिः
तस्यरघोरनीकैः सैन्यैः अनीकंतुरणेसैन्यइतियादवः अर्णवः रामस्यजामदग्न्यअस्त्रैरुत्सार्यैरितअपसारि
तोपिसह्यलग्नइवासीत् सैन्यंद्वितीयोर्णवइवदृश्यतइतिभावः परशुरामेणसह्याचलवतीसमुद्रःप्रोत्सारितइतिकथा
नुसंधेया ५२ भयेति तेनरघुणाभयोत्सृष्टविभूषाणांकेरलयोषितांकेरलदेशांगनानांअलकेषुचम्रूरेणुः

असह्यविक्रमःसह्यंधरमुक्तमुदान्विता नितंबमिवमेदिन्याःस्रस्तांशुकमलंघयत् ५१
तस्यानीकैर्विसर्पद्भिरपरांतजयोद्यतैः रामास्त्रोत्सारितोप्यासीत्सह्यलग्नाइवार्णवः ५२
भयोत्सृष्टविभूषाणांतेनकेरलयोषितं अलकेषुचमूरेणुश्चूर्णप्रतिनिधीकृतः ५३
मुरलामारुतोद्धूतमगमत्कैतकंरजः तद्योधवारवाणानांअयत्नपटवासतां ५४

सेनारजः चूर्णस्यकुंकुमादिरजः प्रतिनिधीकृतः तेनयोषितांपलायनंचमूनांनदवधावनंचध्वन्यते ५३
मुरलेति मुरलानामकेरलदेशेषुकाचिन्नदीमुरचीतिकेचित्पठंतितस्यामारुतेनोद्धूतंउत्थापितंकेत
कंसंबंधिकेतकंरजः तद्योधवारवाणासांरघुभटकंचुकानांकंचुकोवारवाणोस्त्रीत्यमरः अयत्नपटवा
सतांअयत्नसिद्धवस्त्रवसनाद्भव्यत्वमगमत् पिष्टातःपटवासकमित्यमरः ५४ ॥ ५

अभ्यभूयेति चरतांवाह्वानावाजीनां वाजिवाहावगंधर्वहयसैंधवसप्तयइत्यमरः गात्रसिंजितैः गात्रस
ह्यमानैकर्त्तरिक्तः वर्मभिः कवचैः पवनेनोद्धूतानांकंपितानांराजतालीवनानांध्वनिरभ्यभूयतवियस्कृ
तः मर्मरइतिपाठेवाह्वानागात्रसिंजितैः गात्रद्युतिभिरित्यर्थः मर्मरः मर्मरोपमाएइतिध्वनविशेषणं ५५
खर्जूरीति खर्जूराणांतृणद्रुमविशेषणां खर्जूरः केतकीनली खर्जूरीचतृणद्रुमाइत्यमरः स्कंधेषुप्रकां
डेषु अस्त्रीप्रकांडस्यान्मूलाछखावधेस्तरोरित्यमरः नद्धानावद्धानाकरिणांगजानांमदोद्गारेणमदस्रावेण
सुगंधिषुकटेषुगंडेषुपुन्नागेभ्यः पुन्नागपुष्पाणिविहायल्पोयपंचमीवक्तव्येतिपंचमीशिलीमुखाः अलयः

अभ्यभूयतवाह्वानांचरतांगात्रसिंजितैः मर्मरः पवनोद्धूतराजतालीवनध्वनिः ५५ खर्जुरिस्कंधन
द्धानांमदोद्गारसुगंधिषु कटेषुकरिणांपेतुःपुन्नागेभ्यःशिलीमुखाः ५६ अवकाशंशिलीदन्वान्रा
मायाभ्यर्थितोददौ अपरांतमहीपालव्याजेनरघवेकरं ५७॥ मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणं
त्रिकूटमेवतत्रोच्चैर्जयस्तंभचकारसः ५८

पेतुः अलिवाणेशिलीमुखाभित्यमरः ततोधिकसौगंध्यादितिभावः ५६ अवकाशमिति उदन्वानुदधिः रामायजामदग्न्या
यअर्थितोयाचितःसन् अवकाशंस्थानंददौकिलरघवेतु अपरांतमहीपालव्याजेनकरवालिंददौबलिदस्तांशवः
स्मराइत्यमरः अपरांतानांसमुद्रमध्यदेशवर्त्तित्वातेदत्तेकरेसमुद्रदत्तत्वोपचारःकरदानंचभीत्यानतुयज्वायेति
रामादपिरघोरुत्कर्षः ५७ मत्तेभेति सरघुर्मत्तानाभिभानांरदनोत्कीर्णानिदंतक्षतान्येवभावोक्तः व्यक्तानिस्फुटावि
क्रमलक्षणानिपराक्रमचिन्हानिवर्णावलीस्थानीयानियस्मिन्तथोक्तः तंत्रिकूटमेनतत्रापरांतदेशेषुउच्चै
र्जयस्तंभचकारः त्रिकूटादिवोत्कीर्णः स्तंभइवरघोर्जयस्थापकोभूदित्यमरः ५८ ॥ ॥ ॥ ९

123/1947

पारशीकेति ततश्चरघुः संयमीयोगितत्वज्ञानेनइंद्रियाख्यानिइंद्रियनामकःरिपूनिवपारशाकान्राज्ञः
जेतुस्थलधर्मनामतस्थेप्रतिनिर्दिष्टेनापिजलपथेनसमुद्रयानस्यनिषिद्धत्वात्द्वीयसोपिस्थलवर्मनाप्रतस्थेतिभा
वः ५९ यवनीतिसरघुः यवनीनांयवनस्त्रीणांजातेरस्त्रीत्यादिनाङीप् मुखानिपद्मानिधेस्थमितसमासः तेषांमधुना
मद्येनयोमदोमदरागःतन्नसहोकथमिवप्राट्अतिरिक्तकालेजलदोदयःप्रावृषिपद्मविकारस्यप्रसंगात् अ
ब्जानांसंबंधिनंबालातपमिवअब्जाद्दिलादब्जसंबंधितासौरापस्य ६० संग्रामेति तस्यरघोरश्वसाधनैरश्वाः

पारशीकांस्ततोजेतुंप्रतस्थेस्थलवर्त्मना इंद्रियाख्यानिवरिपूंस्तत्वज्ञानेनसंयमी ५९
यवनीमुखपद्मानांसहेमधुमदंनसः बालातपमिवाब्जानामकालजलदोदयः ६०
संग्रामस्तमुलस्तस्यपश्चात्यैरश्वसाधनैः शार्ङ्गकूजितविज्ञेयप्रतियोधोरजस्यभूत् ६१

साधनानियेषांतैः पश्चाद्भवैः पाश्चात्यैर्यवनैःसहदक्षिणापश्चात्पुरस्तात्यक् सहयोगेतृतीयाश्रृंगाणांविका
राणिशार्ङ्गानिधनुंषितेषांकूजितैः शब्दैःहेतुलक्ष्यंतरेशार्ङ्गःपुनर्धनुषिशार्ङ्गिणः जयेचश्रृंगविहितेनापेय्याविशे
षादितिकेशवः अथवाशार्ङ्गैःश्रृंगसंबंधिभिःकूजितैर्विज्ञेयाअनुमेयाप्रतिभटायस्मिन्जासितुमुलसंग्रामः
संकुलयुद्धमभूत्तुमुलंरणसंकुलमित्यमरः ६१ ॥ ॥ ॥ ॥ ॥ ॥

र॰ सू॰ टी॰ ३०

भल्लेति भल्लापवर्जितैर्बाणविशेषकृतैः स्कदीफलोभल्लइतियादवः श्मश्रुलैः भवद्भुमुखरोमवद्भिः सि—
ध्मादित्वाल्लट् तेषांयाश्वास्यानांशिरोभिः सरघाभिः मधुमक्षिकेत्यमरः क्षुद्राव्यंगानटीवेश्यासरघाकंटका
रिकेत्यमरः क्षुद्रारुतानिक्षौद्राणिमधूनितेषांपटलैस्तवकैरिवमहीतस्तारछादयामासएतेनयवनाः श्मश्रू
णिस्थापयित्वावेशिवशापनंमकुर्वंतीतिभावः ६२ अपनीतेति तेषांहताविशिष्टाः अपनीतशिरस्त्राणाः अपसा
रितशीर्षण्याः संतः शरण्यागतवत्सलत्वांतंशरणंययुः तथाहिमहात्मानंसंरंभः क्षोभः प्रणिपातः प्रणतइवप्रति

भल्लापवर्जितैस्तेषांशिरोभिश्मश्रुलैर्महीं तस्तारसरघाव्याप्तैः सक्षौद्रपटलैरिव ६२
अपनीतशिरस्त्राणाःशेषास्तंशरणंययुः प्रणिपातप्रतीकारः संरंभोहिमहात्मनां ६३
विनयंतेस्मतद्योधामधुभिर्विजयश्रमं आस्तीर्णाजिनरत्नासुद्राक्षावलयभूमिषु ६४
ततःप्रतस्थेकौबेरींभास्वानिवरघुर्दिशं शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव ६५

कारोयस्यसः किमहतांपरकीयमोद्धत्यमेवासत्यांतनुजीविताभितिभावः ६३ विनयतेति तस्यरघोःयोधाःभटाः
आस्तीर्णानिअजिनानिचर्मश्रेष्ठान्यवतस्यानियासुनासुद्राक्षाणांवलयंतस्यभूमिषुमृद्वीकागोस्तनीद्राक्षेत्यमरः
मधुभिर्द्राक्षाफलोत्पादितैमद्यैःविजयश्रमंयुद्धखेदविनयतेस्मअपनीतवंतः ६४ ततइतिततोरघुर्भास्वान्सूर्यइव
शरैरुस्रैःकिरणैरिवकिरणोस्रमयूखांशुगभस्तिघृणिघृष्टयइत्यमरःउदीच्यान्नृपान्सानुदकानिउद्धरिष्यन्स्वा
गतान्कुर्वन्कुबेरसंबंधिनींकौबेरींदिशमुदीचींप्रतिप्रस्थे ६५ ॥ ॥ ॥ ॥ ३०

125/1947

विनीतेति सिंधुर्नामकाश्मीरदेशेकश्चिन्नदविशेषः देशेनदविशेषोब्धौसिंधुर्नासरितिस्त्रियामित्यमरः तस्यतीर
विवेष्टनैः अंगकरिवर्तनैःविनीताध्वश्रमाः तस्यरघोर्वाजिनःअश्वाःलग्नाःकुंकुमकुंकुमकिंजल्कायेषांतान् अ
थवालग्नकुंकुमाः केसरायेषांतान्स्कंधानदुधुवुःकंपयांतिस्म ६६ तत्रेतितत्रोदीच्यांदिशिभर्तृषुव्यक्तविक्रमं
भर्तृवधेनस्फुटपराक्रमभित्यर्थः रघुचेष्टितंरघुव्यापारःहूणाजनपदाःतत्रराजानस्तेषांसनरोध अंतःपुरस्त्रियः
तासांकपोलेषुपाटलस्त्वः पाटलिम्नःतारनादिकतारुण्यस्यादेशिउपदेशिकंबभूवअथवामाटलादेदिअदिसा

विनीताध्वश्रमास्तस्यसिंधुतीरविवेष्टनैः दुधुवुर्वाजिनस्कंधान्लग्नकुंकुमकेसरान् ६६
तत्रहूणावरोधानांभर्तृषुव्यक्तविक्रमं कपोलपाटलादेशिबभूवरघुचेष्टितं ॥ ६७ ॥
कांभोजाःसमरेसोढुंतस्यवीर्यमनीश्वराः गजालानपरिक्लिष्टैरक्षोटैःसार्धमानताः ६८
तेषांसदश्वभूयिष्ठास्तुंगाद्रविणराशयः उपदाविविशुःशश्वन्नोत्सेकाःकोशलेश्वरं ॥ ६९ ॥

यस्यतत्रबभूवस्वदयंतेमास्यायतइत्यर्थः ६७ कांभोजइतिकांभोजाराजानःसमरेतस्यरघोर्वीर्यंसोढुमनीश्वराः
अशक्ताःसंतःगजानामालानबंधनस्तंभावेल्युटिविभाषाकीयतेस्त्यात्वंतेनक्लिष्टैःपरिक्षितैःअंकोलैःवृक्षविशे
षैःसार्धमानताःनम्राः ६८ तेषामितितेषांकांभोजानांसद्भिरश्वैःभूमिष्ठातुंगाःद्रविणानांहिरण्यानांहिरण्यद्रवि
णंद्युम्नमित्यमरःराशयःसमुदायाःकोसलेश्वरंकोसलदेशाधिपतिंरघुंआपगाःसरितःउदन्वंतंसमुद्रमिवाविवि
शुःअसकृद्विविशुःतथापिउत्सेकागर्वास्तनविविशुःअतएवनिरंतरामित्यस्मिन्नर्थेनदीसमुद्रदृष्टांतः ॥ ६९ ॥ ॥

ततइति ततोनंतरंअश्वाएवसाधनानियस्यतथोक्तः सनुगौर्याः गुरुंपितरंशैलंहिमवंतंउद्धूतैरश्वखरोद्धूतैर्धा
तूनांगैरिकादीनांरेणुभिः तत्कूटानूतस्यशृंगानिकूटोस्त्रीशिखरंशृंगमित्यमरः वर्द्धयन्निवारुरोहउत्सतेनधूलि
दर्शनात्गिरिशिखरवृद्धिभ्रमोजायतइतिभावः ७० शशंसेति तुल्यसत्वानांसैन्यसमानबलानांगुहाशयाःअरतइ
इतितिगुहाशयाः अधिकरणेशेतेरित्रप्रत्ययः तेषांसिंहानांसंबंधिपरिवृत्त्याऽवलोकितंभावक्तःशयित्वैवग्रीवा
भंगेनावलोकनंकर्तृसैन्यघोषेसेनाकलकलेसंभ्रमकारणेसत्यपिअसंभ्रमंअतःक्षोभंविरहनःप्रसत्त्यप्रतिषे
धेतत्पुरुषइष्यतेशशंसकथयामाससैन्येभ्यइत्यध्याहार्यद्वयोर्लभ्यतेबात्येविहितमिवमनोहर्सैरनुमापकमिति

ततोगौरीगुरुंशैलमारुरोहाश्वसाधनः वर्द्धयन्निवतत्कूटानुद्धूतैर्धातुरेणुभिः ७०
शशंसतुल्यसत्वानांसैन्यघोषेप्यसंभ्रमं गुहाशयानांसिंहानांपरिवृत्त्यावलोकितं ७१
भूर्जेषुमर्मरीभूताःकीचकध्वनिहेतवः गंगाशीकरिणोमार्गेमरुतस्तंसिषेविरे॥ ७२

भावः असंभ्रांतत्वेहेतुस्तुल्यसत्वानामितिनहिसमबलःसमबलाद्बिभेतीतिभावः ७१ भूर्जेष्विति भू
र्जेषुभुजपत्रोभुजोम्हईलत्ककर्मिकाअपीतियादवः मर्मरःशुष्कपर्णानांध्वनिरितियादवः अयंचभुर्जादिश
ब्दवत्गुणिन्यपिवर्त्ततेप्रयोज्यतेप्रयोज्यतेचमर्मरैरगुरुधूपगंधिभिरितिअतोमर्मरीभूतामर्मरशब्दवंतोभू
ताइत्यर्थः कीचकानांवेणुविशेषाणांध्वनिहेतवः श्रोत्रसुखाश्चेतिभावः गंगायाःशीकराःकणाःविद्यंतेयेषां
तेतथोक्ताःमरुतोवायुधामार्गेतंरघुंविषेविरिति ७२ ॥ ॥ ॥ ॥ ॥ ३३

127
1947

विसश्रमुरिति सैनिकाः सेनायांसमवेताःवकप्रत्ययः नमेरूणांसुरपुंनगानांछायासुनिषंणानांदशदुपविष्टा
नांमृगाणांकस्तूरिकामृगाणांनाभिभिःवासिनोत्संगाःसुरभिः ततेलाः दृशदः शिलाः अध्यास्यअ धिशी
उःस्थासाकर्मेतिकर्मत्वेहशास्क अजधित्येत्यर्थः विसांताः ७३ सरलाइतिसरलेषुदेवदारुविशेषेषुआसक्ता
निग्रानिमातंगानांकरिणांग्रीवासुभवानिग्रैवेयानिकंठशृंखलानितेषुस्फुरितात्विषःप्रतिफलितभासःओषध
योनक्तमुज्वलंत्योज्योतिर्लताविशेषाःतेतुर्नायकस्यरघोःअस्नेहदीपकाःतैरनिरपेक्षाःप्रदीपाःआसन् ७४
तस्येति तस्यरघोरुत्सृष्टेषुउज्झितेषुनिवासेषुकंठरज्जुभुगजगैवेयकैःक्षताःनिष्पिष्टाःत्वचोयेषांतेदेवदा

विसश्रमुर्नमेरूणांछायास्वध्यास्यसैनिकाः दृषदोवासितोत्संगानिषंणमृगनाभि
भिः ७३ सरलासक्तमातंगग्रैवेयस्फुरितत्विषः आसन्नोषधयोनेतुर्नक्तमस्नेहदीपकाः
॥७४॥ तस्योत्सृष्टनिवासेषुकंठरज्जुक्षतत्वचः गजवर्ष्मकिरातेभ्यःशशंसुर्देवदा
रवः ७५ तत्रयुद्धंरघोर्घोरंपार्वतीयैर्गणैरभूत् नराचक्षेपणीयास्मनिष्पेषोत्पादितानलं ७६
रवः किरातेभ्योवनचरेभ्योगजानावर्ष्मदेहप्रमाणयोरित्यमरः शशंसुः कथितवंतःदेवदारुस्कंधत्वकक्षतैर्ग
जानामौन्नत्यमनुमीयइत्यर्थः ७५ तत्रेति तत्रहिमाद्रौरघोःपर्वतेभवैःपार्वतीयैःपर्वतीच्छ इतिछप्रत्ययः गणैःक
त्सैवसकैतैसत्रभिःसहगणानुत्सवसंकेतानूजयस्तत्रपांउवइतिमहाभारतेनाराचानांक्षेपणिकाकृतिसायका
नांक्षेपणीयानांभिंडिवालानांक्षेपणीयोभिंडिवालःसमोदीर्घमहाफलावितियादवः अश्मनांरघुसंबंधिनामु
पलानांनिष्पेषःअन्योन्यसंघट्टनंतेनउत्पादितःउद्गमितःअनलोग्नियस्मिन्तत्तथोक्तंघोरअन्योन्यभयंकरंयु
द्धमभूत्युद्धमायोधनंधन्यमित्यमरः ७६

शरैरिति सरघुः शरैरुत्सवसंकेतान्विरतोत्सवान्कृत्वाजित्वेत्यर्थः किंनरान्बाहुः स्वभुजयोर्जयोदाहर
णंजयख्यापकप्रबंधविशेषंगापयामास गतिबुद्धीत्यादिनाकिंनराणांकर्मकत्वंगामंचाभवत् पूर्वपराजयःध्व
न्यते ७७ परस्परेति तेषुगणेषुउपायतेन्युक्ताःपाणयोयेषांतेषुमत्सुपरस्यअन्योन्यंराज्ञाहिमवतः सारःध
नरूपः हिमाद्रिणाराज्ञः सारोबलरूपोविज्ञातः एतेनत्यत्रस्यधनानामनर्थत्वंगणानांचाभवत् पूर्वःपराज
यइतिवध्वन्यते ७८ तत्रेति सरघुस्तत्रहिमाद्रौअक्षोभ्यमनध्य्ययशोराशिंनिवेश्यनिधायपौलस्त्येनरावणेन

शरैरुत्सवसंकेतान्सकृत्वाविरतोत्सवान् जयोदाहरणंबाह्वोर्गापयामासकिंनरान् ७७ परस्परेतिज्ञा
नस्तेषूपायनपाणिषु राज्ञाहिमवतःसारोराज्ञःसारोहिमाद्रिणा ७८ तत्राक्षोभ्योयशोराशिंनिवेश्याव
रुरोहसः पौलस्त्यतुलितस्याद्रेरादधानइवह्रियं ७९ चकंपेतीर्णलौहित्येतस्मिन्प्राग्ज्योतिषेश्वरः तद्गजा
लानतांप्राप्तैःसहकालागरुद्रुमैः ८० नप्रसेहेसरुद्धार्कमधारावर्षदुर्दिनं रथवर्त्मरजोप्यस्यकुतएवपताकिनीं
॥८१॥

तुलितस्याद्रेः कैलासस्यह्रियदधानोजनयतिवत्तोदकैलासमगत्वेवप्रतिनिवृत्तइत्यर्थः नहिश्वराः परेणपराजि
तमभियुंजतइतिभावः ७९ चकंपेइति तस्मिन्रघौतीर्णलौहित्यानामनदीयेनतस्मिन्तीर्णलौहित्येसतिप्राग्ज्यो
तिषांजनपदानांईश्वरः तस्यरघोर्गजानामालानतांप्राप्तैःकृष्णागरुवृक्षैःसहचकंपेकंपितवान् ८० नेतिसप्रा
ग्ज्योतिषेश्वरः रुद्धोर्कमावृतस्सूर्यमधारावर्षधारावृष्टिंविनेवदुर्दिनंदुर्दिनाभवत अस्यरघोरथवर्त्मरजोपिनप्रसे
होपताकिनीतुकुतप्रसेहोनकुत्रापीत्यर्थः॥ ८१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ १२

124/1947

कामेति कामरूपाणांकामरूपदेशानांईश्वरः इत्याखंडलत्यविक्रमंअतींद्रियपराक्रमतेरघुभिन्नाः स्व
न्मदाःटकेषुगंडेषुयेषांतैः नागैर्गजैः साधनैर्भेजे नागांदत्वाशरणंगतइत्यर्थः कीदृशैनागैरन्याइघुव्यति
रितान्नपानुउपरुरोधाश्श्रराणामपिश्रूरतमोरघुरितिभावः ८२ कामेति कामरूपेश्वरोराजाहेम पीठा
धिदेवतांतस्यरघोः पादयोः छायांकनकमयपादपिंनीपादकांतिंरत्नान्येवपुष्पाणितेषामुपहारेण
समर्पणेनानर्चअर्चयामास ८३ इतीति जिष्णुर्जयशीलः रघुः इतिदिशोजित्वारथैरुद्धतंरजः

तमीशःकामरूपाणामखंडल-विक्रमं भेजेभिन्नकटैर्नागैरन्यानुपरुरोधयैः ८२
कामरूपेश्वरस्तस्यहेमपीठाधिदेवतां रत्नपुष्पोपहारेणछायामानर्चपादयोः ८३
इतिजित्वादिशोजिष्णुर्न्यवर्ततरथोद्धतं रजोविश्रामयौराज्ञांछत्रशून्येषुमौलिषु ८४
सविश्वजितमारेभेयज्ञंसर्वस्वदक्षिणं आदानंहिविसर्गायसतांवारिमुचामिवा ८५

छत्रशून्येषुरघोरेकछत्रत्वादितिभावः राज्ञांमौलिषुसंघातेषुकेशेषुचूडाकिरीटकेशाश्रसंघातामौल
स्त्रयइत्यमरः विश्रायमन्यवर्ततनिवृत्तः ८४ सइति सरघुः सर्वत्रदक्षिणोस्येयत्तंसर्वस्वदक्षिणं विश्वजि
त्सर्वदक्षिणेतिश्रुतेः विश्वजितंनामयज्ञंआरेभेकृतवान् युक्तंचैतदित्याहसतांसाधूनांवारिमुचांमेघानामि
वआदानमार्जनंविसर्गायत्यागायहि पात्रेविनियोगायेत्यर्थः तत्रकामंदकः न्यायेनोर्जनमर्थस्यरक्षणंव
द्धिनंतथा तत्पात्रेप्रतिपादनंचतुर्विधमिति ८५ ॥ ॥ ॥ ॥ ॥

सत्रांतइति काकुत्स्थरघुः सत्रांतेयज्ञांते सत्रमाच्छादनेयज्ञेसदादानेधनेपिचेत्यमरः सचिवानांसखासचिवसखः सन्‌तेषामन्ध्यतानुसरणद्योतनार्थश्चः सखित्वव्यपदेशःराजाहः सखिभ्यष्टच् गुर्वीभिर्महतीभिः पुरस्क्रियाभिःपूजाभिःशमितंपराजयेनयव्यलीकंदुःखंवैलक्षण्येवातद्येषांतान् वैलक्षण्येव्यलीकेचदुःखमितियादवः चिरविरहेणउत्स्कंठिता अवरोधाःअंतःपुरांगनायेषांतान्राज्ञः अपत्यानिराजन्याःतान् मूर्धाभिषिक्तोराजन्यइत्यमरः स्वपुरंप्रतिनिवृत्तयेप्रतिगमनायानुमेने अनुज्ञा

सत्रांतेसचिवसखःपुरस्क्रियाभिर्गुर्वीभिःशमितपराजयव्यलीकान् काकुत्स्थश्चिरविरहोत्स्कावरोधान्राजन्यान्स्वपुरनिवृत्तयेनुमेने ८८ तेरेखाध्वजकुलिशातपत्रचिन्हंसम्राजश्चरणयुगंप्रसादलभ्यंप्रस्थानप्रणतिभिरंगुलीषुचक्रुर्मौलिस्रक्च्युतमकरंदरेणुगौरं ८७ ॥ इतिरघुवंशेचतुर्थःसर्गः ॥ ४ ॥ ॥ ॥ ॥

तवान् ८८ तत इति तेराजानः रेखायेध्वजाश्चकुलिशानपत्राणिचध्वजाद्याकाररेखाइत्यर्थः तानिचिन्हानियस्यतत्तथोक्तं प्रसादलभ्यंसम्राजः सार्वभौमस्यचरणयुगंप्रस्थानेप्रयाणसमयेयाः प्रणतयाः नमस्काराः ताभिःकरणेः अंगुलीषुयास्त्रजोमालास्ताभ्यश्च्युतेर्मकरंदरेणुभिः गौरवर्णश्वेतंचक्रुः ८७ इतिरघुवंशेमहाकाव्यटीकायांचतुर्थःसर्गः ॥ ४ ॥ श्रीरामकृष्णार्पणमस्तु ॥ ३२

131
1947

श्रीगणेशाय नमः॥ ॥ तमिति विश्वजितिविश्वजिन्नाम्नि अध्वरे यज्ञे यज्ञः सत्रोध्वरो यागइत्यमरः निःशेषं
विश्राणितं दत्तं श्रवणदाने चुरादिः कोशानामर्थराशीनां जातं समूहो येन तं तथोक्तं कोशोस्त्री कुड्मले दिव्ये शास्त्रे
र्थे ईर्थ्ये दृढेततवितियादवः जातं जनितमूढोरितिशाश्वतः एतेन कौत्सस्यानवसरप्राप्तिं सूचयति तं क्षितीशं रघुं
उपात्तविद्यो लब्धविद्यो वरतंतोः शिष्यः कौत्सः ऋष्यंधिकेत्यण्इञोपवादः गुरुदक्षिणार्थं पुष्करादिभ्यो देशे इ
त्यत्र आर्यावर्ते संतितिदितान्नंदतार्थेतिइति अपत्याख्येयइतिभावः प्रपेदे प्राप अस्मिन्सर्गे वृत्तमुपजातिः तल्लक्षणं तु
स्यादिंद्रवज्रायदितौजगौगः उपेंद्रवज्राजतजास्ततोगौ अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ता

तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोशजातं। उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वर
तंतुशिष्यः १ स मृन्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घ्यशीलः। श्रुतप्रकाशं यशसा प्रका
शः प्रत्युज्जगामातिथिमातिथेयः॥ २॥

इति लक्षणात्॥ १॥ सइति। अनर्घ्यशीलः अमूल्यस्वभावः असाधारणस्वभाव इत्यर्थः मूल्ये पूजाविधावर्घः
शीले स्वभावे सद्वृत्ते इति चामरशाश्वतौ यशसा कीर्त्या प्रकाशत इति प्रकाशः पचाद्यच् अतिथिषु साधुरातिथेयः
पथ्यतिथिवसतिस्वपतेर्ढञितिढञ्प्रत्ययः स रघुः हिरण्यस्य विकारो हिरण्मयं दाण्डिनायनादिसूत्रेण निपातः वीत
हिरण्मयत्वात् अपगतसुवर्णपात्रत्वात् यज्ञस्य सर्वस्वदक्षिणाकत्वादिति भावः मृन्मये मृद्विकारे पात्रे अर्घ्यार्थमि
दं पादार्घ्याभ्यां चेति यत् पूजार्थं द्रव्यं निधाय श्रुतेन शास्त्रेण प्रकाशं प्रसिद्धं स्वपरइति श्रुतं श्रुते नवेदशास्त्रा
ण्यां श्रुतं शास्त्रावधृतयोरित्यमरः अतिथिमभ्यागतं कौत्सं अतिथिर्ना गृहागते इत्यमरः प्रत्युज्जगाम॥ २॥ ॥ १

135
1947

तमिति विधिज्ञः शास्त्रज्ञः अकारेण प्रत्यवायभीरुरित्यर्थः मानधनानां अग्रयायी अग्रेसरः अपयशोभीरुरि
त्यर्थः कृत्यवित्कार्यज्ञः आगमनप्रयोजनमवश्यं प्रष्टव्यमिति कृत्यवित् विशांपतिर्मनुजेश्वरः विष्टरभाजं आ
सनगतं उपविष्टमित्यर्थः विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनमित्यमरः वृक्षासनयोर्विष्टर इति निपातः
तं तपोधनं विधिवत् विध्यर्थं यथाशास्त्रमित्यर्थः तदर्हमिति वतिप्रत्ययः अर्चयित्वा आरात्समीपे आरा

तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी॥ विशांपतिर्विष्टरभा
जमारात्कृतांजलिः कृत्यविदित्युवाच॥३॥ अप्यग्रणीर्मंत्रकृतामृषीणां कुशाग्र
बुद्धे कुशली गुरुस्ते॥ यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः॥४॥

रत्समीपयोरित्यमरः कृतांजलिः सन् इति वक्ष्यमाणप्रकारेणोवाच॥३॥ अप्यग्रणीरिति हे कुशाग्रबुद्धे कु
शाग्रीयमितिप्रोक्तः सूक्ष्मदर्शी बुधः पुमानिति हलायुधः मंत्रकृतां मंत्रस्रष्टॄणां सुकर्ममंत्रपापेत्यादिनाक्वि
प् ऋषीणां अग्रणीः श्रेष्ठः ते तव गुरुः कुशली अपि क्षेमवान्किं अपि प्रश्ने गर्हासमुच्चयप्रश्नशंकासंभावनास्वपीत्य
मरः यतो यस्माद्गुरोस्त्वया अशेषं ज्ञानं लोकेनोष्णरश्मेः सूर्याच्चैतन्यं प्रबोध इव आप्तं स्वीकृतं॥४॥ ॥ ॥

कायेनेति। कायेनउपवासादिकृच्छ्रचांद्रायणानां वाचाभेदपाठेन मनसागायत्रीजपादिनापिकरणेन वा सवस्येंद्रस्य धैर्यं लुंपतीति वासवधैर्यविलोपि स्वपदापहारशंकाजनकमित्यर्थः। यत्तपः शश्वदसकृत्। मुहुर्मुहुः पुनः शश्वदभीक्ष्णमसकृत्समाइत्यमरः। तत्संभृतं संचितं मदर्षेः वरतंतोरप्रिविधंवाक्त्रनः कायजं तपः अंतरायैर्विघ्नैः इंद्रप्रेषितषिताप्सरः शापैर्व्ययं नाशं नापाद्यते कच्चित्। न नीयते किं कच्चित्कामप्रवेदनमित्यमरः॥ ५॥ आधारेति। आधारबंधप्रमुखैरालवालनिर्माणादिभिः प्रयत्नैरुपायैः आधारआलवालेंद्रुबंधोधिकरणेपिचेतिविश्वः

कायेन वाचा मनसापिशश्वद्यद्दृज्त्रिणोधैर्यविलोपितप्तं॥ आपाद्यते न व्ययमंतरायैः कच्चिन्महर्षेस्त्रिविधंतपस्तत् ५ आधारबंधप्रमुखैः प्रयत्नैः संवर्द्धितानां सुतनिर्विशेषं॥ कच्चिन्नवाय्वादिरुपप्लवोवः श्रमच्छिदामाश्रमपादपानां॥ ६॥ क्रियानिमित्तेष्वपिवत्सलत्वादभग्नकामामुनिभिः कुशेषु॥ तदंकशय्याच्युतनाभिनाला कच्चिन्मृगीणामनघाप्रसूतिः॥ ७॥ ॥

रूकतेभ्योनिर्गतोविशेषोतिशयोयस्मिन्कर्मणि न तथा संवर्द्धितानां श्रमच्छिदांवः आश्रमपादपानां वाय्वादिः आदिशब्दाद्दावानलादिरुपप्लवोबाधाकच्चिन्नास्ति किं॥ ६॥ क्रियेति क्रियानिमित्तेष्वपि अनुष्ठानसाधनेष्वपि कशेषु मुनिभिर्वत्सलत्वान्मृगस्नेहादभग्नकामा अप्रतिहतेच्छा तेषां मुनीनामंकाएवशय्यास्तासुच्युतानि नाभिनालानि यस्याः सातथोक्तानालोनालमथास्त्रियां॥ मृगीणां प्रसूतिः संततिः अनघा अव्यसना कच्चित् अनपायिनी किमित्यर्थः दुरंवेः नोव्यसने स्वप्नमितियादवः तेहिव्यालभयाद्दशरात्रमंकेएव धारयंति॥ ७॥ ॥ ॥ ॥ ॥

137
1947

निर्वर्त्यंतइति। यैस्तीर्थजलैर्नियमाभिषेको नित्यस्नानादिर्निर्वर्त्यते निष्पाद्यते येभ्योजलेभ्योउद्धृत्येतिशेषः पितॄणां अग्निष्वात्तादीनां निवापांजलयस्तर्पणांजलयः पितृदानंनिवापः स्यादित्यमरः निर्वर्त्यंते। उञ्छानां प्रकीर्णोद्धृतधान्यानां षष्ठैः षष्ठभागैः पालकत्वात् राजग्राह्यैरंकितानि सैकतानि पुलिनानि येषां तानि वो युष्माकं तानितीर्थजलानि शिवानि भद्राणि कच्चित् अनुपद्रुतानि किमित्यर्थः। उञ्छोधान्यांशआदानं कणशांशार्जनं शिलमिति यादवः। षष्ठाष्टमाभ्यां ञ चेति षष्ठशब्दात्भागार्थेञप्रत्ययः अतएवापूरणार्थत्वात्पूरणगुणेत्यादिना षष्ठीसमासप्रतिषेधः सिकताये षु संतीति सैकतानि सिकताशर्कराभ्यां चेत्यणप्रत्ययः॥ ८॥ नीवारेति। का

निर्वर्त्यतेयैर्नियमाभिषेकोयेभ्योनिवापांजलयः॥ तान्युञ्छषष्ठांकितसैकतानि शिवानिवस्तीर्थजलानि कच्चित्॥ ८ ॥ नीवारपाकादिकडंगरीयैरामृश्यतेजानपदैर्न कच्चित्॥ कालोपपन्नातिथिकल्प्यभागं वन्यंशरीरस्थितिसाधनंवः॥ ९ ॥

लेषु योग्यकालेषु उपपन्नानामागतानामतिथीनां कल्प्याः कल्पिताः भागायस्य तत्तथोक्तं वनेभवं वन्यं शरीरस्थितेर्जीवनस्य साधनं वो युष्माकं पच्यतइति पाकः फलं धान्यमिति यावत् नीवारपाकादि आदिशब्दात् श्यामाकादिधान्यसंग्रहः जनपदेभ्यआगतैर्जानपदैः तत आगतइत्यण्प्रत्ययः। कडंगरीयैः कडंगरं बुसंअर्हंतीति कडंगरीयाः कडंगरोबुसंक्लीबेधान्यत्वचिपुमांस्तुषइत्यमरः कडंगरदक्षिणाच्छ्वेतिछप्रत्ययः तैर्गामाहिष्यादिभिर्नामृश्यते कच्चित् नामृश्यते किं न भक्ष्यते किमित्यर्थः॥ ९॥ ॥ ॥

अयीति। किंचत्वंप्रसन्नेनसतामहर्षिणासम्यग्विनीयशिक्षयित्वात्वामुपदिशेत्यर्थः अहावग्रहस्ताश्रमंप्रवे
ष्टुंक्रियार्थोपपदस्येत्यादिनाचतुर्थीअनुमतोपिअनुज्ञातः। किंहियस्मात्तेतवसर्वेषामाश्रमाणामुपकारेक्षमंश
क्तं। क्षमंशक्तेहितेत्रिषुइत्यमरः द्वितीयमाश्रमंगार्हस्थ्यंसंक्रमितुंप्राप्तुमयंकालोहिविद्याग्रहणानं
तरंतथातस्येतिभावः कालसमयवेलासुतुमुन्इतितुमुन्प्रत्ययः सर्वोपकारक्षममित्यत्रमनुः
यथामातरमाश्रित्यसर्वेजीवंतिजंतवः वर्त्तंतेगृहीस्तद्वदाश्रित्येततरआश्रमइति॥१०॥कुशलप्रश्नंविधा

अथिप्रसन्नेनमहर्षिणात्वंसम्यग्विनीयानुमतोगृहाय॥ कालोह्ययंसंक्रमितुं
द्वितीयंसर्वोपकारक्षममाश्रमंते॥१०॥नवार्हतोनाभिगमेनतृप्तंमनोनियो
गक्रिययोत्सुकंमे॥अथाज्ञयाशासितुरात्मनावाप्राप्तोसिसंभावयितुंवनान्मां
॥११॥

याआगमनप्रश्नंचिकीर्षुमाह। नवेति। अर्हतःपूज्यस्यप्रकाशस्य। अर्हःप्रशंसायामितिशतृप्रत्ययःतवाभिगमे
नागमनमात्रेणमेमनोनतृप्तंनतुष्टंकिंतुनियोगक्रियया आज्ञाकरणेनउत्सुकंसोत्कंठंतत्परेप्रसितासक्ताव
ष्टार्थोद्युक्तउत्सुकइत्यमरः। प्रसितोत्सुकाभ्यांतृतीयाचेतिसप्तम्यर्थेतृतीयाशासितुर्गुरोराज्ञयापिआत्म
नास्वतोवाप्रकृत्यादिभ्यउपसंख्यानमितितृतीया। मांसंभावयितुंवनात्प्राप्तोसि। गुर्वर्थंस्वार्थंवाआगमन
मित्यर्थः॥११॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ २

139
1947

इतीति। अर्घ्यपात्रेणमृन्मयपात्रेणानुमितोव्ययः सर्वस्वत्यागोयस्यरघोरितियुक्तप्रकारामुदारामौदा
र्ययुक्तामपिगांवाचंमनोनियोगक्रियोत्सुकंमेइत्येवंरूपांवाचंस्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजलेलक्ष्य
दृष्ट्यास्त्रियांपुंसिगौरित्यमरः निशम्यश्रुत्वावरतंतुशिष्यःकौत्सःस्वार्थोपपत्तिंस्वकार्यसिद्धिंप्रतिदुर्बला
शःसन्मृन्मयपात्रदर्शनाच्छिथिलमनोरथःसन्वरत्नमितिवक्ष्यमाणप्रकारेणवोचत्॥१२॥ सर्वत्रेति। हेराजन्
त्वंसर्वत्रनोस्माकंवार्त्तंस्वास्थ्यमवेहिजानीहिवार्त्तंवल्गुन्यरोगेचेत्यमरः। वार्त्तंपाटवमारोग्यंभव्यंस्वास्थ्यं

इत्यर्घ्यपात्रानुमितव्ययस्यरघोरुदारामपिगांनिशम्य॥स्वार्थोपपत्तिंप्रतिदुर्ब
लाशस्तमित्यवोचद्वरतंतुशिष्यः॥१२॥ सर्वत्रनोवार्त्तमवेहिराजन्नाथेकुतस्त्वय्य
शुभंप्रजानां॥सूर्येतपत्यावरणायदृष्टेः कल्पेतलोकस्यकथंतमिस्रा॥१३॥

मनामयमितियादवः नचैतदाश्चर्यमित्याह नाथेति। त्वयिनाथेश्वरेसतिप्रजानामशुभंदुःखंकुतः तथाहि
अर्थान्तरंन्यस्यतिसूर्यइत्यादिना सूर्येतपतिप्रकाशमानेसतितमिस्रातमस्ततिःतमस्तांतिमिरेरोगेतमिस्रात्तु
तमस्ततौकृष्णपक्षेनिशायांचेतिविश्वः तमिस्रमितिपाठेतमिस्रंतिमिरंतमइत्यमरः लोकस्यजनस्यलोकस्तु
भुवनेजनइत्यमरः दृष्टेरावरणायकथंकल्पेतदृष्टिमावरीतुंनालमित्यर्थः क्लृपेरलमसमर्थत्वात्तद्योगेनमःस्वस्तीत्या
दिनाचतुर्थी अलमितिपर्याप्त्यर्थग्रहणमितिभगवान्भाष्यकारः संपद्येतनकल्पेइत्यर्थः तुल्येसंपद्यमानेचयथेव
क्रव्यात्यदुक्तंतन्नचित्रमित्याह॥१३॥ ॥ ॥ ॥ ॥ ॥ ॥

भक्तिरि। प्रतीक्ष्येषु पूज्येषु पूज्यः प्रतीक्ष्य इत्यमरः। भक्तिरनुरागविशेषस्तेन त्वकुलोचिता कुलाभ्यस्ता अभ्य
स्तेष्वचितं न्याय्यमितियादवः। हे महाभाग सार्वभौमतया भक्त्या पूर्वानतिशेष अतिवर्तसे किं तु सर्वत्र वार्तवेत
ह्रिं कथं खेद खिन्न इव दृश्यसे अत आह व्यतीतेति अहं व्यतीतकालो अतिक्रान्तकालः सन् अर्थिभावात्
त्वामभ्युपेत इति मे विषादः॥१४॥ शरीरेति हे तेरं द्र तीर्थेस्सत्पात्रे प्रतिपादिताऋद्धिर्येन स तथोक्तः तीर्थशा

भक्तिं प्रतीक्ष्येषु कुलोचितां ते पूर्वान्महाभाग तयातिशेषे॥ व्यतीतकालस्त्वहमभ्यु
पेतस्त्वामार्थिभावादिति मे विषादः॥१४॥ शरीरमात्रेण नरेंद्र तिष्ठन्नाभासि तीर्थप्र
तिपादितर्द्धिः॥ आरण्यकोपात्तफलप्रसूतिः स्तंबेन नीवार इवावशिष्टः॥१५॥ ॥

स्त्राध्वरक्षेत्रोपायोपाध्यायमंत्रिष्विति विश्वः योनीजलवतारे त्वमंत्राद्यष्टादशस्वपि गुणपक्षेत्रेन यापात्रे
तीर्थस्यादर्शनेष्वपीति हलायुधः शरीरमात्रेण तिष्ठन् आरण्यभवा मनुष्या मुनिप्रमुखाः अरण्यान्मनु
ष्य इति वुञ् प्रत्ययः तैरुपात्ता फलमेव प्रसूतिर्यस्य सः स्तंबेन कांडेनावशिष्टः प्रकाशादित्वात् तृतीया नीवार इ
व आभासि शोभसे॥१३॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

141
1947

स्थान इति। भवाने को नराधिपः सन् सार्वभौमः सन् मखजं यज्ञजन्यं नाविद्यते किंचनस्यस्येत्यकिंचनः। आचो
पचमित्यादि नामासाथारव्यसकादिषु निपातनात्। तत्पुरुषः तस्य भावस्तत्त्वं निर्धनत्वं व्ययमक्तिप्रकटयति
स्थाने युक्तं युक्ते द्वे सांप्रतं स्थाने इत्यमरः. तथाहि सुरैः पर्यायेण पीतस्य हिमांशोः कलाक्षयो वृद्धेरूपचयात्
श्लाघ्यतरो हि वरः खलु तमेनाः शोभंते गातितविभवा अनुथर्वुनरा इति भावः। अत्र कामंदकः धर्मार्थक्षीण
कोशस्य क्षीणत्वमपि शोभते सुरैः पीतावशेषस्य कृष्णपक्षे विधारवेति॥१६॥ तत्तस्मादन्य कार्यः यावद्यात

स्थाने भवानेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति॥ पर्यायपीतस्य सुरैर्हिमां
शोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः॥१६॥ तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तु
महं यतिष्ये॥ स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोपि॥१७॥ ॥

वस्तु सांकल्पेवद्यो मानेवधारणे भयो जनांतरराहिते काम मन्यतो वदान्यांतरात् गुर्वर्थं गुरुधनमाहर्तुं अर्जयितुं यति ष्ये
तुद्यो स्सेते तुभ्यं अस्ति शुभमस्तु नमः स्वती स्वादिना चतुर्थी तथाहि चातकोपि धारणीपतितं तोयं चातकानां रुजा
करमिति हेतोरनन्यगतकोपीत्यर्थः निर्गलितः अंब्वेव गर्भो यस्य तं शरद्घनं नार्दति न याचते आर्दगतौ याचनेचे
ति धातुः याचनार्थे गणे अर्दनमिति यादवः॥१७॥ ॥ ८॥ ॥ ५॥ ॥ ५॥ ॥ ५॥

एतावदिति। एतावद्वाक्यमुक्त्वा प्रतियातुंकामो यस्य तं प्रतियातुकामं तुंकाममनसोरपीति मकारलोपः महर्षेर्वरतंतोः शिष्यं कौत्सं रघुपतिः रघुर्निषिध्य निवार्य हे विद्वन् त्वया गुरवे प्रदेयं वस्तु किं कियत्किं परिमाणकं वा इत्येवं तं कौत्सं समन्वयुक्त अपृच्छत् प्रश्नोनुयोगः पृच्छा च इत्यमरः॥ १८॥ तत इति। ततो यथावद्यथार्हं अर्हार्थे घतिः विहिताध्वराय विधिवदनुष्ठितसदाचाराये त्यर्थः स्मया वेशाविवर्जिताय गर्वाभिनिवेशशून्या

एतावदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य॥ किं वस्तु विद्वन्गुरवे प्रदेयं त्वया कियद्वेति तमन्वयुंक्त॥ १८॥ ततो यथावद्विहिताध्वराय तस्मै स्मयावेशविवर्जिताय॥ वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे॥ १९

यानुद्धतायेत्यर्थः वर्णानां ब्राह्मणादीनामाश्रमाणां ब्रह्मचर्यादीनां च तेषां गुरवे नियामकाय तेषां गुरुत्वं तद्धर्मप्रतिष्ठापकत्वं। वर्णास्तु ब्राह्मणादय इत्यमरः। ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये आश्रमोस्त्री त्यमरः सर्वकार्यनिर्वाहकायेत्यर्थः तस्मै रघवे विचक्षणः कुशलो विद्वान् वर्णी ब्रह्मचारी वर्णिनो ब्रह्मचारिण इत्यमरः वर्णी ब्रह्मचारीति णिनिप्रत्ययः। स कौत्सः प्रस्तुतं प्रकृतमाचचक्षे॥ १९॥ ॥

143
1947.

समाप्तेति समाप्तविद्येन मया महर्षिर्गुरुर्दक्षिणास्वीकारार्थं विज्ञापितोभूत् स च गुरुः चिराय अस्खलितोपचारां तां दुष्करां मे भक्तिमेव पुरस्तात् प्रथमं मगणयत् संख्यातवान् भक्त्यैव तुष्टः किं दक्षिणयेत्युक्तवानित्यर्थः। अथवा भक्तिमेव दक्षिणामगणयदिति योज्यं॥ २०॥ निर्बंधेति निर्बंधेन प्रार्थनातिशयेन संजातरुषा संजातक्रोधेन गुरुणा अर्थकार्श्यं दारिद्र्यं अचिंतयित्वा अविचार्य अहं वित्तस्य धनस्य चतस्रो दश कोटिश्च

समाप्तविद्येन मया महर्षिर्विज्ञापितोभूद्गुरुदक्षिणायै स मे चिराय अस्खलितोपचारां तां भक्तिमेवागुणयत्पुरस्तात्॥ २०॥ निर्बंधसंजातरुषार्थकार्श्यमचिंतयित्वा गुरुणाहमुक्तः॥ वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति॥ २१॥ सोहं सपर्याविधिभाजनेन मत्वा भवंतं प्रभुशब्दशेषं॥ अभ्युत्सहे संप्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य २२

चतुर्दश कोटीर्मे मम आहर आनयेति विद्यापरिसंख्यया विद्यासंख्यानुसारेणेत्युक्तः अत्र मनुः अंगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दशेति॥ २१॥ सोहमिति सोहं सपर्याविधिभाजनेनार्घ्यपात्रेण भवंतं प्रभुशब्द एव शेषो यस्य तं मत्वा निःस्वं निश्चित्येत्यर्थः श्रुतनिष्क्रयस्य विद्यामूल्यस्य अल्पेतरत्वात् अतिमहत्त्वात् संप्रत्युपरोद्धुं निर्बंधुं नाभ्युत्सहे॥ २२॥ ॥ ॥

र. मू. टी.
६

इत्थमिति। द्विजराजकांतिश्चंद्रकांतिः चंद्रसमकांतिस्त्वेनतदर्थप्राप्तिं वैराग्यं वारयति द्विजराजः शशध स ९
रो नक्षत्रेशः क्षपाकर इत्यमरः। तस्मात्सोमो राजा तो ब्राह्मणानामिति श्रुतेः एनसो निवृत्तेंद्रियवृत्तिः
जगदेकनाथो रघुर्वेदविदां वरेण श्रेष्ठेन द्विजेन कौत्सेन इत्थमावेदितो निवेदितः सन्नयेनं कौत्सं भूयः पुनर्ज
गाद॥२३॥ गुर्वर्थमिति श्रुतस्य पारं दृष्टवान् श्रुतपारदृश्वा दृशेः क्वनिप्प्रत्ययः गुरवे गुर्वर्थं गुरुदक्षि

इत्थं द्विजेन द्विजराजकांतिरावेदितो वेदविदां वरेण॥ एनोनिवृत्तेंद्रियवृत्तिरेन
जगाद भूयो जगदेकनाथः॥२३॥ गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशाद
नवाप्य कामं॥ गतो वदान्यांतरमित्ययं मे माभूत्परीवादनवावतारः॥२४॥ ॥

णार्थं यथा तथा अर्थी याचकः विशेषणद्वयेनास्य स्वाप्रत्याख्येयत्वमाह रघोः सकाशात्कामं मनोरथं अनवा
प्य अप्राप्य वदान्यांतरं दात्रंतरं गतः स्युर्वदान्यस्थूललक्ष्यदानशौंडा बहुप्रदे इत्यमरः॥ इत्येवंरूपस्य
परिवादस्यापवादस्य नव अद्यं प्रथमो वतारः आविर्भावो माभूत् मास्तु रघोरिति स्वनामग्रहणं संभावित ६
त्वद्योतनार्थं तथा च संभावितस्य चाकीर्तिर्मरणादतिरिच्यत इति भावः॥२४॥ ॥ श्रीराम् ॥

145/1947

स इति। सत्वं महिते पूजिते प्रशस्ते प्रसिद्धे मदीये अग्न्यागारे त्रेताग्निशालायां चतुर्थोऽग्निरिव वसन् द्वित्रीणि
वा अहानि दिनानि संख्यया अव्यया सन्नाद्वूराधिकसंख्याः संख्येय इति बहुव्रीहिः बहुव्रीहौ संख्येये डजब
हुगणादिति डच् प्रत्ययः समासांतः सोढुमर्हसि अर्हन्नहे मान्य तव दर्थं तव प्रयोजनं साधयितुं यावद्यतेय
तिष्ये यावत्पुरानिपातयोर्लडिति भविष्यदर्थे लट्॥२५॥ तथेति- अग्रजन्मा ब्राह्मणः प्रतीतः प्रीतः सन्
तस्य रघोरवितथाममोघां प्रतिज्ञां अथ प्रतिज्ञा सा संविदापत्सु कर्मंग इत्यमरः तां गिरमिति के चित्स्वठंतिम

स त्वं प्रशस्ते महिते मदीये वसंश्चतुर्थोऽग्निरिवाग्न्यगारे॥ द्वित्राण्यहान्यर्हसि सोढुमर्हन्यया
वद्यते साधयितुं त्वदर्थं॥२५॥ तथेति तस्यावितथां प्रतीतः प्रत्यगृहीत्संगिरमग्रजन्मा॥
गामात्तसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात्॥२६॥ वसिष्ठमंत्रोक्षणजा
त्प्रभावादुदन्वदाकाशमहीधरेषु॥ मरुत्सखस्येव बलाहकस्य गतिर्विजघ्ने नहि तद्रथस्य २७

ग्रहीत् सरघुरपि गां भूमिमात्तसारां गृहीतधनां अवेक्ष्य कुबेरादर्थं निष्क्रष्टुमाहर्तुं चकमे इयेष॥ २६॥ वसि
ष्ठेति। वसिष्ठस्य यन्मंत्रेणाभिमंत्र्य प्रोक्षणं तज्जात् प्रभावात् सामर्थ्यात् हेतोः उदन्वदाकाशमहीधरेषु उदन्वत्सु दधा
याकाशे महीधरेषु मरुत्सखस्य मरुतः सखेति सुरुषः बहुव्रीहौ समासांताभावात् ततो वसुस ह्यायस्य
ति लभ्यते वारिणां वाहकौ बलाहकः पृषोदरादित्वात्साधुः तस्येव मेघस्येव तद्रथगतिः संचारे न विघ्नजे नावि
हतादि॥२७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अथेति। अथप्रदोषेरजनीमुखेतस्मिन्काले यानाधिरोहणविधानात्प्रयतो धीरोरघुः संमताद्भवः समंतोराजमात्रा मितिसंभावनस्थेवकैलासनाथंकुबेरंतरसाबलेनजिगीषुर्जेतुमिच्छुः सन्नकल्पितंसज्जितशस्त्रंगर्भेयस्यतंरथ मधिशिष्येरथेशयितवानित्यर्थः अधिशीङ्स्थासांकर्मेतिकर्मत्वं॥ २८॥ प्रातरितिप्रातः प्रायोभिमुखायतस्मै रघवे कोशगृहे नियुक्ता अधिकृताभांडागारिकाः सविस्मयाः संतः कोशगृहस्यमध्येनभसः पंचम्या

अथाधिशिष्येप्रयतः प्रयतः प्रदोषेरथंरघुः कल्पितशस्त्रगर्भं॥ सामंतसंभावनयेवधीरः
कैलासनाथंतरसाजिगीषुः॥ २८॥ प्रातः प्रयाणाभिमुखायतस्मैसविस्मयाः कोशगृहेनियु
क्ताः॥ हिरण्मयींकोशगृहस्यमध्येवृष्टिंशशंसुः पतितांनभस्तः॥ २९॥ तंभूपतिर्भासुरहेमराशिं
लब्धंकुबेरादभियास्यमानात्॥ दिदेशकौत्सायसमस्तमेवशृंगंसुमेरोरिववज्रभिन्नं॥ ३०॥

तसिल्प्रत्ययः पतितांहिरण्मयींसुवर्णमयी दांडिनायेनेत्यादिनानिपातनात्साधुः वृष्टिंशशंसुः कथयामासुः ॥ २९॥ तमिति। भूपतिरघुरभियास्यमानात् अभिगमिष्यमाणात्कुबेराल्लब्धंवज्रेणकुलिशेनभिन्नंसुमेरोः पादं प्रसंतपर्वतमिवास्थितः पादाः प्रत्यंतपर्वताइत्यमरः शृंगंसुमेरोरितिकश्चित्पाठः तभासुरंभास्वरंभजभासमिदोरघुराज नीरघुवप्रत्ययः हेमराशिंसमस्तंमेवकौत्सायदिदेशददौनतुचतुर्दशकोटिमात्रमित्येवकारार्थः॥ ३०॥ ॥ ॥

147
1947

जनस्येति तावर्थिदातारौद्वावपिसाकेतनिवासिनः अयोध्यानिवासिनः साकेतंस्यादयोध्यायांकोशला नंदिनीचसेतियादवः जनस्यअभिनंद्यसत्वौस्तुत्यव्यवसायावभूतां द्रव्याः स्तुत्यव्यवसायेपुसत्वमस्त्रीतुचित्त मरः कोद्रौ गुरुप्रदेयाधिकेः तिरिक्तद्रव्येनिःस्पृहार्थी अर्थिकामादधिकंप्रदश्चेतितथोक्तः प्रोदातृइतिकप्रत्ययः नृपश्च ३१ आशास्यमिति सर्वाणिश्रेयांसिशुभानिहिरण्यादिनिअधिजग्मुषः प्राप्त

जनस्यसाकेतनवासिनस्तौद्वावप्यभूतामभिनंद्यसत्वे॥ गुरुप्रदेयाधिकनिःस्पृहार्थी
नृपोर्थिकामादधिकप्रदश्च॥ ३१॥ अथोष्ट्रवामीशतवाहितार्थंप्रजेश्वरंप्रीतमनामनीषी॥
स्पृशन्करेणानतपूर्वकायंसंप्रस्थितोवाचवचःकौत्सः॥ ३२॥ किमत्रचित्रंयदिकामसूर्भू
र्वृत्तेःस्थितस्याधिपतेःप्रजानां॥ अचिंतनीयस्तुतवप्रभावोमनीषितंद्यौरपियेनदुग्धा॥ ३३॥

वतस्तेतवअन्यस्तुत्रातिरिक्तंआशास्यमासीत् साध्यंआशंसनीयंआशास्यंपुनरुक्तभूतंसर्वसिद्धमित्यर्थः किंतुईदृशंसुत्वंभवतंभवतः पितेवआत्मेवगुणानुरूपंतत्तुल्यगुणमित्यर्थः पुत्रंलभस्वप्राप्नुहि ३४ इत्थमिति अग्रजन्मा· ब्राह्मणः अग्रजन्माद्विजश्रेष्ठभ्रातरिब्राह्मणेस्मृतः इतिविश्वः इत्थंराज्ञेआशिषंप्रयुज्यगुरोः सका शंसमीपंप्रतीयायप्राप। राजापिजीवलोकः जीवसमूहः जीवप्राणीनिमीष्यतामितिविश्वः प्रकाशालोकंप्रकाश मिवचैतन्यमितिपाठेज्ञानमिवातस्मादृशोराश्रुसुतंलेभेप्राप॥ ३५॥ ॥ ॥ ॥ ॥ ॥

ब्राह्मेइति तस्यरघोर्देवीमहिषीब्राह्मे ब्रह्मस्येदमित्यण् ब्रह्मदेवताके अभिजिन्नामके मुहूर्तेईषदसमा
मंकुमारंकुमारकल्पंस्कंदसदृशंईषदसमाप्तविख्यादिना कल्पप्रत्ययः कुमारंपुत्रंसुषुवेकुमारोबालके
स्कंदइतिविश्वः अतोब्राह्ममुहूर्तोपिनत्वात्सितारघुः ब्रह्मणोविधेरेवनाम्नातममजन्मानंपुत्रंअजंअ
जनामकंचकार अहजोहरोहरेकामंविधोवागेरघोःसुतइतिविश्वः॥२६॥ — — — अमीतमना

आशास्यमन्यत्पुनरुक्तभूतंश्रेयांसिसर्वाण्यधिजग्मुषस्ते॥पुत्रंलभस्वात्मगुणानुरूपं
भवंतमीड्यंभवतःपितेव॥३४॥इत्थंप्रयुज्याशिषमग्रजन्माराज्ञेप्रतीयाय गुरोःसकाशं॥
राजापिलेभेसुतमाशुतस्मादालोकमर्कादिवजीवलोकः॥ ३६॥ ब्राह्मेमुहूर्तेकिलतस्य
देवीकुमारकल्पंसुषुवेकुमारं॥ अतःपिताब्रह्मणएवनाम्नातमात्मजन्मानमजंचकार॥ ३६॥

महर्षिकौत्सःसंप्रस्थितःप्रस्थास्यमानःसन् आसशायंभूतवत्वेतिभविष्यदर्थेक्तः उष्ट्राणांक्रमेलकानांव
डवानांचशतैर्वाहितार्थंप्रापितधनं आनतपूर्वकायंविनयनम्रतीत्यर्थः प्रजेश्वरंरघुंकरेणस्पृशन्शत्रुमुवाच॥२२॥

149
1947

रूपमिति ॐजितेजिछंवा ॐजस्तेजासिधातूनांमवष्टंभप्रकाशयोःॐजोबलेदीप्तौचेतिविश्वः रूपंवपुः
अथरूपंनपुंसकं स्वभावाकृतिसौंदर्यवपुषुःश्लोकशब्दयोरितिविश्वः तदेवपैतृकंमेववीर्यशौर्यंतद्वेवःनैसर्गिकं
स्वाभाविकमुन्नततंतदेवतादृगेवेत्यर्थः कुमारोबालकः प्रवर्तितः उत्पादितोदीपः प्रदीपात्सोत्पादकदीपादिवः स्वा
त्स्वकीयात्पूर्वादिभ्योनवभ्योवेतिस्माड्वावैकल्पिकः कारणाज्जनकातनविभिदेभिन्नोनाभूत्सर्वात्मनातादृशए
वाभूदित्यर्थः २७ उपासेति गुरुभ्योविधिवद्यथाशास्त्रंउपात्तविद्यंलब्धविद्यंयौवनस्योद्भेदाविर्भावाद्धेतोर्विशे

रूपंतदोजस्वितदेववीर्यंतदेवनैसर्गिकमुन्नततं॥नकारणात्स्वाद्बिभिदेकुमारःप्रवर्तितोदीप
इवप्रदीपात्॥२७॥उपात्तविद्यंविधिवद्गुरुभ्यस्तंयौवनोभेदविशेषकांतं॥श्रीःसंगतुकामापिगु
रोरनुज्ञांधीरेवकन्यापितुराचकांक्षे॥२८॥अथेश्वरेणक्रथकौशिकानांस्वयंवरार्थंस्वसुरं
दुमत्याः॥आप्तःकुमारानयोत्सुकेनभोजेनदूतोरघवेविसृष्टः॥२९॥ ॥ ॥ ॥ ॥

षेणकांतंसौम्यंतमजंप्रतिसाभिलाषापिश्रीःधीरास्थिरोनत्वचिंतास्थिराचित्तोन्नतिर्यातुनर्देयमितिसंज्ञितभिति
भूपलः कन्यापितुरिवगुरोरनुज्ञामाचकांक्षन् येषायोषराज्यादौभूदित्यर्थः अनुज्ञाशब्दात्पितपारतंत्र्यमुपसा
मर्थ्यात्साणिग्रहणयोग्यताचध्वन्यते॥२८॥ अथेति। अथस्वक्रमगिन्याइंदुमत्याःस्वयंवरार्थंकुमारस्यअजस्यआ
नयनेउत्सुकेनक्रथकैशिकानांविदर्भदेशानामीश्वरेणस्वामिनाभोजेनराज्ञाआप्तोहितोदूतोरघवेविसृष्टःप्रेषितः
क्रियामंत्रयोगेपिचतुर्थीनात्रग्रहणमंत्रैवतात्पर्यमितिद्योत्तनार्थं॥२९॥ ॥ ॥ ॥ ॥

तमिति असौरघुः तंभोजंश्लाघ्यसंबंधंअनूचानत्वादिगुणयोगात्स्पृहणीयसंबंधंविचिंत्यविचार्यसत्रंदा रक्रियायोग्यदशं विवाहयोग्यवयसंचिंत्यससैन्यंएनंपुत्रंमहद्धांसमृद्धां विदर्भाधिपस्यभोजस्यराजधानीपुरीं प्रतिप्रस्थापयामासतेस्यामितिधानीकरणयोग्नीत्यधिकरणार्थेल्युट्प्रत्ययः राज्ञांधानीतिविग्रहः॥४०॥त स्येति। उपकार्यासुराज्यभोग्येषुपटभावनादिषु सौधोस्त्रीराजसदनमुपकार्योपकारिकेत्यमरः वन्यतराजा

तंश्लाघ्यसंबंधमसौविचिंत्यदारक्रियायोग्यदशंचपुत्रं॥प्रस्थापयामास
ससैन्यमेनमृद्धांविदर्भाधिपराजधानीं॥४०॥तस्योपकार्यारचितोपचाराव
न्येतराजानपदोपदाभिः॥मार्गेनिवासामनुजेंद्रसूनोर्बभूवुरुद्यानविहारकल्पाः४१

नेक्षीरस्वामीउपक्रियतेउपकारेत्तिचपटमंडपादिराजसदनमितिरविनाउपचाराः शयनादयोयेषुतेतथोक्ताः जान पदानांजनपदेभ्यआगतानामुपदाभिरुपायनैः वन्याः वनेभवाइतरेयेषांतेवन्येतराः अवन्याइत्यर्थः नबहुव्रीहावि तिसर्वनामसंज्ञाप्रतिषेधः तत्पुरुषेसर्वनामसंज्ञाद्रुवारैवमस्यमनुजेंद्रसूनोः अजस्यमार्गेनिवासनिकाः उद्यानानि क्रीडाःपुमानाक्रीडउद्यानमित्यमरः तान्यवविहाराविहारस्थानानिकल्पास्तत्सदृशा इत्यर्थः ईषदसमाप्तौक ल्पप्रत्ययः॥४१॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ १

151
1947

सइति। विलंबिताध्वाअतिक्रांतमार्गः सोजःशीकरार्द्रैःशीतलैरित्यर्थः मरुद्भिर्वातैरानर्तिताः कंपितानक्तमाला यस्मिन्तस्मिन्निदेशार्हइत्यर्थः चिरबिल्वाद्वृक्षभेदाःचिरबिल्वोनक्तमालः करंजश्चकरंजकेइत्यमरः नर्मदायारो धसिरेवायाः तीरेक्लांतश्रांतंरजोभिः धूसराःकेतवोध्वजायस्यतत्सैन्यंनिवेशयामास॥४२॥ तथेति। अथोपरिष्टा दूर्ध्वउपर्युपरिष्टादितिनिपातः भ्रमद्भिर्मदलोभादितिभावः भ्रमरैःप्रागुन्मज्जनात्सूचितःज्ञापितोस्तःसूचितोंतःस लिलेप्रवेशोयस्यसतथोक्तः निर्धौतदानेक्षालितमदे अतएवामलेगंडभित्तीयस्यसतथोक्तः दानंगजमदस्या

सनर्मदारोधसिशीकरार्द्रैर्मरुद्भिरानर्तितनक्तमाले॥निवेशयामासविलंबिताध्वाक्लांतं
रजोधूसरकेतुसैन्यं॥४२॥अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिःप्राक्सूचितांतःसलिलप्रवेशः
निर्धौतदानामलगंडभित्तिर्वन्यःसरितोगजउन्ममज्ज॥४३॥निःशेषविक्षालितधातुना
पिवप्रक्रियामृक्षवतस्तटेषु॥नीलोर्ध्वरेखाशबलेनशंसन्दंतद्वयेनाश्मविकुंठितेन॥४४॥

गइतिशाश्वतः वन्योगजः सरितोनर्मदायाःसकाशात्पूर्वमप्यासलिलप्रत्ययःउन्ममज्जास्थितः॥४३॥ निःशेषति कथंभूतोगजःनिशेषंविक्षालितधातुनापिधौतगैरिकादिनापिनीलाभिरूर्ध्वाभिःरेखाभिःतटाभिघातजनिताभिः शबलेनकर्बुरेण चित्रंकल्मीरकल्माषशबलेताश्चकर्बुरइत्यमरः।अश्मभिःपाषाणैर्विकुंठिकृतेनदंतद्वयेनऋक्ष वान्नामकश्चित्तत्सत्रत्यः पर्वतस्तस्यतटेषुवप्रक्रियांवप्रक्रीडामुत्खातकेलिमित्यर्थःउत्खातकेलिःशृंगाद्यैर्वप्र क्रीडानिगद्यतेइतिशब्दार्णवेशंसन्कथयन्स्वयमित्यर्थः॥४४॥ ॥ ॥ ॥ ॥ ॥

संहारेति। संहारविक्षेपयोः संकोचनप्रसारणयोः लघुक्रियेण क्षिप्रव्यापारेण लघुक्षिप्रमरं द्रुतमित्यमरः हस्ते नभुंडादंडेनहस्तो नक्षत्रबेदे स्यात्करेभकरयोरपीतिविश्वः सशब्दं सघोषं वृहतस्तरंगान् विदारयन् तारामिमुखः ग जः वारिगजबंधनस्थानं वारितिगजबंधनीतिविश्वः यादवः वार्या अर्गला यविष्कभस्य भंगेभंजने प्रवृत्त इव बभौ
॥४९॥ शैलेति। शैलोपमः सगजः शैवलमंजरीणां जालानिवृंदानि उरसा कर्षन् पश्चात्तटमुत्सर्पे से पूर्वं तेनगजेनोत्पी

युग्मं। संहारविक्षेपलघुक्रियेण हस्तेन तीराभिमुखः सशब्दं। बभौ स भिंदन्
बृहतस्तरंगान्वार्यर्गलाभंग इव प्रवृत्तः॥४९॥ शैलोपमः शैवलमंजरीणां
जालानि कर्षन्नुरसा स पश्चात्। पूर्वं तदुत्पीडितवारिराशिः सरित्प्रवाह
स्तटमुत्सर्प॥४६॥ तस्यैकनागस्य कपोलभित्त्योर्जलावगाहक्षणमात्र
शांता॥ वन्येतरानेकपदर्शनेन पुनर्दिदीपे मददुर्दिनश्रीः॥४७॥

डितो उच्चो वारिराशिर्यस्य सः सरित्प्रवाहस्तटमुत्ससर्प॥४६॥ तस्येति। तस्यैकनागस्य एकाकिनो गजस्य कपोलभि त्त्योर्जलावगाहेन जलस्नपनेन क्षणमात्रं शांता तानिवृत्ता मदुर्दिनश्रीः मदवर्षलक्ष्मीः वन्येतराणां ग्राम्याणां अ नेकपानां द्विपानां दर्शनेन पुनर्दिदीपे ववृधे॥४७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ १०

153
1947

सप्तछदेति। शब्दछदस्य वृक्षविशेषस्य क्षीरवत्कटुः सुरभिः प्रवाहः प्रसारो यस्य तं कटुतिक्तकषायास्तु सौरभ्येपि प्रकीर्तिता इति यादवः असत्यं तदीयभेदमाघ्राय सेनागजेंद्रा विलंधिताः तिरस्कृताः अधोरणानां हस्तिपकानां तीव्रो महान्प्रयत्नो यैस्ते तथोक्ताः संतः आधोरणा हस्तिपका हस्त्यारोहा निषादिन इत्यमरः विमुखाः पराङ्मुखाः बभूवुः ॥४८॥ सइति सगजः छिन्नाबंधा यैस्ते छिन्नबंधाः द्रुताः पलायिताः युगंवहंतीति युग्याः वहाः यस्मिन्स्तः स

सप्तछदक्षीरकटुप्रवाहमसह्यमाघ्राय मदं तदीयं। विलंधिताधोरणतीव्रयत्नाः
सेनागजेंद्रा विमुखी बभूवुः॥४८॥ सछिन्नबंधद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तर
थं क्षणेन। रामापरित्राणविहस्तयोधं सेनानिवेशं तुमुलं चकार॥ ४९॥ ॥

चासौ शून्यश्चतं भग्ना अक्षाः रथावयवादारुविशेषाः अक्षो रथस्यावयवे पाशके प्यक्षमिंद्रियमितिशाश्वतः भग्ना क्षा अतएव पर्यस्ताः पातिताः रथा यस्मिन् तं रामाणां स्त्रीणां परित्राणे संरक्षणे विहस्ताः व्याकुलाः विहस्तव्याकुलौ समा वित्यमरः योधा यस्मिन् तं सेनानिवेशं शिबिरं क्षणेन तुमुलं संकुलं चकार॥ ४९॥ ॥ ॥ ॥ ॥

तमिति नृपतेः राज्ञः वन्यः करी अवध्य इति श्रुतवान् शास्त्रात् ज्ञातवान् कुमारः आपतंतमभिधावंतं नंगं जं नि
वर्तयिष्यन् नतु प्रहरिष्यन् अतएव नात्यापतमनतिदीर्घं नञर्थस्य नशब्दस्य सुप्सुपेति समासः नृपस्याङ्गः इषदाकृ
ष्टचापः सन्विशिखेन बाणेन कुंभे जघान अत्रवाक्कृषः लक्ष्मीकामोयुद्धादन्यत्र करिबंधनकुर्यात् इयंश्रीर्यत्करि
णइति अतएववसुधादन्यत्र द्योतनार्थमेव वन्यग्रहणं कृतं॥ ५०॥ सइति। सगजोविद्धमात्रः ताडितमात्रः कि

तमापतंतं नृपतेरवध्यो वन्यः करीति श्रुतवान्कुमारः॥ निवर्तयिष्यन्विशिखेन कुंभे जघान
नात्यायतकृष्टचापः॥ ५०॥ सविद्धमात्रं किल नागरूपमुत्सृज्य तद्विस्मितसैन्यदृष्टः॥ स्फु
रत्प्रभामंडलमध्यवर्ति कांतं वपुर्व्योमचरं प्रपेदे॥ ५१॥ अथप्रभावोपनतैः कुमारं कल्प
द्रुमोत्थैरवकीर्य पुष्पैः॥ उवाच वाग्मी दशनप्रभाभिः संवर्धितोरस्थलतारहारः॥ ५२॥ ॥

लनतु प्रहृतः तथापि नाम रूपं गजशरीरमुत्सृज्यते न दत्तां तेन विस्मितैः तद्विस्मितैः सैन्यैर्दृष्टः सन् पुरतः प्रभामंड
लस्यमध्यवर्ति कांतं मनोहरं व्योमचरं वपुः प्रपेदे प्राप॥ ५१॥ अथेति अथ प्रभावोपनतैः प्राप्तैः कल्पद्रुमोत्थैः कल्पवृ
क्षोत्पन्नैः पुष्पैः कुमारमजमवकीर्य अभिलषदशनप्रभाभिः दंतकांतिभिः संवर्द्धिताउरःस्थलेये तारहाराः स्थूलमु
क्ताहारस्ते येन सतथोक्तः वाचोऽस्य संतीति वाग्मी वक्ता वाचो ग्मिनिरिति प्रत्ययः सपुरुषउवाच॥ ५२॥ ॥ ११

155
1947

मतंगेति। अवलेपमूलात् दर्पहेतुकात् अवलेपस्तु गर्वे स्याल्लेपने दूषणेपि चेति विश्वः मतंगस्य मुनेः शापात् मतंगस्त्वं
जत्वं गजत्वं प्राप्तवानस्मि मां प्रियदर्शनस्य प्रियदर्शनाख्यस्य गंधर्वपतेः गंधर्वराजस्य तनुजः पुत्रः पुत्रस्त्रियांमू
र्तिस्तनुस्तनूरित्यमरः तन्वादेर्वेति केचिदित्यूङ् प्रियंवदं प्रियंवदाख्यमहि जानीहि प्रियं वदतीति प्रियंवदः प्रि
यंवशोवदः खजिति खच्प्रत्ययः॥ ५२॥ सइति। समहर्षिश्च प्रणतेन मया अनुनीतः सन् पश्चान्मृदुतां शांतिमगच्छत्

मतंगशापादवलेपमूलादवाप्तवानस्मि मतंगजत्वं॥ अवेहि गंधर्वपतेस्तनूजं प्रियंवदं मां प्रि
यदर्शनस्य॥ ५३॥ सचानुनीतः प्रणतेन पश्चान्मया महर्षिर्मृदुतामगच्छत्॥ उष्णत्वमग्न्यातप
संप्रयोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य॥ ५४॥ इक्ष्वाकुवंशप्रभवो यदा ते भेत्स्यत्यजः कुं
भमयोमुखेन॥ संयोक्ष्यसे स्वेन वपुर्महिम्ना तदेत्यवोचत्स तपोनिधिर्मां॥ ५५॥ ॥

तथाहि जलस्य उष्णत्वमग्नेरातपस्य वासंप्रयोगात्संपर्कात् नतु प्रकृत्या उष्णत्वं यत् शैत्यं सा प्रकृतिः स्वभावः विधेयप्रा
धान्यात् सेति स्त्रीलिंगनिर्देशः महर्षीणां शांतिरेव स्वभावो न क्रोधइत्यर्थः॥ ५४॥ इक्ष्वाक्विति। इक्ष्वाकुवंशेप्रभवोय
स्यस्यः अजोयदा ते कुंभमयोमुखेन लोहाग्रेण शरेण भेत्स्यति इष्यति तदा स्वेन वपुषा महिम्ना पुनः संयोक्ष्यसे संग
स्यसे इति सतपोनिधिर्मामवोचत्॥ ५५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

समोचरति। चिरंप्रार्थितंदर्शनंयस्यतेनसत्ववताबलवतात्वयाअहंशापात्संमोचितं मोक्षंप्रापितःभवतः तथप्रति
प्रियंयत्युपकारंनकुर्यांचेत्मेस्वपदोपलब्धिः स्वस्थानप्राप्तिः परं ध्यवसितत्राणस्थानलक्ष्म्याप्रिवस्तुधित्यमरः
वृथास्यादितिउक्तं प्रतिकर्तुमशक्तस्यजीवितान्मरणंवरंमिति॥५६॥ संमोहनमिति। हेसखे सखिशब्देनसम

समोचितः सत्ववतात्वयाहंशापाच्चिरंप्रार्थितदर्शनेन॥ प्रतिप्रियंचेद्भवतोनकुर्यांवृथाहिमे
स्यात्स्वपदोपलब्धिः॥५६॥ अलंह्रियामांप्रतियन्मुहूर्तंदयापरोभूः प्रहरन्नपित्वं॥ तस्मादु
पच्छंदयतिप्रमाज्यंमयित्वयानप्रतिषेधरौक्ष्यं॥५७॥ संमोहनंनामसखेममास्त्रंप्रयोगसंहार
भिभक्तमंत्रं॥ गंधर्वमादत्स्वयतः प्रयोक्तुर्नचारिहंसाविजयश्चहस्ते॥५८॥ ॥ ॥

प्राणतोक्ता यथोक्तं अत्यगः सदनोबंधुः सदैवानुमतः सुहृतः सुहृत् एकक्रियंभवेन्मित्रंसः प्राणसखाभवेदितिप्रयोगसंहा
रयोर्विभक्तमंत्रंगांधर्वंगंधर्वदेवताकंसंमोह्यंतेअनेनेतिसंमोहनंनाममास्त्रंआधत्स्वगृहाण यतोऽस्यास्त्रप्रयोक्तुरस्य प्र
योगिनोऽरिहिंसानचविजयश्चहस्ते हस्तगतोविजयोभवतीत्यर्थः ५७ वधलज्जितःकथमस्त्रग्रहणपरः स्वामिचेतत्राह अ

157
1947

लंभितिकिंचमां प्रतिक्रियाप्रहारनिमित्तनयाअलंकृतः यद्यतोहेतोः त्वंमांप्रहरन्नपिमुहूर्तंदयापरः कृपार
भूः तस्मात्उपच्छंदयंति प्रार्थ्यमानेमयित्वयाप्रतिषेधः परिहारः सएवरौक्ष्यंपारुष्यंतन्नयोज्यंनकर्त्तव्यं ५८
तथेति। नासोमश्चंद्रइवनृसोमः सोमओषधिचंद्रयोरितिशाश्वतः पुरुषश्रेष्ठइत्यर्थः उपमितसमासः। अस्त्रविद
स्त्रज्ञःसोमउद्भवोयस्याः सोमोद्भवायाः सरितोनर्मदायाः रेवातुनर्मदासोमोद्भवामेखलकन्यकेत्यमरः पवित्रंपयउप

गांधर्वमस्त्रंतदितः प्रतीच्छ्यप्रयोगसंहारविभक्तमंत्रं॥ प्रस्वापनंनामयतः प्रहर्तुर्नचारिहिंसा
विजयश्चहस्ते॥५८॥ तथेत्युपस्पृश्यपयःपवित्रंसोमोद्भवायाःसरितोनृसोमः॥ उदङ्मुखःसो
स्त्रविदस्त्रमंत्रंजयाहतस्मान्निगृहीतशापात्॥५८॥ एवंतयोरध्वनिदैवयोगादासेदुषोःस
ख्यमचिंत्यहेतुं॥ एकोययौचैत्ररथप्रदेशान्सौराज्यरम्यानपरोविदर्भान्॥५९॥ ॥ ५॥

स्पृश्यपीत्वाआचम्येत्यर्थः उदङ्मुखःसन्निगृहीतशापान्निवर्त्तितशापात्उरुनादित्यर्थः तस्मात्प्रियंवदा
त्स्त्रमंत्रंजयाह॥५९॥ एवमिति। एवमध्वनिमार्गे दैवयोगाद्दैवशादचिंत्यहेतुअनिर्धार्यहेतुकंसख्यंसखित्वं
सख्युर्यइतियप्रत्ययः आसेदुषोःप्रसवतोस्तयोर्मध्येएकोगंधर्वः चित्ररथस्यकुबेरोद्यानस्यप्रदेशात्
अस्योद्यानंचैत्ररथमित्यमरः अपरोऽजः सौराज्येनराजन्यतयारम्यान्विदर्भप्रदेशान्ययौ॥५९॥ ॥

तमिति। नगरस्योपकंठे समीपे तस्थिवांसं स्थितं तमजं तस्य अजस्य आगमेन आरूढउत्सन्नोगुरुः प्रहर्षो यस्य सः क्रथकैशिकेंद्रो विदर्भराजः प्रवृद्धोर्मिमाली समुद्रश्चंद्र इव प्रत्युज्जगाम प्रत्युद्ययावित्यर्थः। एनमजमग्रयायी सेवाधर्मेण पुरोगच्छन्नित्यर्थः। नीचैर्नम्रः। पुरं प्रवेश्य प्रवेशं कारयित्वा प्रीत्या अर्पितः श्रीः तथा तेन प्रकारेण उपचरत् उपचरितवान् यथा येन प्रकारेण तत्र पुरे समेतो मिलितो जनो वैदर्भ्यं भोजं आगंतुं प्राघुणिकं मेने अजं गृहेप तिं मेने॥६१॥ तस्येति। रघुप्रतिनिधिः रघुकल्पो रघुतुल्य इत्यर्थः उक्तं च दंडिना सादृश्यवाचकप्रस्तावे कल्पदे

तं तस्थिवांसं नगरोपकंठे तदागमारूढगुरुप्रहर्षः॥ प्रत्युज्जगाम क्रथकैशिकेंद्रश्चंद्रं
प्रवृद्धोर्मिरिवोर्मिमाली॥६०॥ प्रवेश्य चैनं पुरमग्रयायी नीचैस्तथोपाचरदर्पितश्रीः॥ मे
ने यथा तत्र जनः समेतो वैदर्भमागंतुमजं गृहेशं॥६१॥ तस्याधिकारपुरुषैः प्रणतैः प्रदि
ष्टां प्राग्द्वारवेदिविनिवेशितहेमकुंभां॥ रम्यां रघुप्रतिनिधिः स नवोपकार्यां बाल्यात्परामिव दशां मद

श्यदेशीयादिप्रत्ययप्रतिनिधी। अपीति। सो॰जः प्रणतैर्नम्रैः कृतवद्भिः कर्तरिक्तः। तस्य भोजस्याधिकारो नियोगस्तस्य पुरुषैरधिकृतैरित्यर्थः प्रदिष्टां निर्दिष्टां प्राग्द्वारस्य वेद्यां विनिवेशितः प्रतिष्ठापितः पूर्णकुंभो यस्यास्तां स्थापितमंगलकलशामित्यर्थः। रम्यां रमणीयां नवोपकार्यां नूतनराजभवनं उपकार्या राजसद्मन्युपकारस्थितेन्यवदितिविश्वः दमनो बाल्यात्परां शैशवादनंतरां दशामिव यौवनमिवेत्यर्थः अध्युवास अधिष्ठितवान् तत्रोषितवानित्यर्थः उपान्वध्याङ्वसइति कर्मत्वं॥६२॥ ॥ ॥ ॥ ॥ ॥

159/1947

तत्रेति। तत्रोपकार्यायां स्वयंवरनिमित्तं समाहृतः सम्मीलितो राजलोको येन तत् कमनीयं स्पृहणीयं कन्याललामकन्यासुश्रेष्ठं ललामो स्त्री ललाम पि प्रभाते पुरुषे ध्वजे श्रेष्ठे भूषापुंड्रशृंगपुच्छचिन्हाश्वलिंगिक्षितिषा दूर्वलिप्सोर्लब्धुमिच्छोः लभेः सनतादुप्रत्ययः अजस्य भावावबोधे पुरुषस्याभिप्रायपरिज्ञानेन कलुषा असमर्थादयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव राजानं कामिनं चोरं प्रविशंति प्रजागरा इति भावः अभिमुखवृत्ते

तत्र स्वयंवरसमाहृतराजलोकं कन्याललामकमनीयमजस्य लिप्सोः॥ भावावबो
धकलुषा दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव॥६३॥ तं कर्णभूषणनि
पीडितपीवरांसं शय्योत्तरच्छदविमर्दकृशांगरागं॥ वैतालिका ललितबंधमनो
हराभिः प्राबोधयन्नुषसि वाग्भिरुदारवाचः॥६४॥ ६५॥ ॥६५॥

ङीवंतः आदंतो वा॥६३॥ कर्णभूषणाभ्यां निपीडितौ पीवरौ पीनावंसौ यस्य तं शय्याया उत्तरच्छदस्योपर्यास्तरणवस्त्रस्य विमर्देन घर्षणेन कृशो विरलो गटागो यस्य तं नत्वंगनासंगादिति भावः प्रथितप्रबोधं प्रकृष्टजानं तमेनम जं सवयसः समानवयस्काः उदारवाचः प्रगल्भगिरः सूतात्मजा बंदिपुत्राः वैतालिका इति पाठः वैतालिका बोधकरा इत्यमरः वाग्भिः स्तुतिपाठैः उषसि प्राबोधयन् प्रबोधयामासुः॥६४॥ ॥६५ ॥

रात्रिरिति। हेमतिमतांवरनिर्द्धारणे षष्ठी। रात्रिर्गतांशय्यांमुंचविनिद्रोभवेत्यर्थः। विनिद्रत्वफलमाह। धा
त्रेति। धात्राब्रह्मणागजतोधूर्भारः धूः स्याद्यानमुखेभारइतियादवः द्विधेवद्वयोरेवेत्यर्थः एवकारस्त्वेती
यनिषेधार्थः। विभक्तानतुविभेज्यस्त्वोपितोरवलुतत्किंनमआह। तांधुमेकतत्एककोटौ तवगुरुःपितांव
निद्रः सन्विभर्त्तितस्याधुरोभवान्धुरंवहतीतिस्त्वमोभारवाहीतस्यपदंवहनस्कानंअपरंयद्धुर्यपदंतदव
—बीविनिद्रोभवेत्यर्थः नह्युभयवात्येएकोवहवतीतिभावः॥६५॥ निद्रेतिचंद्रारविंदराजवदनादयोल

रात्रिर्गतामतिमतांवरमुंचशय्यांधात्राद्विधेवननुधूर्जगतोविभक्ता॥ यामेकतस्तववि
भर्तिगुरुर्विनिद्रस्तयाभवानपरधुर्यपदावलंबी॥६५॥ निद्रावशेनभवताप्यनवेक्ष्य
माणापर्युत्सुकत्वमवलानिशिखंडितेव॥ लक्ष्मीर्विनोदयतियेनदिगंतलंबीसोपित्वदा
ननरुचिंविजहातिचंद्रः॥६६॥ तद्वल्गुनायुगपदुन्मिषितेनतावत्सद्यःपरस्परतुलामधि

क्ष्यास्तानानीतिप्रसिद्धिमाश्रित्योच्यतेनिद्रावशेननिद्राधनेनस्थ्यंतरांसंगोत्रध्वन्यतेः भवतापर्युत्सुकत्वमपि
त्वय्यानुरक्तत्वमपीत्यर्थः प्रसितोत्सुकाभ्यांतृतीयाचेतिसप्तम्यर्थेतृतीया अपिशब्दस्तद्विषयानुरागस्यानपेक्ष
त्वद्योतनार्थंनिशिखंडितार्थभर्तुरन्यासंगज्ञानकलुषिताअवलेवनायकेव ज्ञातेन्यासंगविकृतिखंडितेर्ष्या
कषायितेतिदशरूपके अनपेक्षमाणाविचारयंतीसतीउपेक्ष्यमाणेत्यर्थः लक्ष्मीर्येनचंद्रेणसहत्वदाननसदृश
त्वादितिभावः। विनोदयतिविनोदंकरोतिविनोदशब्दात्तत्करोतितदाचष्टइतिणिच्॥ ॥ ॥ ॥

१४

161/1947

सादृश्यदर्शनाद्दृयोहिविरहिणांविनोदस्तानानीतिभावः। सचंद्रोपिदिगंतलंबीपश्चिमासिगतः सन् अस्तं
गतस्सन्नित्यर्थः। अतएवत्वदाननरुचिंविजहातित्वमुखसदृशंत्यजतीत्यर्थः। अतोनिद्रांविहायतांलक्ष्मीमन
न्यशरणांपरिगृहाणेत्यर्थः अथवानिद्रावशेनभवताअनवेक्ष्यमाणाअनिरीक्ष्यकर्मणिशानच्। लक्ष्मीःप्रयो
जककर्त्रायेनचंद्रेणप्रयोज्येनपर्युत्सुकत्वंत्वद्विरहवेदनांकालाक्षमत्वंऔत्सुक्यमनस्तापज्वरादिभ्यलंका
राविनोदयतिनिरासइतीतियोजना। शेषंपूर्ववत्। नाथास्तअर्थोपपत्तिमपश्यन्इमंपक्षमुपेक्षितः॥ ६६॥

प्रस्पंदमानपरुषेतरतारमंतश्चक्षुस्तवप्रचलितभ्रमरंचपद्मं॥ ६७॥ ॥

तद्वितितत्तस्माल्लक्ष्मीपरिग्रहकारणाद्वल्गुनामनोज्ञेयावल्गुस्त्कानेमनोज्ञेन्ववल्गुभाषितमन्यवद्वितिविश्वः
युगपत्तावाद्उन्मिषितेनयुगपदेवोन्मीलनेनसद्योद्येअपिपरस्परतुलांअन्योन्यसादृश्यंअधिरोहतांप्राप्नुतां।
प्रार्थनायांलोट्। केद्वेअंतः प्रस्पंदमानाचलंतीपरुषेतरास्निग्धातारकनीनिकायत्तथोक्ततारकाक्ष्ण
कनीनिकेत्यमरः। तवचक्षुः अंतःप्रचलितभ्रमरमंतश्चलद्भृंगंपद्मंचतन्मुगपदुन्मेषेसतिसंपूर्णसादृश्यलो
भारतिभावः॥६७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

हंतेति। विभातवायुः प्रभातवायुः स्वाभाविकं नोत्सर्गिकं तेतवमुखमारुतस्य निश्वासस्पर्शो सौरभ्यं गंधमिति इत्यर्थः परगुणेन अन्यदीयगुणेन संक्रामिकगंधेनेत्यर्थः इवमुराप्कतुमिछुरिव। आपूजपूरुधाभिदितीकारादेशः। अनोहा नांवृक्षाणां श्लथं शिथिलं पुष्पवंतात् प्रसवबंधनात् वृतं प्रसवबंधनमित्यमरः। हरति। आदते। अरुणांशुभिन्नैस्तरुणि किरणैः संधितैः सरसिजैः कमलैः सह। तत्पुरुषे कृतबहुलमिति सप्तम्या अलुक्॥

वृंतश्लथं हरति पुष्पमनोकहानां संसृज्यते सरसिजैररुणांशुभिन्नैः॥ स्वाभाविकं परगुणेन विभातवायुः सौरभ्यमीप्सुरिव ते मुखमारुतस्य॥ ६८॥ ताम्रोदरेषु पतितं द्रुमपल्लवेषु निर्धौतहारगुलिका विशदं हिमांभः॥ आभाति लब्धपरभागतयाधरोष्ठे लीलास्मितं सदशनार्चिरिव त्वदीयं॥ ६९॥ ॥ ॥ ॥

संसृज्यते संगच्छते। सृज्यैर्दैवादिकात्कर्तरि लिट्॥ ६८॥ ताम्रोदरेष्वरुणाभ्यांतरेषु तरुपल्लवेषु पतितं निर्धौताहारगुलिकाः मुक्तामणयः इत्यर्थः। तद्वद्विशदं हिमांभः। लब्धपरभागतया लब्धगुणोत्कर्षतया परभागो गुणोत्कर्ष इति यादवः। अधरोष्ठे पतितं त्वदीयं सदशनार्चिः दंतकांतिसहितं लीलास्मितमिवाभाति शोभते॥ ६९॥ १९

163
1947

यावदिति। प्रतापनिधिस्तेजोतिभिर्भानुर्यावन्नाक्रमते नोद्गच्छति आङ उद्गम इत्यात्मनेपदं भानावनुदित एवेत्यर्थः अन्हाय द्रुतिति द्राक् द्रुतित्यंजसान्हाय इत्यमरः अरूणोनाः स्करुणासुरस्तोरुणोः सूरुरित्यमरः तमो निरस्तं तथाहि। हे वीर त्वयि आयोधने युधु ईं भयसरतां पुरः सरतां याते सति तव गुरुः पिता रिपून् स्वायमुछिनत्ति किं वा नोछिन्नोछिन्नैवेत्यर्थः। न खलु योग्यन्यस्तभाराणां स्वामिनां स्वव्यापारखेद इति भावः॥ ७०॥ शय्यामिति। उभाभ्यां पक्षाभ्यां विनीता पनीता निद्रा येषां ते उभयपक्षविनीतनिद्राः अत्र समासविषये उभशब्दस्थाने उभयशब्दप्रयोगए

यावत्प्रतापनिधिराक्रमते न भानुरन्हाय तावदरुणेन तमो निरस्तं॥ अयोधनाग्रसरतां त्वयि वीर याते किं वा रिपूंस्तव गुरुः स्वयमुछिनत्ति॥ ७०॥ शय्यां जहत्युभयपक्षविनीतनिद्राः स्तंबेरमामुखरशृंखलकर्षिणस्ते॥ येषां विभातितरुणारुणरागयोगाद्भिन्नाद्रिगैरिकतटा इव

वसाधुरित्यनुसंधेयं। यथाह कैयटः। तवोभाउदात्तो नित्यामिति नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषये उभयशब्दस्यप्रयोगो माभूत्। उभयशब्दस्यैव य — स्यात्। उभयपुत्र इत्यादि भवतीति। मुखराण्युत्छान चलनात्छब्दायमानानि शृंखलानि निगडानि कर्षंतीति तथोक्ताः। नेतव स्तंबेरमंतीति स्तंबेरमाः हस्तिनः स्तंबकर्णयोरभिजयोरित्यपे हस्तिं स्तच कयोरिति वक्तव्यात्। इभः स्तंबेरमः पद्मीत्यमरः तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक् शय्यां जहति त्यजंति येषां स्तंबेरमाणां दंताः कोशा इव दंतकोशाः दंतकुड्मलाः तरुणारुणो रागयोगात् बालार्कारुणसंपर्कात् भिन्ना द्रिकैरिकतटा इव विभांति। धातुरक्ता इव भातीत्यर्थः॥ ७१॥ ॥ ॥ ॥ ॥ ॥

दीर्घेष्विति। हे वनजाः क्षनीरजाः क्षावनं नीरं वनं सत्वमिति शाश्वतः। वने सलिलकानने इत्यमरः। दीर्घेषु पटमंडपेषु नि
यमिताः बद्धाः वनायुदेश्याः वनायुदेशोद्भवाः पारसीकाः वनायुजा इति हलायुधः। अमी वाहाः अश्वाः निद्रां विहाय प
रोगतानि अग्रभागस्थानि लेह्यानि आस्वाद्यानि सैंधवशिलाशकलानि। सैंधवोस्त्री शीतशिवं मणिमंथजं सिंधुजमित्यम
रः। वक्त्रोष्मणा मुखमारुतेन मलिनयंति मलिनानि कुर्वंति। उक्तं च सिद्धयोगसंग्रहे। पूर्वाह्णकाले चाश्वानां प्रयशो

दीर्घेष्वमी नियमिताः पटमंडपेषु निद्रां विहाय वनजाक्ष वनायुदेश्याः॥ वक्त्रोष्मणा
मलिनयंति पुरोगतानि लेह्यानि सैंधवशिलाशकलानि वाहाः॥ ७२॥ भवति
विरलभक्तिर्म्लानपुष्पोपहारः स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः॥ अयम
पि च गिरं नस्त्वत्प्रबोधप्रयुक्तामनुवदति शुकस्ते मंजुवाक्पंजरस्थः॥ ७३॥

लवणं हितं श्लानाह विबंधघ्नं लवणं सैंधवमित्यादि॥ ७२॥ भवंतीति। म्लानपुष्पोपहारः। पुष्पस्रजां म्लानत्वादेव
विरलभक्तिर्विरलरचनो भवति प्रदीपाश्च स्वकिरणानां परिवेषस्य मंडपस्योद्भेदेन स्फुरणेन शून्यानां भवति नि
स्तेजस्का भवंतीत्यर्थः। अपि च। अयं मंजुवाक् मधुरवचनः पंजरस्थः ते तव शुकः तव प्रबोधनिमित्तेन प्रयुक्तामुच्चारितां
नोस्माकं गिरं वाणीमनुवदति अनुकृत्य वदतीत्यर्थः। इत्थं प्रभातलिंगानि वर्तंते अतः प्रबोधितव्यमिति भावः॥ ७३॥ ३६

165/1947

इतीति। इतीत्थं विरचितवाग्भिः वंदिपुत्रैः वैतालिकैः पुत्रग्रहणं समानवयस्कद्योतनार्थं सपदि विगतनिद्रः तल्पं
शय्यां। तल्पं शय्याट्टदारेष्वित्यमरः। उज्झांचकार। विससर्ज। इवार्थे श्च गुरुमतो नरकुरस्याप्रत्ययः। कथमिव सद्देन
पटु मधुरं निनदद्भिः राजहंसैर्बोधितः। सुप्रतीकाख्यः सुरगजः ईशानदिग्गजः गंगायाः इदं गांगं सैकतं पुलिनमिव।
तोयस्थितं तत्पुलिनं सैकतं सिकतामयमित्यमरः। सिकताशर्कराभ्यां चेत्यण्प्रत्ययः। सुप्रतीकग्रहणं प्रायशः
कैलासवासिनस्तस्य नित्यं गंगातटविहारसंभवादित्यनुसंधेयं॥ ७४॥ अथेति अथोत्थानानंतरं। अचितानि चा

इति विरचितवाग्भिर्वंदिपुत्रैः कुमारः सपदि विगतनिद्रस्तल्पमुज्झांचकार॥ मदपटु निन
दद्भिर्बोधितो राजहंसैः सुरगज इव गांगं सैकतं सुप्रतीकः॥ ७४॥ अथ विधिमवसाय्य
शास्त्रदृष्टं दिवससुखोचितमंचिताक्षिपक्ष्मा॥ कुशलविरचितानुरूपवेषः क्षितिपसमाज
मगात्स्वयंवरस्थं॥ ७५॥ इतिश्रीरघुवंशे म॰ अजस्वयंवराभिगमनं पंचमः सर्गः॥ ५॥

रूण्यक्षिपक्ष्माणि यस्य सोऽजः शास्त्रे दृष्टमवगतं दिवससुखोचितं प्रातःकालोचितं विधिमनुष्ठानं। अवसाय्य
समाप्य स्यतेर्ण्यंतात्ल्यप्। कुशलैः प्रसाधनदक्षैर्विरचितः संपादितोऽनुकूलः स्वयंवरोचितो वेषो नेपथ्यं
यस्य स तथोक्तः सन् स्वयंवरस्थं मंडपगतं क्षितिपसमाजं राजसमूहं अगात् अगमत् इणो गा लुङि। तिगादे
शः पुष्पिताग्रा वृत्तमेतत्। तदुक्तं। अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रेति॥ ७५॥
इति महो॰ मल्लिनाथसूरिवि॰ रघुवं॰ संजीवनीसमाख्यायां पंचमः सर्गः॥ ५॥ ५॥ ॥ ५॥ ॥

१७

167
1947

॥अनुपंमृर्ध्निपदेचकालकंतेतवपुष्पथकामारिकामतातवाकेश्चिद्देकंभजामहे १ सइति सोऽजःतत्रस्छा
नेउपचारवसुराजोपकरणवस्कमंचेषुपर्यंकेषुसिंहस्छान्मनोज्ञवेषान्मनोहरनेपथ्यान्वैमानिकानांविमा
नैश्चरतांचरतीतिठक्प्रत्ययः। मरुतामम राणामरुतोपवनापराविश्वमरः। आकृष्टलीलान् अनुकृतशोभान्
आकृष्टमरल्लीलानित्यर्थः सापेक्षत्वेपिगमकत्वात्समासः। नरलोकंपालयतीतिनरलोकपालाः। कर्मण्य

सतत्रमंचेषुमनीज्ञवेषान्सिंहासनस्थानुपचारवत्सु॥वैमानिकानांमरुतामपश्यदाकृष्टलीलान्नरलोकपालान्॥१॥ रतेर्गृहीतानुनयेनकामंप्रत्यर्पितस्वांगमिवेश्वरेण॥काकुत्स्थमालोकयतांनृपाणांमनोबभूवेंदुमतीनिराशं॥ २॥ ॥

ण्प्रत्ययः। तान्भूपालानपश्यत्॥१॥ रतीति। रतिस्मरप्रियायांचरागेचसुरगेस्मृतेति विश्वः। रतेः कामप्रिया
याःगृहीतानुनयेनस्वीकृतपार्थनेनगृहीतरत्यनुनयपाठस्यर्थः। सापेक्षत्वेपिसमासः ईश्वरेणहरेणप्रत्यर्पि
तस्वांगंकाममिवस्थितंकाकुत्स्थमजंआलोयमानंनृपाणांमनइंदुमतीनिराशंवैदर्भीनिःस्पृहंबभूव॥इंदुमती
सत्यमेनंविहायनास्मान्वरिष्यतीतिनिश्चिकुरित्यर्थः सर्वातिशयसौंदर्यमस्येतिभावः॥ २॥ ८२॥ ॥

वैदर्भेति। अथो कुमारो वैदर्भेणानिर्दिष्टं प्रदर्शितं मंचं पर्यंकं क्लृप्तेन सुविहितेन सोपानपथेन मृगराजशावः सिं
हपोतः पोताः पाकोर्भको डिंभः पृथुकः शावकः शिशुरित्यमरः शिलानां विभंगैः भंगिभिः तुंगमुन्नतं नगो
त्संगं शैलाग्रमिवारुरोह॥३॥ परार्ध्येति। परार्ध्याः श्रेष्ठवर्णाः नीलपीतादयो यस्य तेनास्तरणेन कंबलादि
नाउपपन्नं रत्नवदनेकरत्नखचितं आसनं आसेदिवानधितिष्ठितवान् सोजः मयूरपृष्ठाश्रयिणा गुहेन सेना
न्या सह सेनानीरग्निभूर्गुह इत्यमरः। भूयिष्ठमत्यर्थमुपमेयकांतिरासीत् मयूर स्य विचित्ररूपत्वात् त

वैदर्भनिर्दिष्टमथो कुमारः क्लृप्तेन सोपानपथेन मंचं॥ शिलाविभंगैर्मृगराजशावस्तुंगं नगो
त्संगमिवारुरोह॥३॥ परार्ध्यवर्णास्तरणोपपन्नमासेदिवान् रत्नवदासनं सः॥ भूयि
ष्ठमासीदुपमेयकांतिर्मयूरपृष्ठाश्रयिणा गुहेन॥४॥ तासु श्रिया राजपरंपरासु प्रभाविशे
षोदयदुर्निरीक्ष्यः॥ सहस्रधात्मा व्यरुचद्विभक्तः पयोमुचां पंक्तिषु विद्युतेव॥५॥ ॥

साम्यं रत्नासनस्य तद्वारेण तदारूढयोरपीति भावः॥४॥ तास्विति। तासु राजपरंपरासु श्रिया कृत्या पयोमुचां
पंक्ति मेघश्रेणिषु विद्युतेव सहस्रधा विभक्त नरेंगेषु तरणिविरस्वयमेक एव प्रत्यकं संक्रामत इत्यर्थः। प्रभाविशे १
षस्य उदये नाविर्भावेन दुर्निरीक्ष्यो दुर्दर्शनः आत्मा श्रियः स्वरूपं व्यरुचत्। व्यद्योतिष्ट॥ द्युद्भ्यो लुङीति पर
स्मैपदं द्युतादित्वादङ् प्रत्ययः तस्मिन् समये प्रत्येकसंक्रांतलक्ष्मीकतया तेषां किमपि दुरासदं तेजः प्रादुरासीदित्यर्थः
॥५॥

169
1947

तेषामिति। महार्हासनसंस्थितानां श्रेष्ठसिंहासनस्थितानां उदारनेपथ्यभृतां उज्ज्वलवेषधारिणां तेषां राज्ञां
मध्ये कल्पद्रुमाणां सुरतरूणां मध्ये पारिजात इव स्करद्रुमविशेष इव। पंचैते देवतरवो मंदारः पारिजातकः। सं
तानकल्पवृक्षश्च पुंसि वा हरिचंदनमित्यमरः। स रघुसूनुरेव धाम्ना तेजसा रराज। भूम्नेति पाठे तिशयेनेत्य
र्थः अत्र कल्पद्रुमशब्दः पंचान्यतमविशेषवचनः उपकल्पयति मनोरथा॥ नीति व्युत्पत्त्या सुरद्रुममात्रोप

तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये॥ रराज धाम्ना रघुसूनु
रेव कल्पद्रुमाणामिव पारिजातः॥६॥ नेत्रव्रजाः पौरजनस्य तस्मिन् विहा
य सर्वान्नृपतीन्निपेतुः॥ मदोत्कटे रेचितपुष्पवृक्षा गंधद्विपे वन्य इव द्विरेफाः॥७॥

लक्षकतया प्रत्युक्त इत्यनुसंधेयं कल्प इति द्रुमाः कल्पद्रुमा इति विग्रहः॥६॥ नेत्रेति पौरजनस्य नेत्रव्रजाः
सर्वान् नृपतीन्विहाय तस्मिन्नजे निपेतुः स एव सर्वोत्तम इति ददर्श इत्यर्थः। कथमिव मदोत्कटे मदे गंधद्वि
पे गजे वन्ये भवे वन्ये गंधद्विगंधप्रधाने रेचितारिक्ती कृताः पुष्पाणां वृक्षा यैस्ते पुष्पवृक्षा इत्यर्थः। द्विरेफा भृंगा
इव वन्य विशेषणं द्विरेफाणां पुष्पवृक्षत्यागसंभवनाकृतं॥७॥ ॥ ॥ ॥ ॥ ॥

र॰ मू॰ टी॰ २ अथेति। त्रिभिर्विशेषमाह। अथान्वयज्ञैः राजवंशाभिज्ञैः वंदिभिः स्तुतिपाठकैः वंदिनस्तुतिपाठकेत्यमरः स॰ ६
सोमार्कवंश्ये सोमसूर्यवंशभवे नरदेवलोके राजसमूहे स्तुते सति कन्यामन्वांतरराजमार्गे विवेशेत्युत्तरेणान्व
यः। एवमुत्तरत्रापि योज्यं। संतारिते सम्मंतात् प्रसारिते अगुरुसारो योनिर्यो योनिः कारणं यस्य तस्मिन् धूपे वै
जयंतीः पताकाः समुत्सर्पति सति॥८॥ किंच। पुरस्योपकंठे समीपे उपवनान्याश्रयायेषां कलापिनां बर्हिणां

अथस्तुते बंदिभिरन्वयज्ञैः सोमार्कवंश्ये नरदेवलोके॥ संचारिते चागुरुसारयोनौ धूपे समु
त्सर्पति वैजयंतीः॥ ८॥ पुरोपकंठोपवनाश्रितानां शिखंडिनामुद्धतनृत्यहेतौ॥ प्रध्मात
शंखे परितो दिगंतान्तूर्यस्वने मूर्छति मां — — — ॥९॥ मनुष्यवाह्यं चतुरस्रयानमध्या
कन्यापरिवारशोभि॥ विवेश मंचांतर राजमार्गं पतिंवरा कॢप्तविवाहवेषा॥ १०॥ ॥

उद्धतनृत्यहेतौ मेघध्वनिसदृश्यात्तांडवस्य कारणे प्रध्माताः पूरिताः शंखा यत्र यस्मिन्मंगलार्थे मंगलप्रयोजके तू
र्यस्वने वाद्यघोषेण परितः सर्वतो दिगंतान्मूर्छति व्याप्नुवति सति॥ ९॥ मनुष्येति पतिं वृणोतीति पतिंवरा स्वयं
वरा। अथ स्वयंवरा पतिंवरा वर्या चेत्यमरः संज्ञायां भृवृजि आदिना खच् प्रत्ययः। कॢप्तविवाहवेषा कन्या इंदुम
ती मनुष्यवाह्यं परिवारेण परिवारजनेन शोभायमानं चतुरस्रयानं चतुरस्रवाहनं शिबिकामध्यास्य आरु
ह्य मंचांतरे मध्ये येै राजमार्गस्तं विवेश॥ १०॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ७ २

171/1947

तस्मिन्निति। नेत्रशतैकलक्ष्ये नेत्रशतानामेकलक्ष्ये एकदृश्ये कन्यामये कन्यास्वरूपे तस्मिन्विधातुर्निर्माणे विधा
नातिशये सृष्टिविशेषे नरेंद्राः अंतःकरणैर्निपेतुः आसनेषु देहैरेव केवलं स्थिता देहानपि विस्मृत्य तत्रैव दत्तचित्ता बभूवु
रित्यर्थः। अंतःकरणकर्तृके निपतने नरेंद्राणां कर्तृत्वव्यपदेश आदरातिशयार्थः॥ ११॥ तामिति। तां इंदुमतीं प्रति अ
भिव्यक्तमनोरथानां प्रारूढा अभिलाषाणां महीपतीनां राज्ञां प्रणयाग्रदूत्यः प्रार्थनामेव प्रणयस्तमात्रिश्रंभयाञ्चू
चात्रेमाण इत्यमरः प्रापणे प्रथमदूत्यः प्रथम दूतिकाः प्रणयप्रकाशनसाम्यात् दूतीत्वव्यपदेशः विविधाः शृंगारचेष्टाः
शृंगारविकाराः पादपानां प्रवालशोभा इव बभूवुः उत्पन्नाः अत्र शृंगारलक्षणं रसैस्सुधाकरे विभावैरनुभावैश्च सो

त्रिभिर्विशेषकं। तस्मिन्विधानातिशये विधातुः कन्यामये नेत्रशतैकलक्ष्ये॥ निपेतु
रंतःकरणैर्नरेंद्रा देहैः स्थिताः केवलमासनेषु॥ ११॥ तां प्रत्यभिव्यक्तमनोरथानां म
हीपतीनां प्रणयाग्रदूत्यः॥ प्रवालशोभा इव पादपानां शृंगारचेष्टा विविधा बभूवुः १२

चितेर्व्यभिचारिभिर्नीतास्वदस्यरसत्वं रतिः शृंगार उच्यते। रतिरिच्छाविशेषः तत्रोक्तं तत्रैव यूनोरन्योन्यं विषयिणी
रिच्छा रतिः स्मृतेति चेष्टाशब्देन तदनुभावविशेष उच्यते। तेपि तत्रैवोक्ताः भावं मनोगतं साक्षात्स्वहेतुं व्यंजयं
ति ये तेनुभावा इति ख्याताः भ्रूविक्षेपस्मितादयः। ते चतुर्धा। चित्तगात्रवाग्बुद्ध्यारंभसंभवा इति। अत्र गात्रारंभ
भेदात् चेष्टासंभक्तशब्देन कांश्चिदनुभावान् कांश्चिदित्यादिभिः श्लोकैर्व्यक्ष्यति शृंगाराभासश्चायमनेकत्रैवंप्रति
पादनात्। तदुक्तं। एकत्रैवानुरागश्चेत्तिर्यग्म्लेच्छगतोपि वा। योषितां बहुशक्तिश्चेद्रसाभासस्त्रिधामत इति॥ १२॥

शृंगारचेष्टाविविधावभूवुरित्युक्तास्ताएवदर्शयतिकश्चिदित्यादिभिः। क। श्चदिति। काश्चद्राजाकराभ्यांउपरुद्धना लंगृहीतदंडमालोलश्चचलैः पत्रैरभिहतास्ताडिताद्विरेफाभ्रमरायेनतत् तथोक्तंरजोभिः परागैरंतःपरिवेषमंडलं बध्नातीतिअंतःपरिवेषबंधिलीलारविंदंभ्रमयांचकार। करस्थलीलारविंदंवस्त्वयादंभ्रामयितव्यादितितस्या भिप्रायः सहस्रपूर्णकोपमपलक्षणकदंडमत्यभिप्रायः॥१३॥ विस्रस्तमिति। विलसनशीलोविलासीकवोषल कसंलइतिघितुणप्रत्ययः। अपरोराजाअंसाद्विस्रस्तंचलितंरत्नानुविद्धरत्नखचितंयदंगदंकेयूरंतस्यकोटिलग्नम

कश्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफं॥ रजोभिरंतःपरिवेषबं धिलीलारविंदंभ्रमयांचकार॥१३॥ विस्रस्तमंसादपरोविलासीरत्नानुविद्धांगद कोटिलग्नं॥ प्रावारमु-- प्यथाप्रदेशंनिनीयसाचीकृतचारुवक्त्रः॥ १४॥ ॥

स्थिलग्नंअत्युत्कर्षाश्रयःकोट्याइत्यमरः प्रालंबं ऋजुलंबिनीस्रजं आलंबमृजुलंबीस्यात्कंठादित्यमरः प्रवारणपा टेतुउत्तरीयवस्त्रंउत्क्षिप्योद्धृत्यसाचीकृततिर्यक्कृतंचारुवक्त्रंयस्यसतथोक्तः सन्यथावकाशंयथास्थानंनिनायप्रावर णोत्क्षेपणछलेनाहंत्वामेवरिरंस्येतिइंन्नृपाभिप्रायः गोपनीयंकिंचिदंगेस्थितंदोषंप्राहणुतइतिमत्यभिप्रायः॥१४॥

---

173 / 1947

अंकुचेति। ततःपूर्वोक्तादन्योराजाकिंचित्समावर्जितनेत्रशोभीईषदवाक्पातितनेत्रशोभीसन्नाकुंचिताआभु ग्नावक्ताअग्रांगुलयोयस्यतेनतिर्यग्विसंसर्पिणयोनखप्रभायस्यतेनपादेनहेमंहिरण्मयंपीठंपादपीठंविलि ले खलिखितवान् पादांगुलीमाकुंचनेनत्वमस्समीपमागच्छेतिनृपाभिप्रायः भूमिलेखकोयमपलक्षणकइतींदुमत्यभिप्रा यः भूमिविलेखनंचलक्ष्मीनाशहेतुः तथाच रेखानिर्मार्जिभूम्यां अदत्त्वाणचलनंपादयोरल्पभूगादंतानामल्पशौचंमलिन वसनंतारूक्षताभ्रूर्द्ध जनानांसंध्याकालेचनिद्राविवसनशयनंप्रासहांतिरेकः स्वांगेवाद्यंचपुंसोनिधनमुपयत्केशवस्या

आकुंचिताग्रांगुलिनानृपोन्यः किंचित्समावर्जितनेत्रशोभी॥ तिर्यग्विसंसर्पिनखप्रभे णपादेनहेमंविलिलेखपीठं॥१५॥ निवेश्यवामंभुजमासनार्द्धेतत्संनिवेशादधिकोन्नतांसः॥ कश्चिद्विवृत्तत्रिकभिन्नहारःसुहृत्समाभाषणतत्परोभूत्॥१६॥ ५॥

पिलक्ष्मीमिति॥१५॥ निवेश्येति। कश्चिद्राजावामंभुजंचासनार्द्धेसिंहासनार्द्धेसिंहासनैकदेशेनिवेश्यसंस्थाप्यसं स्थाप्यततःसंनिवेशोस्ववामभुजस्यसंनिवेशात्संस्थानादधिकोन्नतोवामांसोयस्यसतथोक्तः सन्विवृत्तेपरा वृत्तेत्रिकेत्रिकप्रदेशेभिन्नहारः सन्वंशाधरेत्रिकमित्यमरः सुहृत्समाभाषणतत्परोभूत् वामपार्श्ववर्तिनैवमित्रेणसंभा षितुंप्रवृत्तइत्यर्थः। अतएवविवृत्तत्रिकत्वंघटते। त्वयावामांगेसंनिशितयासहएवंवार्त्ताकरिष्यतइतिनृपाभिप्रायः परदृष्ट्वापराङ्मुखोर्यनकार्यमस्तीतींदुमत्यभिप्रायः॥१६॥ ॥ ५॥ ॥ ५॥ ॥ ७॥

विलासिनीति। अन्योपु वा विलासिन्याः प्रियाया विभ्रमार्थं दंतपत्रं दंतपत्रभृतं। आपांडुरं केतकबर्हं केतदल।
दलेपि बर्हमित्यमरः। प्रियानितंबोचितसंनिवेशैरभ्यस्तनिक्षेपणैर्नखाग्रैर्विपाटयामास विदारयामास दंतवनितं वै
एवं नखप्रणानूदास्यामीति नृपाभिप्रायः। तृणछेदवत् पत्रपाठकोयं अपलक्षणे कोयमितीडुमस्याभिप्रायः।
तृणं पत्रं वा नन खैश्छिंद्यात् न विलिखेन्महीमिति निषेधात् च। ताउकाविहारमश्रुभस्त्वकइतीडुमस्याभिप्राये
णाभीकृतं॥ १७॥ कुशेशेति। कश्चिद्राजा कुशेशयं शतपत्रमिव आताम्रं तलं यस्य तेन शतपत्रं कुशेशयमित्यम

विलासिनीविभ्रमदंतपत्रमापांडुरं केतकबर्हमन्यः॥ प्रियानितंबोचितसंनिवेशैर्वि
पाटयामास युवा नखाग्रैः॥ १७॥ कुशेशयाताम्रतलेन कश्चित्करेण रेखाध्वजलांछने
न॥ रत्नांगुलीयप्रभयानुविद्धानुदीरयामास सलीलमक्षान्॥ १८ ॥ ॥ ॥

रः रेखारूपा ध्वजा लांछनं यस्य तेन करेण अंगुलीयुभवान्यंगुलीनमुद्रिकाः अंगुलीयकमूर्त्तिकेत्यमरः जिह्वामूलां
गुलेश्छ इति छप्रत्ययः। रत्नानामंगुलीयानि तेषां भया अनुविद्धान्व्याप्तान् अक्षान् पाशकान् अक्षाः स्युर्देवनाः कितवा ४
पाशकाश्चेत्यमरः सलीलं उदीरयामास अहं त्वयासह दैवं क्रीडिष्यामीतीदृन्नृपाभिप्रायः अक्षचातुर्यकाधुरुषाइतीडुमस्या
भिप्रायः अक्षैर्मा दीव्य तदरतिश्रुतिनिषेधात्॥ १८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

175
1947

कश्चिदिति। कश्चित् कामी यथाभागं यथास्थं अवस्थितेपि तत्सान्निवेशात् स्वसंस्थानात् व्यातिलंघिनीव वलि
तइव किरीटे वज्राणां कीरीटगतानां अंशवो गभस्तयस्तेषांतान्यंगुलिरंध्राणि यस्य तमेकं करं व्यापारयामास च
पलनाख्यो लंकारः आत्मनः प्रकाशनपराचेष्टा चपलातोच्यते। किरीटवन्मम शिरसि स्थितामपि त्वांभा
रं न मन्यत इति नृपाभिप्रायः। शिरसि न्यस्तहस्तोयमपलक्षण इतीडुमत्याभिप्रायः॥ १९॥ ततइति। ततो

कश्चिद्यथाभागमवस्थितेपि स्वसंनिवेशाद्व्यतिलंघि
नीव॥ वज्रांशुभिन्नांगुलिरंध्रमेकं व्यापारयामास करं कि
रीटे १९ ततो नृपाणां श्रुतवृत्तवंशा पुंवत्प्रगल्भा प्रतिहाररक्षी।
प्राक्संनिकर्षं मगधेश्वरस्य नीत्वा कुमारीमवदत्सुनंदा २०

नृपाणां श्रुतवृत्तवंशा वृत्तेर्थः। सापेक्षत्वेपि गमकत्वात्समासः प्रगल्भा वाग्मिनी सुनंदाख्या प्रतिहारं रक्षतीति
द्वारपालिका कर्मण्यण् प्रत्ययः। टिड्ढाणञित्यादिना ङीप् प्राक् प्राक् प्रथमं कुमारीं इंदुमतीं मगधेश्वरस्य संनि
कर्षं समीपं नीत्वा पुंवत्। पुंसा तुल्यं तेन तुल्यं इत्यादिना वतिप्रत्ययः। अवदत्॥ २०॥ ॥ ॥ ॥

र॰मू॰टी॰
९

आसाविति। असौराजाअसाविति पुरोवर्तिनोनिर्देशः एवमुत्तरत्रापिद्रष्टव्यं। शरणोन्मुखानांशरणार्थिनांशर स६
ण्योरक्षणेसमर्थः। अत्रसाधुरितियत्प्रत्ययः। शरणंभवितुमर्हतीति शरण्यइतिनाथनिरुक्तिर्निर्मूलैव।। अगाधस
त्वोगंभीरस्वभावः। सत्वंगुणेपिशाचादौबलेद्रव्यस्वभावयोरितिविश्वः। मगधाजनपदाः तेषुप्रतिष्ठाआस्पदंय
स्यसः मगधप्रतिष्ठः प्रतिष्ठाकृत्यमास्पदमित्यमरः प्रजारंजनलोकरक्षणतत्र लब्धवर्णोविचक्षणः यद्वाप्रजा
रंजनेर्लब्धोकर्षः। परान्शत्रून्तापयतीति परंतपः परंतपाख्याद्विषत्पयोस्तापेरितिखच्प्रत्ययः। खचिह्रस्व

असौशरण्यःशरणोन्मुखानामगाधसत्वोमगधप्रतिष्ठः।। राजाप्रजारंजनलब्धवर्णः
परंतपोनामयथार्थनामा।। २१।। कामंनृपाः संतिसहस्रशोन्येराजन्वतीमाहुरनेन
भूमिं।। नक्षत्रताराग्रहसंकुलापिज्योतिष्मतीचंद्रमसैवरात्रिः।। २२।। ।। ६ ।।

इतिह्रस्वः अरुर्द्विषेत्यादिनामुमागमः। नामेतिप्रसिद्धौयथार्थनामाशत्रुसंपनादितिभावः।। २१।। काममिति। अ
न्येनृपाः कामसदृशासंति। अभिमतेनराजन्वतींशोभनराजन्वतीमाहुः तेनतादृशः कश्चिदस्तीत्यर्थः। सुराज्ञि
देशे-- न्वासाकृतोन्यत्रराजवानित्यमरः राजन्वात्सौराज्यइतिनिपातनात्साधुः तथाहिनक्षत्रैरश्विन्या
दि-- राभिसाधारणैर्ज्योतिर्भिर्ग्रहैर्भौमादिभिश्चसंकुलापिरात्रिश्चंद्रमसैवज्योतिरस्यास्तीतिज्योति ९
ष्मतीनान्येनज्योतिषेत्यर्थः।। २२।। ।। ६।। ।।६।। ।।६।। ।।६।। ।।६।।

177
1947

क्रियेति। अयंपरंतपः। अध्वराणांक्रतूनांक्रियाप्रबंधादनुष्ठानसातत्यादविच्छिन्नादनुष्ठानादित्यर्थः अजस्र
नित्यमाहूतसहस्रनेत्रः सन्चिरंशच्याः पांडुकपोलयोर्लंबान्अलकान्स्रस्तान्पश्चाद्यच्। मंदारैः कल्पद्रु
मकुसुमैः शून्यांश्चकारप्रोषितभर्तृकादिकेशसंस्कारंनकुर्वंति। प्रोषितामलिनाकृशेतिस्मरणादितिभा
वः।। २३।। अनेनेति। वरेण्येनवरणीयेनवृणोतेरौणादिकएण्यप्रत्ययः। अनेनराज्ञागृह्यमाणंपाणिमिच्छसिचे
दित्यर्थः। तर्हिप्रवेशेनगरप्रवेशकालेप्रासादवातायनसंश्रितानांराजभवनगवाक्षसंस्थितानांपुष्पपुरांगनानां। पा

क्रियाप्रबंधादयमध्वराणामजस्रमाहूतसहस्रनेत्रः।। शच्याश्चिरंपांडुकपोललंबा
न्मंदारशून्यानलकांश्चकार।। २३।। अनेनचेदिच्छसिगृह्यमाणंपाणिंवरेण्येनकुरुप्रवे
शे।। प्रासादवातायनसंस्थितानांनेत्रोत्सवंपुष्पपुरांगनानां।। २४।। एवं-- -केतमवेक्ष्यकिंचि
द्विस्रंसिदूर्वांकमधूकमाला।। ऋजुप्रणामक्रिययैवतन्वीप्रत्यादिदेशैनमभाषमाणा।। २५।।

टलापुत्रांगनानांनेत्रोत्सवंकुरु। सर्वोत्तमानांतासामदर्शनीयाभविष्यतीतिभावः।। २४।। एवमिति। एवंतथासुनंद
याक्तेसतितंपरंतपमवेक्ष्यकिंचिद्विस्रंसीनिहर्वाचिन्हामधूकमालायद्वापुष्पमालायस्यासामधूकेतुगुडपुष्पम
धुद्रुमावित्यमरः वरणेशिथिलप्रयत्नेतिभावः। तन्वीइंदुमतीएनंनृपंअभाष्यमाणासतिभावशून्ययोप्रणाम
क्रिययैवप्रत्यादिदेशपरिजहार।। २५।। ।। ।। ।। ।। ।। ।। ।। ।। ।।

तामिति। सेवनान्याचित्तज्ञत्वादितिभावः। वेत्रग्रहणेन नियुक्ता दौवारिकी सुनंदा तां राजसुतां राज्ञांतरमन्यराजा
नंनिनाय। नयतेर्द्विकर्मकः कथमिव समीरणोत्थावातोत्थ भ्रांतरंगरेखा ऊर्मिपंक्तिः मानससरसि या राजहंसी तां
पद्मांतरमिव॥ २६॥ जगादेति। येनां इंदुमतीं जगाद चाकिंमितिअयं अंगनाथः अंगदेशीश्वरः सुरांगनादिभिः प्रार्थि
ताकामिता यौवनश्रीर्यस्य सः सुराकिलेनं इंद्रसहायार्थं इंद्रपुरगानि नमकामयंते — पर — इति प्रसिद्धिः किंच सभका
रेर्यागनशास्त्रकृद्भिः पालकाव्यादिभिर्महर्षिभिर्विनीतभागाशिक्षीतगजः किलेयति — अतएव भ्रमिगतोपि ऐंद्रंपदं

तां सैव वेत्रग्रहणानयुक्ता राजांतरं राजसुतां निनाय॥ समीरणोत्थेव तरंगरेखा पद्मांतरं
मानसराजहंसीं॥ २६॥ जगाद चैनामयमंगनाथः सुरांगनाप्रार्थितयौवनश्रीः विनीत
भागः किलसत्रकारैरैंद्रं पदं भूमिगतोपि भुंक्ते॥ २७॥ अनेन पर्यासयताश्रुबिंदून् मुक्ताफ
लस्थूलतमान्स्तनेषु॥ प्रत्यर्पिताः शत्रुविलासिनीनामाक्षिप्य सूत्रेण विनैव हाराः॥ २८॥

मैश्वर्यंभुंक्तेमल्लोकस्थएवस्वर्गसुखमनुभवतीत्यर्थः तगाप्सरेदिवार्पिसेव्यत्वमेंद्रप्रदश्वाद्यार्थः शाकिलकुत
श्चिवायकारणाद्भुवतीर्णदिग्गजवर्ममालोक्य स्वयमाशक्तिरिंद्राभ्यनुज्ञया आनीते दर्भपिभिः प्रणीतेन ग
जशास्त्रेण गजान्वशीकर्त्र्यभुविसंप्रदायप्रावर्त्तयदिति कथागीयते॥ २७॥ अनेनेति। शत्रुविलासिनीनां स्तनेषु
मुक्तास्थलस्थूलतमानश्रु बिंदून् अश्रूणि शोणिते इति विश्वः। पर्यासयता प्रस्तारयता भर्तृवधादितिभावः अनेनां
गनाथेनानुन्याक्षिप्य सूत्रेण विना हाराएव प्रत्यर्पिताः अविछिन्नाश्रुबिंदुप्रवर्त्तनात् उत्तम्रहारार्पणइव कृतामित्युत्प्रेक्षा
गम्यते॥ २८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

179
1947

निसर्गेति। निसर्गतः स्वभावतः भिन्नास्पदं भिन्नाश्रय सहात स्थास्थितयस्य श्रीः सरस्वतीः इति द्वयं अस्मिन् स
देकसंस्थं उभयमिह संगतमित्यर्थः। हेकल्याणि वाकादित्वान्ङीप्। कांत्या सूनृतयसत्यप्रियया गिरा च योग्या र्हसंसर्गं
हमेव तयोः श्रीसरस्वत्योः तृतीय समानगुणयोः युवयोर्दंपत्यंयुज्यत इतिभावः। दाक्षिणनायकत्वंवास्यध्वन्यते॥ तदुक्तं।
तुल्येनेकत्रदाक्षिणइति॥ २९॥ अथांगेति। अथकुमारी अंगराजात् ख्यस्कर चतार्यपनीय जन्यामात्यसखीं सुनंदां याहि
गच्छेत्यवदन्। अर्थवाद नींवधूं वहंतीति जन्याः जन्यावधूबंधवतान्वायातगच्छेत्यवदत्। जन्यामात्य सखीमुदोजन्यो वर

निसर्गभिन्नास्पदमेकसंस्थमस्मिन्द्वयं श्रीश्च सरस्वती च॥ कांत्या गिरा सूनृतया च यो
ग्यात्वमेव कल्याणि तयोस्तृतीया॥ २९॥ अथांगराजादवितार्य चक्षुर्याहीति जन्यामव
दत्कुमारी॥ नासौ न काम्यो न च वेद सम्यक् द्रष्टुं न सा भिन्नरुचिर्हि लोकः ३०

वधूज्ञातिप्रियंतुल्यहितेषुचेतिपक्षद्वयेविश्वः। अथवा जन्यावधूभृत्या। भृत्याश्चिनवो वाइतिकेशवः। संज्ञायांज
न्याइतियत्प्रत्ययां तोनिपायद त्राहंस्तिकारः जनीवधूं वहंतीति जन्याः आभातुर्वयस्या इति पत्नुभरः। जन्याः स्निग्धा वर
स्यपद्गतिसवंधुपलक्षणार्थमविरोः नत्राये अंगराजनिदर्शय दोषाभावापि दृष्टदोषादित्याह नेसादिना असौ अंगराजः का
म्यः कमनीयो निति नकिलकमनीयएवेत्यर्थः। साकुमारीचम्यग्द्रष्टुंनवेदेति नकिंतुवेदेत्यर्थः किंतुज — लोकोजनोभि
न्नरुचिर्हि कंचिदपि किंचीकभिन्नरोचातिकिंतु मैमिहिद्रष्टानियंतु राक्यतनावः॥ ३०॥ ॥ ५ ॥ ॥

ततइति। ततोनंतरंप्रतिहारभूमौ द्वारदेशेनियुक्ता दौवारिकी। स्त्रीद्वाःस्थःप्रतिहारइत्यमरः द्विषद्भिःशत्रुभिःदुःप्र
सहंदुःसहंदुरमित्यर्थः विशेषएवदृश्यंदर्शनीयंरूपवंतमित्यर्थः। अपरमन्यन्नृपंनवोत्थानंनवोदयंइंदुमिवइंदुमत्यै
निदर्शयामास॥२१॥ अवंतीति। उदग्रबाहुर्विशालवक्षास्तनुवृत्तमध्यः सूक्ष्मवर्तुलमध्योयंराजाअवंतीनाथःअ
वंतीदेशाधीश्वरः त्वष्ट्राविश्वकर्मणाभर्तुस्तेजोवेगमसहमानयादुहित्रासंज्ञादेव्याप्रार्थितेनेतिशेषः। चक्रभ्रमंचक्रा
कारंशस्त्रोत्तेजनयंत्रंभ्रमाबुनिर्गमेभ्रांतोकुंडारव्यशिल्पियंत्रकेतिविश्वः। आरोप्ययस्तेनोल्लिखितः। उत्कृतेजःसवि

ततःपरंदुःप्रसहंद्विषद्भिर्नृपंनियुक्ताप्रतिहारभूमौ। निदर्शयामासविशेषदृश्यमिंदुं
नवोत्थानमिवेंदुमत्यै॥२१॥ अवंतिनाथोयमुदग्रबाहुर्विशालवक्षास्तनुवृत्तमध्यः।
आरोप्यचक्रभ्रममुष्णतेजास्त्वष्ट्रेवयत्नोल्लिखितोविभासि॥२२॥ अस्यप्रयाणेषुसमग्र
शक्तेरग्रेसरैर्वाजिभिरुद्धतानि॥ कुर्वंतिसामंतशिखामणीनांप्रभाप्ररोहास्तमयंरजांसि २२

र्यइवभाति॥ अत्रमार्कंडेयः॥ विश्वकर्मात्यनुज्ञातः॥ शाकद्वीपेविवस्वता॥ भ्रममारोप्यतत्तेजः
शातनयोपचक्रमयति॥ २२॥ अस्येति। समग्रशक्तेः शक्तित्रयसंपन्नस्यास्यावंतिनाथस्यप्रयाणेषुजैत्रया
त्रास्वग्रेसरैर्वाजिभिरश्वैरुत्थितानिरजांसिसामंतानांसमेताभवानांराज्ञांयेशिखामणयश्चूडामणयस्तेषांप्रभा
प्ररोहास्तमयंतेजोनुकुर्वंतिनासारेवास्यशात्रवःपारजयंतइतिभावः॥२२॥ ॥ ॥ ॥ ॥

181
1947

असाविति। असाववंतिनाथःमहाकालंनामस्थानविशेषः तदेवनिकेतनंयस्यतस्यचंद्रमौलेरीश्वरस्यदूरस्यअ
दूरेसमीपेवसन् अतएवहेतोस्तमिस्रपक्षेपिकृष्णपक्षेपिप्रियाभिःसहज्योत्स्नावतःप्रदोषान्रात्रीःनिर्विशत्यनु
भवतिकिलनित्यज्योत्स्नाविहारत्वमेतस्यैवनान्यस्येतिभावः॥ २४॥ अनेनेति। रंभेकदलीस्तंभाविवऊरूयस्याःसा
रंभोरुस्तस्याःसंबुद्धिरंभोरु उत्तरपदादौपम्यइत्यूङ्प्रत्ययः नदीत्वात्ह्रस्वत्वंयूनाअनेनपार्थिवेनसहशिप्राना
मनदीतस्यास्तरंगाणामनिलकंपितासूद्यानानांपरंपरासुपंक्तिषुविहर्तुंतेमनसोरुचिःकच्चिदस्तिकिमि

असौमहाकालनिकेतनस्यवसन्नदूरेकिलचंद्रमौलेः॥तमिस्रपक्षेपिसहप्रियाभिर्ज्यो
त्स्नावतोनिर्विशतिप्रदोषान्॥२४॥अनेनयूनासहपार्थिवेनरंभोरुकच्चिन्मनसोरुचिस्ते॥
शिप्रातरंगानिलकंपितासुविहर्तुमुद्यानपरंपरासु॥२५॥तस्मिन्नभिद्योतितबंधुपद्मेप्र
तापसंशोषितशत्रुपंके॥ बबंधसौतीत्नमसौकुमार्याकुमुद्वतीभानुमतीवभावं॥ २६॥ ॥

त्यर्थः। अभिषंगेस्पृहायांचगभस्तौचरुचिःस्त्रियामित्यमरः॥२५॥ तस्मिन्निति। उत्तमसौकुमार्यांउत्कृष्टांगमार्दवासा
कुमुद्वती अभिद्योतिताउल्लसिताबंधवएवपद्मानियेनतस्मिन् प्रतापेनतेजसासंशोषिताःशत्रवएवपंकाःकर्दमायेनत
स्मिन्नवंतिनाथेकुमुद्वतीकुमुदिनीकुमुदनउवेतसेभ्याड्मलप्रत्ययः। भानुमत्यंशुमतीवभावंचित्तंनबबंधगतानुरागं
करोतिस्मेत्यर्थः। बंधूनांपद्मत्वेनशत्रूणांपंकत्वेनचनिरूपणांराज्ञःसूर्यसम्यार्थः॥२६॥ ॥ ९॥ ॥ ९॥ ॥

तामिति। सुनंदा तामरसांतराभां पद्मोदरतुल्यकांतिकनकगौरीमित्यर्थः। गुणैरन्यूनामधिकामित्यर्थः शोभनादं
ताथस्याः तासांसुदंतींवयसीदंतस्यदत्रितिदत्रादेशः। उगितश्चेतिङीपनांमकृतांमसिद्धावविधवुर्जलितांस्त्रियमिं
मधुरानिमाणांस्त्रियमित्यर्थः। अनुगताआपीयेषु अनूपानामदेशाः ककुद्भरधुरित्यादिना अपुमत्ययः ऊदनोर्देशेइत्यु
कारादेशः। तेषांराज्ञोनूपस्याग्रतोविधायभूयःपुनर्जगाद॥३७॥ संग्रामेति। संग्रामेषुयुद्धेषुनिर्विष्टाअनुभू
ताः सहस्रहस्तबाहवोयस्यसतथोक्तः युद्धादन्यत्रद्विबाहुरितियुज्यते। अष्टादशसुद्वीपेषुनिखाताः स्थापिताःयूपायेन
सतथोक्तः सर्वत्रक्रतुयाजीसार्वभौमश्चेतिभावः। जरायुजादिसर्वभूतरंजनादनन्यसाधारणोराजशब्दोयस्यसतथोक्तः

तामग्रतस्तामरसांतराभामनूपराजस्यगुणैरनूनां॥ विधायसृष्टिंललितांविधातुर्जगाद
भूयःसुदतींसुनंदा॥३७॥ संग्रामनिर्विष्टसहस्रबाहुरष्टादशद्वीपनिखातयूपः॥ अ
नन्यसाधारणराजशब्दोबभूवयोगीकिलकार्त्तवीर्यः॥३८॥ अकार्यचितासमकालमे
वप्रादुर्भवंश्चापधरःपुरस्तात्॥ अंतःशरीरेष्वपियःप्रजानांप्रत्यादिदेशाविनयंविनेता ३९

गी ब्रह्मविद्वानित्यर्थः सकिलभगवतोदत्तात्रेयाल्लब्धयोगइतिप्रसिद्धिः। कृतवीर्यस्यअपत्यंपुमान्कार्त्तवीर्योनाम
राजाबभूवकिलेति अयंचास्यमहिमासर्वोपिदत्तात्रेयहरप्रसादल्लब्धइतिभारतेदृश्यते॥३८॥ अकार्येति। विनेता
शिक्षकोयकार्त्तवीर्यः अकार्यस्यासत्कार्यस्यचिंतयाहंचौर्यादिकंकरिष्यामीतिबुध्यासमकालमेककालमेवयथातथा
पुरस्तादग्रेचापधरः प्रादुर्भवन्प्रजानांजनानांप्रजास्यात्संततौजनइत्यमरः। अंतःशरीरेषुअंतःकरणेषुअंतःशरीरशब्देनेंद्रियंल
क्ष्मतेअनयमपिप्रत्यादिदेशमानसापराधमपिनिवारयामासेत्यर्थः। अन्येतुवाक्कायापराधमात्रप्रतिकर्त्तारइतिभावः ३९

183
1947

ज्याबंधेति। ज्यायामोर्व्याबंधेननिस्पंदानिश्चेष्टाभुजायस्यसतेनविनिश्वसंतीज्याबंधोपरोधात्दीर्घनिश्वसं ती
तिवक्त्राणांपरंपरादशमुखानियेननिर्जितवासवेंद्रविजयिनाअत्रेंद्राद्योप्यतेनजितप्रायाएवेतिभावः। लंकेश्वरे
णदशास्येनयस्यकार्त्तवीर्यस्यकारागृहेबंधनागारे। कारास्याद्बंधनालयइत्यमरः। आप्रसादादनुग्रहपर्यंतंमुषितं
स्थितनपुंसकेभावेक्तः। एतत्प्रसादएवतस्यमोक्षोपायोनतुक्षात्रमितिभावः॥४०॥ तस्येति। आगमवृद्धसेवीश्रुत
वृद्धसेवीप्रपइतिव्याख्यातइतिशेषः। एषभूपतिस्तस्यकार्त्तवीर्यस्यान्वयेवंशेजातःयेनप्रतीपेनसंश्रयस्याश्रय
स्यपुंसोदोषैर्व्यसनादिभिःरूढमुत्पन्नंश्रियःसंबंधिस्वभावलोलप्रकृतिचंचलेत्येवंरूपमयशोदुःकीर्तिर्निरस्त

ज्याबंधनिस्पंदभुजेनयस्यविनिश्वसद्वक्त्रपरंपरेण॥ काराग्रहेनिर्जितवासवेनलंकेश्वरे
णोषितमाप्रसादात्॥४०॥ तस्यान्वयेभूपतिरेषजातःप्रतीपइत्यागमवृद्धसेवी॥ येनश्रि
यःसंश्रयदोषरूढंस्वभावलोलेत्ययशःप्रमृष्टं॥४१॥ आयोधनेकृष्णगतिसहायम
वाप्ययःक्षत्रियकालरात्रिं॥ धारांशितांरामपरश्वधस्यसंभावयत्युत्पलपत्रसारां॥४२

मंनिरस्तंदुष्टाश्रयत्यागशीलायाःश्रियःप्रकृतिचापलप्रवादोदुर्जनपरिकल्पितइत्यर्थः अथतुदोषराहित्यान्न
कदाचिदपिश्रियात्यज्यतइतिभावः॥४१॥ आयोधनेति। अयःप्रतीपःआयोधनेयुद्धेकृष्णगतिंकृष्णवर्त्मानिमग्नि
सहायमवाप्यक्षत्रियाणांकालरात्रिंसंहाराकालरात्रिसंहर्त्रीमित्यर्थः रामपरश्वधस्यजामदग्न्यपरशोःपयोःकुठारः
स्वधितिःपरशुश्चपरश्वधइत्यमरः। शीतांतीक्ष्णांधारांमुखंखड्गादीनांनिशितमुखधारामकीर्तितेतिविश्वः। उत्पल
पत्रस्यसारइवसारोयस्यास्तांतथाभूतांसंभावयतिमन्यते एतत्रगरजिगीषयागतान्रिपून्स्वमेवधक्ष्यामीतिभाग
वतावैश्वानरेणदत्तवरोयंराजाहस्त्यंतेनयागताःशत्रवइतिमहाभारतेकथानुसंधेया॥४२॥ ॥ ॥ ॥ ॥

अस्येति। दीर्घबाहोरस्य प्रतीपस्यांके लक्ष्मीभव एनस्त्रणी वेत्यर्थः। अनेनायं विष्णुतुल्य इति ध्वन्यते। माहिष्मती
नामनगरी तस्याः वप्रः प्रकार एव नितंबः तस्याः कांचीरशनाभूतां जलानां वेण्याप्रवाहेन रम्यां ओघोप्रवाहः
वेणी चेति हलायुधः। रवां नर्मदां प्रासादस्य जालैर्गवाक्षैः जालं समूहे आनाये गवाक्षक्षारकावपीत्यमरः। प्रे
क्षितुं काम इच्छास्ति यदि॥ ४३॥ तस्य इति। प्रकामं प्रियं तीति करं दर्शनं यस्य सोपि दर्शनीय इत्यर्थः। साक्षितीशः श

अस्यांक लक्ष्मीर्भव दीर्घबाहोर्माहिष्मतीवप्रनितंबकांचीं॥ प्रासादजालैर्जलवेणिरम्यां
रेवां यदि प्रेक्षितुमस्ति कामः॥ ४३॥ तस्याः प्रकामंप्रियदर्शनोपि न स क्षितीशो रुचये बभूव॥
शरत्प्रमृष्टांबुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः॥ ४४॥ सा शूरसेनाधिपतिं सुषेणमुद्दि
श्य देशांतरगीतकीर्तिं॥ आचारशुद्धोभयवंशदीपं शुद्धांतरक्ष्या जगदे कुमारी॥ ४५॥ ॥

रदा प्रमृष्टांबुधरोपरोधः निरस्तमेघावरणपर्याप्तकलः शशी नलिन्याः इव इंदुमत्याः रुचये न बभूव रोचिनां जीजन
दित्यर्थः लोकोभिन्नरुचिरिति भावः॥ ४४॥ सेति। लोकांतरे स्वर्गादावपि गीतकीर्तिमाचारेण शुद्धयोरुभयोर्वं
शयोर्मातापितृकुलयोर्दीपकं प्रकाशकं उभयवंशो स्वनोभयपक्षवन्निर्वाहः शूरसेनानां देशानामधिपतिं सुषेणं नाम
नृपतिमुद्दिश्याभिसंधाय शुद्धांतरक्ष्या अंतःपुरपालिकया कर्मणि सा एतञ्ज्ञपूः सा कुमारी जगदे॥ ४५॥ ॥ ॥
185
1947

नीपेति। यज्वा विधिवदिष्टवान् सुयजो ङ्वनिप्रत्ययः। एषः पार्थिवः नीपानामन्वयो सीति नीपान्वयः नीपवंशजः
यं सुषेणमाश्रित्य गुणैः शान्तिमौनादिभिः शांतं प्रसन्नं सिद्धाश्रमम्रष्या श्रममेत्य प्राप्य सत्त्वैर्गजसिंहादिभिः प्राणि
भिरिव नैसर्गिकः स्वाभाविकोपि परस्परेण विरोधः उत्सस्रजे त्यक्तः॥ ४६॥ तस्येति। हिमांशोः कांतिश्चंद्र कि
रण इव आस्ये मुखे नस्य नयनयोरभिरामा रवेण कांतिशोभा आत्मगेहे स्वभवने सभि विष्टा संक्रांता अविषह्य वि
सोढुमशक्यं तेजः प्रतापस्तु हर्म्याग्रेषु धनिकमंदिराग्रांतेषु हर्म्यादि धनिनां वासो भवनागारमंदिरमित्यमरः।
संरूढास्तृणांकुरा येषां तेषु शून्येष्वित्यर्थः। रिपुमंदिरेषु शत्रुनगरेषु। मंदिरं नगरे गृहे इति विश्वः। संनिविष्टं स्वजनान्हा

नीपान्वयः पार्थिव एष यज्वा गुणैर्यमाश्रित्य परस्परेण॥ सिद्धाश्रमं शांतमिवेत्य सत्त्वैर्नैसर्गिको
प्युत्ससृजे विरोधः॥ ४६॥ अस्यात्मगेहे नयनाभिरामा कांतिर्हिमांशोरिव संनिविष्टा॥ हर्म्या
ग्रसंरूढतृणांकुरेषु तेजोविषह्यं रिपुमंदिरेषु॥ ४७॥ यस्यावरोधस्तनचंदनानां प्रक्षालनाद्वारि
विहारकाले॥ कलिंदकन्या मथुरां गतापि गंगोर्मिसंसक्तजलेव भाति॥ ४८॥ ॥ ॥

दको द्विषंनयश्चेति भावः॥ ४७॥ यस्येति मुखेण यस्य वारिविहारकाले जलक्रीडासमये अवरोधानामंतःपुरांगनानां स्त
नेषु चंदनानां मलयजानां प्रक्षालनाद्धेतोः कलिंदो नाम शैलस्तत्कन्या। यद्वा। कलिंदो यं रवं डपतीति कलिंदः स्त
र्यः तत्कन्या यमुना कालिंदी सूर्यतनया यमुना शमनस्वसेत्यमरः। मथुरायां गंगाभावं सूचयता अपि शब्देन कालिंदी तीरे म
थुरा लवणासुरकाले शत्रुघ्नेन निर्मास्यत इति वक्ष्यति। तत्र मधुनाम मथुरा संभव इति चिंत्यां मथुरां मधुपुरीति शब्दप्रका
शे यद्वा सान्वेति मधुनामास्य राज्ञो गता प्राप्तिगंगायापि विकुष्टापीत्यर्थः। गंगाया भागीरथ्याः ऊर्मिभिः संसक्ते
नयेव भाति धवलचंदनसंसर्गात् भत्स्यमांगादन्यत्रापि गंगासंगतेव भातीत्यर्थः सितासिते हि गंगायमुने इति घंटापथः ४८

त्रातेनेति। तार्क्ष्याद् गरुडात्। त्रस्तेन यमुनाओकं स्थानं यस्य तेन कालीयेन नागेन विस्पष्टं किल लब्धभयदानाभिः
क्रियत्वेन दत्तं वक्षस्थलमपि रुचिं मणिं दधानो यः स्फुरेण सकौस्तुभं कृष्णं विष्णुं ह्रेपयतीव श्रीयतीव अतिशी
त्यादि न सुगागमः। कौस्तुभमतिरपि उत्कृष्टोयं मणिरिति भावः॥ ५९॥ संभाव्येति। युवानमनु सुषेणं भर्तारं सं
भाव्यमत्वापति त्वेनांगीकृत्येत्यर्थः। मृदुप्रवालो भरानुपरि प्रस्तारितकोपलपल्लवा पुष्पशय्या यस्मिन्तत्र चैत्रर
थात् कुबेरोद्यानात् अन्ने वृंदावने वृंदावननामके उद्याने हे सुंदरी यौवनस्य श्रीः फलं निर्विश्य तां भज्यतां।

त्रातेन तार्क्ष्यात्किल कालियेन मणिं विसृष्टं यमुनौकसा यः॥ वक्षस्थलव्यापि रुचं दधानः
सकौस्तुभं ह्रेपयतीव विष्णुं॥ ५९॥ संभाव्य भर्तारममुं युवानं मृदुप्रवालोत्तरपुष्पश
य्ये॥ वृंदावने चैत्ररथादनूने निर्विश्यतां सुंदरि यौवनश्रीः॥ ६०॥ अध्यास्य चांभः पृषतो
क्षितानि शैलेयनद्धानि शिलातलानि॥ कलापिनां प्रावृषि पश्य नृत्यं कांतासु गोवर्द्धनकंद

॥ ६०॥ अध्यास्येति। किंच प्रावृषि वर्षासु कांतासु गोवर्धनस्याद्रेः कंदरासु दरीषु। दरी तु कंदरो वा स्त्रीत्यमरः॥
अंभसः पृषतैर्बिंदुभिः उक्षितानि सिक्तानि शिलेव शैलेयं। शिलाजतु शैलेयमिति यादवः॥ यद्वा शिलापु
ष्पाख्य ओषधिविशेषः। कालानुसार्यवृद्धाश्मपुष्पजं च शिवा मितु शैलेयमित्यमरः। शैलायाः ढञ्चेत्यत्र
शिलाया इति योगविभागाद्विकार्येढप्रत्ययः। तद्गंधवन्ति शैलेयगंधीनि शिलान्यध्यास्य अधिष्ठाय क
लापिनां बर्हिणां नृत्यं पश्य॥ ६१॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

187/1947

नृपमिति। स्याद्यावर्तोभिसांभ्रमरइत्यमरः। आवर्त्तमनोज्ञा नाभिर्यस्याः सा इंदुमती इदं वचनं दीसाम्यार्थमुक्तं।
अन्यवधूरन्यवधूर्भवित्री भाविनी कुसामारी तं नृपं सागरगं स्रोतोवहा नदी मार्गवशादुपेतं प्राप्तं महीधरं पर्वतं इ
व व्यत्यगात् अतीत्यगता॥ ६२॥ अथांगदेति। अथ भुजिष्या किंकरी नंदा। भुजिष्या किंकरी मता इति हलायुधः। अंगद
श्लिष्टभुजं केयूरनद्धभुजं सादितशत्रुपक्षं विनाशितशत्रुवर्गं हेमांगदं नाम कलिनाथं आसेदुषी मासन्नोप्यवाले

नृपं तमावर्तमनोज्ञनाभिः साव्यत्यगादन्यवधूर्भवित्री॥ महीधरं मार्गवशादुपेतं स्रो
तोवहा सागरगामिनीव॥ ६२॥ अथांगदाश्लिष्टभुजं भुजिष्या हेमांगदं नाम कलिंगनाथं॥
आसेदुषी सादितशत्रुपक्षं बालामबालेंदुमुखीं बभाषे॥ ६३॥ असौ महेंद्राद्रिसमानसारः प
तिर्महेंद्रस्य महोदधेश्च॥ यस्य क्षरत्सैन्यगजच्छलेन यात्रासु यातीव पुरो महेंद्रः॥ ६४॥

दुमुखीं पूर्णेंदुमुखीं इंदुमतीं बभाषे॥ ६३॥ आसाविति। महेंद्राद्रेः समानसारः तुल्यस्थैर्यः असौ हेमांगदः महें
द्रस्य नामकुलपर्वतस्य महोदधेश्च पतिः स्वामी महेंद्रः महोदधी एवास्य गिरिजलदुर्गे इति भावः। यस्य यात्रासु क्षरे
तां मदस्राविणां सैन्यगजानां छलेन व्याजेन महेंद्रो महेंद्राद्रिः पुरोग्रे पातीव अद्रिकल्पा भ्य गजा इत्यर्थः॥ ६४॥ ॥

ज्याघातेति। सुभुजश्चापभृतां पुरोगो धनुर्धराग्रेसरो यो बंदीकृतानां गृहीतानां प्रग्रहोपग्रहौ बंधावित्यमरः। रि
पुश्रियां सांजनो बाष्पसेको ययोस्ते कज्जलमिश्रास्रसिक्ते इत्यर्थः। पद्धतीवद्वे ज्याघातानां मौर्वीकिणानां रेखे
राजी भुजाभ्यां बिभर्ति द्विवचनात्सव्यसाचीत्वं गम्यते। रिपुश्रिया भुजाभ्यामेवाहरणात् द्रढतरे रेखे यो स्तस्य इति
नोत्प्रेक्षा। तयोः सांजनत्वात् सांजनाश्रुसेकोक्तिः॥५५॥ यमिति आत्मनः सद्मनि सुप्तं यं हेमांगदं संरूढः समी
पस्थः अतएव प्रासादवातायनैर्दृश्यवीचिः मंद्रेण गभीरेण ध्वनिना व्याजितो विसर्जितः यामस्य तुर्यः प्रहरावसा

ज्याघातरेखे सुभुजो भुजाभ्यां बिभर्ति यश्चापभृतां पुरोगः॥ रिपुश्रियः सांजनबाष्पसेके
बंदीकृताया इव पद्धती द्वे॥५५॥ यमात्मनः सद्मनि संनिकृष्टं मंद्रध्वनित्याजितयामतू
र्यः॥ प्रासादवातायनदृश्यवीचिः प्रबोधयत्यर्णव एव सुप्तं॥५६॥ अनेन सार्द्धं विहरां
बुराशेस्तीरेषु तालीवनमर्मरेषु॥ द्वीपांतरानीतलवंगपुष्पैरपाकृतस्वेदलवा मरुद्भिः ५७

नवाद्यं येन स तथोक्तः मंद्रस्तु गंभीर इत्यमरः। द्वौ यामप्रहरौ समावित्यमरः। अर्णव एव प्रबोधयति अर्णवस्यैव तूर्यका
र्यकारित्वात् तद्वैयर्थ्यमित्यर्थः। समुद्रस्यापि सेव्यः किमन्येषामिति ध्वनिः॥५६॥ अनेनेति। अनेन राज्ञा सार्द्धं तालीवनम
र्मरेषु मर्मरेति ध्वनत्सु अथ मर्मरः स्वनिते वस्त्रपर्णानामित्यमरवचनात् गुणपरस्यापि मर्मरशब्दस्य गुणिपरत्वं प्रयोगाद
वसेयं अंबुराशेस्तीरेषु द्वीपांतरेषु। द्वीपांतरेभ्य आनितानि लवंगपुष्पाणि देवकुसुमानि यैस्तैः लवंगं देवकुसुममित्यमरः। म
रुद्भिर्वातैः अपाकृताः प्रशमिताः स्वेदस्य लवाः बिंदवो यस्याः सा तथाभूता सती त्वं विहर क्रीड॥५७॥ ५९॥ ॥ ११

184/1947

प्रलोभितेति। आकृत्या रूपालोभनीया आकर्षणीया न तु वर्णमात्रेणेत्यर्थः। विदर्भराजावरजा भोजानुजा इंदुमती त
एवं प्रलोभिता प्रचोदितापि नीत्या पुरुषकारेण दूरकृष्टा दूरमानीता लक्ष्मीः प्रतिकूलं दैवं यस्य तस्मात् पुंस इव तस्माद्धेमां
गदात् अपवृत्ता प्रतिनिवृत्ता॥५८॥ अथेति। अथ द्वारे नियुक्ता दौवारिकी सुनंदा तत्र नियुक्त इति ठक्प्रत्ययः। द्वारादीनां चे
त्यैजागम औकारः देवसरूपं देवतुल्यं तुरगाख्यस्य पुरस्य पांड्यदेशे कायकुब्जतीरवर्तिनो नागपुरस्य नाथं प्रेत्य प्राप्य हे
कौमारि इति विलोकयेति पूर्वानुशिष्टां पूर्वमुक्तां भोजरोद्रो गोत्रापत्यस्त्रियं भोज्यामिंदुमतीं कौड्यादिभ्यश्चेत्यत्र भो

प्रलोभिताप्याकृतिलोभनीया विदर्भराजावरजा तयैवं॥ तस्मादपावर्त्तत दूरकृष्टा नीत्येव लक्ष्मीः
प्रतिकूलदैवात्॥५८॥ अथोरगाख्यस्य पुरस्य नाथं दौवारिकी देवसरूपमेत्य॥ इतश्चकौ
राक्षि विलोकयेति पूर्वानुशिष्टां निजगाद भोज्यां॥५९॥ पाड्योयमंसार्पितलंबहारः कृप्तां
गरागो हरिचंदनेन॥ आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः॥ ६०॥ ॥

जात्क्षत्रियात इत्युपसंख्यानात् ष्यङ् प्रत्ययः यङश्चापिति चाप्। निजगाद इतो विलोकयेति पूर्वमुक्ता पश्चादुक्तव्यं नि
जगादेत्यर्थः॥५९॥ पाड्य इति। अंसयोरर्पिता लंबत इति लंबा हारा यस्य स हरिचंदनेन गोशीर्षाख्येन चंदनेन तैलप
र्णिकगोशीर्षे हरिचंदनमित्यमरः। कृप्तांगरागः सिद्धानुलेपनः अयं पांड्यानां जनपदानां राजा पांड्यः पांड्यजनपदश
ब्दात् क्षत्रियाद्ण् एवक्त इति अण् तस्य राजपत्यवदिति वचनात्। बालातपेन रक्ताः अरुणाः सानवो यस्य सः
सनिर्झरोद्गारः प्रवाहस्यंदनसहितः प्रवाहो निर्झरो झर इत्यमरः। अद्रिराज इति भाति॥६०॥ ॥५९॥ ॥५९॥

146770

विंध्यस्येति। विंध्यस्यनाममहाद्रेः तपनमार्गनिरोधायवर्द्धमानस्येतिशेषः। संस्तंभयिता निवारकः निःशेषंपीत
उज्झितः पुनस्त्यक्तः सिंधुराजः समुद्रो येन सोगस्त्यः अश्वमेधावभृथे दीक्षांतेकर्मणि दीक्षांतोवभृथोयज्ञइत्यमरः
आद्रमूर्त्तेः स्नातस्येत्यर्थः। यस्यपांड्यस्य भीत्यास्नेहेन नतु दाक्षिण्येन सुस्नातंपृच्छ तीतिसौस्नातिकोभवतिपृ
च्छतौसुस्नातादिभ्यउपसंख्यानम् इति ठक्॥ ६१॥ अस्त्रमिति। पुरापूर्वंजनस्थानस्यखरालयस्य कृते तुपश्चनगरत्रेता
यांसत्यमंदिरं द्वापरेतुजनस्थानं कलौनाशिकमुच्यतइति। विमर्दशंकी हस्तोउद्धतो लंकाधिपतिरावणः इरापंदुर्लभ

विंध्यस्यसंस्तंभयितामहाद्रेर्निःशेषपीतोज्झितसिंधुराजः॥ प्रीत्याश्वमेधावभृथार्द्रमू
र्तेः सौस्नातिकोयस्यभवत्यगस्त्यः॥ ६१॥ अस्त्रंहरादाप्तवताइरापंयेतें इलोकावजया
यदृप्तः॥ पुराजनस्थानविमर्दशंकी संधायलंकाधिपतिःप्रतस्थे॥ ६२॥ अनेनपाणौविधि
वद्गृहीतेमहाकुलीनेनमहीवगुर्वी॥ रत्नानुविद्धार्णवमेखलायाः दिशःसपत्नीभवदक्षिणस्याः ६२

नस्थेब्रह्मशिरोनामकं हरादाप्तवतायेनपांड्येनसंधायसंधिविधायइंद्रलोकावजयायइंद्रलोकंजेतुंप्रतस्थेइंद्रविज
यिनोरावणस्यापि विजेतारमित्यर्थः॥ ६२॥ अनेनेति। महाकुलीनेन महाकुलेजातेन महाकुलादञ्खञावितिखञ्प्रत्ययः
अनेनपांड्येन पाणौत्वदीयोविधिवद्यथाशास्त्रंगृहीते सातिगुर्वीगुरुः वोतोगुणवचनादितिङीप्। महीवरत्नैनुरंविद्धोव्या
प्तोणर्वएवमेखलायस्यास्तस्याइदंविशेषणंमह्याइंदुमत्यांचयोज्यंदक्षिणस्यादिशः सपत्नीभव अनेनसपत्न्यंतराभा
वोध्वन्यते॥ ६३॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ १२

191/1947

तांबूलेति। तांबूलवल्लीभिः नागवल्लीभिः परिणद्धाः परिरब्धाः पूगाः क्रमुकायासुतास्तुतांबूलवल्लीतांबूली
नागवल्ल्यपिनिघोरात्तुपूगः क्रमुकइतिचामरः। एलालताभिरालिंगिताश्चंदनपादपायासु तासुगं
धसारोमलयजोभद्रश्रीश्चंदनोस्त्रियामित्यमरः तमालस्यतापिच्छस्यपत्राण्यास्तरणंयासुतासुकालस्कंधस्त
मालःस्यात्तापिच्छोपीत्यमरः मलयस्थलीषु शश्वन्मुहुः सदावारंतुंप्रसीद अनुलाभव॥ ६४॥ इंदीवरेति।

तांबूलवल्लीपरिणद्धपूगास्वेलालतालिंगितचंदनासु॥ तमालपत्रास्तरणासुरंतुं
प्रसीदशश्वन्मलयस्थलीषु॥ ६४॥ इंदीवरश्यामतनुर्नृपोसौत्वंरोचनागौरशरीरय
ष्टिः॥ अन्योन्यशोभापरिवृद्धयेवां योगस्तडित्तोयदयोरिवास्तु॥ ६५॥ स्वसुर्विदर्भाधिपतेस्त
दीयोलेभेंतरंचेतसिनोपदेशः॥ दिवाकरादर्शनबद्धकोशेनक्षत्रनाथांशुरिवारविंदे॥ ६६॥ ॥

असौनृपः इंदीवरश्यामतनुस्त्वंरोचनागोरोचनेनगौरीशरीरयष्टिर्यस्याः साअतस्तडित्तोयदयोर्विद्युन्मेघयोरिववांयु
वयोर्योगः समागमोन्योन्यस्यशोभायाः परिवृद्धयेस्तु॥ ६५॥ स्वसुरिति। विदर्भाधिपतेर्भोजस्य स्वसुःकारि
दुमत्याश्चेतसितदीयः सुनंदासंबंधिउपदेशोवाक्यंदिवाकरस्यादर्शनेन बद्धकोशे मुकुलितेअरविंदेनक्षत्रना
थांशुश्चंद्रकिरणइवांतरमवकाशंनलेभे॥ ६६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

र॰ मू॰ टी॰ संचारिणीति। पतिंवरा साइंदुमतीरात्रौ संचारिणी दीपशिखेव यं यं भूपालं व्यतीयाय अतिक्रमआतीत्यगता स स स६
३२ भूमिपालः समइत्यर्थः नित्यवीप्सयोरिति वीप्सायां द्विर्वचनं नरेंद्रमार्गे राजपथे अट्टाख्ये गृहभेद इव स्यादट्टः क्षौ
ममस्त्रियामित्यमरः। विवर्णभावं विच्छायत्वं तमाश्रतत्वं प्रपेदे॥६७॥ तस्यामिति। तस्यां इंदुमत्यामुपस्थिताया
मासन्नायां सत्यां रघोः सूनुरजो मां वृणीत न वेति समाकुलः संशयितोऽभूत्। अथास्याजस्य वामेतरो दक्षिणो
बाहुः केयूरं बध्यतेऽत्रेति केयूरबंधोंगदस्थानं तस्योच्छ्वसितैः स्फुरणैः संशयं नुनोद॥६८॥ तंप्राप्येति। ष

संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा॥ नरेंद्रमार्गाट्ट इव प्रपेदे विवर्णभावं
स स भूमिपालः॥६७॥ तस्यां रघोः सूनुरुपस्थितायां वृणीत मां नेति समाकुलोऽभूत्॥
वामेतरः संशयमस्य बाहुः केयूरबंधोच्छ्वसितैर्नुनोद॥६८॥ तं प्राप्य सर्वावयवानवद्यं
व्यावर्ततान्योपगमात्कुमारी॥ न हि प्रफुल्लं सहकारमेत्य वृक्षांतरं कांक्षति षट्पदाली॥६९॥

ट्पदाली कुमारी सर्वेष्ववयवेषु अनवद्यं दोषं तमजं प्राप्य अन्योपगमात् राजांतरोपगमात् व्यावर्त्त निवृत्ता तथा हि।
षट्पदी भृंगावलिः प्रफुल्लतीति प्रफुल्लं विकसितं पुष्पितमित्यर्थः फुल्लतेः पचाद्यच् फलतेस्तु प्रफुल्लमिति पठितव्यं अनुपस ३२
र्गाद्धिति निषेधादित्युभयथापि न कांचिदनुपपत्तिरित्यलं प्राकृ सहकारं चूतविशेषमेत्य आम्रश्चूतोरसालोसौ सहकारोति सौ
रभ इत्यमरः। वृक्षांतरं न कांक्षति न हि सर्वाति कृष्टवस्तुलाभे वस्त्वंतरस्याभिलाषः स्यादित्यर्थः॥६९॥ ॥७॥ ॥

193/1947

तस्मिन्निति। तस्मिन्नजे समावेशिता सक्रामिता चित्तवृत्तिर्यस्यास्तां इंदोः प्रभेव प्रभा यस्यास्तां आल्हादकत्वादिंदु
साम्यं इंदुमतीमवेक्ष्य अनुक्रमज्ञा वाक्योपोद्वपर्याभिज्ञा सुनंदा इदं वक्ष्यमाणं सविस्तरं सप्रपंचं मथ ने वाक्यशब्द इति
जश्लोनिषेधात् रुदोरविस्यप्रत्ययः विस्तारो विस्तरो व्यासः स तु शब्दस्य विस्तर इत्यमरः केवाक्यं वक्तुं प्रचक्रमे॥७०॥ इ
क्ष्वाकुवंश्येति। इक्ष्वाकोर्मनुपुत्रस्य वंश्यः वंशे भवः नृपाणां ककुदं श्रेष्ठः ककुद्धतककुदं श्रेष्ठे वृषांराजलक्ष्मणीति विश्वः। आ
हितलक्षण प्रख्यातगुणैः प्रतीतः कृतलक्षणाविस्यमरः। ककुदि वृषांसे तिष्ठतीति ककुत्स्थ इति प्रसिद्धः॥ कश्चिद्राजाभूत्

तस्मिन्समावेशितचित्तवृत्तिमिंदुप्रभामिंदुमतीमवेक्ष्य॥ प्रचक्रमे वक्तुमनुक्रमज्ञा
सविस्तरं वाक्यमिदं सुनंदा॥७०॥ इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहितल
क्षणोऽभूत्॥ काकुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोसलेंद्राः॥७१॥ ॥

महाककुत्स्थ इत्याहितलक्षणः प्राप्तचिन्होऽभूदिति यतः ककुत्स्थादारभ्य उन्नतेच्छा महाशायः महेच्छस्तु महाशय इत्यमरः
उत्तरकोशलेंद्रा राजानो दीपादयः श्लाघ्यं प्रशस्तं ककुत्स्थस्य गोत्रापत्यं वा पुमान् काकुत्स्थ इति शब्दसंज्ञां दधति बिभ्रति
तन्नाम स स्वयशोऽपि वंशस्य कीर्तिकर इति भावः पुरा किल पुरंजयो नाम साक्षाद्भगवतो विष्णोरंशावतारः कश्चिदैक्ष्वाको
राजा देवैः सह समयबद्धेन देवासुरयुद्धे महोक्षरूपधारिणो महेंद्रस्य ककुदि स्थित्वा पिनाकी लीलया निखिलसमुरकुलं
निहत्य ककुत्स्थसंज्ञां लेभे इति पौराणिकी कथानुसंधेया वक्ष्यते चायमेवार्थ उत्तरश्लोके॥७१॥ ॥८॥ ॥९॥

महेंद्रमिति। यः ककुत्स्थः संयति युद्धे महानुक्षा महोक्षः अचतुरेत्यादिना निपातः तस्य रूपमिव रूपं यस्य तं महेंद्रं आस्थाय आरुह्य अत एव प्राप्तपिनाकिनः ईश्वरस्य लीला येन स तथोक्तः सन् बाणैः असुरांगनानां गंडस्थलीः प्रोषिततपत्रलेखानिवृत्तपत्ररचनाश्चकार तत्तद्भर्तृन् असुरान् अवधीदित्यर्थः। नहि विधवानां प्रसाध्यत इति भावः॥७२॥ ऐरावतेति। यः काकुत्स्थः ऐरावणस्य स्वर्गगजस्या— लेन ताडनेन विश्लथं शिथिलं अंगदं ऐंद्रमंगदं स्वकीयेन संघट्टयन् स्वामर्ध्यां श्रेष्ठां मूर्तिमुपेयुषोपि प्राप्त— च गोत्रभिदः इंद्रस्य अर्द्धमासनस्याद्धीसनं अर्द्धं नपुंसकमिति समा

महेंद्रमास्थाय महोक्षरूपं यः संयति प्राप्तपिनाकिलीलः॥ चकार बाणैरसुरांगनानां गंडस्थलीः प्रोषितपत्रलेखाः॥७२॥ ऐरावतस्फालनविश्लथं यः संघट्टयन्नंगदमंगदेन॥ उपेयुषः स्वामपि मूर्तिमग्र्यामर्धासनं गोत्रभिदोधितिष्ठौ॥७३॥ जातः कुले तस्य किलोरुकीर्तिः कुलप्रदीपो नृपति— लीपः॥ अतिष्ठदेकोनशतक्रतुत्वे शक्राभ्यसूयाविनिवृत्तये यः॥७४॥

सः अधितष्ठौ अधितिष्ठवान् स्थादिष्वभ्यासेन चाभ्यासस्येत्यभ्यासस्यापायेपि षत्वं न केवलं महोक्षरूपधारिण एवेंद्रस्य ककुदमारुरुक्षत् किंतु निजरूपधारिणोऽपींद्रस्याद्धीसनमित्यपिशब्दार्थः अथवा अर्द्धासनमपीत्यपेरन्वयः॥७३॥ जात इति। उरुकीर्तिर्महायशाः॥ कुलप्रदीपको वंशप्रदीपको दिलीप इति नृपतिस्तस्य कुले जातः किल यो दिलीपः॥ शक्राभ्यसूयायाः विनिवृत्तये न स्वशक्रोतिभावः। एकेनोनाः शतं क्रतवो यस्य स एकोनशतक्रतुः तस्य भावस्तत्त्वे अतिष्ठत् इंद्रप्रीतये शततमं क्रतुमवशेषितवानित्यर्थः॥७४॥ ५॥ ॥५॥ ॥५॥ ॥५॥ ५॥

195
1947

यस्मिन्निति। यद्यस्मिन् दिलीपे महीशासति विहरत्यत्रेति विहारः। क्रीडास्थानं तस्योर्द्धपथे निद्रां गतानां वाणिनीनां वाणिनी नर्तकी मत्ता विदग्धा वनिता सुचेतिविश्वः। वाणिन्यो नर्तकी मत्तेत्यमरश्च। अंशुकानि वस्त्राणि वातोपि नास्रंसयत्। आभरणाय आभरणं आहर्तुं को हस्तं लंबयेत् तस्य आज्ञासिद्ध् दकुतोभयसंचाराः। भजा इत्यर्थः। भर्द्धश्चासौ पंथाश्चेति विग्रहः समप्रविभागे प्रमाणाभावानैकदेशि समासः॥७९॥ पुत्र इति। विश्वजितो नाम महाक्रतोः प्रयोक्ता अनुष्ठाता तस्य दिलीपस्य पुत्रो रघुः पदं पत्न्यमेवप्रशास्ति पालयंति। योरघुश्चतस्रभ्यो दिग्भ्यश्चाव

यस्मिन्महीशासति वाणिनीनां निद्रां विहारार्द्धपथे गतानां॥ वातोपि नास्रंसयदंशुकानि को लंबयेदाभरणाय हस्तं॥७५॥ पुत्रो रघुस्तस्य पदं प्रशास्ति महाक्रतोर्विश्वजितः प्रयोक्ता॥ चतुर्दिगावर्जनसंभृतां यो मृत्पात्रशेषामकरोद्विभूतिं॥७६॥ आरूढमद्रीनुदधीन् प्रतीर्णं भुजंगमानां वसतिं प्रविष्टं॥ ऊर्ध्वंगतं यस्य न चानुबंधि यशः परिच्छेत्तुमियत्तयालं ७७

र्जितान्हृता संभृता सम्यग्वर्द्धिता तां चतुर्दिगावर्जितसंभृतां विभूतिं संपदं मृत्पात्रावशेषो यस्यास्तां मकरोत् विश्वजिद्यागस्य सर्वस्वदक्षिणाकत्वादित्यर्थः॥७६॥ आरूढमिति। किंच अद्रीनारूढमुदधीन्वितीर्णं अवगाढं सकलभूगोलव्यापकमित्यर्थः। भुजगमानां वसतिं पातालं प्रविष्टं ऊर्ध्वं स्वर्गादिकं गतं व्याप्तं सर्वदिशव्यापीत्यर्थः अनुबध्नातीत्यनुबंधि अवच्छेकिलत्रयव्यापकं चेत्यर्थः। अत एवैवंभूतं यस्य यशः इयत्तया देशतः कालतो वा लेन विन्मानेन परिच्छेत्तुं मातुं नालं न शक्यं ॥७७॥

असाविति। असावजोनाख्यः कुमारस्त्रिविष्टपस्य स्वर्गस्य पतिमिंद्रं जयंत इव जयंतः पाकशासन इत्यमरः तं
प्रभुमनु जातः तस्माज्जात इत्यर्थः तज्जातोपि तदनुजातो भवतीति जन्यजनकयोरानंतर्यात् गत्यर्थात् कर्मकश्लि
षशीङ् स्थासवजनरुहजर्यतिभ्यश्चेति क्तः। उपसर्गवशात् सकर्मकत्वं आहचत्रैव वृत्तिकारः श्लिषादयः सोप
सर्गाः सकर्मका भवंतीति दम्यः शिक्षणीयवत्सो यो अजः गुर्वीं भुवनस्य धुरं धुर्येण धुरंधरेण चिरानिरूढेन पित्रा सदृशं
तुल्यं यथा तथा बिभर्ति। यथा कश्चिद्वत्सतरो पि धुर्येण महोक्षेण समं वहतीत्युपमालंकारो ध्वन्यते। दम्यवत्सत

असौ कुमारस्तमजोनुजातस्त्रिविष्टपस्येव पतिं जयंतः॥ गुर्वीं धुरं यो भुवनस्य पित्रा धुर्येण द
म्यः सदृशं बिभर्ति॥ ७८॥ कुलेन कांत्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः॥ त्वमात्मन
स्तुल्यममुं वृणीष्व रत्नं समागच्छतु कांचनेन॥ ७९॥ ततः सुनंदावचनावसाने लज्जां तनूकृत्य
नरेंद्रकन्या॥ दृष्ट्या प्रसादामलया कुमारं प्रत्यग्रहीत्संवरणस्रजेव॥ ८०॥ ॥ ॥ ॥

रावित्यमरः॥ ७८॥ कुलेनेति। कुलेन कांत्या लावण्येन नवेन वयसा यौवनेन विनयः प्रधानं येषां तैर्गुणैः श्रुतशीलादिभि
श्च आत्मनस्तुल्यं स्वानुरूपममुमजं त्वं वृणीष्व किं बहुना रत्नं कांचनेन समागच्छतु संगच्छतां प्रार्थनायां लोट् रत्नकां
चनयोरिवात्यंतमनुरूपत्वाद्युवयोः समागमः प्रार्थ्यत इत्यर्थः॥ ७९॥ तत इति। ततः सुनंदावचनस्यावसाने अंते नरेंद्रकन्या
इंदुमती लज्जां तनूकृत्य संकोच्य प्रसादेन अमलया दृष्ट्या प्रसन्नया वरणस्य स्रजा स्वयंवरणार्थस्रजेवेनं कुमारम
जं प्रत्यग्रहीत् स्वीकारसम्यक्तानुरागमपश्यदित्यर्थः॥ ८०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ३६

197
1947

सेति। सा कुमारी यूनि तस्मिन्नजे अभिलाषबंधमनुरागग्रंथिं शालीनतया अधृष्टतया स्यादधृष्टस्तु शालीन इत्यमरः
शालीनकौपीने अधृष्टकार्ययोरिति निपातः। वक्तुं न शशाक तथापि अरालकेशाः सो भिलाषबंधो रोमांचलक्ष्येण पुलक
व्याजेन व्याजोपदेशौ लक्ष्यं चेत्यमरः। गात्रयष्टिं नीत्वा निराक्रामत्॥ सात्विकभावेन लिंगेन प्रकाशित इत्यर्थः॥ ८१॥
तथेति। सख्यामिंदुमत्यां तथागतायां तथाभूतायां दृष्टानुरागायां सत्यामित्यर्थः। तथागतेति। सखी सहचरी सखी
भाषायामिति निपातनात् ङीपूर्वेत्रभर्तृ सुनंदा हे आर्ये पूज्ये अन्योन्यं प्रति व्रजाम इति परिहासपूर्वमोवभाषे।

सा यूनि तस्मिन्नभिलाषबंधं शशाक शालीनतया न वक्तुं॥ रोमांचलक्ष्येण स गात्रयष्टिं भि
त्वा निराक्रामदरालकेश्याः॥ ८१॥ तथागतायां परिहासपूर्वं सख्यां सखी वेत्रधरा बभाषे॥
अन्यत्र व्रजामो न्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श॥ ८२॥ सा चूर्णगौरं रघुनंदनस्य धात्रीक
राभ्यां करभोपमोरूः॥ आसंजयामास यथाप्रदेशं कंठे गुणं मूर्तमिवानुरागं॥ ८३॥ ॥ ॥

अथ वधूरिंदुमती एनां सुनंदामसूयया रोषेण कुटिलं ददर्श अन्यगमनस्यासह्यत्वादिति भावः॥ ८२॥ सेति। करभः कर
प्रदेशविशेषः मणिबंधादाकनिष्ठात् करस्य करभो बहिरित्यमरः। करभ उपमा ययोस्तावूरू यस्याः सा ऊरूत्तरपदादौप
म्य इत्यूङ्प्रत्ययः। सा कुमारी चूर्णेन गौरं लोहितं गुणं स्रजं मूर्तं मूर्तिमंतं अनुरागमिव धात्र्याः उपमातुः सुनंदायाः
कराभ्यां रघुनंदनस्याजस्य कंठे यथाप्रदेशं यथास्थानं असंजयामास न तु स्वयमाससंज अनौचित्यात्
॥ ८३॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

यतेति। वरेण्योवरणीयउत्कृष्टः वृङः एण्यः सोजः मंगलपुष्पमय्यामधूकादिकुसुमप्रचुरयाविशालेवक्षस्थलेलंब
मालंबमानतयास्त्रजाविदर्भराजावरजामिंदुमतींकंठार्पितोबाहुरेवपाशोयया तामगंस्तमन्यतेलुङ्। बाहुपाशानन्य
सुखमन्वभूदित्यर्थः॥८४॥ शशिनमिति। तत्रस्वयंवरेसमगुणयोस्तुल्यगुणयोरिंदुमतीरघुनंदनयोर्योगेतत्प्री
तिर्येषांतेसमगुणयोगप्रीतयः पौराः पुरेभवाजनाइयमजसंगतोइंदुमतीमघेर्मुक्तंशशिनंशरच्चंद्रमुपगताकौमु
दीअनुरूपंसदृशंजलनिधिमवतीर्णाप्रविष्टाजन्हुकन्याभागीरथीतत्सदृशीत्यर्थः इत्येवंरूपंनृपाणांश्रवणयोःकटु

तयास्त्रजामंगलपुष्पमय्याविशालवक्षस्थललंबयासः॥ अमंस्तकंठार्पितबाहुपाशांविद
र्भराजावरजांवरेण्यः॥८४॥ शशिनमुपगतेयंकौमुदीमेघमुक्तंजलनिधिमनुरूपंजन्हुक
न्यावतीर्णा॥ इतिसमगुणयोगप्रीतयस्तत्रपौराः श्रवणकटुनृपाणामेकवाक्यंविवव्रुः॥८५॥
प्रमुदितवरपक्षमेकतस्तत्क्षितिपतिमंडलमन्यतोवितानं॥ उषसिसरइवप्रफुल्लपद्मंकुमुद
वनप्रतिपन्ननिद्रमासीत्॥८६॥ ॥ इतिरघुवंशेषष्ठःसर्गः ६ ॥ ५॥ ५॥

परुषंएकमेविसंवादिवाक्यमेवाक्यंविवव्रुः॥८५॥ प्रमुदितेति। एकतएकत्रप्रमुदितोहृष्टोवरस्यजामातुः पक्षो
वर्गोयस्यतत्तथोक्तं अतोन्यत्रवितानंशून्यंभयाशंकादप्रहृष्टमित्यर्थः। तत्क्षितिपतिमंडलंउषसिप्रभातेप्रफुल्ल
पद्मंकुमुदवनेप्रतिपन्नंनिद्राप्रासनिमीलनंसरइवसरस्तत्कल्पमासीत्॥८६॥ इतिमल्लिनाथसूरिविरचितायांरघुवं
शटीकायांषष्ठःसर्गः॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५ ॥

199
1947

॥श्रीः॥ ॥ भेजेमहिनीपीयेकं मुद्गरन्यपयोधर। मार्गतिंबालवालोक्यस्वसनावादिदंपती॥१॥ अथेति। अथविद
र्भनाथोभोजः सदृशेनोपयंत्रावरेणयुक्तांतां। अतएवसाक्षात्प्रत्यक्षं साक्षात्प्रत्यक्षतुल्ययोरित्यमरः। स्कंदेनयुक्ता
देवसेनानिदेवसेनानामदेवपुत्रीस्कंदपत्नीतामिवस्थितांस्वसारंभगिनीमदायगृहीत्वापुरप्रवेशाभिमुखोबभूव।
॥१॥ सेनेति। भोजस्यराज्ञोगोत्रापत्यंस्त्रीभोज्यातामिंदुमतींप्रतिव्यर्थमनोरथत्वात्तुरूपेषुआकृतिवेषेषुनेपथ्येषु

अथोपयंत्रासदृशेनयुक्तांस्कंदेनसाक्षादिवदेवसेनां॥ स्वसारमादायविदर्भनाथः पुरप्रवेशा
भिमुखोबभूव॥१॥ सेनानिवेशात्पृथिवीभृतोपिजग्मुर्विभातग्रहमंदभासः॥ भोज्यांप्रतिव्यर्थ
मनोरथत्वात्तुरूपेषुवेषेषुचसाभ्यसूयाः॥२॥ सान्निध्ययोगात्किलतत्रशच्याः स्वयंवरक्षोभकृता
मभावः॥ काकुत्स्थमुद्दिश्यसमत्सरोपिशशामतेनक्षितिपाललोकः॥३॥ ॥ ॥ ॥

समाभ्यसूयाः इत्येतिनिर्दंतः। किंभविभातेप्रातर्येग्रहाश्चंद्रादयः तइवमंदभासः क्षीणकांतयः पृथिवीभृतोनृपाअपि
सेनानिवेशात्शिबिराणिजग्मुः॥२॥ ननुक्रुद्धाश्चेद्युद्धंकुतो। तत्राह सान्निध्येति। तत्रस्वयंवरमात्रेशच्याः इंद्राण्याः
संनिधिरेवसांनिध्यंतस्ययोगात्संज्ञावाइतोः स्वयंवरस्यक्षोभकृतांविघ्नकारिणामभावः किलकिलेतिस्वयंवरवि
घातकाःशच्याविनाशइत्यागमस्तूचनार्थत्वेनहेतुनाकाकुत्स्थमजमुद्दिश्यसमत्सरोपिसवैरोपिक्षितिपाललो
कः शशामनाक्षुभ्यत्॥३॥ ॥ ५॥ ॥ ५ ॥ ॥५५ ॥ ५५॥ ॥५॥

तावदिति। यावत्तावच्च साकल्यइत्यमरः। तावत्प्रकीर्णा साकल्येप्रस्तारिता अभिनवाः उपचाराः पुष्पप्रकारादयो यस्य तं तथोक्तं। इंद्रायुधानीव द्योतितानि प्रकाशितानि तोरणांन्यंकाः चिह्नाः चिह्नानि यस्य तं ध्वजाच्छायया ध्वजच्छायं छायाबाहुल्यइति नपुंसकत्वं तेन वारितमुष्णमातपो यस्य पद्मः इंद्रायुधामणिविशेषाः इंद्रायुधमणितुल्ये शक्रचापे प्रकीर्तित इति केयटः। तं राजमार्गं सवरो वोढा वध्वा सह प्राप विवेश।। ४।। ततइति। ततश्चामीकरजालवत्सु सौवर्णगवाक्षयुक्तेषु सौधेषु तस्यालोकने तत्पराणामासक्तानां पुरसुंदरीणामित्थं वक्ष्यमा

तावत्प्रकीर्णाभिनवोपचारमिंद्रायुधद्योतिततोरणांकं।। वरः सवध्वा सह राजमार्गं प्राप
ध्वजच्छायनिवारितोष्णं।। ४।। ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु।।
बभूवुरित्थं पुरसुंदरीणां त्यक्तान्यकार्याणि विचेष्टितानि।। ५।। आलोकमार्गं सहसा व्र
जंत्याकया चिदुद्वेष्टनवांतमाल्यः।। बद्धुं न संभावित एव तावत्करेण रुद्धोपि हि केशपाशः।। ६।।

णप्रकारास्त्यक्तान्यकार्याणि परित्यक्तकेशबंधनादीनि येषु तानि विचेष्टितानि व्यापाराः नपुंसकभावे क्तः बभूवुः।। ५।। तान्येवाह पंचभिः श्लोकैः। आलोकेति। सहसा आलोकमार्गं गवाक्षपर्यंतं व्रजंत्या कयचित्कामिन्या उद्वेष्टन वांतमाल्यः उद्वेष्टनं बंधनिश्लेषणो दीर्णमाल्यः करेण रुद्धो गृहीतोपि केशपाशः। केशकलापः पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे इत्यमरः। तावदालोकप्रदेशपर्यंतं बंधनार्थं न संभावितः न चिंतितः।। ६।। ५।। ।। ५।।

201/1947

प्रसाधिकमिति। काचित्प्रसाधिकया अलंकर्त्र्या आलंबितं रंजनार्थं धृतं द्रवरागमेव आर्द्रलाक्षणांकमेव अग्र्यं चासौ पादश्चाग्रपाद इति समानाधिकरणसमासः। हस्ताग्रहस्तयोर्गुणगुणिनोर्भेदाभेदाविति वामनः तमाक्षिप्याकृष्य उत्सृष्टलीलागतिस्त्यक्तमंदगमना सती आगवाक्षात् गवाक्षपर्यंतं पदवीं मार्गे अलक्तकांकाल्लाक्षारागचिह्नां ततान विस्तारयामास।। ७।। अपरास्त्री दक्षिणं विलोचनमंजनेन संभाव्यालंकृत्य तद्वंचितं तेनांजनेन वर्जितं वामनेत्रं यस्याः सा तथैव उत्सृष्टलीलागतिरेव शलाकामंजनकर्णिकां कूर्चिकां वहंती वातायनसंनिकर्षं गवाक्षसमीपं ययौ

प्रसाधिकालंबितमग्रपादमाक्षिप्य काचिद्द्रवराग मेव।। उत्सृष्टलीलागतिरागवाक्षा
दलक्तकांकां पदवीं ततान।। ७।। विलोचनं दक्षिणमंजनेन संभाव्य तद्वंचितवामनेत्रा।।
तथैव वातायनसन्निकर्षं ययौ शलाकामपरा वहंती।। ८।। जालांतरप्रेषितदृष्टिरन्या प्र
स्थानभिन्नां न बबंध नीवीं।। नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलंब्य वासः।। ९।।

दक्षिणग्रहणं संभ्रमात् व्युत्क्रममध्यः। द्योतनार्थं सव्यमक्षि पूर्वमनुष्ण्या अंजनमिति श्रुतेः।। ८।। जलांतरेति। अन्या स्त्री जालांतरप्रेषितं दृष्टिर्गवाक्षमध्यप्रेरितदृष्टिः। सतिप्रस्थानेन गमनेन भिन्नां त्रुटितां नीवीं वसनग्रंथिं नीवी परिपणो ग्रंथौ स्त्रीणां जघनवाससीति विश्वः न बबंध किंतु नाभिप्रविष्टाः आभरणानां कंकणानां प्रभा यस्य तेन आभरणसंभ्रमादिति भावः हस्तेन वासो अवलंब्य गृहीत्वा तस्थौ।। ९।। ।। ५।। ।। ५।। ।। ५।।

अर्द्धेति। सत्वरमुत्थितायाः कस्याश्चित् अर्द्धमाचितामणिभिर्गुंफिता अर्द्धाचिता दुर्निर्भिन्ने संभ्रमाद्गुस्फिते दुर्निर्भिन्न
प्रक्षेपण इति धातोः कर्मणि कः। पदेपदे प्रतिपदं वीप्सायां द्विर्भावः गलंती रत्ना सतिरशनामेखला तदानीं गमनसमये अंगु
ष्ठमूले अर्पितं गर्भितं सूत्रमेव शेषो यस्याः सा आसीत्॥१०॥ तासामिति। तदा तासां कुतूहलानां तासां स्त्रीणां आ
सवगंधो गर्भो येषां तैर्विलोलानि नेत्राण्येव भ्रमरा येषां तैर्मुखैर्व्याप्तांतराः अन्तर्गतावकाशाः गवाक्षाः सहस्रपत्राभ
रणा इवासन् कमलालंकृता इत्यर्थः॥११॥ ताराधवमिति। ताः नार्यः रिपोरपत्यं पौरोबमजं तस्यापत्यमित्यण्प्रत्ययः द

अर्द्धाचिता सत्वरमुत्थितायाः पदेपदे दुर्निर्भिते गलंती॥ कस्याश्चिदासीद्रशना तदानीमंगुष्ठ
मूलार्पितसूत्रशेषा॥१०॥ तासां मुखैरासवगंधगर्भैर्व्याप्तांतराः सांद्रकुतूहलानां॥ विलो
लनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन्॥११॥ ताराघवं दृष्टिभिरापिबंत्यो नार्यो
न जग्मुर्विषयांतराणि॥ तथाहि शेषेंद्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा॥१२॥ ॥

ष्टिभिरापिबंत्योति तृष्णतया पश्यंत्यो विषयांतराणि कार्यांतराणि जग्मुः न विदुरित्यर्थः। तथाहि। आसां नारीणां शेषें
द्रियवृत्तिः श्रोत्रादीन्द्रियव्यापारः सर्वात्मना स्वरूपकार्त्स्न्येन चक्षुः प्रविष्टेव श्रोत्राणीन्द्रियाणि स्वातंत्र्येणार्थग्रहणाशक्ते चक्षु २
रेव प्रविश्य कौतुकात्स्वयमप्येनमुपलभते किमु अन्यथा स्वस्वविषयाधिगमः किं न स्यादिति भावः श्र एव न्कथाः
श्रोत्रसुखाः कुमार इति वक्ष्यति॥१२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ६९ ॥

203
1947

ताः कथयति। स्थान इति त्रिभिः श्लोकैः। भोज्या इंदुमती परोक्षैः रहस्यैः भूपतिभिर्दत्ता मम मे वेयं इति प्रार्थितापि स्वस्वयं
वरमेव साधयितुममंस्त मेने न तु परोक्षमेव किंचित्प्रार्थितं यत्स्थाने युक्तमेतत् कुतः अन्यथा स्वयंवराभावे आसा
विंदुमती पद्मसद्मस्याः स्तीतिपद्मा लक्ष्मी आशीर्दिता दर्चू। नाराय णमिवात्मतुल्यं स्वानुरूपं कांतं पतिं अजं कथं ल
भेत सदसाद्विवेकासौ कार्यादिति भावः॥१३॥ परस्परेणेति। स्पृहणीयशोभं सर्वास्पर्शसौंदर्यमिदं द्वंद्वं मिथुनं द्वंद्व
रहस्येत्यानानिपातः परस्परेण नायोजयिष्यत् न योजयेत् यदि प्रजानां पत्युर्विधातुरस्मिन् द्वये द्वंद्वे रूपविधान

स्थाने वृता भूपतिभिः परोक्षैः स्वयंवरं साधुममंस्त भोज्या॥ पद्मेव नारायणमन्यथा सौलभेत
कांतं कथमात्मतुल्यं॥१३॥ परस्परेण स्पृहणीयशोभं न चेदिदं द्वंद्वमयोजयिष्यत्॥ अस्मिन्द्व
ये रूपविधानयत्नः पत्युः प्रजानां वितथोभविष्यत्॥१४॥ रतिस्मरौ नूनमिमावभूतां राज्ञां सहस्रे
षु तथाहि बाला॥ गतेयमात्मप्रतिरूपमेव मनो हि जन्मांतरसंगतिज्ञं॥१५॥ ॥ ॥

प्रयत्नः। सौंदर्यनिर्माणप्रयासविफलो वितथो भविष्यत्। एतदनुरूपस्त्रीपुंसांतराभावादिति भावः। लिङ्निमित्ते लृङ्
क्रियातिपत्ताविति लृङ्॥१४॥ रतीति। रतिस्मरौ यो नित्यसहचरावित्यभिप्रायः नूनं तावेव इयं चायं च इमौ दंपती अभू
तां एतद्द्वयं न उत्सत्र कुतः तथाहि प्रसिद्धमेतत्। यद्धि बाला राज्ञां सहस्रेषु राजसहस्रेषु सध्येसेष्वपि वात्मास कार इति भा
वः। अस्य प्रतिरूपं स्वतुल्यमेव तुल्यसंकाशनीकाशप्रतिरूपका इति दंडी गता प्राप्तेति तदपि कथं ज्ञानमत आह मनो
हि जन्मांतरसंगतिज्ञमिति प्रत्यभिवासनावशाद्यनुभूतार्थेषु मनःप्रवृत्तिरस्तीत्यर्थः जन्मांतरसाहचर्यमेवात्र प्रवर्त
क इति भावः॥१५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इतीति। इत्याद्युक्तप्रकारेण पौरवधूमुखेभ्यः उक्ता उत्सन्नाः श्रोत्रयोः सुखा मधुरा सुखशब्दो विशेषाभिघ्नश्च। अ
थत्रिषु द्रव्ये पापं पुण्यं सुखादि चेत्यमरः। कथाः गिराः शृण्वन् कुमारो ओमंगलसंविधाभिः मंगलरचनादिभिरुद्भासि
तशोभितसंबंधिनः कन्यासहानः सद्मायससाद्माप॥१६॥ तत्रेति। तत्र सद्मनि अर्चितः पूजितो भोजपतेः अग्निकल्पोऽग्निक

इत्युद्गतापौरवधूमुखेभ्यः शृण्वन्कथाः श्रोत्रसुखाः कुमारः॥उद्भासितं मंगलसंविधाभिः
संबंधिनः सद्मसमाससाद॥१६॥ तत्रार्चितो भोजपतेः पुरोधाः हुत्वाग्निमाज्यादिभिरग्नि
कल्पः॥ तमेव चाधाय विवाहसाक्षे वधूवरौ संगमयांचकार॥१७॥ हस्तेन हस्तं परिगृह्य वध्वाः
सराजसूनुः सुतरां बभासे॥ अनंतराशोकलताप्रवालं प्राप्येव चूतः प्रतिपल्लवेन॥१८॥ ॥

ल्पो भोजपतेः पुरोधाः पुरोहिताः पुरोधास्तु पुरोहित इत्यमरः। आज्यादिद्रव्यैरग्निं विवाहसाक्ष्ये चाधाय साक्षिणं कृत्वे
त्यर्थः। वधूवरौ संगमयांचकारयोजयामास॥ १७॥ हस्तेनेति। सराजसूनुः हस्तेन वध्वाः हस्तं परिगृह्य अनंतरा
याः सन्निहितायाः अशोकलतायाः प्रवालं पल्लवं प्रतिपल्लवेन स्वीयेन प्राप्य चूत इव सुतरां सकाशे॥१८॥ ।
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

205
1947

आसीदिति। वरः कंटकितः पुलकितः प्रकोष्ठो यस्य स आसीत् स्यात्व्यंग्ये इत्यत्रो वरोमहर्षे च कंटक इत्यमरः। कुमा
री स्विन्नांगुलिः संवृत्ता बभूव। अत्र उत्प्रेक्षते पाणिसमन पाणौसंस्पर्शेन तयोर्वधूवरयो मनोभवाय वृत्तिर्वास्थि
तिः सम विभक्ते वेत्यर्थः। प्राक् सिद्धस्याप्यनुरागसाम्यस्य संप्रति तत्कार्यदर्शनात् पाणिस्पर्शकृतमुत्प्रेक्षते। अत्र वा
त्स्यायनः कन्या तु प्रथमसमागमे स्विन्नांगुलिः स्विन्नमुखी भवति पुरुषस्तु रोमांचितो भवति एभिरन योर्भावं परीक्षेते
ति। स्त्रीपुरुषयोः स्वेदरोमांचाभिधानं सात्त्विकोक्तिमात्रोपलक्षणं न तु प्रातिनियमो विवक्षितः। एभिरिति बहुवचन
सामर्थ्यादेवं सति कुमारसंभवे रोमोद्गमः प्रादुरभूदुमायाः स्विन्नांगुलिः पुंगवकेतुरासीदिति व्युत्क्रमवचनं दोषायेति

आसीद्वरः कंटकितप्रकोष्ठः स्विन्नांगुलिः संववृते कुमारी॥ तस्मिन्द्वयेतत्क्षणमात्मवृत्तिः सममवि
भक्तेव मनोभवेन॥१९॥ तयोरपांगप्रतिसारितानि क्रियासमापत्तिनिवर्तितानि। ह्रीयंत्रणामा
नशिरे मनोज्ञामन्योन्यलोलानि विलोचनानि॥२०॥ प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्त
न्मिथुनं चकासे॥ मेरोरुपांतेष्विव वर्तमानमन्योन्यसंसक्तमहस्त्रियामं॥२१॥ ॥ ॥

॥१९॥ तयोरिति। अपांगेषु नेत्रप्रांतेषु प्रतिसारितानि प्रवर्तितानि क्रिययोर्निरीक्षणलक्षणयोः समापत्त्या यदृच्छा संगत्या
निवर्तितानि आहृतानि अन्योन्यस्मिन् लोलानि सतृष्णानि लोलश्चलसतृष्णयोरित्यमरः। तयोर्दंपत्योर्विलोचना
नि दृष्टयो मनोज्ञां रम्यां ह्रियामीलनेन यंत्रणां संकोचनम् आनशिरे प्रापुः॥२०॥ प्रदक्षिणेति। तन्मिथुनं उदर्चिषः उद्गतज्वाल
स्य कृशानोः कृष्णवर्त्मनः प्रदक्षिणप्रक्रमणात् प्रदक्षिणीकरणाच्चकासे कथमिव मेरोरुपांते षु वर्तमानम् आवर्तमानं
मेरुं प्रदक्षिणं कुर्वन्नित्यर्थः। अन्योन्यसंसक्तं संगतं मिथुनस्याप्येतत् विशेषणं अहश्च त्रियामा च अहस्त्रियामं रात्रिंदि

र॰ मू॰ टी॰ नितंबेति नितंबेन गुर्वी अलघ्वी। दुर्वारा लघु नो गुर्वी इति शाश्वतः। विधात्रप्रतिमेन ब्रह्मतुल्येन तेन गुरुणा याजकेन प्र स ७
४ युक्ता अनुकृष्टीतिनियुक्ता मत्तचकोरस्य नेत्रे इव नेत्रे यस्याः सा लज्जावती सा वधूः अग्नौ लाजविसर्गं चकार॥२२॥ हविरिति। ह
विषः आज्यादेः शमीपल्लवानां गंधो यस्यास्तीति तथोक्तः शमीपलाशमिश्रान् लज्जनं लजित्वा लाजवापनीति
कात्यायनः। पुण्यो धूमः कृशानोः पावकादुदीयाय कपोलसंसर्पिणी शिखा यस्य स तथोक्तः स धूमस्या वध्वा मुहूर्तं कर्णो
त्पलरतां करणाभरणत्वं प्रपेदे॥२३॥ तदिति। तद्वधूमुखं आकारेण आप्रमाधूमग्रहणात् अंजनस्य क्लेदः अंजनक्लेदः अंजनमि

॥नितंबगुर्वी गुरुणा प्रयुक्ता वधूर्विधातृप्रतिमेन तेन॥ चकार सा मत्तचकोरनेत्रा लज्जावती लाजविसर्ग
मग्नौ॥२२॥ हविःशमीपल्लवलाजगंधी पुण्यः कृशानोरुदियाय धूमः॥ कपोलसंसर्पिशिखः स तस्याः
मुहूर्तकर्णोत्पलतां प्रपेदे॥२३॥ तदंजनक्लेदसमाकुलाक्षं प्रम्लानबीजांकुरकर्णपूरं॥ वधूमुखं पाटल
गंडलेखमाचारधूमग्रहणाद्बभूव॥२४॥ तौ स्नातकैर्बंधुमता च राज्ञा पुरंध्रिभिश्च क्रमशः प्रयुक्तं॥ कन्या
कुमारौ कनकासनस्थावार्द्राक्षतारोपणमन्वभूतां॥२५॥ ॥ ॥ ॥ ॥ ॥

श्रो बाष्पोदकमिव तेन कुलाक्षं प्रम्लानो बीजांकुरो यवादिबीजांकुर एव कर्णपूरो यस्मिन् तत् पाटलगंडलेखं अरुणगंडस्थ
लं च बभूव॥२४॥ ताविति। कनकासनस्थौ कन्याकुमारौ स्नातकैः स्नातकस्त्वाप्लुतो व्रतीत्यमरः। बंधुम
ता बंधुपरः भरेणेत्यर्थः। राज्ञा च पुरंध्रीभिः पतिपुत्रवतीभिर्नारीभिश्च क्रमशः प्रयुक्तं स्नातकादीनां पूर्वपूर्वविशि ४
ष्टाक्रमेण कृतमार्द्राक्षतानामारोपणं शेषारोपणमन्वभूतां॥२५॥ ॥ ॥ ॥ ॥ ॥

207/1947

इतीति। अधिश्रीरधिकसंपन्नो भोजकुलप्रदीपः स राजा इति स्वसुः पाणिग्रहणं विवाहं संपाद्य महीपतीनां पृथगे के
कशोर्हणार्थं आधिकृतान् अधिकारिणः समादिदेश आज्ञापयामास॥२६॥ लिंगैरिति। मुदो लिंगैरारोपितसंतोषचि
ह्नैः संवृतविक्रिया गुह्यतवस्ते राजानः अतएव प्रसन्नाः बहिर्निर्मलाः गूढनक्राः अंतर्लीनाग्राहा इव स्थिताः स्तेन पार्वेदर्भं भ
मंत्र्य आपृच्छ्य तदीयां वैदर्भीयां उपदाछलेन उपायनमिषेण प्रत्य — ययुः॥२७॥ स इति। आरंभसिद्धौ कार्यसिद्धौ वि

इति स्वसुर्भोजकुलप्रदीपः संपाद्य पाणिग्रहणं स राजा॥ महीपतीनां पृथगर्हणार्थं समादिदे
शाधिकृतानधिश्रीः॥२६॥ लिंगैर्मुदः संवृतविक्रियास्ते ह्रदाः प्रसन्ना इव गूढनक्राः॥ वैद
र्भमामंत्र्य ययुस्तदीयं प्रत्यर्प्य पूजामुपदाछलेन॥२७॥ स राजलोकः कृतपूर्वसंविदारंभ
सिद्धौ समयोपलभ्यं॥ आदास्यमानः प्रमदामिषं तदावृत्य पंथानमजस्य तस्थौ॥२८॥

षये पूर्वं कृता इति कृतपूर्वस्त्विष्टपेतिसमासः कृतपूर्वा संवित्संकेतमार्गविरोधः विषयो येन स तथोक्तः सविद्युद्धे
प्रतिज्ञायां संकेताचारनामस्वितिकेशवः। स राजलोकः समयोपलभ्यमजप्रस्थानकाललभ्यं तदा तस्य एका
किलादित्यर्थः। समरोपलभ्यमिति पाठे युद्धसाध्यमित्यर्थः। तत्प्रमदैवामिषं भोग्यवस्तु प्रमदामिषं। आमिषं च
स्त्रियां मांसे तथा स्याद्भोग्यवस्तुनीति केशवः आदास्यमानो गृहीष्यन्नजस्य पंथानमावृत्य अवरुध्य तस्थौ॥२८॥

नत्रेति। अनुष्ठितः संपादितः अनंतर आयाः विवाहो येन स तथोक्तः क्रथकैशिकानां पत्तीपि विदर्भेश्वरोपि तावन्त
हासत्वानुरूपं यथा तथाहरिणीकृतश्रीः स नृहारिणं कन्यादेयं धनं यौतकादि शुयदेयं सुदायो हरणं च नादित्यमरः
राघवमजं प्रस्थापयदन्वगाच्च॥२९॥ तिस्रइति। कुंडिनं विदर्भनगरं तस्य ईशो भोजः त्रिषु लोके षु प्रथितेन तेनाजेन
सार्द्धं मार्गेति स्रोवसतीः रात्रीः उषित्वाक्षित्वा वसतीरात्रिवेश्मनोरित्यमरः। कालाध्वनोरत्यंतसंयोगे द्वितीया प
र्वात्ययेदृशांतेतु उष्णरश्मेः सूर्यात्सोम इव तस्मात् पावर्त्ततं विसृज्य निवृत्त इत्यर्थः॥२०॥ मन्यव इति। नृपाः प्रागपि

भार्त्तापिताव क्रथकैशिकानामनुष्ठितानंतरजाविवाहः॥ सत्वानुरूपाहरणीकृतश्री प्रास्थापयद्रा
घवमन्वगाच्च॥२९॥ तिस्रस्त्रिलोकप्रथितेन सार्द्धमजेन मार्गे वसतीरुषित्वा॥ तस्मादपावर्तत कुंडिने
शः पर्वात्यये सोम इवोष्णरश्मेः॥२०॥ प्रमन्यवः प्रागपि कोशलेंद्रे प्रत्येकमात्तस्वतया बभूवुः॥ अ
तो नृपाश्चक्षमिरे समेताः स्त्रीरत्नलाभं न तदात्मजस्य॥२१॥ तमुद्वहंतं पथि भोजकन्यां रुरोध रा
जन्यगणः स दृप्तः॥ बलिप्रदिष्टां श्रियमाददानं त्रैविक्रमं पादमिवेंद्रशत्रुः॥२२॥ ९ ॥

प्रत्येकमात्तस्वतया दिग्विजये कृतधनत्वेन कोशलेंद्रे प्रमन्यवः रूढवैरा बभूवुः। अतः कारणात्समेमेताः संगताः स
न्तः तदात्मजस्य अजस्य स्त्रीरत्नलाभं न चक्षमिरे न सहिरे॥२१॥ तमिति। दृप्तः स दर्वराजन्यगणः सराजसंघात
भोजकन्यां उद्वहंतं नयंतं तमजं बलिप्रदिष्टां वैरोचनप्रदत्तां श्रियमाददानं स्वीकुर्वाणां त्रिविक्रमस्य इदं त्रैविक्रमं पा
दं इंद्रशत्रुः प्रल्हाद इव पथि रुरोध तथा वामनपुराणे विरोचन विरुद्धो पि प्रल्हादः प्राक्तनं स्मरन् विक्रोस्तक्रमम
णस्य पादांभोजं रुरोधेति॥२२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ १

209/1947

तस्या इति। स कुमारोजः तस्याः इंदुमत्याः रक्षार्थं अनल्पयोध बहुसुभटं पितुरागतं पित्र्यं आप्तमित्यर्थः सचिवं आ
दिश्य आज्ञाप्य तां पार्थिववाहिनीं राजसेनां ध्वजिनी वाहिनी सेनेत्यमरः। ज्योतीरथां भागीरथीं उत्तरंगः शो
णः शोणाख्येन दइव प्रत्यग्रहीत् अभियुक्तवान्॥ २३॥ पत्तिरिति। पत्तिः पदचारी योधः पदातिं पादचारं अभ्य
पतत्। पङ्घामततीप पदातिः पादस्य पदित्यादिना पदादेशः पदातिपत्तिपदगः पादातिकपदातिय इत्यमरः।
रथिनः स्यंदनारोहाः अश्वारोहास्तु सादिन इत्यमरः। रथिनं रथेशो भ्यपतत्। तुरंगसादी अश्वारोहः तुरंगाधिरूढं

तस्याः सरक्षार्थमनल्पयोधमादिश्य पित्र्यं सचिवं कुमारः॥ प्रत्यग्रहीत्पार्थिववाहिनीं तां ज्यो
तीरथां शोण इवोत्तरंगः॥२३॥ पत्तिः पदातिं रथिनं रथेशः तुरगसादी तुरगाधिरूढं॥ यंता
गजस्याभ्यपतत् गजस्थं तुल्यप्रतिद्वंद्वि बभूव युद्धं॥२४॥ नदत्सु तूर्येष्वविभाव्य वाचो नोदीर
यंति स्म कुलोपदेशान्॥ बाणाक्षरैरेव परस्परस्य नामोर्जितं चापभृतः शशंसुः॥२५॥ ॥

अश्वारोहं अभ्यपतत्। गजस्य यंता हस्त्यारोहो गजस्थमभ्यपतत्। इत्थं तुल्यप्रतिद्वंद्वि एकजातिसुभटं युद्धमभूत्।
द्वंद्व कलहोस्त्येषामिति द्वंद्विनो योधाः द्वंद्वं कलहयुग्मयोरित्यमरः॥२४॥ नदत्स्विति। तूर्येषु नदत्सु अभिभाव्य
वाचः अनवधार्यगिरः चापभृतः योधधानुष्काः कुलं उपदिश्यते प्रख्याप्यते तैस्तान् कुलोपदेशान् कुलनाम
मानि नोदीरयंति स्म न उच्चारयामासुः श्रोत्रमशक्यत्वाद्वाचो नाश्रुवन्नित्यर्थः। किंतु बाणाक्षरैव बाणोपुलिखिता
क्षरैरेव परस्परस्य ऊर्जितं तेजस्विनामशशंसुः रूचुः॥२५॥ ॥ ॥ ॥ ॥ ॥ ५९ ॥

उत्थापितइति। संयति संग्रामे अश्वैरुत्थापितः स्यंदनवंशानां रथगणानां चक्रैः सांद्रीकृतः। घनीकृतः वंशः ए
ष्वारिस्थगेहोर्ईकोष्टुर्वेणौ र्गणेकुलइति केशवः। कुंजरकर्णानां तालैः ताडनैर्विस्तारितोरेणुनेत्रक्रमेणांशु
कपरिधानोशुकेनेवेत्यर्थः। स्पस्तराशुकयोर्नेत्रं क्रमेणोध्रोपरिधानोचेतिविश्वः। सूर्य उपरुरोध च्छा
दयामास॥२६॥ मत्स्येति। वायुवशाद्विस्तीर्णै र्विस्तृतैर्मुखैः प्रवृद्धानि ध्वजिनीरजांसि सैन्यरेणून् एहे

उत्थापितः संयति रेणुरश्वैः सांद्रीकृतः स्यंदनवंशचक्रैः॥ विस्तारितः कुंजरकर्णतालै
र्नेत्रक्रमेणोपरुरोध सूर्यं॥२६॥ मत्स्यध्वजा वायुवशाद्विदीर्णैर्मुखैः प्रवृद्धध्वजिनीरजांसि।
बभुः पिबंतः परमार्थमत्स्याः पर्याविलानीव नवोदकानि॥२७॥ रथो रथांगध्वनिना विजज्ञे
विलोलघंटाक्वणितेन नागः॥ स्वभर्तृनामग्रहणाद्बभूव सांद्रे रजस्यात्मपरावबोधः॥२८॥

तो मत्स्याकाराः ध्वजाः पर्याविलानि कलुषानि नवोदकानि पिबंतः। परमार्थमत्स्याः सैन्यमत्स्या इव बभूवुः॥२७
रथइति। सांद्रे रजसि रथो रथांगध्वनिना चक्रध्वानेन विज्ञे ज्ञातः नागो हस्ती विलोलघंटाक्वणितेन घंटानादेन
विजज्ञे आत्मपरावबोधः परस्परविवेकः योधानामिति शेषः स्वभर्तृणां स्वस्वामिनां नामग्रहणात् नामोच्चारणाद्बभू
व रजोंधतया स्वं परं च शब्दादेवानुमाय प्रहरंतीत्यर्थः॥२८॥ ॥ ॥ ॥ ॥ ॥ ॥
॥ ७॥ ॥ ७॥ ॥ ७॥ ॥ ७॥ ॥ ७॥ ॥ ७॥ ७॥ ६

211/1947

आवृण्वत इति। लोचनमार्गं दृष्टिपथमावृण्वतउपरुंधत आजौ विजृंभितस्य रजएवांधकारं तस्य शस्त्रक्ष
ताश्वद्विपवीराजन्मयस्य सरुधिरप्रवाहो बालारुणो बालसूर्यो भूत्। अरुणो भास्करेपि स्यादित्यमरः। बा
णविशेषणं रुधिरसाबाणात्यार्थं॥२९॥ स इति। क्षतजेन रुधिरेणाछिन्नमूलः त्याजितभूतलसंबंध इत्यर्थः।
तस्य क्षतजस्य उपरिष्टात् सवनेनाव धूतो वातेनाहतः स रेणुः अंगारशेषस्य हुताशनस्य पूर्वोत्थितो धूम इवाब

आवृण्वतो लोचनमार्गमाजौ रजोंधकारस्य विजृंभितस्य॥ शस्त्रक्षताश्वद्विपवीरजन्मा बाला
रुणोभूद्रुधिरप्रवाहः॥२९॥ सच्छिन्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात्पवनावधूतः॥
अंगारशेषस्य हुताशनस्य पूर्वोत्थितो धूम इवावभासे॥४०॥ प्रहारमूर्छापगमे रथस्था
यंतृनुपालभ्य निवर्तिताश्वान्॥ यैः सा दिता लक्षितपूर्वकेतून्तानेव सामर्षतया निजघ्नुः
॥४१॥

भासे॥४०॥ प्रहारेति। रथिनः प्रहारेण या मूर्छा तस्या अपगमने सति रथस्थाः रथे एव स्थिताः संरक्षत इत्यर्थः
मूर्छितानामन्यत्र नीत्वा संरक्षणमिति सारथिधर्मः यंतॄन् सारथीनुपालभ्य असाधुकृतमिति क्षिप्य निवर्ति
ताश्वाः संतः पूर्वं यैः सादितास्ताः स्वयं लक्षितपूर्वकेतून् पूर्वदृष्टैः केतुभिर्ज्ञातानित्यर्थः तानेव सामर्ष
तया निजघ्नुः प्रजह्नुः॥४१॥ ॥ ७॥ ॥ ७॥ ॥ ७॥ ॥ ७॥ ॥ ७॥

र॰मू॰टी॰
७

अपीति। अर्द्धं सौमार्गश्चेति विग्रहः तस्मिन्नर्द्धमार्गे परेषां बाणे लूनाः छिन्ना अपि हस्तवतां कृतहस्तानां धनुर्भृतां संप्रयुक्ताः शरा आत्मजवानुवृत्त्या स्ववेगानुबंधनेन लूनाः फलिभिर्लोहाग्रवद्भिः सस्य बाणमयोऽफलमिति विश्वः। अर्द्धं यत्तेभागाश्च पूर्वैरर्द्धभागैः शृणोतीति शरु हिंसा तस्मै हितं शरव्यं लक्ष्यं तुगवादिभ्योयदिति यत्प्रत्ययः। विध्यं लक्ष्यं शरव्यं चेत्यमरः। समापुरेव न तु मध्ये पतिता इत्यर्थः॥४२॥ आधोरणानामिति गजसंनिपाते गजयुद्धे निशितैश्चक्रैरारोपितैरत एव क्षुरस्येवाग्रमेषां तैः क्षुराग्रैश्चक्रैरायुधविशेषैर्हृतान्यपि छिन्नान्यपि षस्ये

अप्यर्द्धमार्गे परबाणलूना धनुर्भृतां हस्तवतां पृषत्काः॥ संप्रापुरेवात्मजवानुवृत्त्या पूर्वार्द्धभागैः फलिभिः शरव्यं॥४२॥ आधोरणानां गजसन्निपाते शिरांसि चक्रैर्निशितैः क्षुराग्रैः॥ हृतान्यपि श्येननखाग्रकोटिव्यासक्तकेशानि चिरेण पेतुः॥४३॥ पूर्वं प्रहर्ता न जघान भूयः प्रतिप्रहाराक्षममश्वसादी॥ तुरंगमस्कंधनिषण्णदेहं प्रत्याश्वसंतं रिपुमाचकांक्षे॥४४॥ ॥

नानां पक्षिविशेषाणां नखाग्रकोटिषु व्यासक्ताः केशा येषां तानि आधोरणानां हस्त्यारोहाणां आधोरणा हस्तिपका हस्त्यारोहा निषादिन इत्यमरः। शिरांसि चिरेण पेतुः नाराव्यपातान्मार्गेवारुत्थपश्चाइत्तत्तापक्षिणां नखेषु संकेशसंगश्चिरपातहेतुरित्यर्थः॥४३॥ पूर्वमिति। पूर्वं प्रहर्ता प्रथमं प्रहर्ता अश्वसादी तो रंगिकः प्रतिप्रहारे क्षममशक्तं तुरंगमस्कंधे निषण्णदेहं मूर्छितमित्यर्थः। रिपुं भूयो न जघान किंतु प्रत्याश्वसंतं पुनर्जीवंतं आचकांक्षे व्यानायुधव्यसनं प्राप्तं नार्त्तं नार्तं नातिपरीक्षितमिति निषेधादिति भावः॥४४॥ ॥ ॥ ॥ ॥ ॥ ७

213
1947

तनूत्यजामिति। तनूत्यजानां तनुं त्युनिस्पृहाणामित्यर्थः। वर्मभृतां कवचिनां सेनां बांधिभिः बृहत्सु दंतेषु पतद्भिः तनूत्यजामिति। तनूत्यजानांतनुषुनिस्पृहाणामित्यर्थः। असिभिः यद्भूतमुत्थितमग्निं विकोशैः पिधानाउद्धृतैः कोशोस्त्री कुड्मले खड्गपिधानेऽर्थविदिव्ययमोदित्यमरः। असिभियद्भूतमुत्थितमग्निं विविग्नाः भीता गजाः करशीकरेण न। भयांबभूवुः॥४५॥ शिलीमुखेति शिलीमुखैर्बाणैः कृत्तानि शिरांसि विफलानि तैरा — सपन्नच्युतैभ्रष्टैः शिरांसि त्रायंत इति शिरस्त्राणि शीर्षाणि शीर्षण्यं च शिरस्त्रं चेत्यमरः। रणक्षितिः मृत्योः पान शोणितान्येव मद्यं तस्य कुल्याः प्रवाहा यस्यां आकुलात् कृत्रिमासिदिदित्यमरः। रणक्षितिः मृत्योः पान

तनुत्यजां वर्मभृतां विकोशैर्बृहत्सु दंतेष्वसिभिः पतद्भिः॥ उद्यंतमग्निं शमयांबभूवुर्गजा विविग्नाः करशीकरेण॥४५॥ शिलीमुखोत्कृत्तशिरः फलाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव॥ रणक्षितिः शोणितमद्यकुल्या रराज मृत्योरिव पानभूमिः॥४६॥ उपांतयोर्निष्कुषितं विहंगैराक्षिप्य तेभ्यः पिशितप्रियापि॥ केयूरकोटिक्षततालुदेशा शिवा भुजच्छेदमपाचकार॥४७॥८॥

पानभूमिरिव रराज॥४६॥ उपांतयोरिति। उपांतयोर्विहंगैर्निष्कुषितं तुंडखंडितं इणनि छायामित्तीडागमः। भुजच्छेदं भुजखंडं तेभ्यो विहंगेभ्य आक्षिप्याच्छिद्य पिशितप्रिया मांस प्रियापि शिवा क्रोष्ट्री इति विश्वः स्त्रियां शिवा भूरिमायुगोमायुमृगधूर्तकाः शृगालवंचकक्रोष्टुफेरुफेरवजंबुका इत्यमरः। केयूरस्य कोट्या क्षतस्तालुदेशो यस्याः सा सतिअपाचकार अपसारयामास किरतेः करोतेर्वा लिट्॥४७॥ ॥ ७॥ ॥ ७॥ ॥ ७॥ ॥ ७॥

र·मू·टी· ९

कश्चिदिति। कश्चिद्वत्रेन हृतोत्तमांगः छिन्नशिराः कश्चिद्वीरः सद्यो विमानप्रभुर्विमानाधिपतिः उपत्य वामांगं सं
सक्ता संसक्ता संगसंगिनी सुरांगना यस्य स तथाभूतः सन् समरे नृत्यन्तं च निजकबंधमशिरस्कं कलेवरं ददर्श। कबंधो
स्त्री क्रियायुक्तमपमूर्द्धकलेवरमित्यमरः॥ ४८॥ अन्योन्येति। कौचिद्वीरौ अन्योन्यस्य सूतयोः सारथ्योः उन्मथना
न्निधनात्तावेव सूतौ रथिनौ चाभूतां व्यश्वौ नष्टाश्वौ संतौ गदाभ्यां व्याप्तौ दीर्घः संप्रहारो युद्धं ययोस्तौ अभूतां।
ततो भग्नायुधौ भग्नगदौ संतौ बाहुविमर्दनिष्ठौ बाहुयुद्धप्रसक्तौ बभूवतां॥ ४९॥ परस्परेणेति। परस्परेण क्षतयोः स७

कश्चिद्द्विषत्खड्गहृतोत्तमांगः सद्यो विमानप्रभुतामुपेत्य॥ वामांगसंसक्तसुरांगनः स्वं नृत्यत्कबं
धं समरे ददर्श॥ ४८॥ अन्योन्यसूतोन्मथनादभूतां तावेव सूतौ रथिनौ च कौचित्॥ व्यश्वौ
गदाव्यायतसंप्रहारौ भग्नायुधौ बाहुविमर्दनिष्ठौ॥ ४९॥ परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रांतवा
य्वोः समकालमेव॥ अमर्त्यभावेपि कयोश्चिदासीदेकाप्सरःप्रार्थितयोर्विवादः॥ ५०॥ ॥

प्रहर्त्रोः योधयोः समकालमेककालं यथा तथोत्क्रांतवाय्वोर्युगपद्गतप्राणयोरेकैनाप्सरा एकस्यामप्सरसि प्रार्थितां ताभ्यां
तयोरेकाप्सरःप्रार्थितयोः प्रार्थितैकाप्सरसोरित्यर्थः वाहिताग्न्यादिषु परनिपात अथवा एकस्यामप्सरसि प्रार्थितं प्रार्थ
नीययोरिति विग्रहः स्त्रियां बहुष्वप्सरसः इति बहुत्वाभिधानं प्रायिकाभिप्रायं कयोश्चित्प्रहर्त्रोर्योधयोरमर्त्यभावेपि
देवभूयेपि विवादः कलह आसीत्। एकामेवाभिलाषो हि महद्वैरबीजमित्यर्थः॥ ५०॥ ॥ ॥ ॥ ॥ ९

215/1947

व्यूहाविति। तौ उभौ व्यूहौ सेनासंधौ। व्यूहस्तु बलविन्यास इत्यमरः। पश्चात्पुरश्च यौ मारुतौ तयोः पर्यायवृ
त्त्या अनुक्रमव्यापारेण प्रवृद्धौ महार्णवोर्मी इव इतरेतरस्मादन्योन्यस्मादव्यवस्थं व्यवस्थारहितं अनियतं
यथा भंगं जयं चापतुः प्रापुर्वतौ॥ ९१॥ परेणेति। बलस्य सैन्यं परेण बलेन भग्नेपि सति महौजा महाबलोः अरिसैन्यं प्रत्येव
ययौ तथाहि समीरेण वायुना धूमो निवर्त्यते कक्षादपसार्यते वर्तते एव तात्कर्मणि लिट्। वह्निस्तु यतो यत्र कक्षस्तृणं

व्यूहावुभौ तावितरेतरोत्थं भंगं जयं चापतुरव्यवस्थं॥ पश्चात्पुरोमारुतयोः प्रवृद्धौ पर्यायवृत्त्ये
व महार्णवोर्मी॥ ९१॥ परेण भग्नेपि बले महौजा ययावजः प्रत्यरिसैन्यमेव॥ धूमो निवर्त्येत समीरणे
न यतो हि कक्षस्तत एव वह्निः॥ ९२॥ रथी निषंगी कवची धनुष्मान् दृप्तः स राजन्यकमेकवीरः॥
निवारयामास महावराहः कल्पक्षयोद्वृत्तमिवार्णवांभः॥ ९३॥ ॥ ॥ ॥ ॥

कक्षो वीरुत्तृणं विरुद्धा विरुद्ध इत्यमरः। तत एव तत्रैव प्रवर्त्तत इति शेषः। सार्वविभक्तिकस्तसि॥ ९२॥ रथीति रथी रथारूढः
निषंगी तूणवान् तूणोपासंगतूणीरनिषंगइषुधिर्द्वयोरित्यमरः। कवची वर्मितशरीरः धनुष्मान् धनुर्धरः दृप्तो गर्व
वितः एकवीरः असहायशूरः सोऽजः राजन्यकं राजकं राजसमूहं गोत्रोक्षेत्यादिना वुञ्प्रत्ययः। महावराहः कल्पक्षये क
ल्पांतकाले उद्धूतमर्णवांभ इव निवारयामास विलोडयामासेति वा॥ ९३॥ ॥ ॥ ॥ ॥ ॥ ९॥

सइतिसोजः। आजौ संग्रामे दक्षिणहस्तं तूणरवेन निषंगविवरेण वामम् अतिरूढ दरं वामं सव्यम् अतापेच दक्षिणे चेति विश्वः व्यापारयन्न लक्षितशरसंधानादयस्तदुर्लभ्यां इत्याहसकृदाकर्णकृष्णा योद्धुरस्य मौर्वी रिपून्घ्नंतीति रिपुघ्नास्तान् अमनुष्यकर्तृकेति कश्चित्प्रयः बाणान्मुषेवेकिमु॥५४॥ सइतिसोऽजःरोषेण दष्टां अत एव अधिलोहिताक्षे — येषां तैः व्यक्तऊर्ध्वरेखा यासां ताभ्रुकुटीभ्रूभंगान्वदद्भिः भल्लनिकृंता बाणविशेषोच्छिन्नाः कंठायेषां तैर्हुंकारगर्भैः सहुंकारैर्द्विषतां शिरोभिः गांभूमिंतस्तारछादयामास॥५५॥ सर्वैरिति। द्विरदप्रधानैः गजमुख्यैः सर्वैर्बलांगैः सेनांगैः

सदक्षिणं तूणमुखेन वामं व्यापारयन्हस्तमलक्षिताजौ। आकर्णकृष्टा सकृदस्य योद्धुर्मौर्वीव बाणान्सुषुवे रिपुघ्नान्॥५४॥ सरोषदष्टाधरलोहिताक्षैर्व्यक्तोर्ध्वरेखाभ्रुकुटीर्वहद्भिः। तस्तार गां भल्लनिकृंतकंठैर्हुंकारगर्भैर्द्विषतां शिरोभिः॥५५॥ सर्वैर्बलांगैर्द्विरदप्रधानैः सर्वायुधैः कंकटभेदिभिश्च॥ सर्वप्रयत्नेन च भूमिपालास्तस्मिन्प्रजह्रुर्युधि सर्व एव॥५६॥ ५॥ ॥५॥

हस्त्यश्वरथपादातं सेनांगं स्याच्चतुष्टयमित्यमरः। कंकटभेदिभिः कवचभेदिभिः उरश्छदः कंकटकेऽजगरः कवचोऽस्त्रियामित्यमरः। सर्वायुधैश्च वाच्यं बलमुवाचा अंतरमाह। सर्वप्रयत्नेन सर्व एव भूमिपाला युधि तस्मिन्न्अजे प्रजह्रुः तं प्रजह्रुरित्यर्थः सर्वत्र सर्वकारकशक्तिसंभवनात्कर्मणाप्यधिकरणविवक्षायां सप्तमी तदुक्तं अनेकशक्तियुक्तस्य विश्वस्यानेककर्मणः। सर्वदा सर्वथा भवात्किंचिद्विवक्ष्यते इति।५६॥ ॥

217
1947

सोजः। परेषां द्विषां। अस्त्रव्रजैः भिन्नरथनीहारैर्हिमो मग्नो दिनस्य पूर्वभागः प्रातःकालः किंचित्प्रकाशेनेषद्भ्रस्येण विवस्वते व ध्वजाग्रमात्रेण लक्ष्यो बभूव ध्वजाग्रादन्यन्न लक्ष्यत इत्यर्थः॥५७॥ प्रियमिति। अधिराजस्तनुर्महाराजपुत्रः कुसुमास्त्रकांतः मदनवत्कंदरः — प्रांतिवृत्तलो — स्वसवितृष्णः जाकरूक इत्यर्थ। असोकुमारः प्रियंवदात् गंधर्वात्प्राप्तं गंधर्वदेवताकम् प्रस्वापयतीति प्रस्वापनं निद्राजनकम् अस्त्रं रासु प्रायुंक्त प्रयुक्तवान्।।५८॥ ततइति। ततोधनुः

सोऽस्त्रव्रजैश्छन्नरथः परेषां ध्वजाग्रमात्रेण बभूव लक्ष्यः॥ नीहारमग्नो दिनपूर्वभागः किंचित्प्रकाशेन विवस्वतेव॥५७॥ प्रियंवदात्प्राप्तमथ प्रियार्हः प्रायुंक्त राजस्वधिराजसूनुः॥ गांधर्वमस्त्रं कुसुमास्त्रकांतः प्रस्वापनं स्वप्ननिवृत्तलौल्यः॥५८॥ ततो धनुःकर्षणमूढहस्तमेकांसपर्यस्तशिरस्त्रजालं॥ तस्थौ ध्वजस्तंभनिषण्णदेहं निद्राविधेयं नरदेवसैन्यं॥५९॥ ५॥ ॥

कर्षणेमूढः हस्तम् अव्यावृत्तहस्तं एकस्मिन्नंसे पर्यस्तं स्रजं शिरस्त्रजालं यस्य तत् ध्वजस्तंभेषु निषण्णाः अवष्टब्धा देहा यस्य तत् नरदेवानां राज्ञां सेना एव सैन्यं स्वार्थे ष्यञ् चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् निद्राविधेयं निद्रापरतंत्रं तस्थौ॥५९॥ ॥

ततइति। ततः कुमारः प्रियया इंदुमत्या नपात्तरसे आस्वादितमाधुर्ये तिश्लाघ्य इतिभावः। अधरोष्ठेजलजं शंखंनिवेश्य
जलजंशंखपद्मयोरितिविश्वः। दध्मौ मुखमारुतेन पूरयामास येनविष्टेन शंखेन एकवारः ससहस्ताभ्यामर्जितं मूर्तं
मूर्तिमद्यशः पिबन्निवाबभासे यशसः शुभ्रत्वादितिभावः॥ ६०॥ ॥ ॥ ॥ ॥ ॥

ततः प्रियोपात्तरसेधरोष्ठे निवेश्य दध्मौ जलजं कुमारः॥ तेन स्वह
स्तार्जितमेकवीरः पिबन्यशो मूर्तमिवाबभासे॥ ६०॥ शंखस्वनो
भिज्ञतया निवृत्तास्तं सन्नशत्रुं ददृशुः स्वयोधाः॥ निमीलितानां
मिव पंकजानां मध्ये स्फुरंतं प्रतिमाशशांकं॥ ६१॥ ॥

शंखेति। शंखस्वनस्य शंखध्वनेरभिज्ञतया प्रत्यभिज्ञानत्वान्निवृत्ताः प्राक्पलाय्य संप्रतिप्रत्यागताः स्वयो १०
धाः सन्नशत्रुं तमजं निमीलितानां पंकजानां मध्ये स्फुरंतं प्रतिमा चासौ शशांकश्च तं प्रतिबिंबचंद्रमिव ददृशुः॥ ६१॥

2-19
1947

सइति। संप्रति राघवेण रघुपुत्रेण पूर्वं रघुणेवेतिभावः। हेराजानः वो युष्माकं यशः हृतं जीवितं कृपया न हृतं। वक्त
शक्यमितिभावः। इत्येवंरूपा वर्णाः एतदर्थप्रतिपादकं वाक्यमित्यर्थः। सशोणितैः शोणितदिग्धैः शिलीमुखाग्रैः बा
णाग्रैः साधनैः तेनाजेन प्रयोजककर्त्रा पार्थिवानां केतुषु निःक्षेपिताः प्रयोजकैरन्यैर्निवेशिता लिखिता इत्यर्थः। क्षिप
तेर्ण्यन्तात्कर्मणि क्तः॥ ६२॥ सइति। चापकोट्या निहितैकबाहुर्येन सः शिरस्त्रस्य निःकर्षणेनापनयनेन

सशोणितैस्तेन शिलीमुखाग्रैर्निक्षेपिताः केतुषु पार्थिवानां॥ यशो हृतं संप्रति राघवेण
न जीवितं वः कृपयेति वर्णाः॥ ६२॥ स चापकोटीनिहितैकबाहुः शिरस्त्रनिःकर्षणभिन्न
मौलिः॥ ललाटबद्धश्रमवारिबिंदुर्भीतां प्रियामेत्य वचो बभाषे॥ ६३॥ इतः परानर्भकहार्य
शस्त्रान्वैदर्भि पश्यानुमता मयासि॥ एवंविधेनाहवचेष्टितेन त्वं प्रार्थ्यसे हस्तगता ममैभिः॥ ६४॥

भिन्नमौलिः श्लथकेशबंधनः ललाटे बद्धाः श्रमवारिबिंदवो यस्य सोजो भीतां प्रियां इंदुमतीं एत्यासाद्य वचो बभाषे
॥ ६३॥ इतीति। हे वैदर्भि इतः इदानीं अर्भकहार्यशस्त्रान् बालहार्यायुधान् परान् शत्रून् पश्य मयानुमतासि
द्रष्टुं इति शेषः। एभिर्नृपैः एवंविधेन तिनिद्रारूपेणाहवचेष्टितेन व्यतिरेकेण कर्मणा मम हस्तगता हस्तगतवत् उग्रं देत्य
र्थः त्वं प्रार्थ्यसे अपाजिहीर्ष्यसे इत्यर्थः। एवंविधेनेत्यत्र स्वहस्तेन निर्देशं न सोपहासं वादेति द्रष्टव्यं॥ ६४॥ ॥

र॰मू॰टी॰ ३३ तस्या इति। प्रतिहुंङ्कि भवाद्विषूथात् विषादद्दैन्यात्सद्यो विमुक्तं तस्यामुखनिश्वासस्य यो बाष्पः ऊष्मा। बाष्पो नेत्रजलोष्मणोरिति विश्वः। तस्यापगमाद्धेतोरात्मीयं प्रसादं नैर्मल्यं प्रपन्नः प्राप्तः आत्मस्वरूपं दृश्यते नेनेत्यात्मदर्शो दर्पण इवाबभासे॥ ६५॥ दृष्टेति। सा इंदुमती दृष्टापि पत्युः पौरुषेणमुदितापि ह्रिया विजिता यतः। अतः प्रि स७

तस्याः प्रतिद्वंद्विभवाद्विषादात् सद्योविमुक्तं मुखमाबभासे॥ निश्वासबाष्पापगमात्प्रपन्नः प्रसादमात्मीयमिवात्मदर्शः॥ ६५॥ दृष्टापि सा ह्रीविजितानसाक्षाद्वाग्भिः सखीनां प्रियमभ्यनंदत्॥ स्थलीनवांभःपृषताभिवृष्टा मयूरकेकाभिरिवाभ्रवृंदं॥ ६६॥ ॥

यमजं साक्षात्स्वयं नाभ्यनंदत् न प्रशशंस। किंतु नवैरंभःपृषतैः अंभोबिंदुभिः अभिवृष्टा सिक्ता स्थली अकृत्रिमा भूमिः। जानपदकुंडेत्यादिना ऽकृत्रिमार्थे ङीप्। अभ्रसंघं मेघवृंदं मयूरकेकाभिरिव सखीनां वाग्भिरभ्यनंदत्॥ ६६॥ ॥ ३३

221/1947

र॰मू॰टी॰ ३२ इतीति। नोद्यते न उच्यते इत्यवद्यं गर्ह्यं अवद्यपण्येत्यादिना निपातः। कुत्सितावद्यखेटगर्ह्याणिकाः समा इत्यमरः। तस्मादपेतो निर्दोष इत्यर्थः। भोजः इति राज्ञां शिरसि वामं पादमाधाय अनवद्यां अदोषां तां इंदुमतीं उदवहत् उपानयत्। आत्मसाच्चकार इत्यर्थः। तमुद्वहंतं पथि भोजकन्यामित्यत्र नाश्लिष्टः। तस्य अजस्य रथतुरगरजोभिः रूक्षा एव अलंकाः परुषा एव अलकाग्राणि यस्याः सा इंदुमत्येव मूर्तामूर्तिमती समरविजयलक्ष्मीर्बभूव। एतल्लाभादन्यः स७

इति शिरसि स वामं पादमाधाय राज्ञामुदवहदनवद्यां तामवद्यादपेतः॥ रथतुरगरजोभिस्तस्य रूक्षालकाग्रा समरविजयलक्ष्मीः सैव मूर्ता बभूव॥ ६७॥ प्रथमपरिगतार्थस्तं रघुः संनिवृत्तं विजयिनमभिनंद्य श्लाघ्यजायासमेतं॥ तदुपहितकुटुंबः शांतिमार्गोत्सुकोभून्नहि सति कुलधुर्ये सूर्यवंश्या गृहाय॥ ६८॥ इति रघु॰ काव्ये सप्तमः सर्गः॥ ७॥

को विजयलक्ष्मीलाभ इत्यर्थः॥ ६७॥ प्रथमेति। प्रथमं अजागमनात् प्रागेव परिगतो ज्ञातः अर्थो विवाहरूपो येन सः रघुर्विजयिनं विजययुक्तं श्लाघ्यजायया समेतं संनिवृत्तं प्रत्यागतं तमजमभिनंद्य तस्मिन्नजे उपहितकुटुंबः सन् शांतिमार्गोत्सुकोभूत्। तथाहि कुलधुर्ये कुलधुरंधरे सति सूर्यवंश्या गृहाय गृहस्थाश्रमाय न भवंति॥ ६८॥ ३२
इति रघु॰ संजीविन्यां सप्तमः सर्गः॥ ७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

223
1947

।।श्रीः।। हेरंबमवलंबेहं यस्मिन्पातालकेलिषु। दंतेनोद्दस्यति क्षोणीं विश्राम्यति फणीश्वराः।।१।। अथेति। पार्थिवो रघुः ललितं सुभगं विवाहकौतुकं विवाहमंगलं विवाहहस्तसूत्रं वा बिभ्रत एव। कौतुकं मंगले हर्षे हस्तसूत्रे कुतूहले इति शाश्वतः। तस्यात्मजस्य अपरां इंदुमतीमिव वसुधामपि हस्तगामिनीमकरोत्।।१।। दुरितैरिति। नृपस्तनयः राजपुत्राः यवाज्यं धरितैरपि विषप्रयोगादिनिषिद्धोपायैरपि आत्मसात्स्वाधीनं। तदधीनवचनरतिसाति

अथतस्यविवाहकौतुकंललितंबिभ्रतएवपार्थिवः।।वसुधामपिहस्तगामिनीमकरोदिंदुमतीमिवापरां।।१।।दुरितैरपिकर्तुमात्मसात्प्रयतंतेननृपस्तनेवोहियत्।।तदुपस्थितमग्रहीदजःपितुराज्ञेतिनभोगतृष्णया।।२।।अनुभूयवसिष्ठसंभृतैःसलिलैस्तेनसहाभिषेचनं।।विशदोच्छ्वसितेनमेदिनीकथयामासकृतार्थतामिव।।३।। ५ ।। ।।

प्रत्ययः कर्तुमयतंते हि मवर्नंत एवैत्सर्थ हि हतावधारणामित्यमरः उपस्थितस्वतः सामंत इज्यमजः पितुराज्ञेति हेतोरग्रहीत्। भोगतृष्णयानाग्रहीत्।।२।।अनुभूयेति। मेदिनी मही महिषीव ध्वन्यते वसिष्ठेन संभृतैः सलिलैस्तेनाजेन सहाभिषेचनमनुभूय विशदोच्छ्वसितेन स्फुटमुज्जृंभणेन आनंदनिर्मलोच्छ्वसितेन चेति ध्वन्यते कृतार्थतां गुणवत्भर्तृलाभकृतसाफल्यं कथयामासेव न च एतावता पूर्वेषामयकर्षः वर्णाश्रमसापरत्वात् सर्वत्र जयमन्विच्छेत् पुत्रादिच्छेत्पराजयमित्यंगीकृतत्वात्।।३।। ।। ।। ।। ।। ।।

सइति। अथर्वविदा अथर्ववेदाभिज्ञेन गुरुणा वसिष्ठेन कृतक्रियः अथर्वोक्तविधिना कृताभिषेकसंस्कार इत्यर्थः।
सोऽजः परैः शत्रुभिर्दुरासदो दुर्धर्षो बभूव तथाहि। अस्त्रतेजसा क्षत्रतेजसा सहितं युक्तं ब्रह्मतेजो यत्र अयं प
वनाग्निसमागमो हितकल्प्य इत्यर्थः। पवनाग्नीत्यत्र पूर्वनिपातशास्त्रस्यानित्यत्वात् द्वंद्वे घीतिअग्निशब्दस्य
पूर्वनिपातः तथाच काशिकायां। अयमेकलक्षणहत्तोरितिनिर्देशः पूर्वनिपातव्यभिचारचिन्हानि। क्षात्रेणैव
थेद्वन्द्वे किमंगपुनर्वसिष्ठमंत्रप्रभावे सतीत्यर्थः तथात्र मनुः। नाक्षत्रं ब्रह्म भवति नाक्षत्रं ब्रह्म वर्द्धते। ब्रह्मक्षत्रेषु
संयुक्ते। इहामुत्र च वर्द्धतइति॥४॥ रघुमिति। प्रजाः नरेश्वरं तं अजं निवृत्तयौवनं प्रत्यावृत्तयौवनं रघुमेवा अमन्य

सबभूवदुरासदः परैर्गुरुणाथर्वविदा कृतक्रियः॥ पवनाग्निसमागमोह्ययं सहितं ब्र
ह्मयदास्त्रतेजसा॥४॥ रघुमेव निवृत्तयौवनं तममन्यंत नरेश्वरं प्रजाः॥ सहितस्य न के
वलां श्रियं प्रतिपेदे सकलान् गुणानपि॥५॥ अधिकं शुशुभे शुभंयुना द्वितयेन द्वय
मेव संगतं॥ पदमृद्धमजेन पैतृकं विनयेनास्य नवं च यौवनं॥६॥ ५॥ ५॥

तानकिंचित्ततो न भेदोऽस्तीत्यर्थः कुतः हि यस्मात् सोऽजस्तस्य रघोः केवलां एकां श्रियं न प्रतिपेदे किंतु सकलान् गुणान्
शौर्यदाक्षिण्यादीन् अपि प्रतिपेदे। अस्तैतद्गुणयोगात् तद्वृद्धिर्युक्तेत्यर्थः॥५॥ अधिकमिति। द्वयमेव शुभं शुभंयुना
शुभंयुस्तु। शुभान्वयमित्यमरः। अहं शुभमोर्युसितिर्युस् प्रत्ययः द्वितीयेन संगतं युतं सदधिकं शुशुभे। किं केनातआह।
पदमिति पैतृकं पितुरागतं पितुष्ठञिति वञ् ऋद्धं समृद्धं पदं राज्यं अजेन अस्य अजस्य नवयौवनं विनयेनेन्द्रियजये
न च विनयो हीन्द्रियस्तद्धक्कशाखमहतीति कामंदकः। राज्यस्थोपि प्राकृतवन्नदृप्तो भूदित्यर्थः॥६॥ ॥

सदयमिति। महाभुजः अचिरोपनतां नवोपगतां मेदिनीं नवं पाणिगृहणं विवाहो यस्यास्तां नवोढां वधूमिव सहसा
बलात्कारेण चैत्सहो बलं महामार्ग इत्यमरः। इयं मेदिनी वधूश्च उद्वेगं भयं व्रजेदिति हेतोः स्वयं बुभुजे भुजो नवन इ
त्यात्मनेपदं॥७॥ अहमिति। प्रकृतिषु प्रजासु मध्ये सर्वो जनः प्रकृतिष्विति स्याहमित्यनेनान्वयः व्यव
धानतु सोढव्यः सर्वो जनः प्रकृतिः अहमेव महीपतेर्मतः महीपतीनामर्सं मन्यमानः मतिबुद्धिपूजार्थेभ्यश्च
ति वर्तमानार्थे क्तः तस्य वर्तमान इति षष्ठी इत्यचयत्। अमन्यत कुतः उदधेनिम्नगाशतेष्विवास्य कतृक म

सदयं बुभुजे महाभुजः सहसोद्वेगमियं व्रजेदिति॥ अचिरोपनतां समेदिनीं नव
पाणिग्रहणां वधूमिव॥७॥ अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिंतयन्॥
उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित्॥८॥ न खरो न च भूयसा मृदुः
पवमानः पृथिवीरुहानिव॥ सपुरस्कृतमध्यमक्रमो नमयामास नृपाननुद्धरन्॥९॥

णोः कृतीनि कर्तरि षष्ठी। क्वचिदपि जनविषये विमानना अवगणनान भवत् यतो यः क्वचिदव मन्यते अतः सर्वोप्य
हमेवास्य मतः इत्यमन्यतेत्यर्थः॥८॥ नेति। सनृपोभूयसा न खरो तीक्ष्णो न भूयसा मृदुरपि मृदुश्चसन् किंतु पुर
स्कृतमध्यमकृतः सन् मध्यमपरिपाठामवलंब्येत्यर्थः पवनो वायुः पृथिवीरुहानिव नृपान् अनुद्धरन् अनुत्पाटय
न्नेव नमयामास अत्राहुः मृदुमप्यवमन्येत तीक्ष्णादुद्विसते जनः तीक्ष्णश्चैव मृदुश्चैव प्रजानामधिसंमतः॥९॥ ॥

225/1947

अथेति। अथरघुरात्मजंपुत्रंआत्मवित्तयानिर्विकारमनस्कृतयाइत्यर्थः। उदयादिष्वविकृतिमनसः सत्वमुच्यते
आत्मवित्तयेत्यर्थः उदयादिष्वविकृतिमनःसत्वंचानउक्तमित्युक्तलमायांप्रकृतिष्वमात्यादिषुप्रतिष्ठितं रूढं
मूलंवीक्ष्यज्ञाविनाशोधर्मोयेषांतेषुविनाशधर्मेषुअनित्येष्वित्यर्थः धर्मादेशानिचूप्रत्ययः त्रिदिवस्थेषु
स्वर्गस्थापिविषयेषुशब्दादिषुनिस्पृहोभूत्॥१०॥कुलधर्मश्चायमस्येत्यादृगुणवदिति। दिलीपवंशजाः पा
णामेवार्द्धकेगुणवतिसुतरोपिताश्रियःस्थापितलक्ष्मीकप्रयताश्चसंतःतरुवल्कान्येववासांसियेषां संय

अथवीक्ष्यरघुःप्रतिष्ठितंप्रकृतिष्वात्मजमात्मवत्तया॥ विषयेषुविनाशधर्मिषुत्रिदिवेष्वपिनिः
स्पृहोभवत्॥१०॥ गुणवत्सुतरोपितश्रियःपरिणामेहिदिलीपवंशजाः॥पदवींतरुवल्कवा
ससांप्रयतासंयमिनांप्रपेदिरे॥११॥ तमरण्यसमाश्रयोन्मुखंशिरसावेष्टनशोभिनातत॥
पितरंप्रणिपत्यपादयोरपरित्यागमयाचतात्मनः॥१२॥ रघुरश्रुमुखस्यतस्यतत्कृतवानी
प्सितमात्मजप्रियः नेचसर्पइवत्वचंपुनःप्रतिपेदेव्यपवर्जितांश्रियं॥१३॥ ॥ ॥

मिनांपदवींप्रपेदिरेयतस्ततः तस्मात्अस्यपीत्थमुचितमितिभावः॥११॥ तमिति। अरण्यसमाश्रयो
न्मुखंवनवासोद्युक्तंपितरंतंरघुःकृतोजोवेष्टनशोभिनाउद्वेष्टनमनोहरेण। शिरसापादयोःप्रणिपत्यआ
त्मनोपरित्यागमयाचतमांपरित्यज्यनगंतव्यमितिअर्थितवानित्यर्थः॥१२॥ रघुरिति। आत्मजप्रियोरघुअ
श्रुणिमुखेयस्यतस्याश्रुमुखस्यअजस्यतदपरित्यागरूपमीप्सितमभिलषितंकृतवान् सर्पस्त्वचमिवअ
पवर्जितांत्यक्तांश्रियंपुनर्नप्रतिपेदे॥१३॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ २

227
1947

सरघुःकिलांत्यमाश्रमंचतुर्थाश्रममाश्रितःपुराद्बहिरावसतेस्थानेवसन्आविकृतेंद्रियःसान्नित्यर्थः अत
एवस्नुषाध्वेवपुत्रयोग्ययानतुस्वभोग्ययाश्रियासमुपास्यतःशुश्रूषितःजितेंद्रियस्यतस्यस्नुषातइवश्रिये
पिपुष्पफलोदकाहरणादिष्वशिश्रुषाव्यतिरेकेणनकिंचिदपेक्षितमासीदित्यर्थः। अत्रयद्यपिब्राह्मणाः
प्रव्रजंतीतिश्रुतेःआत्मान्यग्नीन्समारोप्यब्राह्मणःप्रव्रजेगृहादिति मनुवचनात्मुखजानामयंधर्मोय
द्विष्णोलिंगधारणंबाहुजातोरुजातानांनायंधर्मोविधीयतइतिनिषेधाच्चब्राह्मणस्यैवप्रव्रज्यानक्षत्रि
यादेरित्याहुःतथापि यदहरेवविरज्येत्तदहरेवप्रव्रजेदित्यादिश्रुतेःत्रैवर्णिकसाधारण्यात् त्रयाणां वर्णा

सकिलाश्रममंत्यमाश्रितोनिवसन्नावसतेपुराद्बहिः॥ स
मुपास्यतपुत्रभोग्ययास्नुषयेवाविकृतेंद्रियःश्रिया॥१४॥

नांवेदमधीत्यचत्वारआश्रमाइतिसूत्रकारवचनात्ब्राह्मणःक्षत्रियोवापिवैश्योवाप्रव्रजेदितिस्मरणाच्चनिषे
धस्यचमुखजानामयंधर्मोवैष्णवंलिंगधारणंबाहुजातोरुजातानांनत्रिदंडंविधीयतेइतित्रिदंडीविषयत्वदर्श
नाच्चक्षत्रियस्यब्राह्मणग्रहणस्यउपलक्षणमाचक्षाणाःकेचित्त्रैवर्णिकाधिकारंप्रतिपेदिरे। तथारतिसकिला
श्रममंत्यमाश्रितेइतिप्राविकविनाप्ययमेवपक्षोविवक्षितोनिप्रतीमःअन्यथावानप्रस्थाश्रमपरतयाव्याख्यानेविरो
धःविदधेविधिमस्यनैष्ठिकंयतिभिःसार्द्धमनाग्निमग्निचिदितिवक्ष्यमाणेनाग्निसंस्कारेणविरोधःस्यात्अग्नि
संस्काररहितस्यवानप्रस्थाश्रमस्यैवाभावादित्यलंप्रासंगिकेन॥१४॥ ॥ ॥ ॥ ॥ ॥

प्रशमेति। प्रशमे स्थितः पूर्वपार्थिवो रघुर्यस्य तत् अभ्युद्यतो अभ्युदितो नूतनेश्वरो ऽजो यस्य तत्कुलं निभृतेंदुना अस्तमयाप्रसन्नचंद्रेण उदितार्केण च तुलासादृश्यं आरुरोह प्रापनभसा तुलाभिन्न तुल्यार्थैरित्यादिना तृतीयाप्रतिषेधः तस्य सदृशवाचीवि पुलशब्दविषयत्वात्कृष्णस्य तुला स्तीति प्रयोगा ब्रूअ सादृश्यवाचित्वादिति।
॥१५॥ यतीति। यतिभिक्षुः यतिपार्थिवलिंगधारिणौ रघुराघवौ रघुतत्पुत्रौ अपिवृत्तिमहोदयार्थयो तुल्याभ्युदयफलकयोर्धर्मयोर्निवर्तकयोर्धर्मयोरित्यर्थः। भुवंगतौ भुलोकमवतीर्णौ अंशाविवजनैः ददृशाते दृष्टौ॥१६॥

प्रशमस्थितपूर्वपार्थिवं कुलमभ्युद्यतनूतनेश्वरं॥ नभसा निभृतेंदुना तुला मुदितार्केण समारुरोह तत्॥१५॥ यतिपार्थिवलिंगधारिणौ ददृशाते रघुराघवौ जनैः॥ अपवर्गमहोदयार्थयोर्भुवमंशाविव धर्मयोर्गतौ॥१६॥ नृपतिः प्रकृतीरवेक्षितुं व्यवहारासनमाददे युवा॥ परिचेतुमुपांशुधारणां कुशपूतं प्रवयास्तु विष्टरं॥१७॥ अजितोधिगमाय मंत्रिभिर्युयुजे नीतिविशारदैरजः॥ अनपायिपदोपलब्धये रघुराप्तैः समियाय योगिभिः॥१८॥ ॥ ॥

नृपतिरिति। युवा नृपतिः राजा प्रकृतीः प्रजाः कार्यार्थिनिरवेक्षितुं दृष्टादृष्टपरिज्ञानार्थमित्यर्थः। व्यवहारासनं धर्मासनं आददे स्वीचकार प्रवयास्थविरो नृपतिरघु स्तु प्रवयाः स्थविरो वृद्धइत्यमरः। धारणां चित्तस्यैकात्मतां परिचेतुं अभ्यसितुं उपांशुविजने भोक्तुमिति हलायुधः। कुशैः पूतं विष्टरमासनमाददे यमादिगुणसंयुक्ते मनसि स्थितिरात्मनि॥ धारणा प्रोच्यते सद्भिर्योगशास्त्रविशारदैरिति वासिष्ठः॥१८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

229/1947

अनयदिति। एकोन्यतमः अज इत्यर्थः अनंतरान् च भूम्यनंतरान् मातव्यपार्ष्णिग्रहादीन् प्रभुशक्तिसंपदा कोशदंडमहीमुखशांस्तयन तामनयत् कोशदंडबलं चेति प्रभुशक्तिः प्रकीर्तितेति मिताक्षरायां अपरो रघुः प्रणिधानयोग्यया समाध्यभ्यासेन योगाभ्यासार्थयोः शिरइति विश्वः शरीरगोचरान् शरीराश्रयान् पंचमरुतः प्राणादीन् वशमानयत्। प्राणोपानः समानश्चोदानव्यानौ च वायवः शरीरस्था इमे इत्यमरः॥१९॥ अकरोदिति। अविरेश्वरोजः क्षितौ द्विषतामारंभाः कर्माणि तेषां फलानि भस्मसादकरोत्। कृत्स्न्येन भस्मीकृतवान् विभाषासातिकात्स्न्येयोरिति सातिप्रत्ययः। अपरो रघुर्ज्ञानमयेनात्मतत्त्वज्ञानरूपेणा वह्निना पावकेन स्वकर्मणा भवबीज

अनयत्प्रभुशक्तिसंपदा वशमेको नृपतीननंतरान्॥ अपरः प्रणिधानयोग्यया मरुतः पंचशरीरगोचरान्॥१९॥ अकरोदचिरेश्वरः क्षितौ द्विषदारंभफलानि भस्मसात्॥ इतरो दहने स्वकर्मणां ववृते ज्ञानमयेन वह्निना॥२०॥ पणबंधमुखान्गुणानजः षडुपायुंक्त समीक्ष्य तत्फलं॥ रघुरप्यजयद्गुणत्रयं प्रकृतिस्थं समलोष्ठकांचनः॥२१॥

भूतानां दहने भस्मीकरणे ववृते स्वकर्माणि दग्धुं प्रवृत्त इत्यर्थः। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेर्जुनेति॥२०॥ पणबंधेति। पणबंधः संधिरिति कौटिल्याः अजः पणबंधमुखान् संध्यादीन् षड्गुणान् संधिनो विग्रहो यानमासनं द्वैधमाश्रयः षड्गुणा इत्यमरः। तेषां गुणानां फलं तत्फलं समीक्ष्य उपायुंक्त कफलिष्यंतमेव गुणं प्रायुंक्तेत्यर्थः। प्रोपाभ्यां युजेरयज्ञपात्रेष्विति आत्मनेपदं समं तुल्यतया दृष्टं लोष्ठं मृत्खंडः कांचनं येन स समलोष्ठाश्मकांचनो निस्पृह इत्यर्थः। लोष्टानि लोष्टवः पुंसीत्यमरः रघुरपि गुणत्रयं सत्त्वादिकं गुणाः सत्त्वरजस्तमेत्यमरः प्रकृतौ साम्यावस्थायामेव तिष्ठतीति प्रकृतिस्थं पुनर्विकारस्त्वंयथा भवति तथा जयत्॥२१॥ ॥ ॥ ॥ ॥ ॥ ॥

नेति। स्थिरकर्मा आफलोदयकारी नवः प्रभुः अजः आफलोदयात्फलसिद्धिपर्यंतं कर्मणः आरंभान विरराम न वि
वृतः जुप्साविरामप्रमादार्थानामुपसंख्यानमित्यपादानत्वात्पंचमी व्याङ्परिभ्यो रम इति परस्मैपदं स्थिर
धीर्निश्चलचित्तः न चेतरो रघुरापरमात्मदर्शनात्परमात्मसाक्षात्कारपर्यंतं योगविधेरैक्यानुसंधानान्नविरर
म॥२२॥ इतीति। इत्येवं प्रतिषिद्धः प्रसरः स्वार्थः प्रवृत्तिश्च येषां तेषु शत्रुषु चेंद्रियेषु च जाग्रतौ अप्रमत्तौ उदयापवर्ग
योरभ्युदयमोक्षयोः प्रसितावासक्तौ। तत्परे प्रसितावासक्तावित्यमरः। उभावजरघू उभयीं द्विविधां अभ्युदयमो

नतवः प्रभुराफलोदयात्स्थिरकर्मा विरराम कर्मणः॥ नच योगविधेर्नवेतरः स्थिरधीराप
रमात्मदर्शनात्॥२२॥ इति शत्रुषु चेंद्रियेषु च प्रतिषिद्धप्रसरेषु जाग्रतौ॥ प्रसृतावुदयापव
र्गयोरुभयीं सिद्धिमुभाववापतुः॥२३॥ अथ कश्चिदजव्यपेक्षया गमयित्वा समदर्शनः समाः
॥ तमसः परमापदव्ययं पुरुषं योगसमाधिना रघुः॥२४॥ ॥ ॥ ॥ ॥ ॥

क्षरूपां उभावुदात्तो नित्यमिति तयप्रत्ययस्यायजादेशः टिड्ढाणञित्यादिना ङीप्। सिद्धं फलमवापतुः। उभावुभे सिद्धिं
यथासंख्यमवापतुरित्यर्थः॥२३॥ अथेति। अथ रघुः समदर्शनः सर्वभूतेषु समदृष्टिः सन अजव्यपेक्षया आकांक्षितुरो
धेन काश्चित् समाः कतिचिद्वर्षाणि। समा वर्षसमं तुल्यमिति विश्वः। ‒ ‒ ‒ ‒ ‒ ‒ गमयित्वा योगसमाधिना ऐक्या ४
नुसंधानेन संयोगो योग इत्युक्तो जीवात्मपरमात्मनोरिति वसिष्ठः। अव्ययमविनाशिनं तमसः अविद्यायाः परं भिन्नं
पुरुषं परमात्मानमापत् प्राप्य सायुज्यं प्राप्त इत्यर्थः॥२४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

231/1947

श्रुतेति। पितुः श्रुतदेहविसर्जनः आकर्णिततनुत्यागः राघवश्चिरमश्रूणि विमुच्य विसृज्य अस्य पितुरग्निसंस्का
ररहितमित्यर्थः। रिष्टमरणांतसंबंधि नैष्ठिकं अंतेष्टिकं यतिभिः संन्यासिभिः सार्धं सह विदधे चकार अग्निं चित
वानाहितवानित्यग्निचित् अग्नौ विदितिक्विप्प्रत्ययः स्वयमग्निचिदपीति भावः॥२५॥ अकरोदिति। पितृकार्य
स्य श्राद्धस्य कल्पविधानज्ञः स पितृभक्त्या पितरि प्रेम्णा करणे न पितुः परलोकसुखापेक्षया मुक्तत्वादिति भावः।
तस्य रघोरौर्ध्वदैहिकं देहादूर्ध्वं भवतीति तथा तिलोदकपिंडदानादिकमकरोत् तनु भक्तिरेव श्राद्धादिफलप्रा

श्रुतदेहविसर्जनः पितुश्चिरमश्रूणि विमुच्य राघवः॥ विदधे विधिमस्य नैष्ठिकं यतिभिः
सार्धमनग्निमग्निचित्॥२५॥ अकरोत्तदौर्ध्वदैहिकं पितृभक्त्या पितृकार्यकल्पवित्॥ नहि
तेन पथा तनुत्यजः तनयावर्जितपिंडकांक्षिणः॥२६॥ स परार्ध्यगतेरशोच्यतां पितुरुद्दिश्य
सदर्थवेदिभिः॥ शमिताधिरधिज्यकार्मुकः कृतवानप्रतिशासनं जगत्॥२७॥ ॥

सिकस्मान्नाश्राद्धिसाद तथाहि तेन पथा मार्गेण योगरूपेण तनुत्यजः शरीरत्यागिनः पुरुषास्तनयैरावर्जितपिंड
कांक्षिणो दत्तपिंडाकांक्षिणो नहि॥२६॥ स इति परार्ध्यगतेः प्राप्तमोक्षस्य पितुरशोच्यतां अशोच्यत्वमुद्दिश्याधिकृत्य
सदर्थश्रुतिस्मृतिवेदार्थज्ञैर्विद्वद्भिः शमिताधिर्निवारितमनःपीडः पुंस्याधिर्मानसी व्यथेति अमरः। सोऽजः अधिज्य
कार्मुकः सम्पालनार्थमुपात्तदंड इत्यर्थः जगल्लोकं अप्रतिशासनं प्रतिशासकरहितं कृतवानेकमेव सर्वनियामक इत्यर्थः
परिव्राजि विपश्चेतु पतिते चात्मनि कायेनिशौकोज्ञानीनामन्यथा दोषभागिनिन इति॥२७॥ ॥ ॥

क्षितिरिति। क्षितिर्भूमिर्भामिनी मानिनी इंदुमती च। भामिनीति विशेषणेन सपत्नीविषयं मत्सर्यं च व्यज्यते अग्र्यपौरुष
मुत्कृष्टपराक्रमम् उत्कृष्टभोगशक्तिं च तं पतिम् आसाद्य प्राप्य प्रथमा क्षितिः बहूनि रत्नानि सूते बहुरत्नसूः। अभूत्। अ
भवत् अपरा इंदुमती वीरं स्कृतम् अजीजनत् जनयामास। सद्यो न्यथा सादृश्यमुच्यते॥२८॥ सस्कृतः कइत्याशंक्याह। दशेति
दशरश्मिशतानि यस्य स सूर्यस्तेनोपमीयत इति तदुपमा द्युतिर्यस्य तथा सर्शायेसा दशस्कृदिक्षु आशासु श्रुतं प्रसिद्धं
शब्दं कंठस्य रावणस्यारेः रामचंद्रस्य गुरुं पितरं विदुः बुधाः दशेति पूर्वपदं यस्य रथस्य दशपूर्वः स चासौ रथश्चेति वि

क्षितिरिंदुमती च भामिनी पतिमासाद्य तमग्र्यपौरुषं॥ प्रथमा बहुरत्नसूरभूदपरा वीरम
जीजनत्सुतं॥२८॥ दशरश्मिशतोपमद्युतिं यशसा दिक्षु दशस्वपि श्रुतं॥ दशपूर्व
रथं यमाख्यया दशकंठारिगुरुं विदुर्बुधाः॥२९॥ ऋषिदेवगणस्वधाभुजां श्रुतयागप्र
सवैः स पार्थिवः॥ अनृणत्वमुपेयिवान्बभौ परिधेर्मुक्त इवोष्णदीधितिः॥३०॥ ॥

हः बहुव्रीहिरत्र नेष्टस्तदर्थानुपपत्तेरनेककोटिरथत्वाद्दशरथस्येत्याशयेन नाम्नैव पूर्वपदं व्यवहितं प्रयुक्तं एतदनु
सारान्माघेपि हिरण्यपूर्वं कशिपुं प्रचक्षत इति प्रयुक्तं॥ २९॥ ऋषीति। श्रुतयागप्रसवैः स्वाध्याययजनसंतानैर्यथा
संख्यं ऋषीणां देवगणानां स्वधाभुजां पितॄणां चानृणत्वं ऋणान्निर्मुक्तत्वं उपेयिवान् प्राप्तवान् स पार्थिवः अजः प १
रिधेः परिवेषात् परिवेषस्तु परिधिरूपसूर्यकमंडल इत्यमरः। मुक्त उष्णदीधितिः सूर्य इव बभौ दिदीपे॥ ३०॥

233/1947

बलमिति। तस्य विभोरजस्य केवलमेकं वसु धनं न परप्रयोजनं किंतु गुणवत्तापि गुणत्वमपि परप्रयोजनाप
रेषामन्येषां प्रयोजनं यस्याः सा परप्रधाना विधेयांशत्वेन प्रधानत्वात् गुणविशेषणात् एवं केवलस्कं केवलं न उ
हनीयं तथा हि बलं सत्त्वमार्तानामापन्नानां भयस्योपशांतये न वधाय न परपीडनाय बहु बहुले श्रुतं विद्या विदुषां
मननतये न मदस्कारायन विद्वद्वज्ञानायत स्वधनं परोपयोगीति किं कर्तव्यं बलश्रुतादयोपि गुणाः परोपयोगिन
इत्यर्थः॥२१॥ सइति। अवेक्षितप्रजाः सुप्रजाः सुरसंतानः स राजा कदाचित् देव्या महिष्या इंदुमत्या सह नगरस्य उ

बलमार्तभयोपशांतये विदुषां सन्नतये बहुश्रुतं॥ वसुतस्य न केवलं विभोर्गुणवत्तापि पर
प्रयोजनं॥२१॥ स कदाचिदवेक्षितप्रजः सह देव्या विजहार सुप्रजाः॥ नगरोपवने शची
सखो मरुतां पालयितेव नंदने॥२२॥ अथरोधसि दक्षिणोदधेः श्रितगोकर्णनिकेतमी
श्वरं॥ उपवीणयितुं ययौ रवेरुदयावृत्तिपथेन नारदः॥२३॥ ॥ ॥ ॥

पवने विजहार चिक्रीड किंभूतः कः कस्मिन्निव शचीसखः सन्मरुतां देवानां पालयिता इंद्रः नंदनवने इव॥२२॥ अथेति
अथ दक्षिणस्य उदधेः समुद्रस्य रोधसि तटे श्रितगोकर्णनिकेतनं अधिष्ठितगोकर्णाख्यस्थानं ईश्वरं उपवर्णयितुं वीणा
या उपसमीपे गातुं सत्यापेत्यादिना उपुमानार्थे णिच् प्रत्ययः। नारदो मुनिः रवेः सूर्यस्य उदीचः उत्तरस्या दिशः आ
काशे आवृत्तिर्निवर्तनं तस्याः पथा गगणप्रकारः तेन पथा रवेरुत्तरस्या दिशो व्यावृत्य दक्षिणायनमागच्छतीति इत्य
र्थः। ययौ जगाम रूपोपमा तेनास्यानितेजास्विस्वमुच्यते॥२३॥ ॥ ॥ ॥ ॥ ॥

कुसुमैरिति। तस्य नारदस्य अतोद्यस्य वीणायाः शिरस्यग्रे निवेशितां अपार्थिवैरभौमैर्दिव्यैः कुसुमैर्ग्रथितां गुंफितां स्र
जं वेगवान्मारुत आधिवासेसंस्कारे स्पृहयेवाहरत्॥३४॥भ्रमरैरिति। कुसुमानुयायिभिः पुष्पानुसारिभिर्भ्रमरैः
परिकीर्णा परिवृता मुनेर्नारदस्य परिवादिनी वीणाविशेषः वीणा तु भवेद्विपंची सा तु तंत्रीभिः सप्तभिः परिवादिनीत्यम
रः वनस्य वायोरलेपजं हरणरूपवर्गजात मंजनेन कज्जलेनाविलं बमाविलं वाष्पमश्रु सृजती मुंचती वदृशे दृष्टा भ्र
मराणां मंजनवाष्पविंदुसादृश्यं विवक्षितं वा नपुंसकस्येति वर्तमाने भाठीन द्योतुभिनुमूविकल्पः॥३९॥अभिभूयेति।

कुसुमैर्ग्रथितामपार्थिवैः स्रजमातोद्यशिरोनिवेशितां॥ अहरन्किल तस्य वेगवानाधिवाससस्पृहयेव मा
रुतः॥३४॥भ्रमरैः कुसुमानुयायिभिर्विनिकीर्णा परिवादिनी मुनेः॥ ददृशे पवनावलेपजं सृजती वा
ष्पमिवांजनाविलं॥३९॥अभिभूय विभूतिमार्तवीं मधुगंधातिशयेन वीरुधां॥ नृपतेरमरस्रगा
प सा दयितोरुस्थलकोटिषु स्थितिं॥३६॥क्षणमात्रसखीं सुजातयोस्तनयोस्तामवलोक्य विह्व
ला॥ निमिमील नरेश्वरप्रिया हृतचंद्रा तमसेव कौमुदी॥३७॥ ॥ ॥ ॥ ॥

सा अमरस्रक् देवकुसुमावलीमधुनो मकरंदस्य चातिशयेन करणेन वीरुधां वल्लीनां नगरोपवर्तिनीनां वर्त्तवीं वसंतर्तु
सम्बंधां विभूतिं संपदं पुष्पाणामाभिभूय तिरस्कृत्य नृपतेरजस्य दयितायाः इंदुमत्याः उरः छाद्यते आभ्यामित्युरः छ
दः कोतयोः कोटिषु अग्रिमप्रदेशेषु इत्यर्थः स्थितिमाप परिच्छदः कंचुकश्रतिके चित्॥३६॥क्षणेति सुजातयोः सम्यनोः
सुंदरयोरित्यर्थः क्षणमात्र सखीं तां स्रजमालोक्य विह्वला विवशा नरेन्द्रप्रिया इंदुमती तमसा राहुणा तत्
स्करा राहुः स्वर्भानुरित्यमरः हृतचंद्रा कौमुदीव निमिमील ममारेत्यर्थः॥ ३७॥ ॥ ॥ ॥

235
1947

वपुषेति। करणैः इंद्रियैः उभितेन करणं साधकतमक्षेत्रगात्रेंद्रियेष्वपीत्यर्थः वपुषा करणेन निपतंतीपतिमप्यपा त
यत्। अमूर्च्छयत् उपमानाभिप्रायेण निमित्तमाह दीपार्चिः दीपशिखार्चिः तैलस्य निषेके भ्रवणे सति योबिंदुः तेन सह
मेदिनीमुपैति पतति ननु खलु इंदुमत्या दीपार्चिरुपमानत्वं अजस्य तैलबिंदोः तत एव तस्या जीवितसस्ताभिस्तस्य जी
वितशेषश्च सूच्यते॥३८॥उभयोरिति। उभयोर्द्वयोरपि पार्श्ववर्तिनां सेवकानां तुमुलसंकीर्णेनार्त्तरवेण रोदनेन

वपुषा करणोज्झितेन सा निपतंती पतिमप्यपातयत्॥ ननु तैलनिषेकबिंदुना सह दीपार्चि
रुपैति मेदिनीं॥३८॥उभयोरपि पार्श्ववर्त्तिनां तुमुलेनार्तरवेण वेजिताः॥ विहगाः कम
लाकराश्रयाः समदुःखा इव तत्र चुक्रुशुः॥३९॥नृपतेर्व्यजनादिभिस्तमो नुनुदे सा तु त
थैव संस्थिता॥ प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते॥ ४०॥ ५ ॥

जिता स्त्रासिताः कमलाकरजलयोर्निलयो येषां ते विहगाः पक्षिणो समदुःखा इव तत्पार्श्ववर्तिनो समानशोका
इव चुक्रुशुः॥३९॥नृपतेरिति। ततोः नंतरं व्यजनादिभिः करणैः पार्श्ववर्त्तिभिः कर्त्तृभिरादिशब्देन जलसेककर्पूर
क्षोदादयो गृह्यंते नृपतेस्तमो मूर्छा नुनुदे निरस्तं सा इंदुमती तु तथैव तेन मूर्छाप्रकारेणैव स्थिता तथा हि प्रतिकार
स्य चिकित्साया विधानं करणमायुषो जीवितकालस्य शेषे सति फलाय सिद्ध्ये कल्पते समर्थं भवति हि॥४०॥ ॥

प्रतीति। अथ नितांतवत्सलोऽतिस्निग्धः स राजा सत्वस्य चैतन्यस्य विप्लवान्नाशात् प्रतियोजयितव्याया अवस्रंस
नानंतरं पुनः सज्जीकरणयोग्यायाः वल्लक्याः वीणायाः समा अवस्था यस्याः सा तथा तां मंगनां प्रियतां गृहीत्वा भु
जाभ्यामिति भागवतनुच्चितयोग्यं परिचितं च तां क्रमुत्संगं निनाय प्रापयामास वल्लकीपक्षे तु सत्वं तंत्रीणामवष्टंभः
शलको विशेषः॥४१॥ पतिरिति। अंकनिषंणया कुत्संगस्थितया करणानामिंद्रियाणां तदुपलक्षितस्य चैतन्य
स्य वा अपायेनापगमेन हेतुना विभिन्नवर्णया विच्छाययातया प्रियया उपलक्षितः पतिरजः उषसि प्रातःकाले अवि

प्रतियोजयितव्यवल्लकीसमवस्थामथ सत्वविप्लवात्॥ स निनाय नितांतवत्सलः परिगृ
ह्योचितमंकमंगनां॥४१॥ पतिरंकनिषंणया तया करणापायविभिन्नवर्णया॥ समल
क्ष्यत बिभ्रदाविलां मृगलेखामुषसीव चंद्रमाः॥४२॥ विललाप बाष्पगद्गदं सहजामप
हाय धीरतां॥ अभितप्तमयोपि मार्दवं भजते कैव कथा शरीरिषु॥४३॥ ॥ ६९ ॥

लां मलिनां मृगलेखां लांछनमृगरेखारूपचिंह्नं बिभ्रद्धारयंश्चंद्रमा इव समलक्ष्यत दृश्यत॥४२॥ विललापेति। सहजां स्वाभा
विकीं धीरतामप्यपहाय विप्रकीर्य बाष्पेण कंठगतेन गद्गदं विशीर्णाक्षरं यथा तथा ध्वनिमात्रानुकारि गद्गदशब्दो विल
लापधैर्यापगमे हानेडुःखातिशयकारणमित्याशयेनाह। अभितप्तमभितप्तमयो लोहं अचेतनमपि मार्दवं मृदुत्व
मवैरत्वं च भजते प्राप्नोति शरीरिषु चेतनेषु कथैव वाद एव संदिग्धार्थनिर्णयरूपा कारिकं रूपेत्याक्षेपः संदिग्धेन्यायः
प्रवर्तते दृिप्तताप्तेषु अधैर्यप्राप्ति संदेहो नास्त्येवेत्यर्थः॥४३॥ ॥ ॥ ॥ ॥ ॥ ७

237
19347

कुसुमानीति। कुसुमान्यपि। गात्रस्य संगमात्संयोगात् न तीव्राभिघातादिति भावः अस्तून् प्राणान् अपोहितु
अपनेतुं यदि भवंति समर्थानि भवंति तर्हि प्रहरिष्यतो हंतुमिच्छतो विधेर्दैवतस्यान्यत् कुसुमेभ्यः किमिव वस्तु सा
धनं प्रहरणं न भविष्यति न भवेत् सर्वं साधनं तादित्यर्थः॥४४॥ अथवेति। अथवा प्रजानामंतको यमः मृदुवस्तु मृदुना
वस्तुनैव हिंसितुं हंतुमारभते। अत्रार्थे हिमसेकं तुषारवर्षणं तेन विपत्तिर्मृत्युर्यस्याः सा तथा नलिनी पद्मिनी पूर्वं निद

कुसुमान्यपि गात्रसंगमात्प्रभवंत्यायुरपोहितुं यदि॥ न भविष्यति हंत साधनं किमिवान्य
त्प्रहरिष्यतो विधेः॥४४॥ अथवा मृदुवस्तु हिंसितुं मृदुनैवारभते प्रजांतकः॥ हिमसे
कविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं गता॥४५॥ अथवा मम भाग्यविप्लवादशनिः कल्पि
त एष वेधसा॥ यदनेन पातितस्तरुः क्षपिता तद्विटपाश्रया लता॥४६॥ ॥ ॥

र्शनं प्रथमदृष्टांतो मे मता संमता द्वितीयं निदर्शनं पुष्पमत्स्करिंदुमतीति भावः॥४५॥ अथेति। अथवा मम भाग्यस्य वि
प्लवान्नाशात् निमित्तात् वेधसा कर्त्रा एषा कुसुमावलीरूपो शनिर्वज्रः कल्पितः अपूर्वः क्षतइत्यभिसंधिः अपूर्व
त्वमेव स्पष्टयति। यद्यस्मात् अनेन पुरोवर्तिना पुष्पाशनिना तरुराश्रयभूतो न निपातितः किंतु तद्विटपाश्रया तरोः शा
खाधारा लतावल्ली क्षपिता प्रध्वंसिता तत्र शब्देनात्मा ध्वन्यते लताशब्देन इंदुमती लोके प्रसिद्धो शनिस्तरुं लतां च क्षपय
ति अयं च लतामेव न तरुमित्यनेन प्रकारेणापूर्वत्वमित्यभिप्रायः॥४६॥ ॥ ॥ ॥ ॥ ॥

कृतव--। यद्वायस्माद्धेतोरपराधेपिकृतापराधेपिमयिविषयेचिरनवधीरणामवज्ञामकृतवत्यासिनाकार्षीः तस्माद्धेतोरेकपदेयुगपदेवनिरागसं निरपराधमिमंजनंदासभूतं माभाष्य मामंत्र्यणाकस्माद्धेतोर्नमन्यसेनचि नयसि॥४७॥ ध्रुवमिति। हेशुचिस्मितेधवलहसितेकैतवेनकपटेनवत्सलःस्निग्धःशठोमूढः प्रियकृत्तवत विदितोज्ञातोसि। मतिबुद्धिपूजार्थेभ्यश्चेतिषष्ठी। यद्यतः मामनापृच्छ्यानामंत्र्यइतोलोकादसान्निवृत्तयेप्रस्था मनायपरलोकेगतास्मि॥४८॥ दयितामिति। इहममहततजीवितंकुत्सितजीवितंतावदादौदयितांइंदुमयद्या

कृतवत्यसिनावधारिणामपराधेपिवदाचिरंमयि॥ कथमेकपदेनिरागसंजनमाभाष्यमिमंम न्यसे॥४७॥ ध्रुवमस्मिशठःशुचिस्मितविदितःकैतववत्सलस्तव॥ परलोकमसंनिवृत्तयेयद नापृच्छ्यागतासिमामितः॥४८॥ दयितांयदितावदन्वगाद्विनिवृत्तंकिमिदंतयाविना॥ सहतां हतजीवितंममप्रबलामात्मकृतांतुवेदनां॥४९॥ सुरतःश्रमसंभृतोमुखेध्रियतेस्वेदलवोद्गमो पिते॥ अथवास्तमितात्वमात्मनाधिगिमांदेहभृतामसारतां॥५०॥ ॥ ॥ ॥

न्वगाद्न्वधावदितितयादयितयाविनाकिंकेननिमित्तेनाविनिवृत्तंप्रत्यागतंआत्मकृतेनस्वकर्मणाप्रबलामधिकांवे दनांदुःखंसहतांक्षमतां॥४९॥ स्मरतेति। सुरतेनानिमित्तेनश्रमस्तेनसंभृतःकल्पितस्वेदस्यजवानांकरणांउद्गमस्ते न मुखेध्रियतेअवतिष्ठतेध्रुञ्अवस्थानइतिधातोःतोदादिकात्कर्तरिलिट्शयाग्लिङ्क्षितिरिङादेशः अथवात्वमात्मना स्वरूपेणअस्तमितानष्टकृत्स्नादिभ्यउपसंख्यानात्तृतीया इमांदेहभृतांअसारतांधिक्निंदनमित्यर्थः धिक्निर्भर्त्सन निंदयोरित्यमरः अभितर्वतसोःकार्याधिगुपर्यादिषुत्रिषुद्वितीयाम्रेडितांतेषुततोन्यत्रापिदृश्यतइतिधिक्शब्दयोगाद्द्वितीया॥५०॥

९

239/1947

आत्मनिकैतववत्सलत्वंशठत्वंचइंदुमत्याभिप्रायेणायदारोपिततदिदानींनिषेधति। मनसेति। मयाकर्मणमनसकर णेनापितवविप्रियंनकृतपूर्वंपूर्वंनकृतमित्यर्थः। सुप्सुपेतिसमासः मांकिंनिमित्तंजहासित्यजसि। ननुमेदिनीपति स्त्वनातोविप्रियमस्तीत्याशंक्याह। ननुप्रियेक्षितेःशब्देनपतित्वमित्याकांक्षायामाह त्वयिमेभावनिबंधनास्वभावा श्रयानवाह्यकरणाश्रयारतिप्रेमजातएवमनसापिविप्रियकरणमकारमित्यभिसंधिः॥५१॥ कुसुमेति। हेकरभोरु करभसदृशोरुमणिबंधादानिकनिष्ठंकरस्यकरभोबहिरित्यमरः। मारुतःकुसुमकचितान्पुष्पानिबद्धान्वलीम

मनसापिनविप्रियंमयाकृतपूर्वमथकिंजहासिमां॥ ननुशब्दपतिःक्षितेरहंत्वयिमेभावनि बंधनारतिः॥५१॥ कुसुमोत्कचितान्वलीमसश्चलयन्भृंगरुचस्तवालकान्॥ कर भोरुकरोतिमारुतस्त्वदुपावर्त्तनशंकिमेमनः॥५२॥ तदपोहितुमर्हसिप्रियेप्रतिबोधेनविषा दमाशुमे॥ ज्वलितेनगुहागतंतमस्तुहिमाद्रेरिवनक्तमोषधिः॥५३॥ ॥ ॥

तरंगितान्कुटिलानित्यर्थः भृंगरुचःभ्रमरवर्णास्तवालकान्चलयन्नेममनःकर्मतदुपावर्त्तनशंकितवप्रत्याश्व सनंशंकतइतितत्करोति अलकचलनाद्याद्दृष्टिकातत्प्रत्याश्वसनमनुमीयतमित्यर्थः।उपावर्त्तनंवा॥५२॥ त दिति। ततस्मात्कारणात्हेप्रियेअशुमतिबोधयमेविषादंदुःखमपोहितुंनिरसितुंअर्हसि। काकेनकस्यामि वनक्तंरात्रौओषधिविशिष्टलताज्वलितेनप्रकाशेनतुहिमाद्रेर्हिमाचलस्यगुहासुगतंतमोधकारमिव॥५३ ॥

इदमिति। उच्छ्वसितालकं विकीर्णचूर्णकुंतलं विश्रमथं विगलापं नवेदं मुखं मां दुनोति। किमिव निशि रात्रौ सुप्तं मु
कुलितं वरताभ्यंतरं षट्पदस्वनं एकं पंकजमद्वितीयं पद्ममिव। निशीत्यनेनांधकारं लक्ष्यं तदेवो सितानुभानुभिर्
हनीयं॥९४॥ शशिमिति। शर्वरी रात्रिः शशिनं चंद्रं पुनरेति दयिता प्रिया द्वंद्वं मिथुनेन चरतीति द्वंद्वचरं पतत्रिणं प
क्षिणं तथा चक्रवाकं पुनरेति इत्यनेन हेतुना तौ चंद्रचक्रवाकौ विरहांतरक्षमौ विरहभेदानुक्षमे तु इति विरहांतरक्ष
मौ अत्यंतं गता अपुनरागमाय गता त्वं मां कथं न दहेन संतापये॥९९॥ नदेति। देवामोरु सुंदरो नवपल्लवानां संस्तर

इदमुच्छ्वसितालकं मुखं नवविश्रांतकथं दुनोति मां॥ निशि सुप्तमिवैकपंकजं विरताभ्यंतरषट्
पदस्वनं॥९४॥ शशिनं पुनरेति शर्वरी दयिता द्वंद्वचरं पतत्रिणं॥ इति तौ विरहांतरक्षमौ क
थमत्यंतगता न मां दहेः॥९९॥ नवपल्लवसंस्तरेपि तं मृदु दूयेत यदंगमर्पितं॥ तदिदं विषहिष्यते
कथं वद मां भोरु चिताधिरोहणं॥५६॥ इयमप्रतिबोधशायिनीं रसनां त्वां प्रथमा रहःसखी॥ ग
तिविभ्रमसादनीरवा न शुचा नानुमृतेव लक्ष्यते॥९७॥ ॥ ॥ ॥ ॥ ॥

ऽर्पितं मृदु यदंगं ते दूयेत परितप्येत तदिदमंगं चितायामधिरोहणं कथं विषयिष्यते वद॥९६॥ इयमिति। इयं प्रथमा आद्या
रहसि सुरते सखी सहचरी यं रशना मेखला गतिविभ्रमाणां चंक्रमणविलासानां सादान्नाशान्नीरवा निःशब्दा सती अप्रबोधा
य शायिनीं स्वप्नशीलां त्वां शुचा शोकेन निमित्तेनानुगते वन लक्ष्यते इति न लक्ष्यत एवेत्यर्थः॥९७॥ ॥ ॥ ॥

युग्मेनाह कलमिति त्रिदिवेति। उभयोरेकान्वयः अन्यभृतासु परभृतासु कोकिलासु कलं मधुरं भाषितं वचनं क
रहंसीषु विस्तहंसीषु मदेनालसं मंदं गमनं पृषतीषु हरिणीषु विलोलं चपलं ईक्षितं दर्शनं पवनाधूतलतासु विभ्रमो
विलासः इत्यमी गुणास्त्वया त्रिदिवे स्वर्गे उत्कया पि मामवेक्ष्य उद्दिश्य निहितास्थापिताः सत्यं ध्रुवं तव विरहे गु
रुव्यथमधिकदुःखं मे हृदयं मनः अवलंबितुं न क्षमाः न समर्थाः॥९८॥९९॥ मिथुनमिति। ननु प्रिये त्वया इमौ फलिनी

कलमन्यभृतासु भाषितं कलहंसीषु गतं मदालसं॥ पृषतीषु विलोलमीक्षितं पवनोद्धूतलतासु विभ्रमः
॥९८॥ त्रिदिवोत्सुकयाप्यवेक्ष्य मां निहिताः सत्यममी गुणास्त्वया॥ विरहे तव मे गुरुव्यथं हृद
यं न त्ववलंबितुं क्षमाः॥९९॥ युग्मं॥ मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ॥
अविधाय विवाहसत्क्रियामनयोर्गम्यत इत्यसांप्रतं॥६०॥ कुसुमं कृतदोहदस्त्वया यदशो
कोयमुदीरयिष्यति॥ अलकाभरणं कथं नु तत्तव नेष्यामि निवापमाल्यतां॥६१॥ ॥ ॥

सहकारश्च प्रियंगुलता च तौ मिथुनं परिकल्पितं समर्पितं अनयोः फलिनीसहकारयोर्विवाहाख्यां सत्क्रियां संभावनाम
संभाव्यानं कृत्वा गम्यते त्वयेति यत्सांप्रतं अघटमानं त्वयि इत्थं व्रतं प्रयुक्तं॥६१॥ कुसुममिति। त्वया कृतदोहदः
संपादितेच्छाविशेषोयमशोकः यत्कुसुममुदीरयिष्यति उद्गमयिष्यति तत्तव बालकाभरणं कुसुमं कथं नु केन प्रकारेण नि वा
पस्यमाल्यतां दाघांजलेरर्घ्यं नेष्यामि॥६१॥ ॥ ॥ ॥ ॥ ॥

241/1947

स्मरतेति। हेस्कगात्रिसशब्दंनिपुर्कं। मंजिनूपुरंयस्मिन्सतं अन्यैःसहकादिभिर्दुर्लभंचरणेनयदिनानुरहस्त्वीकरणंत
दुनंत्वादीमितिभावयतास्मरसाचिंतयतेवकुस्कमाश्रुवर्षिताप्रुष्पवाष्पममुनापुरोवर्तिनाप्रूर्वोक्ताद्गन्येनाशोकेनशोच्यते
॥उत्तमागेनवचरणताडनेनतत्पोषश्वेदानेनश्लेषेस्पष्टाकृतः॥ ६२॥ तवेति। हेकिंनरकंठिकंठशब्देनात्रतज्जःस्वरोध्वन्य
तेकिंनराणांदेवगायकविशेषाणांकंठइवकंठोयस्याःसातथाअंगगात्रकंठेभ्यइतिङीप्। तवनिश्वसितानुकारिभि
सौरभ्यादिभिरितिभावस्तंगतबकुलैःकुसुमैःकरणैर्मयाकथ्यनेभिद्राकमंसदार्द्धचितांअर्द्धस्यूतांविलासायमेखला

स्मरतेवशशब्दनूपुरंचरणानुग्रहमत्यदुर्लभं॥ अमुनाकुसुमाश्रुवर्षिणात्वमशोकेनसुगात्रिशो
च्यसे॥ ६२॥ तवनिश्वसितानुकारिभिर्बकुलैरर्द्धचितांसमंमया॥ असमाप्यविलासमेखलांकिमि
दंकिंनरकंठिसुप्यते॥ ६३॥ समदुःखसुखःसखीजनःप्रतिपच्चंद्रनिभोयमात्मजः॥ अहमेकरसस्तथा
पितेव्यवसायाप्रतिपत्तिनिष्ठुरः॥ ६४॥ धृतिरस्तमितारतिश्च्युताविरतागेयमृतुर्निरुत्सवः॥ गत
माभरणप्रयोजनंपरिशून्यंशयनीयमद्यमे॥ ६५॥ ॥ ॥ ॥ ॥ ॥

नसमाप्याप्रूथित्वाइदंपुरोवर्त्तियथातथाकिंकस्मैप्रयोजनायकथ्यतेनिद्राक्रियेते॥ ६३॥ समइति। अयंसखीजनःसम
दुःखसुखेप्रात्मजःप्रतिपदिशुक्लपक्षेक्षयीचंद्रस्तन्निभस्तत्सदृशः अथमहमेकरसोभिन्नरागःसमानप्रेमेस्थर्यः
तथापितेव्यवसायउद्योगःप्रतिमत्त्व। निश्चयेनाकस्मिकगमनव्यंजितेनानिष्ठुरःक्रूरः॥ ६४॥ धृतिरिति। अद्य १०
मेधृतिःप्रीतिःअस्तमितारतिःक्रीडाच्युताःगेयंगायनंविरतंऋतुर्वसंतोनिरुत्सवःआभरणानांप्रयोजनंगतंशय
नीयंशयनंपरितःशून्यंजातं॥ ६५॥

243/1947

त्वन्नहेतुत्वंप्रकाशयति। गृहिणीति। त्वांहरतातेनतएवकरुणाविमुखेनकृपयाःपराङ्मुखेनमृत्युनामेममसंबंधि
कंवस्तुकनहृतंतत्सर्वंत्वहमित्याकूतंतदेवविवृणोति। गृहिणीहताअनेनसर्वंकुंठत्वंत्वदाश्रयमितिभावःससचिवो
हतःसचोदितोपदेशस्त्वदायतइत्यनेनोन्यनेमिथोरहसिसखीहृतासर्वोभोगस्त्वदाश्रयस्त्वमुनाप्रकटितांललिते
सुकुमारेकालानांगीतादीनांविधावनुष्ठानविषयेप्रियशिष्याहृताप्रियत्वंप्राज्ञत्वादित्यभिसंधिःसर्वोनादोनेनत्वंभि
बंधनइत्युक्तमासितं॥ ६६॥ मदिरेति। हेमदिराक्षिमत्तलोचनेप्रसंगोचितेयंसंबुद्धिः। मदाननार्पितंमुखेमन्मुखेमृतर

गृहिणीसचिवःसखीमिथःप्रियशिष्याललितेकलाविधौ॥ करुणाविमुखेनमृत्युनाहरतात्वां
वदकिंनमेहृतं॥ ६६॥ मदिराक्षिमदाननार्पितंमधुपीत्वारसवत्कथंनुमे॥ अनुपास्यसिबाष्पदू
षितंपरलोकोपनतंजलांजलिं॥ ६७॥ विभवेपिसतियात्वयाविनासुखमेतावदजस्यगण्यतां॥
भक्तस्यविलोभिनांतरैर्ममसर्वेविषयस्त्वदाश्रयाः॥ ६८॥ ॥ ५॥ ॥ ॥

सवत्कगंधमाधुर्यंमधुमद्यंपीत्वाइदानीमनुपास्यसिमदाननार्पितस्यपरलोकोपनस्यचरसवतोबाष्पदूषितस्यमधुनो
जलांजलेश्चमहदंतरमितिविचक्ष॥ ६७॥ परलोकेउपनतंप्राप्तमेवबाष्पैरश्रुभिर्दूषितंजलांजलिंतिलोदकांजलिंक
अनुविभवइति त्वयाविभवेसत्यपिअजस्यसुखमेतावदियमेवाधिकंगण्यतांजायतां तथाहिविलोभनांतरैरन्यैर्वि
षिणलोभजनकवस्तुभिरैश्वर्यादिभिरदनस्याना—स्यममसर्वेविषयभोगाःसर्वेत्वदाश्रयाःत्वमेवाश्रयोधिकरणं
येषांतेतथा॥ ६८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

विलपन्निति। कोशलाधिपोजः प्रियामिंदुमतींप्रतिप्रतिमुद्दिश्यकरुणः करुणाजनकः स चासावर्थश्च तेनग्रथितं
मनस्कृतं तथाविलपन् पृथिवीरुहान् वृक्षानपि स्रुतशारवारसैर्बाष्पदुर्दिनात् स्रुतः गलितः शाखाविटपानां रसोनि
र्यासः सएवबाष्पोः श्रुः स्रुदुर्दिनंदुर्वर्षायेषांतेतथाभूतांनकरोत्। किमुतमनुष्यानितिभावः॥ ६९॥ अथेति। अ
थतस्यां कतः उत्संगात्स्वश्चासौजनश्चेतिविग्रहः। स्वजनोज्ञातिवर्गः कथंचित्तांसुंदरींअपनीय कृतान्यमंडनां

विलपन्निति कोशलाधिपः करुणार्थग्रथितंप्रियांप्रति॥ अकरोत्पृथिवीरुहानपिस्रुतशाखा
रसबाष्पदुर्दिनात्॥ ६९॥ अथतस्यकथंचिदंकतः स्वजनस्तामपनीयसुंदरी॥ विससर्ज
तदंत्यमंडनामनलायागुरुचंदनैधसे॥ ७०॥ प्रमदामनुसंस्थितः शुचानृपतिः सन्निति
वाच्यदर्शनात्॥ नचकारशरीरमग्निसात्सहदेव्यानुजजीविताशया॥ ७१॥ ॥

अगरुः कालागरुः चंदनः श्रीखंडएवएधासिइंधनानि यस्मिन्नितिमंत्रसंस्कारोपिसूचितः तस्मैअनलायअग्नये
विससर्जददौ॥ ७०॥ प्रमदामिति नृपतिरजः सन् विद्वान्तथापिशुचाशोकेन हेतुनाप्रमदांस्त्रियमनुसं
स्थितोमृतइतिवाच्यानिंदायादर्शनाद्भिमशादेव्यासहशरीरमग्निसाद्धीनंनचकारनतुजीविताशया।
॥ ७१॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

245
1947

अथेति। अथतेनविदुषाशास्त्रज्ञेनराज्ञागुणाएवशेषारूपाद्योयस्याः सातथातांगेहिनींगृहस्वामिनीं अपदिश्यउ
द्दिश्यदशाहतः दशाहानामह्नांसमाहारोदशाहः तद्धितार्थेत्यादिसमाहारार्थेतत्पुरुषः समाहारस्यैकत्वादेकवचनं
राजाहः सखिभ्यः इतिटच्प्रत्ययः। रात्राह्नाहाः पुंसीतिपुल्लिंगानांअन्होन्हएतेभ्यइत्यकारादेशोन। नसंख्यादेः स
माहारइतिनिषेधात्तसिल् तस्मादशाहतः परेऊर्ध्वंकर्तुव्याम इदयोमहासमृद्ध्योविधयः श्राद्धादयः क्रियाः पुरः पु
र्याउपवनेउद्यानेएवसमापिताः संपूर्णमनुष्ठिताइत्यस्यह्योद्विप्रोदशाहेनभूमिपेतिमनुवचनविरोधोनशंकनीयः
तस्यनिर्गुणक्षत्रियविषयत्वात्सगुणवत्क्षत्रियस्यउदशाहतः शुद्धिमाहपराशरः क्षत्रियस्तुदशाहेनस्वधर्मनिरतः

अथतेनदशाहतः पुरोगुणविशेषामुपदिश्यभामिनीं॥ विदुषाविधयेमहर्द्धयः पुरए
वोपवनेवितेनिरे॥ ७२॥ सविवेशपुरींतयाविनाक्षणदापायशशांकदर्शनः॥ परिवा
हमिवावलोकयन् स्वशुचः पौरवधूमुखाश्रुषु॥ ७३॥ ॥ ॥ ॥ ॥

शुचिरिति। स्त्रच्यतेचास्याप्रगुणवत्त्वमितिमिषेण॥ ७२॥ सइति। तयेंदुमत्याविनाक्षणदायारात्रेरपायेपगमेयः शशांक
सइवदृश्यतइतिप्रातः कालीनचंद्रइवदृश्यमानमित्यर्थः। कर्मार्थेल्यट्प्रत्ययः सोजः पौरवधूमुखाश्रुषु स्वशुचः स्वशो
कस्यपरिवाहंजलोच्छ्वासमिवावलोकयन्। जलोच्छ्वासाः परिवाहाइत्यमरः। स्वदुःखपुरातिशयमिवपश्यन् पुरींविवेश
वधूग्रहणात्तस्यांइंदुमत्यांसइवाभिमानादजसमानदुःखस्त्वेनासरिवाहोन्निवेदाति॥ ७३॥ ॥ ॥ ॥

र॰ सु॰टी॰ १२

अथेति। अथ सवनाय यागाय दीक्षितो गुरुर्वसिष्ठः आश्रमस्थितस्तमजमभिषंगजडं मोदुःखमोहितं विजज्ञिवान्
ज्ञातवान् स — क्तस्थेति क्तस्तप्रत्ययः इति वक्ष्यमाणप्रकारेण शिष्येणान्वबोधयत् बुधेर्ण्यंताल्लङ्॥७४॥ व
सिष्ठशिष्य आह। असमापितेति। यतो हेतो मुनिरसमापितविधिरसमापितक्रतुस्तत — वतापकारणं दुःखहेतुं
कलत्रनाशरूपं विद्वानपि विदेशतुर्वसिष्ठ इति वसादेशः न लोके त्यादिना षष्ठीप्रतिषेधस्तत भवंतं प्रकृतौ स्वभा
वस्थापयितुं समाश्वासयितुमित्यर्थः स्वयं नोपस्थितो नागतः॥७५॥ मयीति। हे स्तुत्य सदाचार संदिश्यत इ

अथ तं सवनाय दीक्षितः प्रणिधानाद्गुरुराश्रमस्थितः॥ अभिदुःखांगजडं विजज्ञिवानिति शिष्ये
ण किलान्वबोधयत्॥७४॥ अथसमाप्तविधिर्यतो मुनिस्तव विद्वानपि तापकारणं॥ न भवंतमुप
स्थितः स्वयंप्रकृतौ स्थापयितुं कृतस्थितेः॥७५॥ मयि तस्य सुवृत्त वर्तते लघुसंदेशपदा सरस्वती॥
शृणु विश्रुतसत्वसारतां हृदि चैनामुपधातुमर्हसि॥७६॥ पुरुषस्य पदेष्वजन्मनः समतीतं च भ
वच्च भावि च॥ स हि निःप्रतिघेन चक्षुषा त्रितयं ज्ञानमयेन पश्यति॥७७॥ ॥ ॥ ॥

ति संदेशः संदेष्टव्य इत्यर्थः तस्य पदानि वचकानि लघूनि संक्षिप्तानि यस्यां सा लघु — — — पदा तस्य मुनेः सरस्व
ती वाणी मयि वर्तते हे विश्रुतसत्त्वसार सत्त्वाख्यातधैर्यातिशय तां सरस्वतीं शृणु एनां वाचं हृदि उपधातुं धर्तुमर्हसि॥७६॥
वक्ष्यमाणार्थविषये इष्टं मुनेः सर्वज्ञत्वं तावदाह पुरुषस्येति अजन्मनः पुरुषस्य भगवतस्त्रिविक्रमस्य पदेषु विक्रमे
षु त्रिभुवनेष्वपि इत्यर्थः समतीतं भूतं च भवद्वर्तमानं च भविष्यच्चेति त्रितयं निःप्रतिघेनाप्रतिबंधेन ज्ञानमयेन चक्षु
षा ज्ञानदृष्ट्या स मुनिः पश्यति हि अतस्तदुक्तेषु न त्वनादर्थितव्यमित्यर्थः॥७७॥ ॥ ७२॥ ॥ ॥

सर्ग ८

१२

चरत इति। पुरा किल दुश्चरं तीव्रं तपश्चरतस्तृणबिंदोर्नाम्नः कस्यचिदृषेः परिशंकितः कर्त्तरि क्तः भीत्रार्थानां भयहेतुरि
त्यपादानात्। हरिरिंद्रः समाधिभेदिनीं हरिणीं नाम स्मरांगनां तस्मै तृणबिंदवे प्रजिघाय प्रेरितवान्॥७८॥ स इति। स मुनिः
शमः शांतिरेव वेला मर्यादा प्रलयोर्मिणा प्रलयकालतरंगेण शमविघातकेनेत्यर्थः अब्ध्यंबुविकृतौ वेला कालम
र्यादयोरपीत्यमरः यादवो तपसः प्रतिबंधेन विघ्नेन यो मन्युः क्रोधः तेन हेतुना अमुं स्वर्गे आविःकृतचारुविभ्रमां हरिणीं
मर्त्यलोके मानुषी मनुष्यस्त्री भवेति अशाप॥७९॥ भगवन्निति। हे भगवन्महर्षे अयं जनः परोस्यास्तीति स्वामिने

चरतः किल दुश्चरं तपस्तृणबिंदोः परिशंकितः पुरा॥ प्रजिघाय समाधिभेदिनीं हरिरस्मै हरिणीं
स्मरांगनां॥७८॥ स तपःप्रतिबंधमन्युना प्रमुखाविःकृतचारुविभ्रमां॥ अशपद्भव मानुषीति तां
शमवेलाप्रलयोर्मिणा मुनिः॥७९॥ भगवन्परवानयं जनः प्रतिकूलाचरितं क्षमस्व मे॥ इति
चोपनतां क्षितिस्पृशं कृतवाना सुरपुष्पदर्शनात्॥८०॥ क्रथकैशिकवंशसंभवा तव भूत्वा महि
षी चिराय सा॥ उपलब्धवती दिवश्च्युतं विवशा शापनिवृत्तिकारणं॥८१॥ ॥ ५ ॥ ॥ ॥

न परवान् पराधीनः अयमिति आत्मनिर्देशात्। अहं पराधीन इत्यर्थः मे मम प्रतिकूलाचरितं अपराधं क्षमस्वेत्यनेन प्र
कारेणोपनतां हरिणीं असुरपुष्पदर्शनात् सुरपुष्पपर्यंतं क्षितिं स्पृशतीति क्षितिस्पृक् तां क्षितिस्पृशं मानुषीमकरोत्
दिव्यपुष्पदर्शनं शापावधिरित्यनुगृहीतवानित्यर्थः॥८०॥ क्रथेति। क्रथकैशिकानां राज्ञां वंशः संभवो यस्याः सा हरिणी
तव महिषी भूत्वा चिराय दिवः स्वर्गात् च्युतं पतितं शापनिवृत्तिकारणं सुरपुष्परूपं उपलब्धवती विवशाभूदिति शेषः मृ
तेत्यर्थः॥८१॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

र॰ मू॰ टी॰ नहिति। न सस्मात्कारणात्तस्या अपायचिंतया अलं तस्यान‍र्णं न चिंत्यमित्यर्थः। ननु कलत्रान्निषेधात्कियांप्रति कारणत्वचिं स॰ ८
१२ तयेतृतीया। कुतो नचिंत्यं तत्राह तदुत्पत्तिमतां जन्मवतां विपद्विपत्तिरुपस्थिता सिद्धा जातस्य हि ध्रुवो मृत्युरेवेत्यर्थः।
ननु कलत्ररहितस्य किं जीवितमत्राह वसुधेयं वसुधाभूतिरवेक्ष्यतां पाल्यतां हि यस्मान्नृपा वसुमत्या पृथिव्या कल
त्रवंतोऽतो नानुशोचयितव्यमित्यर्थः॥८१॥ उदयइति। उदये अभ्युदये सति मदेन यद्वाच्यं निंदा दुःखं तदुन्नता परिहार
नासता मदहेतावमाघता त्वया आत्मवत्तया अविकृतचित्तया गलिंतश्रुतं ज्ञानमाविःकृतं प्रकाशितं तत्कृतमनसो

तदलं तदपालचिंतया विपदुत्पत्तिमतां व्यवस्थियतां॥ वसुधेयमवेक्ष्यतां त्वया वसुमत्याहि
नृपाः कलत्रिणः॥८२॥ उदयेवदवाच्यमच्युताश्रुतावाविकृतमात्मन त्वया॥ मनसस्त
दुपस्थितेज्वरेपुनरक्लीबतयाप्रकाश्यतां॥८३॥ रुदताकुतएवसापुनर्भवता नानुमृतापि
लभ्यते॥ परलोकजुषां स्वकर्मभिर्गतयोभिन्नपथाहि देहिनां॥८४॥ ॥ ॥ ॥

ज्वरे संतापे उपस्थिते प्राप्ते अक्लीबतया धैर्येण लिंगेन पुनः प्रकाश्यतां विदुषां सर्वावस्थास्वपि धीरेण भवितव्यमि
त्यर्थः॥८३॥ अतोऽपि नारोदितव्यमित्याह। रुदतेति। रुदता भवता सा कुत एव लभ्यते एव अनुम्रियत इत्यत आह किंपु
नेनानुमृतेः नुमृतवतापि भावता पुनर्न लभ्यते तन्न चनुमृतेन लभ्यते तदपि नेत्याह। परलोकजुषां लोकांतरभाजाम १२
पि देहिनां गम्यत इति गतयो योग्यस्थानानि स्वकर्मभिः पुण्यपापैर्भिन्नपथाः पृथक्मार्गा हि परत्रापि स्वस्वधर्मानुरू
पफलभोगाय भिन्नदेशगमनान्मृतेनापि त्वया लभ्यत इति॥८४॥ ॥ ॥ ॥ ॥ ॥ ॥

247/1447

अयेति। किंतु अयशोकमनाः निर्दुःखचित्तः सन् कुटुंबिनीं पत्नीं निवापदत्तिभिः पिंडोदकादिदानैरनुगृह्णीष्व तर्पयेत्यर्थः
अन्यथा दोषमाह। अतिसंततमविच्छिन्नं स्वजनानां बंधूनां अश्रु प्रेतं दहतीति प्रचक्षते मन्वादयः अत्र या ज्ञव ल्क्यः
श्लेष्माश्रु बंधुभिर्मुक्तं प्रेतो भुंक्ते यतो वशः अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तित इति॥८५॥ मरणमिति। शरीरि
णां प्रकृतिः स्वभावः ध्रुवमित्यर्थः जीवितं विकृतिः यादृच्छिकमित्यर्थः एवं स्थिते जंतुः प्राणी क्षणमपि अत्यं तस
योगो द्वितीया। क्षणमपि पूर्णं श्वसंजीवन्नवतिष्ठते यद्यसौ क्षणजीवी लाभवान्ननु जीवने यथालाभसंतोष्टव्यं अन्यलाभा
न्मरणे तु न शोचितव्यं यस्य स्वाभाविकत्वादिति भावः॥८६॥ अवेति मूढचेतनः। भ्रांतबुद्धिः प्रियनाशं इष्टनाशं हृदय

अयशोकः मनाः कुटुंबिनीमनुगृह्णीष्व निवापदत्तिभिः॥ स्वजनाश्रुकिलातिसंततं दहति प्रेतमिति प्रचक्षते॥८५॥
मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः॥ क्षणमप्यवतिष्ठते श्वसन्यदि जंतुर्ननु लाभवानसौ॥८६
अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितं॥ स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतं॥८७॥
स्वशरीरशरीरिणावपि श्रुतसंयोगविपर्ययौ यदा॥ विरहः किमिवानुतापयेद्वद बाह्यैर्विषयैर्विपश्चितं॥८८

र्पितं निखातं शल्यं शंकुमवगच्छति मन्यते स्थिरधीर्विद्वांस्तु तदेव शल्यं समुद्धृतं उत्खातं मन्यते प्रियनाशे सतीति शेषः। कुतः कु
शलद्वारतया प्रियनाशस्य मोक्षोपायतया इत्यर्थः विषयलाभविनाशयोर्यथासंख्यं हिताहितसमानत्वाभिमानः पामराणा
नां विपरीतं न विपश्चितामिति भावः॥८७॥ स्वेति। स्वशरीरशरीरिणो देहात्मनावपि यदा यतः श्रुतौ श्रुत्यवगतौ संयोगविपर्य
यौ संयोगवियोगौ ययोस्तौ तदा बाह्यैर्विषयैः पुत्रकलत्रादिभिः विरहो विपश्चितं विद्वांसं किमिवानुतापयेत्। न किं
चिदित्यर्थः अथवा स्वशब्दस्य शरीरेणैव संबंधः॥८८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

र·घु·टी·
१४

सर्ग८

नेति। हेवशीनांउत्तमपृथक्जनवत्तुच्छः शोकस्यवशंगंतुंनार्हसि तथाहि द्रुमसानुमतांतरुशिखरिणांकिमंतरंकोवि
शेषः वायौसतिद्वितीयेपिद्विःप्रकाराः अथप्रथमचरमेत्यादिनाजसि विभाषा सर्वनामसंज्ञातेद्रुमतेश्चलायदिसानु
मतामपिवचलनेद्रुमवत्तेषामचलसंज्ञानेत्यर्थः॥८९॥ सइति। सराजाउदारमतेर्विनेतुर्वसिष्ठस्यवचस्तच्छिष्यमुखे
रितंतथेतिप्रतिगृह्यांगीकृत्यमुनिंवसिष्ठशिष्यंविससर्जकिंतुतद्वचः शोकघनेदुःसहेअस्याजस्यहृदि अलब्धपदमल
ब्धावकाशंसद्गुरोर्वसिष्ठस्यांतिकंप्रतियातमिवप्रतिनिवृत्तंकिंतोटकवृत्तमेतत् इहतोटकमंबुधिसैःप्रथितमित्यु

नपृथक्जनवत्तुचोवशंवशिनामुत्तमगंतुमर्हसि॥ द्रुमसानुमतांकिमंतरंयदिवायौद्वितयेपिचं
चला॥८९॥ सतथेतिविनेतुरुदारमतेप्रतिगृह्यवचोविससर्जमुनिं॥ तदलब्धपदंहृदिशोक
घनेप्रतियातमिवांतिकमस्यगुरोः॥९०॥ तेनाष्टौपरिगमिताः समाःकथंचिद्बालत्वादवित
थसूनृतेनसूनोः॥ सादृश्यप्रतिकृतदर्शनैःप्रियायाःस्वप्नेषुक्षणिकसमागमोत्सवैश्च॥९१॥सू

क्तं॥९०॥तेनेति। अवितथयथार्थंसूनृतंप्रियवचनंयस्यतेनाजेनसूनोःपुत्रस्यबालत्वात्राज्याक्षमत्वादि
त्यर्थः। प्रियाया इंदुमत्याः सादृश्यंवस्त्वंतरमाकारसाम्यंप्रतिकृतिश्चित्रंतयोर्दर्शनैःस्वप्नेषुक्षणिकाःक्षणभंगुरायेसमाग
मास्तएवोत्सवास्तैश्चकथंचित्कृच्छ्रेणाष्टौसमाःसंवत्सराःपरिगमिताःवियोगेयोगेवाप्रियजनसदृशदर्शनानुभवनंततश्चित्र
कर्मस्वप्नसमयेतद्दर्शनेपितदंगस्पर्शनामुपगतवतांस्पर्शनमपिप्रतीकारःकामव्यथितमनसांकोपिकथितइतिप्र
कृतेःसा।दृश्यादिचित्राभिधानंतस्पष्टपदार्थस्पष्टेरप्युपलक्षणं॥९१॥ ॥ ॥ ॥ ॥ ॥ १४

249
1947

तस्येति। शोकएवशंकुःकीलः शंकुःकीलेस्त्रीचेतिविश्वः। तस्याजस्यहृदयंप्लक्षप्ररोहः सौधतलमिवप्रसह्यबलात् कि
लविभेदप्राणांतहेतुमपिमरणकारणमपिभिषजामसाध्यमप्रतिसमाधेयंतंशोकशंकुंरोगपर्यवसितंप्रियायाअनुगम
नेत्वरयोत्कंठयालाभंमेनेतद्विरस्यातिदुःसहत्वात्तत्प्राप्तिकारणंमरणमेववरंइत्यमन्यतेत्यर्थः॥९२॥ सम्यगिति।अ
थनृपतिरजःसम्यग्विनीतंनिसर्गसंस्काराभ्यांविनयवंतंवर्महरतीतिवर्महरंकवचधारिणमित्यर्थः। वयसिचेत्यच्प्रत्ययः
। कुमारंदशरथंप्रजानांरक्षणविधौराज्येविधिवद्विध्यर्थंयथाशास्त्रमित्यर्थः। तदर्हमितिवतिप्रत्ययः। आदिश्यनियोज्य

तस्यप्रविश्यहृदयंकिलशोकशंकुःप्लक्षप्ररोहइवसौधतलंविभेदप्राणांतहेतु
मपितंभिषजामसाध्यंलाभंप्रियानुगमनेत्वरयासमेने॥ ९२॥ सम्यग्वि
नीतमथवर्महरंकुमारमादिश्यरक्षणविधौविधिवत्प्रजानां॥ रोगोपसृष्ट
तनुदुर्वसतिंमुमुक्षुःप्रायोपवेशनमतिर्नृपतिर्बभूव॥ ९४॥ ॥ ॥

रोगेणोपसृष्टायास्तनोःशरीरस्यदुर्वसतिंदुःखावस्थितंमुमुक्षुर्जिहासुःसन्प्रायोपवेशेनशनावस्थानेमतिर्यस्यस
बभूवप्रायश्चानशनेमृत्यौतुल्यबाहुल्ययोरितिविश्वःअत्रपुराणवचनं सभास्तक्षोभवेद्यस्तकपातकैर्मदादिभिः
दुश्चिकित्स्यैर्महारोगैःप्रपीडितोभवत्तुयः। स्वयंदेहविनाशस्यकालेप्राप्तेमहामतिः आब्रह्माणंवास्वर्गादिमहाफलमभी
प्सुभिः प्रविशेज्ज्वलनंदीप्तंकुर्यादनशनंतथा। एतेषामधिकारोस्तिनान्येषांसर्वजंतुषु। नराणामथनारीणांसर्ववर्णे
षुसर्वदेति॥९३॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

र॰सू॰टी॰ ४९

तीर्थइति। आसाद्यजोजन्हुकन्यासरय्वोस्तोयानांजलानांव्यतिरेकेणसंभेदेनभवेत्तीर्थेगंगासरयूसंगमेदेहत्या स८
गात्सद्यएवामरगणनायांलेख्यलेखवनंतयोरेवस्वस्त्यककरवलार्थं। इतिभावेष्यञ्प्रत्ययः। आसायंत्राप्यपूर्वस्मा
दप्याकारादधिकंचतुरयासुभगयाकांतयासंगतंसन्नंदनस्याभ्यंतरेषुक्रीडाभवनेषुनररमतयत्तः॥

कथंचित्तीर्थेस्मिन्देहत्यागोयथाभवेत्। तस्मात्तथातदोषेणप्राप्नुयादीप्सितान्यपीतिस्कांदे॥९४॥ इति ४९
श्रीमहोपाध्यायमल्लिनाथसूरिविरचितायांसंजीविन्यांअष्टमः सर्गः॥८॥ ॥ ॥ ॥ ॥

251/1947

र·मू·टी·
३

॥श्रीः॥ ॥एकलोचनमेवार्थसार्धलोचनमन्यतः लीलार्थनीलकंठार्धमहः किमपि मन्महे॥ १॥ पितरि स०
ति समाधिना संयमेन जितेंद्रियः यमवतां संयमिनां अवतारक्षतां राज्ञां च धुर्यः अग्रे स्थितो महारथो दशरथः
पितुरनंतरउत्तरकोशला जनपदान् समधिगम्य प्रशशास अत्र मनुः क्षत्रियस्य परो धर्मः प्रजानां परिपालनमि
ति द्रुतविलंबितमेतद्वृत्तं तदुक्तं द्रुतविलंबितमाह नभौ भरावि॥ १॥ अधिगतमिति अधिगतं प्राप्तं आत्म
कुलोचितं स्वकुलागतं सनगरं प्रकृतिमंडलं नगरजनपदसहितं जानपदमंडलं अत्र प्रकृतिशब्देन मात्रवाचि

पितुरनंतरमुत्तरकोशलान्समधिगम्यसमाधिजितेंद्रियः॥ दशरथः प्रशशास महार
थो यमवतामवतां च धुरि स्थितः॥ १॥ अधिगतं विधिवद्यत्पालयन्प्रकृतिमंडलमात्म
कुलोचितं॥ अभवदस्य ततो गुणवत्तरं सनगरं नगरंध्रकरौजसः॥ २॥ ॥ ॥

ना नगरशब्दयोगात् गोबलिवर्दन्यायेन जानपदमात्रमुच्यते यद्यस्माद्विधिवत् यथाशास्त्रमपालयत् ततो हेतो
रंध्रं करोतीति रंध्रकरः कुमारः रंध्रहेतुरित्यर्थः कर्मोहेतुताच्छील्यानुलोमेषु इति टप्रत्ययः नगरस्य रंध्रकरः कु
मारः कुमारः क्रौंचदारुण इत्यमरः तदोजस्तत्तुल्यबलस्यास्य दशरथस्य गुणवत्तरमभवत् तस्मै जानपद
मंडलं तस्मिन्ननीवासकमभूदित्यर्थः तस्मै प्रासि नासत्कावित्यमरः॥२॥ ॥ ५ ॥ ॥ ५ ॥

251-A
1947

उभयमिति। मनस ईषिणो मनीषिणो विद्वांसः पृषोदरादित्वात्साधुः बलनिषूदनं इंद्रमनुदं उधरो राजा मनुशिति
यो इंद्रधरः स एवान्वयः कूटस्थो यस्य तं यद्वा मनुनाप्रणीतो योर्इ उप्रजापालनरूपस्तं धरतीति सोन्वयो ग्रस्थल
त्र जातो वा तं अर्थपतिं दशरथं चेत्युभयमेव समये वरसेजलधनं वर्षतीति समयवर्षी तस्य भावेन समयवर्षित
याहेतुना कृतकर्मणां स्वकर्मकारिणां कार्षुकाणामनुचराणां च श्रमं नुदतीति नुदं श्रमस्य नुदं इगुपधेत्यादिना कः
प्रत्ययः क्लिबंतत्वेन पुल्लिंगेन उभयशब्देन सामानाधिकरण्यं न स्यादिति वदंति॥ ३॥ जनपद इति। शमतरे शांति

उभयमेव वदंति मनीषिणः समयवर्षितया कृतकर्मणां॥ बलनिषूदनमर्थपतिं च तं श्रमनुदं
मनुदंउधारान्वयं॥ ३॥ जनपदे न गदः पदमादधावभिभवः कुत एव सपत्नजः॥ क्षितिरभू
त्फलवत्यजनंदने शमरतेमरतेजसि पार्थिवे॥ ४॥ दशदिगंतजिता रघुणा यथा श्रियमपु
ष्यदजेन ततः परं॥ तमधिगम्य तथैव पुनर्बभौ न न महीनमहीनपराक्रमं॥ ५॥ ॥

परे अमरतेजसि अजनंदने दशरथे पार्थिवे पृथिव्या ईश्वरे सति तस्य ईश्वर इत्यण् प्रत्ययः। जनपदे देशे गदो व्याधिः
रोगव्याधिगदामया इत्यमरः॥ पदं नादधौ न चक्रे। सपत्नजः शत्रुजन्यः अभिभवः कुत एव असंभावित एवेत्यर्थः
क्षितिः फलवत्यभूत्॥ ४॥ दशरथेति। महीदशदिगंतान् जितवानिति दशदिगंतजिता तेन रघुणा यथा श्रियं कां
तिमपुष्यत्। ततः परं अनंतरं अजेन यथा श्रियं अपुष्यत्॥ तथैवाहीनपराक्रमं अन्यूनविक्रमं तं दशरथं इनं
स्वामिनं अधिगम्य पुनर्बभाविति न किं तु पुनर्बभावित्यर्थः द्वौ नञौ प्रकृत्यर्थं गमयतः॥ ५॥ ॥ ॥

समतयेति। नराधिपः दशरथः समतया समवर्त्तित्वेन माध्यस्थेनेत्यर्थः वसुवृष्टेर्धनवृष्टेर्विसर्जनैः असतां दुष्टानां नियमनैर्निग्रहैश्च वरुणो वरुणः स द्वितीयः अपुण्यजनेश्वरौ यमकुबेरौ वरुणान् यथासंख्यमनुययौ। अनु चकार। रुच्या तेजसा अरुणाग्रसरं अनुरुसारथिं सूर्यमनुययौ॥६॥ तस्य व्यसनासक्तिर्नासीदित्याह नेति उद याय्यतमानमभ्युदयार्थं व्याप्रियमाणं तं दशरथं मृगयाभिरतिः आखेटकव्यसनासक्तिर्नापहरत् न चकृष आख्येटं मृगव्यं स्यादाखेटो मृगया स्त्रियामित्यमरः। इष्टमाससंतादुरमस्यतिदुरोदरं द्यूतं नापाहरत्. दुरोदरो

समतया वसुवृष्टिविसर्जनैर्नियमनादसतां च नराधिपः॥ अनुययौ यमपुण्यजनेश्वरौ सवरुणावरुणाग्रसरं रुचा॥६॥ न मृगयाभिरतिर्न दुरोदरं न च शशिप्रतिमाभरणं मधु॥ तमुदयाय नवा नवयौवना प्रियतमा यतमानमपाहरत्॥७॥ न कृपणा प्रभवत्यपि वासवे न वितथा परिहासकथास्वपि॥ अपि सपत्नजनेन च तेन वागपरुषा परुषाक्षरमीरिता॥८॥ ॥

द्यूतकारे पणे द्यूते दुरोदरमित्यमरः। शशिनः प्रतिमा प्रतिबिंबं आभरणं यस्य तन्मधु नापाहरत्। नातिपरच्छेदः। वा समुच्चये प्रियतमा वा स्त्रियश्च नापाहरत् अत्र मनुः पानमक्षाः स्त्रियश्चेति मृगया च यथाक्रमं एतत्कष्टतमं विद्या च्चतुष्कं कामजे गणे इति॥७॥ नेति। तेन राज्ञा प्रभवति प्रभौ सति वासवेति कृपणादिना वाङ्नेरिता नोक्ता परिहासः कथा २
स्वपि वितथा अनृता वाङ्नेरिता किं चापरुषा रोषश्चेत्येतेन सपत्नजनेष्वपि परुषाक्षरं निष्ठुराक्षरं यथा तथा वाङ्नेरि ता किमुतानेत्रे पि सर्वत्रापि सिद्धार्थः किं च दीनासत्यामधुरैव वागुक्तेति फलितार्थः॥८॥ ॥९॥ ॥५॥ ॥

253
1947

उदयमिति। वसुधाधिपाः राजानः उद्वहतीत्युद्वहो नायकः पचाद्यच्। रघूणामुद्वहः रघुनायकः तस्माद्रघुनाय कादुदयं वृद्धिं अस्तमयं नाशं चेत्युभयं मानशिरे लेभे कुतः हि यस्मात् स दाशरथिः निदेशमाज्ञा लंघयतां कुर्वतां शोभनं हृदयं यस्येति सुहृद्‌ पोहृदयः यस्येति सुहृन्मित्रमभूत् सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः प्रतिगर्जतां प्रतिस्पर्द्धिनां अयमेव दुहृदयं यस्येत्ययोहृदयः कविना चित्तो भूत् आज्ञाकारिणः रक्षिति अन्यान्मारयतीत्यर्थः॥९॥
अजयदिति। अधिज्यशरासनः सदशरथः उदधिनेमिं समुद्रवेष्टनां मेदिनीमेकरथेन अजयत् स्वयमेक एवाजैषी

उदयमस्तमयं रघूद्वहादुभयमानशिरे वसुधाधिपाः॥ स हि निदेशमलंघयतामभूत्सुहृदयोहृदयः प्रतिगर्जताम्॥९॥ अजयदेकरथेन स मेदिनीमुदधिनेमिमधिज्यशरासनः॥ जयमघोषयदस्य हि केवलं गजवती जवतीव्रहया चमूः॥१०॥ अवनिमेकरथेन वरूथिना जितवतः किल तस्य धनुर्भृतः॥ विजयदुंदुभितां ययुरर्णवा घनरवा नरवाहनसंपदः॥११॥

दित्यर्थः गजवती गजयुक्ता जवेन तीव्रा जवाधिका हया यस्याः सा चमूस्तस्य नृपस्य केवलं जयमघोषयत् अप्रथय त्। स्वयमेकवीरस्य चमूरुपकरणमात्रमित्यर्थः॥१०॥ अवनिमिति। वरूथिना गुप्तमनावरूथोग गुप्तिर्भांनिरो धनेरथस्थितमिति सज्जनः एकरथेन द्वितीयरथेनावनिं जितवतो धनुर्भृतो नरवाहनसंपदः कुबेरतुल्यश्री कस्य तस्य दशरथस्य घनरवा मेघसमघोषा वा अर्णवा विजयदुंदुभितां ययुः। अर्णवा तं विजयीत्यर्थः॥११॥

शमितेति। पुरंदरः इंद्रः शतकोटिनाशतस्त्रिणा कुलिशेन वज्रेण शिखरिणां पर्वतानां शमितपक्षबलः। विना स९
शितपत्रसारः नवतामरसाननः पंकेरुहं तामरसमित्यमरः। स दशरथः शरवृष्टिमुचा स्वनवता धनुषा द्विषां श
मितपक्षः सहायो बलं च येन स तथोक्तः पक्षः सहाये पीत्यमरः॥१२॥ चरणयोरिति। शतशो नृपतयः अखंडि
तपौरुषं तं दशरथं मरुतो देवाः शतमखं यथा शतक्रतुमिव नखरागेण नखकांत्या समृद्धिभिः संपादितद्धिभिः
मुकुटरत्नमरीचिभिः चरणयोरस्पृशन् प्रणेमुरित्यर्थः॥१३॥ निववृत इति। स दशरथः सचिवैः सम योजितैः

शमितपक्षबलः शतकोटिना शिखरिणां कुलिशेन पुरंदरः॥ स शरवृष्टिमुचा धनुषा
द्विषां स्वनवतानवतामरसाननः॥१२॥ चरणयोर्नखरागसमृद्धिभिर्मुकुटरत्नमरीचि
भिरस्पृशन्॥ नृपतयः शतशो मरुतो यथा शतमखं तमखंडितपौरुषं॥१३॥ निववृ
ते स महार्णवरोधसः सचिवकारितबालसुतांजलीन्॥ समनुकंप्य सपत्नपरिग्रहा
ननलकानलकानवमां पुरीं॥१४॥

कारिता बालसुतानामंजलयो यैस्तान् स्वयमस्तं मुखागतानित्यर्थः अलकान् हतभर्तृकतया अलकसंस्कार
शून्यान् सपत्नशून्या स्वपरिग्रहान् शत्रुपत्नीः पत्नीपरिजनदानमूलशापाः परिग्रहा इत्यमरः। समनुकंप्यानु ३
गृह्य अलकानवमां अलकानगरात् अन्यूनां पुरीमयोध्यां प्रति अनुदितं श्वेतछत्रं यस्य सः अर्णवरोध
सः पर्यंतान्निववृते शरणागतवत्सल इति भावः॥१४॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥

255
1947

उपगतेति। अनुदितं अनुच्छ्रितं अन्यनृपच्छत्रातिरिक्तं सितातपवारणं छत्रं यस्य सः अनलसोमयोरग्नि
चंद्रयोः समा द्युतिरन्या द्युतिस्तेजः कांतिर्यस्य सः तथोक्तः स दशरथो मंडलस्य नाभितां द्वादशराजमंडल
स्य प्रधानम[हीपति]त्वमुपगतो चक्रवर्तीसन्नपीत्यर्थः। अथ नाभिसुनंतं गेयस्य संज्ञा मतीरिका रथच
क्रस्य मध्यपिंडिका यां च ना पुनः अन्नक्षत्रियभेदेष्येम नोर्मुख्य महीपताविति केशवः अजितं नृपास्य दमस्ती
ति जेतव्यमरिमंडलमस्तीति बुध्या मनसो अप्रमत्तोऽभूत् विजितानिखिलजेतव्योपि पुनर्नीतिव्यातरवानिवो ज
गरूक एवावतिष्ठेत्यर्थः। द्वादशराजमंडलं उक्तं कामंदकेनोक्तं अरिर्मित्रमरिर्मित्रं मित्रमित्रमतः परं। तथा रि

उपगतोपि च मंडलनाभितामनुदितान्यसितातपवारणः॥
श्रियमवेक्ष्य स रंध्रचलामभूदनलसोनलसोमसमद्युतिः॥१६॥

मित्रमित्रं च विजिगीषोः पुरःसराः। पार्ष्णिग्राहस्ततः पश्चादाक्रंदस्तदनंतरं। आसारावनयोश्चैव विजिगीषो
स्तु पृष्ठतः आरक्ष्ये विजिगीषाश्च मध्यमो भूम्यनंतरः। अनुग्रहे संगतयोः समस्तप्यतयोर्वधे मंडलाद्बहिरेतेषामु
दासीनो बलाधिकः। अनुग्रहे संहतानां व्यस्तानां च मध्ये प्रभुरित्यभिप्रायः। पंच विजिगीषोः पुरःसराः
पार्ष्णिग्राहाक्रंदपार्ष्णिग्राहसाराक्रंदासारश्चेति पश्चतः चत्वारः मध्यमोदासीनौ द्वौ विजिगीषुरित्येक इत्येवं
द्वादशराजमंडलं तत्रोदासीनमध्यमोत्तमरश्च चक्रवर्ती दशरथश्चेतादृगिति तात्पर्यार्थः॥१६॥ ५ ॥

जघनेति। अलकाधिपस्य कुबेरस्येव विक्रमो यस्य सन्नृपो जघनेभ्यो निर्विषयी कृता मेखला येषां तेषां तथा
भूतान् अनुचितान्ययोग्यानि यान्यश्रूणि तैर्विलुप्ता नष्टा विशेषका सुगंधिद्रव्यविरचितास्तिलका येषां तेन
थाभूतान् नलकूरदिताने वविधान् रिपुदारगणान् बलादकरान्। सपत्नीवैधव्यं प्रापितवानिति भावः। किं विशेषस्
तिलकविशेषस्य विहके चेति विश्वः॥३६॥ तमिति। पत्यौ व्रतं नियमो यस्याः सा पतिव्रता सकलाकमलहस्ता
देवता लक्ष्मीरर्थिषु विषये अलाघवं लघुत्वरहितं अपराङ्मुखमित्यर्थः ककुत्स्थकुलोद्भवं तं दशरथं आत्म
भुवं पुरुषं विष्णुं चापहाय त्यक्त्वा अन्यं कं नृपतिं असेवत कं मपिनासेवतेत्यर्थः विष्णाविव विष्णुतुल्ये तस्मिन्न

जघननिर्विषयीकृतमेखलाननुचिताश्रुविलुप्तविशेषकान्॥ सरिपुदारगणानकरोद्बला
दनलकानलकाधिपविक्रमः॥३६॥ तमपहाय ककुत्स्थकुलोद्भवं पुरुषमात्मभुवं च पतिव्रता॥
नृपतिमन्यमसेवत देवता सकमला कमलाघवमर्थिषु॥३७॥ तमलभंत पतिं पतिदेवताः
शिखरिणामिव सागरमापगाः॥ मगधकोशलकेकयशासिनां दुहितरो हितरोपितमार्गणं
॥३८॥

पिश्रीः स्थिराभूदित्यर्थः॥३७॥ तमिति। पतिरेव देवता यासां ताः पतिदेवताः पतिव्रताः मगधाश्च केकयाश्च ता
न् जनपदान् शासतीति तच्छासिनस्तेषां राज्ञां दुहितरः पुत्र्यः सुमित्रा कौशल्या कैकय्य इत्यर्थः। अत्र क्रमो नाव
क्षितः आहितरोपितरोपितमार्गणं शत्रुनिखातशरं कादंबमार्गणाः शरा इत्यमरः तं दशरथं क्ष्माभृतां दुहितरः
आ समंतात् अपगच्छंतीति वा अपेन असंबंधिना वेगेन गच्छंतीति आपगा इति क्षीरस्वामी नद्यः सागरमिव पतिं
भर्तारं लभंत॥३८॥

257
1947

प्रियतमाभिरिति। अरीन् घ्नंतीति अरिहणोऽरिघ्नः हंतेः क्विप् ब्रह्मभ्रूणवृत्रेषु क्विप्। इति नियमस्य प्रा
यिकत्वात्। यथाह न्यासकारः प्रायिकश्चायं नियमः क्वचिदन्यस्मिन्नुपपदे दृश्यते। मधुहा ग्रामिकर्तं च व
क्ष्यमाणस्य बहुलग्रहणस्य पुरस्तादपकर्षाल्लभ्यत इति तेषु योगेषु उपाये षु विचक्षणो दक्षः। यो
गः सन्नहनोपायध्यानसंगमयुक्तिषु इत्यमरः। इंद्र पियो ज्यमेतत्। असौ दशरथः तिसृभिः प्रियतमाभिः

प्रियतमाभिरसौ तिसृभिर्बभौ तिसृभिरेव भुवं सह शक्तिभिः॥ उपगतो विनि
नीषुरिव प्रजा हरिहयोऽरिहयोगविचक्षणः॥३९॥ स किल संयुगमूर्ध्नि सहायतां
मघवतः प्रतिपद्य महारथः॥ स्वभुजवीर्यमगापयदुच्छ्रितं सुरवधूरवधूतभयाः शरैः॥४०॥

सह प्रजाः विनिनीषुः विनेतुमिच्छुः तिसृभिः शक्तिभिः प्रभुमंत्रोत्साहशक्तिभिरिव सह भुवं उपगतो हरिहय इंद्र
इव बभौ॥३९॥ स इति। महारथो स दशरथः संयुगमूर्ध्नि रणांगणे मघवतः इंद्रस्य सहायतां प्रतिपद्य प्राप्य शरैर
धूतभयां निवर्त्तितत्रासाः सुरवध्वः उच्छ्रितं स्वभुजवीर्यं अगापयत्। किल खलु गायतेः शब्दकर्मत्वात्
गतिबुद्धीत्यादिना सुरवधूनामपि कर्मत्वं॥४०॥ ६९॥ ॥ ६९ ॥ ॥ ६९॥ ॥ ६९ ॥

क्रतुष्विति। क्रतुषु अश्वमेधेषु विसर्जितमौलिना अवरोपितकिरीटेन यावद्यज्ञ अध्वर्युरेव राजा भवतीति राजचिन्हत्यागविधानादिति अभिप्रायः मौलिः किरीटधम्मिल इति विश्वः। भुजसमाहृतदिग्वसुना अर्जितदिगंतरसंपदा अनेन क्षात्रियस्य विजितमित्युक्तं नियमार्जितधनत्वं सविनियोगकारित्वं सूच्यते। वितमसा तमो गुणरहितेन दशरथेन तमसा च सरयूश्च नद्यौ तयोः स्तटाः कनककयूपानां समुच्छ्रयेण समुन्नामनेन शोभिनः कृताः कनकमयत्वं च यूपानां शोभार्थं विध्यभावात्। हमयूपस्य शोभन इति यावत्॥२०॥ अजिनेति ईश्वरो भगवानष्टमूर्तिरजिनं कृष्णाजिनं दंडं औदुंबरं बिभर्तीति अजिनदंडभृत्। तं कृष्णाजिनेन दीक्षय

क्रतुषु तेन विसर्जितमौलिना भुजसमाहृतदिग्वसुना कृताः॥ कनकयूपसमुच्छ्रयशो
भिनो वितमसा तमसासरयूतटाः॥२०॥ अजिनदंडभृतं कुशमेखलां यतगिरं मृग
शृंगपरिग्रहं॥ अधिवसंस्तनुमध्वरदीक्षितामसमभासमभासयदीश्वरः॥२०॥ ॥

ति। औदुंबरं दीक्षितदंडं यजमानाय प्रयच्छतीति विधानात् कुशमयी मेखला यस्याः सा कुशमेखला तां शरमयी मौंजी वा मेखला तया यजमानं दीक्षयतीति विधानात् नृपतेः कुशग्रहणं क्वचिच्छ्रुतिनिषेधदर्शनात् कृतं यतगिरं संयतवाचं यजमानं यच्छतीति श्रुतेः मृगशृंगपरिग्रहः कंडूयनसाधनं यस्याः सा तां कृष्णाविषाणया कंडूयत इति विधेः अध्वरदीक्षितां संस्कारविशेषयुक्तां तनुं दशरथं अधिवसन् अधिष्ठितः अतएव समाभासो दीप्त्या यस्मिन् कर्मणि तद्यथा तथा आभासयत् भासयति स्म॥२०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

259/1947

अवभृथेति। अवभृथेन प्रयतो नियतेंद्रियः सुरसमाजसमाक्रमणोचितः। देवसभाधिष्ठानार्हः स दशरथः उन्नतं शिरो वनमुचे उदकवर्षिणे। वनं नीरं वनं सत्वं इति शाश्वतः नमुचेररये केवलं इंद्रायैव नमयति स्म न कस्मैचिदन्यस्मै मानुषायेत्यर्थः॥२१॥ असकृदिति। तरस्विना च बलवता हरिहयस्याग्रसरेण धनुर्भृता तेन बहुशो दिनकरस्याभिमुखाः अभिमुखोत्था इत्यर्थः रणरेव स्फुरद्विषां दैत्यानां रुधिरेण नु रुधिरे निवारिताः॥२२॥ अथ

अवभृथप्रयतो नियतेंद्रियः सुरसमाजसमाक्रमणोचितः॥ नमयति स्म स केवलमुन्न
तं वनमुचे नमुचेररये शिरः॥२१॥ असकृदेकरथेन तरस्विना हरिहयाग्रसरेण धनुर्भृता॥
दिनकराभिमुखा रणरेणवो रुरुधिरे रुधिरेण सुरद्विषां॥२२॥ अथ समाववृते कुसुमैर्नवैः
स्तमिव सेवितुमेकनराधिपं॥ यमकुबेरजलेश्वरवज्रिणां समधुरं मधुरंचितविक्रमं॥२३॥

ति। यमकुबेरजलेश्वरवज्रिणां धर्मराधनदवरुणेंद्राणां समधूर्तारोयस्य सः समधुरः मध्यास्यवितरणसन्नियमेष्वैर्थैस्तुल्य इत्यर्थः ॠक्पूरब्धूरित्यादिना अपसमासांतः। तं समधुरं अंचितविक्रमं एकनराधिपं तं दशरथं सेवितुमिव मधुर्वसंतः। अथ पुष्परसे मधुर्दैत्ये चैत्रवसंते मधुश्चेति विश्वः नवैः कुसुमैः उपलक्षितः॥ समाववृते समागतः रिक्तहस्तो नोपेयाद्राजानं देवतां गुरुमिति वचनात् पुष्पसमेतो राजानं सेवितुमिति भावः॥२३॥ ९॥ ॥९॥ ॥ ९॥ ९॥ ॥९॥ ॥९॥

जिगमिषुरिति। धनदाध्युषितां कुबेराधिष्ठितां दिशं जिगमिषुं गंतुमिच्छुः रथयुजा सारथिना अरुणेन
वर्तितवाहनो निवर्तिताश्वो रविः हिमस्यानिग्रहैर्निराकरणैर्दिनमुखानि विमलयन् अस्य जगतू दक्षिणां दि
शमत्यजत् इत्यर्थः॥२५॥ हिमवर्णितेति। हिमेन वर्णिकृता मलिनीकृताश्चंदनवृक्षाणां पल्लवा यस्य तं
मलयाद्रिं विरहयन् परित्यजन् उत्तरामाशामभिमुखो रविः सूर्यः। अह्नो विरहो रजनी तेन ध्रुवं निश्चितं
भेदो वियोगो ययोस्तयोर्विहंगयोश्चक्रवाकयोः स्त्रीपुंसयोः कृपयेव शनैर्जगाम वसंतो निशाया अ

जिगमिषुर्धनदाध्युषितां दिशं रथयुजा परिवर्तितवाहनः॥ दिनमुखानि रविर्हिमनि
ग्रहैर्विमलयन्मलयं नगमत्यजत्॥२५॥ हिमविवर्णितचंदनपल्लवं विरहयन्नम
लयाद्रिमुदङ्मुखः॥ विहगयोः कृपयेव शनैर्ययौ रविरहर्विरहध्रुवभेदयोः॥२६॥
कुसुमजन्म ततो नवपल्लवास्तदनु षट्पदकोकिल—जितं॥ इति यथाक्रममाविरभू
न्मधुर्द्रुमवतीमवतीर्य वनस्थलीं॥२६॥ ॥ ॥ ॥ ॥ ॥

ल्पत्वात् अह्नो महत्वात् उत्प्रेक्षा गामिषुरिवत्यजतश्लेषेयं॥२७॥ कुसुमेति। आदौ कुसुमजन्म ततो नवपल्लवाः
तदनु अनु लक्षणे इति कर्मप्रवचनीयत्वात् द्वितीया मेवं तथा संख्येयत इभयानंतरं षट्पदानां कोकिलानां च कू
जितं इति प्रकारेण यथाक्रममनतिक्रम्य द्रुमवतीं द्रुमयिष्ठां वनस्थलीं अवतीर्य मधुर्वसंतः आविरभूत् केषां
चिद्द्रुमाणां पल्लवप्राथम्यात् केषांचित्कुसुमप्राथम्याभ्योक्तक्रमस्य दृष्टविरोधः॥२६॥ ॥ ॥ ॥

261
1947

परभृतेति। मृदुः रवो यस्याः सा मृदुरवाः परभृताः कोकिला कलहांतरे प्रियकोपे लघुरिष्टा वाक् यस्याः
सा तादृशी प्रियसखीं मदनक्षतचेतसः कामपीडितान् प्रियतमान् योषितां दुरवापाः दुर्लभाः समागमाः
येषां ते दुरवापसमागमान् चक्रे॥२७॥ नयेति। नयेन नीतिरेव गुणोस्तेन। अथवा नयेन गुणैः शौर्यादिभिश्च उपचि
तां उपकारः फलं यस्यास्तां सदुपकारफलां भूपतेर्दशरथस्य श्रियमर्थिन इव मधुना वसलेन संभृतां सम्यक् पुष्टां

परभृता मदनक्षतचेतसां प्रियसखी लघुवागिव योषितां॥ प्रियतमानक
रोत्कलहांतरे मृदुरवा पसमागमान्॥२७॥ नयगुणोपचितामिव भूभृ
पतेः सदुपकारफलां श्रियमर्थिनः॥ अभियुः सरसो मधुसंभृतां कम
लिनीमलिनीरपतत्रिणः॥२८॥ कुसुममेव न केवलमार्तवं नवमशो
कतरोः स्मरदीपनं॥ किशलयप्रसवोपि विलासिनां मदयिता दयिताश्रवणार्पितः
॥२९॥

सरसः संबधिनीं कमलिनीं पद्मिनीं अलिनीरतत्रिणः भ्रमरा नीरपतत्रिणो जलपक्षिणः हंसादयश्चाभियुः
॥२८॥ कुसुममिति। ऋतोर्भवं आर्तवं ऋतोरण् इत्यण्। नवं प्रत्ययं। अशोकतरोः केवलं कुसुममेव स्मरदीपनं न तु
विलासिनां मदयिता मादकः दयिताश्रवणार्पितः किशलयः प्रवालोपि पल्लवो संतानोपि स्मरदीपनः॥२९॥

विरचिताइति। मधुनावसंतेननवनश्रियांविरचिताः अभिनवाः पत्रविशेषकाः पत्रलताः इवास्थिताः। मधूनांमकरंदानां दानेविशारदाः चतुराः कुरबकास्तरवो मधुलिहांमधुपानांनबकारणतांययुः भृंगाः कुरबकमधूनिपीताजगुरित्यर्थः दानशौंडिनेअर्थिजनाः स्क्रवंतीतिभावः॥२०॥ स्क्रवदनेति। सुवदनावदनासवेनकांतामुखमद्येनसंभृतोजनितः तस्यदोहदमितिप्रसिद्धः तस्यानुवादीसदृशोगुणोयस्यसः तदनुवादीगुणः कुसुमोद्गमः कर्ता

विरचितामधुनोपवनश्रियामभिनवाइवपत्रविशेषकाः॥ मधुलिहांमधुदानविशारदाः
कुरवकारवकारणतांययुः॥२०॥ सुवदनावदनासवसंभृतस्तदनुवादिगुणः कुसुमोद्गमः
॥मधुकरैरकरोन्मधुलोलुपैर्बकुलमाकुलमायतपंक्तिभिः॥२१॥ उपहितांशिशिरापग
मश्रियामुकुलजालमशोभतकिंशुके॥प्रणयिनीवनखक्षतमंडनंप्रमदयामदयापितलज्जया॥२२॥

मधुलोलुपैरायतपंक्तिभिर्मधुकरैः करणैः बकुलवृक्षंआकुलमकरोत्॥२१॥ उपहितमिति। शिशिरापगमश्रियावसंतलक्ष्म्याकिंशुकेपलाशवृक्षेपलाशेकिंशुकःपर्णइत्यमरः। उपहितंदत्तंमुकुलजालंकुड्मलसंहतिमदेउथापितलज्जयाअपसारितपयाप्रमदयाप्रणयिनिप्रियतमेउपहितंनखक्षतमेवनखक्षतमंडनंतदिवाशोभत॥२२॥ ॥५॥ ॥५॥ ॥५॥ ॥५ ॥५॥ ॥५॥ ॥५॥ ७

263
19417

व्रणेति। व्रणैर्दंतक्षतैर्गुरुभिर्दुर्भरैःप्रमदानामधरोष्ठैः दुःसहांहिमस्यव्यथाकरत्वादसत्युजघनेषुनिर्विषयीकृतानिरवकाशीकृतामेखलायेनतत् शैत्यायजितमेखलमित्यर्थः एवंभूतंहिमंरविस्तावदशेषंयथातथाअपोहितंनालंखलुनशशाकोहि। किंतुविरलंकृतवान्॥२३॥ अभीनि अत्रभूतलतयानर्तकीसमाधिरभिधीयते। अभिनयान्नर्तनव्यंजकान् व्यंजकाभिनयौसमावित्यमरः परिचेतुमभ्यसितुंउद्यतेवस्थितामलयमारुतेनकंपितपल्लवापल्लवशब्देनहस्तोगम्यतेसकलिकासकोरकाकलिकाकोरकःपुमानित्यमरः सहकारलताकलिः कलहद्वेषउ

व्रणगुरुप्रमदाधरदुःसहंजघननिर्विषयीकृतमेखलं॥नखलुतावदशेषमपोहितुंरविरलंवि-
रलंकृतवान्हिमं॥२३॥ अभिनयान्परिचेतुमिवोद्यतामलयमारुतकंपितपल्लवा॥अमदया
त्सहकारलतामनःसकलिकाकलिकामजितामपि॥२४॥ प्रथममन्यभृताभिरुदीरिताः प्र
विरलाइवमुग्धवधूकथाः॥सुरभिगंधिषुशुश्रुविरेगिरःकुसुमितासुमितावनराजिषु॥२५॥

ति॥ कलिस्यात्कलहेशूरेकलिरंत्ययुगेयुधीत्यमरः। कामोरागस्तामितामपिजितरागद्वेषाणामित्यर्थः। मनोदमयत्॥२४॥ प्रथमामिति। सुरगंधोयासांताः सुरभिगंधिषुगंधस्येत्यादिनाइप्रत्ययः। कुसुमान्यासांसंजातानिकुसुमितास्तासुवनराजिषुवनपंक्तिषुअन्यभृताभिः कोकिलाभिः प्रथममारंभेउदीरिताःउक्ताः अतएवमिताः गिरः आलापाः सविरलामुग्धवधूस्तोकोक्तामुग्धवधूनांकथवाचइवशुश्रुविरेश्रुताः॥२५॥ ॥ ॥ ॥

दशनेति। दशनानां चंद्रिकया ज्योत्स्नया व्यवभासितं शोभितं मधोर्वसंतस्य हसितमिव आसवगंधो यस्यास्ती त्यास
वगंधी शुचिः शुभ्रो यस्य ततू शुचिरसंचितं संभृतं तिलकं तिलककुसुमं मीक्ष्णभिरभिलाषुभिर्भ्रमरैः सेवितं हसित
मपि शुचिरसंचितं आसवगंधि चेति मकरंदवाकुल्ये च पुष्पे उपचारितसंचिता दुग्धेश्वता।।२६।। श्रुतीति। श्रुतिसु
खाः श्रवणमधुराः भ्रमरस्वना एव गीत यो यासां ता ताः कुसुमान्येव कोमलादंतरुचो दंतकांतयो यासां ताः अने
न सास्मितत्वं उपवनांतलताः पवनाहैः किशलयैः साभिनयैः लयशब्देन लयानुगताभिनयो भिनयो लक्ष्यते उपवनां
पवनाहतैरिति सक्रियत्वाभिधानात् पाणिभिरिव बभ्रुः अनेन लतानां नर्तकीसाम्यं गम्यते।।२७।। ललितेति। अं

दशनचंद्रिकया व्यवभासितं हसितमासवगंधिमधोरिव। तिलकपुष्पमसेव्यत षट्पदैः शुचि
रसंचिरसंचितमीक्ष्णभिः।।२६।। श्रुतिसुखभ्रमरस्वनगीतकुसुमकोमलदंतरुचो बभ्रुः। उपव
नांतलताः पवनहतैः किशलयैः सलयैरिव पाणिभिः।।२७।। ललितविभ्रमबंधविचक्षणं सुर
भिगंधपराजितकेसरं। पतिषु निर्विविशुर्मधुमंगनाः स्मरसखं रसखंडनवर्जितं।।२८।। ग

गनाः ललितविभ्रमबंधविचक्षणं मधुरविलासघटनोपदेशपटुतरं सुरभिणा मनोहरेण गंधेन पराजितकेसरनि-
र्जितकुवलयपुष्पं अथ केसरे कुवलय इत्यमरः स्मरस्य सखा यं स्मरसखं स्मरोद्दीपकमित्यर्थः मधुमद्यं अर्धर्चा
पुसांचेति पुल्लिंगता उक्तं च मकरंदस्य मद्यस्य माक्षिकस्य च वाचकः अर्धर्चादिगणो पाठः पुंनपुंसकयोर्मधुरित्य ९
र्थः पतिषु विषये रसखंडनवर्जितं अनुरागभंगरहितं यथा तथा निर्विविशुः परस्परानुरागपूर्वकं पतिभिः सह प
पुरित्यर्थः।।२८।। ।।८।। ।।८।। ।।८।। ।।८।। ।।८।। ।।८।। ।।

265/1947

शुशुभिरे इति। विकचतामरसाः विकसिताः कमलभाः मदेन कलाः अव्यक्तमधुरध्वनवंतः उदकलोलः विहंगमाः
जलप्रियपक्षिणो हंसादयो यासु ताः गृहेषु दीर्घिकाः वाप्यः स्मितेन चारूणि विलोचनानि यासां ताः श्लथाः सं
जिता मुखराः मेखला यासां ताः सजिते क्रतेरिक्ताः स्त्रिय इव शुशुभिरे।।३९।। गमयितुमिति। मधो वसंते पंथानां
वधूजनो महतीं दीर्घां मां सुखेन गमयितुमिति विहितुं न प्रभुर्न समर्थः इति कृपावशादिव रजनीवशवती सर्वं द्रा रात्री

शुशुभिरे स्मितचारुतराननाः स्त्रिय इव श्लथसिंजितमेखलाः।। विकचतामरसा गृहदीर्घि
कामदकलोदकलोलविहंगमाः।।३९।। गमयितुं प्रभुरेष सुखेन मां न महतीं वत पांथवधूजनः।।
इति दयात इवाभवदायता न रजनी रजनीशवती मधौ।।४०।। उपययौ तनुतां मधुखंडिता महि
मकरोदय पांडुमुखच्छविः।। सदृशमिष्टसमागमनिर्वृतिं वनितया नितया रजनीवधूः।।४१।।

रायता दीर्घा न बभूव अभेक्षो यं।।४०।। उपययाविति मधुना मधुसमायेन खंडितह्रा संगमिताक्षीयं तेरवलूतरा थणे
रात्र यः खंडिता ख्याना पिता च ध्वन्यते हिमकरोदयेन चंद्रोदयेन पांडुः मुखस्य प्रदोषस्य वक्त्रस्य च कांतिर्यस्या
सा रजन्येव वधूः इष्टसमागमनिर्वृतिं प्रियसमागमसुखं अनितया अप्राप्तया इण् धातोः कर्तरि क्तः वनितया
तुल्यं तनुतां कार्श्यं चोपययौ।।४१।। ।।८।। ।।८।। ।।८।। ।।८।। ।।८।। ।।८।।

र॰ मृ॰ टी॰ १

तिलकेति। तिलकानां वृक्षविशेषाणां मस्तकमुपरिभागः तदेव हर्म्यं प्रासादः तत्र कृतास्पदैर्निविष्टैः कुसुमानां मधुनो मकरंदस्यानुषंगः संपर्कः तेन सुगंधिभिः स्मरयुतैः सकामैरयुतैर्बहुभिः अबलानां सखा यो बलास खास्तैर्भृंगयुतैः भृंगा एव विलसिनस्तैः कलं मधुरमगायत युक्ते कामिनो हिहर्म्यारूढाः सकामाः कुसुमैर त्यादितस्य मधुनो पपद्यस्यास्वादेन सुरभयः कलं गायंति अबलासखैरितिरा अहसारिवभ्य एच् अयुतैरित्य त्र यद्यप्ययुतशब्देन दशसहस्राणि अभिधीयंते तथापि बहुत्वमुपलक्ष्यते ॥४२॥ अपेति। हिमकरश्चंद्रः अपतुषारतया अपगतनीहारतया विशदप्रभैर्निर्मलकांतिभिः सुरतरागपरिश्रमनोदिभिः सुरतसंगखेदहारिभिः

तिलकमस्तकहर्म्यकृतास्पदैः कुसुममध्वनुषंगसुगंधिभिः॥ कलमगीयत भृंगविलासिनां स्मरयुतैरयुतैरबलासखैः॥४२॥ अपतुषारतया विशदप्रभैः सुरतरागपरिश्रमनोदिभिः॥ कुसुमचापमतेजयदंशुभिर्हिमकरो मकरोर्जितकेतनं॥४३॥ अनलसान्यभृतानलसा मनः कमलधूलिभृता मरुतेरिता॥ कुसुमभारनताध्वगयोषितामसमशोकमशोकलता करोत्॥४४॥ ॥

अंशुभिः किरणैः मकरोर्जितकेतनं करेण ऊर्जितं उच्छ्रितकेतनं ध्वजो यस्य तं लब्धावकाशत्वादुच्छ्रितं ध्वजमित्यर्थः कुसुमचापमतेजयन्यशातयन्निजशातनइति धातोर्णेर्यतात्त्व ड़ः सहकारित्वात् कामोपि तीक्ष्णोभूदित्यर्थः॥ ॥४३॥ अनलसेति। अनलसा कला कूजितं प्रवणान्यकोकिलायस्य स तथा कलमधूलिधृता परागयुक्तेन पवनेनेरिता कंपिता कुसुमभारनता पुष्पभारैर्नम्रा अशोकलता चारुवल्लभा—वधूजनानामसमशोकमितिदुःखितं मनोनलसादग्निरूपां चकारविभाषासातिकान्त्रीदिति सातिप्रत्ययः॥ ४४॥ ॥ ॥ ॥ ॥ ॥

267
1947

विशदेति। हिमवर्षिणा शिशिरऋतोः परं तत्प्रसिद्धं वसरव्यं वस्तकस्कधासाम्यंप्राप्त। कीदृशा विशदा अपतुषारत्वा निर्मलश्चंद्रः रश्मयो यत्र तत्तथा सखयांतीति सुखः पन्वाद्यच् सुखो मयलयानिलोपि यत्र तत्तथा पुष्पितं वृक्षमत एवोन्मदाः कोकिला यत्र तत्तथा उपभोग रसं भोग श्रृंगरप्रचुरं तदिति सामान्यपेक्षया नपुंसकनिर्देशः॥४५॥ हुतेति। हुतहुताशनदीप्तिभि आज्यादिभिः प्रज्वलितमल्लकुसुमं कर्णिकारमित्यर्थः। वनलक्ष्म्याः कनकाभरणस्य प्रतिनिधिप्रदितिशेषः। दलेषु केसरेषुवपेशलं सुकुमारं संभाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधाविति वामनः।

विशदचंद्रकरं सुखमारुतं कुसुमितद्रुममुन्मदकोकिलं॥ तदुपभोगरसं हिमवर्षिणः परमृतोरमृतोपमतां ययौ॥४५॥ हुतहुताशनदीप्तिवनश्रियः प्रतिनिधिः कनकाभरणस्य यत्॥ युवतयः कुसुमं दधुराश्रितं तदलके दलकेसरपेशलं॥४६॥ अलिभिरंजनबिंदुमनोहरैः कुसुमपंक्तिनिपातिभिरंकितः॥ नखलु शोभयति स्म वनस्थलीं न तिलकस्तिलकः प्रमदामिव॥४७॥

यत्रकिंजल्कमित्यर्थः आहितं प्रियैरिति शेषः तत्कुसुमं युवतयः अलकेषु कुंतलेषु दधुः॥४६॥ अलिभिरिति। अंजनबिंदुमनोहरैः कज्जलकणवत्सुंदरैः कुसुमपंक्तिषु निपतंतितैः अलिभिः अंकितः चिन्हितः तिलकः श्रीमान्नाम वृक्षः तिलकः श्रीमानित्यमरः तिलकविशेषकः तमालपत्रतिलकचित्रकाणि विशेषकइत्यमरः॥ लट् स्मशब्दयोगात् भूतार्थे लट्॥४७॥ ॥ ९ ॥ ॥९॥ ॥९॥ ॥९॥ ॥

र॰ मू॰ टी॰ अमदयमिति। तरुचारुविलासिनी तरोः पुंसश्चारुविलासिनी नवमल्लिका सत्यवारव्या लतासप्तला नवम स॰

१० ल्लिकेत्यमरः। मधुनो मकरंदस्य मद्यस्य च गंधेन सनाथया गंधप्रधानयेत्यर्थः। किशलयमेवाधरस्तत्र संग

तरागया प्रस्तरागयेत्यर्थः। कुस्कमैः संभृतया संपादितया कुसुमरूपयेत्यर्थः स्मितरुचा हास्यकांत्य मनः पश्य

तामितिशेषः। अमक्षयतू॥ ४८॥ अरुणेति। विलासिनो विलसनशीलाः पुरुषाः वेकसेत्यादिनाघिनुणप्रत्य

यः। अरुणस्य रागमारुण्यं निषेधतीति तिरस्कुर्वंति अरुणरागनिषेधानितैः कुसुमादिरंजनात्सदृशैरित्यर्थः। ते

मन्वेत्यनुबध्नातितद्धीलःतंनिषेधंतितस्य चानुकरोतीतिशब्दाः सदृशवाचका इतिदंडी। अंशुकैरंबरैः श्रवणेषु

अमदयन्मधुगंधसनाथया किशलयाधरसंगतया मनः॥ कुस्कमसंभृतयानवमल्लिका स्मितरु

चा तरुचारुविलासिनः॥ ४८॥ अरुणरागनिषेविभिरंशुकैः श्रवणलब्धपदैश्च यवांकुरैः॥ परभृ

ताविरुतैश्च विलासिनः स्मरबलैरबलैकरसाः कृताः॥ ४९॥ उपचितावयवा शुचिभिः कणैरलिक

दंबकयोगमुपेयुषी॥ सदृशकांतिरलक्ष्यत मंजरी तिलकजालकजालकमौक्तिकैः॥ ५० ॥

लब्धपदैर्निविशितैरित्यर्थः। यवांकुरैश्च परभृताविरुतैः कोकिलाकूजितैश्च स्मरबलैः कामसैन्यैरेकत्रैवरसो येषां ते येक

रसाः स्त्रीपरतंत्राः कृताः॥ ४९॥ उपचितमिति। शुचिभिः शुभैरजोभिः उपचयवा अलिकदंबयोगमुपेयुषी प्राप्ता तिलकजा

तिकलवृक्षोत्था मंजरी अलके धृयज्जालकं आभरणविशेषः तस्मिन्मौक्तिकैः सदृशकांतिः अलक्ष्यत भृंगसंगि ३०

नी शुभ्रा तिलकमंजरी नीलालकासक्तमुक्ताजालमिवालक्ष्यतेतिवाक्यार्थः॥ ५०॥ ५॥ ॥ ५॥ ॥

2-69
1947

ध्वजेति। अलिव्रजाः मदनस्य धनुर्भृतो धनुष्कस्य ध्वजपटं पताकाभूतं ऋतुश्रियो वसंतलक्ष्म्याः छविकरं शोभा

मुखचूर्णं मुखालीकृतचूर्णं तं सपवनं तस्मिन्नुत्थितं कुसुमानां केसरेणुकिंजल्कधूरेणुस्तमन्वयुः अन्वग

च्छन् यातेर्लङ्॥ ५१॥ अनुभवन्निति। नवादोलाभेषाया स्मिन्नतू नवदोलेऋतूत्सवं वसंतोत्सवं अनुभवं अब

लाजनः पटुरिविनिपुणो जयिप्रियकंठस्य जिघृक्षया ग्रहीतुमालिंगितुमिच्छया आसनरज्जुपरिग्रहेपिवर

ज्जुपरिग्रहणे बाहुलतां भुजलतां जलतां जडतां उयोर्लरभेदः। शिथिलां अनयत् दोलाक्रीडानुपतंभयेनन

ध्वजपटं मदनस्य धनुर्भृतः छविकरं मुखचूर्णमिव श्रियः॥ कुसुमकेसररेणुमलिव्रजाः सपवनोपव

नोत्थितमन्वयुः॥ ५१॥ अनुभवन्नवदोलमृतूत्सवं पटुरपि प्रियकंठजिघृक्षया॥ अनयदासनर

ज्जुपरिग्रहे भुजलतां जडतामबलाजनः॥ ५२॥ त्यज तमानमलं बत विग्रहैर्न पुनरेति गतं चतुरं व

यः॥ परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः॥ ५३॥ ॥ ॥ ॥ ॥

यिका कंपितासती प्रियकंठमाश्लिष्यन्नित्यर्थः॥ ५२॥ त्यजतेति। बतेत्यामंत्रणे विस्मयामंत्रणे बतेत्यमरः। बतांगना

मानं कोपं त्यजत स्त्रीणामीर्ष्याकृतकोपो मानोऽन्यासंगिनि प्रिय इत्यमः विग्रहैर्विरोधैरलं विग्रहो न कार्य इत्यर्थः गतम

तीतं चतुरं उपभोगक्षयं वयो यौवनं पुनर्नैति नागच्छति इत्येवरूपे स्मरमते स्मराभिप्रायेन पुंसके भावे क्तः परभृताभिः

कोकिलाभिः निवेदिते सति वधूजनो रमते स्म रेमे कोकिलाकूजितोद्दीपितस्मरस्त्रीजनः कामशासनभयादिवो

त्कृतमुखलयदित्यर्थः। पचाद्यच्॥ ५३॥ ॥ ५॥ ॥ ५॥ ॥ ५॥ ॥ ५॥ ॥ ५॥

अथेति। अथानंतरं मधुमथ्नातीति मधुमत् विष्णुः संपदादित्वात्क्विप्। मधुर्वसंतः मथ्नातीति मथः पचाद्यच् मननं मतम् स॰ ९
तन्मथ्नातीति मन्मथः मनसा मथो मन्मथः तेषां संनिभः सदृशः मधुमन्मधुमन्मथसंनिभः स नृपो दशरथो विलासवती स
खस्त्री सहचरः सन् क्रतुः प्रासोध स्यात्तवं वसंतोत्सवं यथासुखमनुभूय मृगयारतिं मृगयाविहारं चकमे आचकांक्षे।
॥ ९४॥ व्यसनासंगदोषं च परिहरन्नाह परिचयमिति। असौ मृगया चललक्ष्याणि मृगगवयादीनि तेषां निपातने परि
चयमभ्यासं करोति। भयक्रोधयोस्तदिंगितं बोधं तेषां चललक्ष्याणामिंगितस्य चेष्टितस्य भयादिलिंगभूतस्य बो
धनं ज्ञानं च करोति। तनुं शरीरं श्रमस्य क्षेपात् निरायासात् प्रगुणां प्रकृतं लघवादिगुणवतीं च करोति अतो हेतोः

अथ यथासुखमार्तवमुत्सवं समनुभूय विलासवतीसखः॥ नरपतिश्चकमे मृगयारतिं स मधुमन्मधुमन्मथसंनिभः॥ ९४॥ परिचयं चललक्ष्यनिपातने भयरुषोश्च तदिंगितबोधनं श्रमजयात्प्रगुणां च करोति सा तनुमतोऽनुमतः सचिवैर्ययौ॥ ९५॥ मृगवनोपगमक्षमवेषभृद्विपुलकंठनिषक्तशरासनः॥ गगनमश्वखुरोद्धुतरेणुभिर्नृसविता स वितानमिवाकरोत्॥ ९६॥ ॥ ॥ ॥

सचिवैः अनुमतो यथोसर्वं चेतद्युद्धोपयोगीत्यतस्तत्पदेक्षया मृगया प्रवृत्तिर्न तु व्यसनादिति तयेतिभावः॥ ९५॥ मृगयेति।
मृगाणां वनं तस्योपगमप्राप्तिस्तस्य क्षममर्हं वेषं बिभर्तीति स तथोक्तः मृगयाविहारानुगुणवेषधारीत्यर्थः। विपुलं
कंठे निषक्तशरासनो लग्नधन्वा ना सविता इव नृसविता नृसूर्यः सः गगनं वितानमुल्लोचं सहितमिवाकरोत्। गगनं नलक्ष्यत इत्यर्थः वितानं उ ३३
च्छमंदयोरिति विश्वः। अथवा सवितानमित्येकं पदं उल्लोचेन सहितमिवाकरोत् अस्त्री वितानमुल्लोचेन इत्यमरः।
॥ ९६॥ ॥ ॥ ९॥ ॥ ॥ ९॥ ॥ ॥ ९॥ ॥ ९॥ ॥ ॥ ९॥ ॥ ॥ ९॥

271
1947

लघयतीति। अलमत्यर्थं पुष्पितोऽमसै भृंगैरितः सेवितः स्मरे समाधिरेकाग्रतां करोतीति स्मरसमाधिकरः सहका
रतरुस्तरुणीभिः स्वीकृतां पत्युरपराधेनोत्पन्नामधिकारो यस्य भावोऽधिकारो यत्तां न लघयतिस्मेति न अपि तु लघयति
स्म कृतावलोकनेन स्त्रियो रोषं हित्वा प्रियवशा बभूवुरिति भावः। द्वौ नञौ प्रकृतमर्थं सातिशयं गमयतः क्षेपोयं॥ ९७॥
ग्रथितेति। वनमालया वनपुष्पस्रजा ग्रथितबंधमौलिः बद्धधम्मिल्लः तरूणां पलाशैः पत्रैः सवर्णस्तुल्यस्तनुच्छ
दं यस्य स तथोक्तः इदं च वर्मणः पलाशसावर्ण्यभिधानं मृगयादीनां विश्वासार्थं तुरगस्य वल्गनेन गतिविशेषेण

लघयति स्म न पत्यपराधजां न सहकारतरुस्तरुणीधृतां॥ कुसुमितो नमितोऽलिरिभिरुन्मदैः स्मरसमाधिकरो षतां॥ ९७॥ ग्रथितमौलिरसौ वनमालया तरुपलाशसवर्णतनुच्छदः॥ तुरगवल्गनचंचलकुंडलो विरुरुचे रुरुचेष्टितभूमिषु॥ ९८॥ तरुलता विनिवेशितविग्रहा भ्रमरसंक्रमितेक्षणवृत्तयः॥ ददृशुरध्वनि तं वनदेवताः सुनयनं नयनंदितकोशलं॥ ९९॥ ॥

चंचले कुंडले यस्य स दशरथो रुरुभिर्मृगविशेषैः चेष्टितः चरिता या भूमयः तासु विरुरुचे विदिद्युते॥ ९८॥ तन्विति। त
न्विषु लतासु विनिवेशितविग्रहाः संक्रमितात्मानः भ्रमरेषु संक्रमिता ईक्षणवृत्तयो दृष्टिव्यापारा यासां ता। व
नदेवताः सुनयनं सुलोचनं नयनेन नाव्यानंदिताः संतोषिताः कोशलायेन तं दशरथं अध्वनि ददृशुः प्रसन्नपावन
तया तं देवता अपि स्वरूपस्यादृदृशुरित्यर्थः॥ ९९॥ ॥ ९॥ ॥ ९॥ ॥ ९॥ ॥ ९॥ ॥

र॰म॰टी॰ श्वगणीति। सदशस्थः श्वभिर्गणः श्वगणः स एव येषामस्तीति श्वगणिनः श्वायादिगणः सैर्वागुरा मृगबंधनरज्जवः वागु स॰९
३२ रा मृगबंधनमित्यमरः तया चरंतीति वागुरिकाः जालिकाः चरतीति ठक् द्वौ वागुरिकजालिकावित्यमरः। तैः प्रथ
मास्थितं अधितं व्यपगताः अनलाः दवाग्नयो दस्युवस्तस्कराश्च यस्मात्तथोक्तं दस्युतस्करमोषकाइत्यमरः। करये
हनविशोधनमादौ मातुरं कमपि प्रविविष्णुः प्राप्तशस्त्यनुगतः प्रविशेद्या संकटे वनदहनेन च तिष्ठेदिति कामंदकः॥
स्थिरा दृढा पंकादिरहिता तुरंगमयोग्या भूमिर्यस्य तत् निपातवत् आहावयुक्तं आहावस्तु निपाने स्यादुपकूलजला

श्वगणिवागुरिकैः प्रथमास्थितं व्यपगतानलदस्युविवेशसः॥ स्थिरतुरंगमभूमि
निपातवन्मृगययोगवयोपचितं वनं॥६०॥ अथ नभस्य इव त्रिदशायुधं कनक
पिंगतडिद्गुणसंयुतं॥ धनुरधिज्यमनाधिरुपाददे नरवरो रवरोषितकेसरी॥६१॥

लाशय इत्यमरः। मृगैः हरिणादिभिः वयोभिः गवयैः गोसदृशैः अरण्यपशुविशेषैश्च उपचितं समृद्धं वनं विवेश॥६०
अथेति। अनाधिर्मनोव्यथारहितः नरेषु वरः श्रेष्ठः रवेण धनुष्टंकारेण रोषिताः केसरिणः सिंहा येन स राजा कनकमिव
पिंगः पिशांगो यस्तडिदेव गुणो मौर्वी तेन संयुतं सयुक्तं त्रिदशायुधं इन्द्रचापं नभस्यो भाद्रमास इव स्तु नभस्यः ३२
प्रोष्ठपद भाद्रपदाः समाइत्यमरः अधिज्यमधिकृतमौर्वीकं धनुरादददे जग्राह॥६१॥ ॥५१॥ ॥५१॥

273
1947

तस्येति। स्तनप्रणयिभिः स्तनप्रार्थिभिः एणशावैः हरिणशिशुभिः पृथुकः शावकः शिशुरित्यमरः। व्याहन्यमानं हरिणीनां
गमनं गतिर्यस्य तत् कुशाग्रभेर्येषां तानि यस्य तत् कुशगर्भमुखं तस्य यूथस्याग्रेसरः पुरःसरो गर्वितः दृप्तश्च कृष्णसारो यस्य त
मृगाणां कुलं यूथं सजातीयैः कुलं यूथं नरश्च पुंनपुंसकं इत्यमरः तस्य दशरथस्य पुरस्तादग्रभागे आविर्बभूव॥६२॥ तदि
ति। जवनो जवशीलः जुचंक्रम्येत्यादिना युच् प्रत्ययः तरस्वी त्वरितो वेगी प्रजवी जवनो जवीत्यमरः तं वाजिनं अश्वं गतेना
रूढेन तूणीइषुधिः बह्वादिभ्यश्चेति स्त्रियां ङीप्। तस्याः मुखात् विवरात् उद्धृतशरेण राज्ञा प्रार्थितं अभियातं यां चाभिया
तिं च प्रार्थनाकथने बुधैरिति केशवः। अत एव विशीर्णपंक्तिः संभवायस्य तन्मृगयूथं कर्तृ भयादश्रुसिक्तैः आकुलाभयचकि

तस्य स्तनप्रणयिभिर्मुहुरेणशावैर्व्याहन्यमानहरिणीगमनं पुरस्तात्॥ आविर्बभूव कुशगर्भमुखं मृगाणां
यूथं तदग्रसरगर्वितकृष्णसारं॥६२॥ तत्प्रार्थितं जवनवाजिगतेन राज्ञा तूणीमुखोद्धृतशरेण विशीर्णपंक्ति॥
श्यामीचकार वनमाकुलदृष्टिपातैर्वातेरितोत्पलदलप्रकरैरिवाभः॥६३॥ लक्ष्मीकृतस्य हरिणस्य हरिप्रभावः प्रेक्ष्य
स्थितां सहचरीं व्यवधायदेहं॥ आकर्णकृष्टमपि कामितया स धन्वी बाणं कृपामृदुमनाः प्रतिसंजहार॥६४॥ ॥

तायेर्दृष्टिपातास्तैः पवनप्रेरितेरिंदीवरदलबृंदैरिव वनं श्यामीचकार॥६३॥ लक्ष्मीकृतस्येति। हरिरिंद्रो विष्णुर्वा तस्येव प्रभावो यस्य सः
धन्वी धनुष्मान् स नृपो लक्षितस्य हरिणस्य स्वप्रियः सोदेहं व्यवधाय अनुरागादंतर्धाय स्थितां चरतीति चरतां पचादिषु चरतेः टित्करणात्
ङीप्। यथाह वामनः अनुचरीति चरतेष्टित्वादिति सह भूता चरी हरिणीं प्रेक्ष्य कामीतया स्वयं कामुकत्वात्। कृपामृदुमनाः करुणार्द्रचित्तः
स आकर्णकृष्टमपि दुःप्रतिसंहरमपीत्यर्थः। बाणं प्रतिसंजहार निपुणत्वादित्यर्थः नैपुण्यं धन्वीत्यनेन गम्यते॥६४॥ ॥

र०मू०टी० ३३ तेनेति। अभिघातेरभसमोत्कर्षयस्यनस्याभिहंतुमुद्यतस्येत्यर्थः वन्यस्यवने - - स्यनेत्रविवरनेत्रमध्येतेनृपेणविकृष्य स९
मुक्तः पत्नीशरः विग्रहंमहिषदेहंनिर्भिद्यविदार्यशोणितलिप्तोनभवतीत्यशोणितलिप्तपुंखोयस्यसतथोक्तः सन् तंम
हिषंप्रथमंपातयामासस्वयंपश्चात्पपातकृञ् चानुप्रयुज्यतेलिटीत्यत्रअनुशब्दस्यव्यवहितंविपर्यस्तप्रयोगनिवृत्त्यर्थ
त्वात् पातयांप्रथमंमासेत्यप्रयोग इति पाणिनीयाः यथाह वार्तिककारः विपर्यासनिवृत्त्यर्थंव्यवहितनिवृत्त्यर्थंचेति।

तेनाभिघातरभसस्यविकृष्यपत्रीवन्यस्यनेत्रविवरेमहिषस्यमुक्तः॥ निर्भिद्यविग्रहमशोणित
लिप्तशल्यस्तंपातयांप्रथममासपपातपश्चात्॥६८॥ प्रायोविषाणपरिमोक्षलघूत्तमांगान्खड्गां
श्चकारनृपतिर्निशितैःक्षुरप्रैः॥ शृंगंसदृप्तविनयाधिकृतःपरेषामभ्युच्छ्रितंनममृषेनतुदीर्घमायुः॥
॥६९॥

॥६८॥ प्रायइति। नृपतिः निशितैः क्षुरप्रैः शरविशेषैः खड्गान्मृगान् गंडकेखड्गखड्गिनावित्यमरः। प्रायोबाहुल्येनविषा
णमोक्षपरिमोक्षेण शृंगभंगेनलघून्यन्यगुरूण्युत्तमांगानिशिरांसियेषांतान् चकारनतुवधादित्यर्थः कुतः दृप्तविनयाधिकृ
तः दुष्टनिग्रहनियुक्तःसराजापरेषांप्रतिकूलानांअत्युच्छ्रितमुन्नतंशृंगंविषाणंप्राधान्यंवा शृंगंप्राधान्यसान्वोश्चेत्यमरः ३३
नममृषेनसेहे दीर्घमायुर्जीवितंकालंनेत्यर्थः नममर्षकिंतुममृषएवेत्यर्थः॥६९॥ ॥५॥ ॥५८ ॥

275
1947

व्याघ्रानिति। अभीर्निर्भीकः सगुहाभिमुखोऽस्पतितानागतान्वायुनारुग्णान्भग्नान्फुल्लाः विकसिताः येअसनस्यसर्जक
वृक्षस्याग्रविटपास्तानिवस्थितान् इषुधिभरतानित्यर्थः व्याघ्राणांचित्ररूपत्वादुपमानंफुल्लविशेषणं अनुपसर्गा
त्फुल्लक्षीवकृशोल्लाघा इति निष्ठानकारस्यलत्वंनिपात्यः सर्जकासनबंधूकपुष्पप्रियकजीवका इत्यमरः। शरैः
पूरितानिवक्त्ररंध्राणियेषांतान्व्याघ्रान्शिक्षाविशेषेण अभ्यासातिशयेनलघुहस्तत्वात्क्षिप्रहस्ततयानिमे
षेण चकारतूणीपूरितानित्यर्थः॥७०॥ निर्घातेति। कुंजेषुलीनान् कुंजनिकुंजौवल्लीवेल्लतादिपिहितोदरइत्य

व्याघ्रानभीरभिमुखोत्पतितान्गुहाभ्यःफुल्लासनाग्रविटपानिववायुरुग्णान्॥ शिक्षाविशे
षलघुहस्ततयानिमेषात्तूणीचकारशरपूरितवक्त्ररंध्रान्॥७०॥ निर्घातोग्रैःकुंजलीनान्जि
घांसुर्ज्यानिर्घोषैःक्षोभयामाससिंहान्॥ नूनंतेषामभ्यसूयापरोऽभूद्वीर्योदग्रेराजशब्देमृगाणां
॥७१॥

मरः। सिंहान्जिघांसुर्हंतुमिच्छुः निर्घातोव्योत्थितओत्पातिःशब्दविशेषः तद्वदुग्रैर्ज्यानिर्घोषैरुग्रैःशब्दैःक्षो
भयामासअत्रोत्प्रेक्षते तेषांसिंहानांसंबंधिनिवीर्येणोदग्रेउन्नतेमृगेषुविषयेयोराजशब्दस्तस्मिन्नभ्यसूया
परःअभूत् नूनंअन्यथाकथमेतानन्विहन्यादित्यर्थः मृगाणामितिपाठेसमासेगुणभूतत्वात्राजशब्देनसंबं
धोदुर्घटः शालिनीवृत्तमेतत्॥७१॥ ॥५॥ ॥५ ॥५॥ ॥५॥ ॥५॥

तानिति। काकुत्स्थो दशरथः गजकुलेषु बद्धतीव्रवैरं येषां तान् कुटिलेषु लग्नामुक्ता गजकुंभमौक्तिकानि येषां तान् नृसिं स॰ ९
हान् हत्वा आत्मानं रणेषु कृतकर्मणां कृतोपकाराणां गजानां आनृण्यं अनृणत्वं मार्गणैः शरैः मार्गणो याच्ञके श
रे इति विश्वः गतं प्राप्तमिवामंस्त मेने॥ ७२॥ चमरानिति। क्वचिच्चमरान् परितः अभितः परित इत्यादिना द्वितीया
प्रवर्तिताश्वः आकर्णविकृष्टान् भल्लान् रघुविशेषान् वर्षतीति स तथोक्तः स नृपो नृपतीनिव तान् चम
रान् सितवालव्यजनैः अस्त्रचामरैः वियोज्य विहृत्य सद्यः शांतिं जगाम श्रूराणां परकीयमैश्वर्यमेवासह्यं न

तान्हत्वा गजकुलबद्धतीव्रवैरान् काकुत्स्थः कुटिलनखाग्रलग्नमुक्तान्॥ आत्मानं रणकृ
तकर्मणां गजानामानृण्यं गतमिव मार्गणैरमंस्त॥ ७२॥ चमरान्परितो प्रवर्तिताश्वः
क्वचिदाकर्णविकृष्टभल्लवर्षी। नृपतीनिव तान्वियोज्य सद्यः सितवालव्यजनैर्जगाम शां
तिं॥ ७३॥ अपि तुरगसमीपादुत्पतंतं मयूरं न स रुचिरकलापं बाणलक्षीचकार॥ सपदि
गतमनस्कश्चित्रमाल्यानुकीर्णे रतिविगलितबंधे केशपाशे प्रियायाः॥ ७४॥ ॥

नु जीवितमिति भावः औपछंदसिकं वृत्तं॥ ७३॥ अपीति। स नृपः तुरगसमीपादुत्पतंतमपि सुमहारमपीत्यर्थः। रुचि
रकलापं भास्करवर्हं मदनां मतिरोतीति मयूरो बर्हीष्टे पोदरादित्वात् साधुः। तच्चित्रेण माल्येनानुकीर्णे रत्यां विगलित 34
बंधे प्रियायाः केशपाशे सपदि गतमनस्कः प्रवृत्तचित्तः उरःप्रभृतिभ्यः कविति कप्प्रत्ययः न बाणलक्ष्मीचकार
प्रजहारेत्यर्थः॥ ७४॥ ॥ ९॥ ॥ ९॥ ॥ ९॥ ॥ ९ ॥ ९॥ ॥ ९ ॥

277
19107

तस्येति। कर्कशविहारादतिव्यायामात् संभवो यस्य तमाननेविलग्नजालकं बद्धकदंबकं तस्य नपस्य स्वेदं तुषारशी
तलः शिशिराम्बुकणसहितः भिन्नाः निर्दलिताः पल्लवानां पुटाः शोकाः येन स वनानिलः आचचाम जहारेत्यर्थः। रथो
द्धतावृत्तमिति॥ ७५॥ इतीति। इत्यात्मनो विस्मृतमन्यत् करणीयं कार्यं येन तं विस्मृतान्यकार्यं तिरमित्यर्थः। सचि
वैरवलंबिता धृता धूर्यस्य तं ऋक्पूरब्धूरित्यप्रत्ययः समासांतः अनुबंधसेवया परिवृद्धो रागो यस्य तं नराधिपं मृ

तस्य कर्कशविहारसंभवं स्वेदमाननविलग्नजालकं॥ आचचाम सतुषारशीकरो भिन्नपल्लव
पुटो वनानिलः॥ ७५॥ इति विस्मृतान्यकरणीयमात्मनः सचिवावलंबितधुरं नराधिपं॥ प
रिवृद्धरागमनुबद्धसेवया मृगया जहार चतुरेव कामिनी॥ ७६॥ स ललितकुसुमप्रवालश
य्यां ज्वलितमहौषधिदीपिकासनाथां॥ नरपतिरतिवाहयां बभूव क्वचिदसमेतपरिच्छदस्त्रि
यामां॥ ७७॥ ॥

यं ते यस्यां मृगा इति मृगया परिचर्या मृगयादीनामुपसंख्यानमिति शप्रत्ययांतो निपातः चतुरा विदग्धा कामिनी
जहार आचकर्ष न जातु भकामः कानामुपभोगेन शाम्यतीति भावः सुमंगली वृत्तं॥ ७६॥ सइति। स नृपतिः ल
लितानि कुसुमानि पल्लवानि शय्या यस्यां तां ज्वलिताभिः महौषधीभिरेव दीपिकाभिः सनाथां नित्यदीपामित्यर्थः।
त्रियामां रात्रिं क्वचिदसमेतपरिच्छदः परित्यक्तपरिजनः सन्नित्यर्थः॥ अतिवाहयां बभूव गमयामास पुष्पिता
ग्रा वृत्तं॥ ७७॥ ॥ ९ ॥ ९ ॥ ॥ ९॥ ॥ ९॥ ॥ ९॥ ॥ ९ ॥ ॥ ९॥

उषसीति। उषसिप्रातः पटूनांपटवाहूनामिवध्वनिर्येषांतैर्जगयूथानां कर्णैरेवतालैर्वाद्यभेदैर्विनीतनिद्रः विगतनि
द्रः सन्नृपः तत्रवनेमधुराणिविहंगानांकूजितान्येववंदीनांगेरोलगीतनिशृएवअरमत॥७८॥ अथेति। अथजातु
कदाचित्नृरोर्मृगस्यगृहीतवर्त्मास्वीकृततरुनुमृगः विपिनेवनेपश्वाच्चरैरलक्ष्यमाणःकुरंगवेगादित्यर्थः श्रमेण
फेनमुचासकेनास्विद्यतेत्यर्थः तुरंगमेणतपस्विभिर्गाढंभवगाढंसेवितांनाममदींसरितंप्राप॥७९॥ कुंभेति। ततः

उषसिचगजयूथकर्णतालैःपटुपटहध्वनिभिर्विनीतनिद्रः॥ अरमतमधुराणि
तत्रशृएवनृविहगविकूजितवंदिमंगलानि॥७८॥ अथजातुरुरोर्गृहीतव
र्त्माविपिनेपार्श्वचरैरलक्ष्यमाणः॥ श्रमफेनमुचातपस्विगाढांतमसांप्रापन
दींतुरंगमेण॥७९॥ कुंभपूरणभवःपटुरुच्चैरुच्चचारनिनदोंभसितस्याः॥
तत्रसद्विरदबृंहितशंकीतवृपातिनमिषुंविससर्ज॥८०॥ ॥ ॥ ॥

तस्याःतमसायाः अंभसिकुंभकर्णनिभवउत्पन्नःपचाद्यच्पटुर्मधुरःउच्चैर्गंभीरःनिनदोध्वनिरुच्चचारउदीयाय
तत्रनिनदेसन्नृपःद्विरदबृं हितशंकितेइतिद्विरदबृंहितशंकिसन्शब्देनशब्दानुसारेणपततीतिशब्दपाती
नमिषुंविससर्ज॥ स्वागतावृत्तं॥८०॥ ॥ ५ ॥ ॥५॥ ॥५॥ ॥५॥ ।

279
1947

नृपतेतिरि। तत्कर्मनृपतेःक्षत्रियस्यप्रतिषिद्धमेवयदेतत्कर्मगजवधरूपंपक्तिरथोदशरथोविलंघ्यलक्ष्मी
कामोयुद्धादन्यत्रकरिवधंनकुर्यादितिशास्त्रमुल्लंघ्यकृतवान् ननुविदुषश्चतस्यकथंइदृग्विधंचेतमित्याश
क्याहः अपथइति। श्रुतवंतोपिविद्वांसोपिरजनिमीलिताःरजोगुणहताःसंतानपंथाइत्यर्थंपथोविभाषेतिवास
मासांतःअपथंनपुंसकमितिनपुंसकं। अपंथास्त्वपथंतुल्यमित्यमरःतस्मिन्नर्थेमार्गेपिदंअर्पयंतिनिक्षिपंति

नृपतेः प्रतिनिषिद्धमेवयत्कृतवान्पंक्तिरथोविलंघ्यतत्॥ अपथेपद
मर्पयंतिहिश्रुतवंतोपिरजोनिमीलिताः॥८१॥ हातातेतिक्रंदितमाक
र्ण्यविषण्णस्तस्यान्विष्यन्वेतसगूढंप्रभवंसः॥ शल्यप्रोतंप्रेक्ष्यसकुंभं
मुनिपुत्रंतापादंतःशल्यरवासीत्क्षितिपोपि॥८२॥ ॥ ॥

हिप्रवर्त्तंतइत्यर्थः वैतालीयंवृत्तं॥८१॥ हातातेति। देत्यत्तौ। तातोजनकः हाविषादरुगर्त्तिषुतातस्तुजनकःपि
तेत्यमरः। हातातेतिक्रंदितंक्रोशनमाकर्ण्यविषण्णोभग्नोत्साहः सन्तस्यक्रंदितस्यवेतसैर्गूढंबलंप्रभवत्यस्मा
दितिप्रभवकारणंतमन्विष्यन्शल्येनशरेणप्रोतंस्यूतंशल्यंत्रीकीशरेवंशेइत्तिविश्वः सकुंभमुनिपुत्रंप्रेक्ष्यस
क्षितिपोपितापात्दुःखादंशल्यंयस्यसांतःशल्यइवासीत्। मत्तमयूरंवृत्तं॥८२॥ ॥ ॥ ॥ ।

र-वृ-टी-
१६

तेनेति। प्रथितान्वयेन प्रख्यातवंशेन येतेन पापभीरुत्वं सूचितं। तेन राज्ञा तुरगादवतीर्य पृष्टान्वयः ब्रह्महत्याशंकया पृष्टकुलः जलकुंभे निषण्णदेहः स मुनिपुत्रः तस्मै राज्ञे स्खलद्भिरक्षरप्रायैः अक्षरपदैः अशक्तिवशाद्दुरुच्चारितैरित्यर्थः आत्मानं द्विजेतरश्चासौ तपस्वी सुतश्च तं कथयां बभूव। न तावत् त्रैवर्णिक एवाहमस्मि किंतु करणः वैश्यतु करणः शूद्र्यामिति याज्ञवल्क्यः कुतो ब्रह्महत्येत्यर्थः तथा च रामायणे। ब्रह्महत्याकृतं पापं हृदयादपि नीयतां। न द्विजातिरहं जन्मा मा भूत्ते मनसो व्यथा। शूद्रायामस्मि वैश्येन जातो जनपदाधिपेति॥ ८३॥ तदिति। तच्चोदितः तेन पुत्रेण चोदितः पितृसमीपं प्रापयेत्युक्तः स नृपतिः अनुद्धृतशल्यं अनुत्पाटितशरमेव तं मुनिपुत्रं अवसन्नदृशोः

तेनावतीर्य तुरगात्प्रथितान्वयेन पृष्टान्वयः स जलकुंभनिषण्णदेहः॥ तस्मै द्विजेतरतपस्विसुतं स्खलद्भिरात्मानमक्षरपदैः कथयां बभूव॥ ८३॥ तच्चोदितश्च तमनुद्धृतशल्यमेव पित्रोः सकाशमवसन्नदृशोर्निनाय॥ ताभ्यां तथागतमुपेत्य तमेकपुत्रमज्ञानतः स्वचरितं नृपतिः शशंस॥ ८४॥ ॥ ॥ ॥ ॥ ॥

नष्टचक्षुषोरंधयोरित्यर्थः। पित्रोर्मातापित्रोः पिता मात्रेत्येकशेषः सकाशं समीपं निनाय तत्र नदीतीरे एवं मृतपुत्रं पित्रोरानयनाभिधानात्। तथागतं वेतसविद्धं एकश्चासौ पुत्रश्च तमेकपुत्रं एकग्रहणं पित्रोरनन्यगतिकत्वसूचनार्थं तं मुनिपुत्रं उपेत्य सन्निकृष्य अज्ञानतः करिभ्रांत्या स्वचरितं स्वकृतं ताभ्यां पितृभ्यां क्रियायोग्रहणाच्चतुर्थी शशंस कथितवान्॥ ८४॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स९

३६

281
1947

ताविति। तौ जाया च पतिश्च दंपती राजदंतादिषु च जायाशब्दस्य दंभावो जंभावश्च विकल्पेन निपातितः दंपती जंपती जायापती समस्त इत्यमरः। बहु विकल्प भूयिष्ठं परिदेव्य शिशोः उरस्तः वक्षसः पंचम्यास्तसिल् निखातं शल्यं शरं प्रहर्त्रा राज्ञा उदहारयतां उद्धारयामासतुः स शिशुः परासुः। अथ वृद्धो हस्तअर्पितैर्नयनवारिभिरेव शापदानस्य पूर्वजनकृत्वात्तैरेव भूपतिं शशाप॥ ८५॥ दिष्टांतमिति। हे राजन् भवानप्यंते वयसि अहमिव पुत्रशोकाद्दिष्टांतो कालावसानं मरणमित्यर्थः दिष्टं काले च दैवे स्यादिष्टमिति विश्वः। आप्स्यतीत्युक्तवंतं आक्रांतः पदाहतपूर्वमित्या

तौ दंपती बहु विलप्य शिशोः प्रहर्त्रा शल्यं निखातमुदहारयतामुरस्तः॥ सोऽभूत्परासुरथ भूमिपतिं शशाप हस्तार्पितैर्नयनवारिभिरेव वृद्धः॥ ८५॥ दिष्टांतमाप्स्यति भवानपि पुत्रशोकादंते वयस्यहमिवेति तमुक्तवंतं॥ आक्रांतपूर्वमिव मुक्तविषं भुजंगं प्रोवाच कोशलपतिः प्रथमापराधः॥ ८६॥ शापोऽप्यदृष्टतनयाननपद्मशोभे सानुग्रहो भगवता मयि पातितेयं॥

क्रांतपूर्वः सुप्सुपेति समासः। तं प्रथमं मकृतमित्यर्थः। मुक्तविषं अपकारिणं पश्चादुत्सृष्टविषं भुजंगमिव स्थितं स्वकृतप्रथमापराधः प्रथमापराधाकर्त्तरि क्तः इदं च सहनेकारणमुक्तं शापदानात् पश्चादपराधी कोशलपतिर्दशरथः प्रोवाच॥ ८६॥ शापोपीति। अदृष्टतनयाननपद्मशोभायेन तस्मिन्नपुत्रके मयि भगवता पातिता वज्रप्रायत्वात् पातित इत्युक्तं। अयं पुत्रशोकान्म्रियस्वेत्येवंरूपः शापोऽपि मम अनुग्रहः वृद्धकुमारवत्सायेन इष्टावाप्तिनांतकयत्वात् सोपकार एव निग्राहकस्याप्यनुग्राहकत्वमर्थांतरंन्यासेन्याह॥ ॥ ॥ ॥

कृष्यामिति। इंधनैः काष्ठैः इद्धः प्रज्वलितो ज्वलनोऽग्निः कृष्यकृषणार्हां कृषुपथाश्चाक्रषि राज्जिरिति कृष्णां क्षितिंद सं॰
दहन्नपि बीजप्रोहाणां तदंकुराणां जननीं उत्पादनक्षमां करोति॥ ८७॥ इत्थामिति। इत्थं गते ईदृग्विते सति वसुधाधि
पतेन ज्ञानागतघृणोऽनिः करुणोऽहं तत्त्वाहत एवेति न वबध्यो वधार्हः अयंजनः अथमिति राज्ञोनिर्वेदात् स्वादरे स्वाल
न्निर्दिशः किं विधातामित्या द्यभिहिते मया विधेयमिति विज्ञप्त इत्यर्थः समुनिः सदारः सभार्य परासुं पुत्रं मनुगं
तुं मनोयस्य सोऽनुगंतुमनाः तुं काममनसारपीति मकारलोपः हुताशेन वतः सान्नी नेधान् काष्ठानि ययाचे। नचा

कृष्यां दहन्नपि खलु क्षितिमिंधनेद्धो बीजप्ररोहजननीं ज्वलनः करोति॥८७॥ इत्थाग
ते गतघृणः किमयं विधत्तां वध्यस्तवेत्यभिहितो वसुधाधिपेन। एधान्हुताशनव
तः मुनिर्ययाचे पुत्रं परासुमनुगंतुमनाः सदारः॥८८॥ प्राप्तानुगः सपदि शासन
पस्य राजा संपाद्य पातकविलुप्तधृतिर्निवृत्तः। अंतर्निविष्टपदमात्मविनाशहेतुं
शापं दधज्ज्वलनमौर्वमिवांबुराशिः॥८९॥ इति श्रीरघुवंशे मृगयावर्णने नवमः सर्गः॥९॥

त्रात्मघाते दोषः। अनुष्टानासमर्थस्य वानप्रस्थस्य जीवनः भृग्वग्निजलसंपातैर्मरणं प्रतिधीयते इति वचना
त्॥ ८८॥ प्राप्तेति। प्राप्तानुगो राजा सपद्यस्य मुनेः शासनं काष्ठसंभरणरूपं माग्गे कोऽपि प्राप्तानुगत्वा सं
पाद्य मुनिवधनिमित्तेन विलुप्तधृतिः नष्टोत्साहः सन् अंतर्निविष्टपदं लब्धस्थानमात्मविनाशहेतुं
शापं अंबुराशिरौर्वं ज्वलनं वडवानलमिव और्वस्तु वडवानल इत्यमरः॥ दधत्सन्निवृत्तः॥ ८९॥ ॥ ॥
इति रघुवंशमहाकाव्यसंजीवनीटीकायां नवमः सर्गः॥ ९॥ ॥ ॥ ॥ ॥ ॥

281-A
1971

र·स्तू·टी·
३८

स१

३८

283
1947

र.मू.टी. १ श्री॥ ॥आशास्ये नित्यमानंदं परं रामकथामृतं॥ श्रावः पुलकितं येषं पाद्यं पद्यं प्रमोदितुं॥१॥ पृथ्वीमि स१०
ति। पृथ्वीं शासतः पालयतः पाकशासनतेजसः इंद्रवर्चसः अनूनर्द्धेर्महासमृद्धेस्तस्य दशरथस्य किंचिदून
मीषन्न्यूनं शरदां संवत्सराणां अयुतं दशसहस्रं ययौ। एकं च दश चैव सहस्रं अयुतं तेन तथा। प्रयुतं कोट्यर्बुदं स्थ
नात्स्थानं दशगुणं स्यात् इत्यार्यभट्टः इदं च मुनिशापान्वितपरवेदित्वं नतु जननात्। षष्टिर्वर्षसहस्राणि
जातस्य मम कौशिकः। दुःखेनोत्पादितश्चायं न रामं नेतुमर्हसीति रामायणविरोधात् नाप्यभियेकात्परं सम्य

पृथिवीं शासतस्तस्य पाकशासनतेजसः॥ किंचिदूनमनूनर्द्धेः
शरदामयुतं ययौ॥१॥ न चोपलेभे पूर्वेषामृणनिर्मोक्षसाधनं॥
सुताभिधानं स ज्योतिः सद्यः शोकतमोपहं॥२॥ ॥ ॥

ग्विनीतमथवर्मदरं कुमारमात्मरक्षणविधौ विधिवत्प्रजानमिकौमारानुष्ठितत्वाभिधानात्स एव विरोध इति
स्यादतो वत्सरे शरदित्यमरः॥१॥ न चेति। स दशरथः पूर्वेषां पितॄणां ऋणनिर्मोक्षसाधनं एष वा अनृणो यः
पुत्रीति श्रुतिः। पितॄणामृणविमुक्तकारणं सद्यः शोक एव तमः तदपहंतीति शोकतमोपहं अत्राभयंकार १
इति बहुपदिपितर्दंतविधिमाश्रित्य जपक्लेशतमसो रिति डप्रत्ययः। सुताभिधानं सुताख्यं ज्योतिर्नोपलेभे इ
ति न प्राप च॥२॥

285
1947

अतिष्टदिति। प्रत्ययं हेतुमपेक्षत इति प्रत्ययापेक्षा संततिर्यस्य स तथोक्तः। प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुरित्य
मरः सन्नृपो मंथात्। प्राक् मंथात् पूर्वं अनभिव्यक्ताद्रत्नाद्रत्नोत्पत्तिर्यस्य सोऽर्णव इति चिरमतिष्ठत् सामग्र्यभावा
त् विलंबो न तु प्रबंधादिति भावः॥२॥ ऋष्यशृंगेति। ऋष्यस्य मृगभेदस्य शृंगमिव शृंगं यस्य स ऋष्यशृंगादयः।
ऋष्यशृंगो नाम कश्चिदृषिस्तदादयः जितात्मानः वशीकृतांतःसंतः ऋतुं तौचा जयतीति चाऋत्विजः याज्ञिकाः
ऋत्विक् दधृक् इत्यादिना क्विप्प्रत्ययांतो निपातः संतानकांक्षिणः पुत्रार्थिनस्तस्य दशरथस्य पुत्रीयां पुत्रनिमि

अतिष्ठत्प्रत्ययापेक्षसंततिः स चिरं नृपः॥ प्राङ्मंथादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः॥३॥
मनोर्वंशाश्चिरस्तस्मिन्ननभिव्यक्तसंततिः॥ भिमज्यपुनरुत्था स्यन्दः शोण इवाभवत्॥४॥
क्षेपोयं॥ ऋष्यशृंगादयस्तस्य संतः संतानकांक्षिणः॥ आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः॥५॥

त्तां पुत्रात् छ चेति छ प्रत्ययः। इष्टिं यागमारेभिरे॥५॥ तस्मिन्निति तस्मिन्नवसरे पुत्रेष्टिप्रवृत्तिसमये देशः पुलस्त्यस्य
गोत्रापत्यं पुमान् पौलस्त्यो रावणः तेन उपप्लुताः पीडिताः संतो निदाघार्त्ताः आध्वानं गच्छंतीति अध्वगाः पंथा
अंतात्यंताध्वदूरपारमवानितेषु इति उप्रत्ययः। छायाप्रधानं वृक्षं छाया वृक्षमिव शाकपार्थिवादित्वात् समा
सः हरिवि — अभिजग्मुः॥६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तेइति। तेदयाश्चोदन्वंतं समुद्रं उदन्वानुदधौ चेति निपातः। प्रापुः। आदिपुरुषो विष्णुश्च बुबुधे योगनिद्रां विजहावित्यर्थः। गमनप्राप्तिबोधयोरविलंबाश्चौ चकारौ। तथाहि। अव्याक्षेपः गमनस्याव्यासंगः अविलंब इति पाठे तु भविष्यंत्याः कार्यसिद्धेर्लक्षणं लिंगं हि॥ ७॥ उक्तं हि। अनन्यपरता वास्य कार्यसिद्धेस्तु लक्षणमिति॥ ६॥ भोगीति। धौरोको येषां ते दिवौकसः देवाः। पृषोदरादित्वात्साधुः। भोगिनः शेषस्य भोगः शरीरं भोगः सुखे स्त्र्यादिभृतावहेश्च फलकाययोरित्यमरः। एव वासनं सिंहासनं तत्रासीनं उपविष्टं आसेः शानच् ईदासइ तीकारादेशः त

तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिं॥ अभिजग्मुर्निदाघार्ताः छायावृक्षमिवाध्वगाः॥ ६॥
ते च प्रापुरुदन्वंतं बुबुधे चादिपूरुषः॥ अव्याक्षेपो भविष्यंत्याः कार्यसिद्धेर्हि लक्षणं॥ ७॥
भोगिभोगासनासीनं ददृशुस्तं दिवौकसः॥ तत्फणामंडलोदर्चिर्मणिद्योतितविग्रहं॥ ८॥
श्रियः पद्मनिषण्णायाः क्षौमांतरितमेखले॥ अंके निक्षिप्तचरणमास्तीर्णकरपल्लवे॥ ९॥

स्य भोगिनाः फणामंडलेये ऽर्चिषः उज्ज्वला मणयः तैर्द्योतितविग्रहं तं विष्णुं ददृशुः॥ ७॥ श्रिय इति। सत्तानिः संविशेनष्टि। कीदृशं विष्णुं पद्मोनिषण्णायाः उपविष्टायाः श्रियः क्षौमांतरिता दुकूलव्यवहिता मेखला यस्य तस्मिन्नास्तीर्णौ करपल्लवौ पाणिपल्लवौ यस्मिन् तस्मिन्विशेषणद्वयेनापि चरणयोः सौकुमार्यान्नूकठिनमेखलास्पर्शासहत्वं सूच्यते तस्मिन्नंके निक्षिप्तचरणं॥ ८॥ ९॥ ॥ ॥ ॥ ॥ ॥ ॥ २

287
1947

प्रबुद्धेति। पुनः कीदृशं प्रबुद्धं विकसितं यत्पुंडरीकं तद्वदक्षिणी यस्य तं दवसे — पुंडरीकमे वाक्षिय स्येति विग्रहः॥ बालातपेन निभं सदृशं अंशुकं यस्य तं पीतांबरधरमित्यर्थः। अन्यत्र बालातपव्याप्तांशुकमित्यर्थः निभो व्याजसदृशयोरित्यमरः। प्रारंभः प्रकृष्टो योगाः योगिनः तेषां सुदर्शनं सुलभदर्शनं। अनत्र प्रारंभे आदौ सुरदर्शनं शारदं शारसंबंधिनं दिवसमिव स्थितं॥ १०॥ प्रभेति। पुनः किंविधं प्रभया अनुलिप्तमनुरंजितं। श्रीवत्सं नामलांछनं येन तं। लक्ष्म्या विभ्रमदर्पणं विलासादर्शं कुत्र्थ्वीं स्तभ्नाति। व्याप्नोतीति कुस्तुभोब्धिः तत्र भवः कौस्तुभः

प्रबुद्धपुंडरीकाक्षं बालातपनिभांशुकं॥ दिवसं शारदमिव प्रारंभसुखदर्शनं॥ १०॥
प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणं॥ कौस्तुभाख्यमपां सारं बिभ्रतं बृहतोरसा॥ ११॥
बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः॥ आविर्भूतमपां मध्ये पारिजातमिवापरं॥ १२॥
दैत्यस्त्रीगंडलेखानां मदरागविलोपिभिः॥ हेतिभिश्चेतनावद्भिरुदीरितजयस्वनं॥ १३॥

आख्या यस्य तं। अपां समुद्राणां सारं स्थिरांशं अग्र्यमणिमित्यर्थः। बृहता उरसा बिभ्राणं॥ ११॥ बाहुभिरिति। विटपाकारैः शाखाकारैः दिव्याभरणभूषितैः बहुभिः उपलक्षितं अत एवापां सैंधवीनां मध्ये आविर्भूतं पारिजातं अपरं द्वितीयपारिजातमिव स्थितं॥ १२॥ दैत्यस्त्रीगंडलेखानां असुरांगनागंडस्थलीनां यो मदरागस्तं विलुंपंति हरंतीति इति मदरागविलोपिनः तैश्चेतनावद्भिः सजीवैर्हेतिभिः सुदर्शनादिभिः हेतिः शस्त्रे चिरस्थायिरितिविश्वः। उदीरितजयस्वनं जयशब्दं उद्घोषयंतीभिः सूर्तिमतीभिः शस्त्रदेवताभिः उपस्यमानमित्यर्थः॥ १३॥ ॥
= केशवः =

मुक्तेति। मुक्तः भृगवसंनिधानात्त्यक्तः शेषेण अहीश्वरेण सहविरोधः सहजामपिवैरं येन तेन कुलिशव्रणाअ
मृताहरण काले इंद्रमुक्तवज्रप्रहाराः त एवलक्ष्माणियस्यसतेनप्रबद्धः अंजलिर्येन तेनप्रांजलिनाइत्यर्थः
विनातेनानुद्धतेनगरुत्मताउपस्थितमुपासितं। पुराकिलतेनविष्णुनामातरिप्रार्थितेनदुहितुर्गुणकेश्याः पत्युः क
स्यचित्सर्पस्यगरुडाद्भयप्रदानेकृतेस्वविपक्षरक्षणक्षुभितपक्षिराजेनत्वद्दासोऽहं त्वत्तो बलाधिकइतिगर्वितस्ववामतज
नीभारेणैवभग्नः स भगवान्विनितायेतिमहाभारतीकथस्त्रचयतिविनीतेनेत्यनेन।।१४।। योगेति। योगएवमनसोवि
षयांतरव्यावृत्तिसाम्यान्निद्रा तस्या अंते अवसाने विशदैः प्रसन्नैः पावनैः शोधकैः अवलोकनैः सुखशयनैः पृ

मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा।। उपस्थितं प्रांजलिना विनीतेन गरुत्मता।।१४।।
योगनिद्रांतविशदैः पावनैरवलोकनैः।। भृग्वादीननुगृह्णंतं सौखशायनिकानृषीन्।।१५।।
प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषां।। अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरं।।१६।।
नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते।। अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने।।१७।।

तीतिसुखशायनिकास्तान्। पृच्छतौसुस्नातादिभ्य उपसंख्यानमितिठक्। भृग्वादीनृषीननुगृह्णंतं।।१५।। प्रणिपत्येति
अथदर्शनानंतरं सुराः सुरद्विषां असुराणां शमयित्रे विनाशकाय तस्मै विष्णवे प्रणिपत्य स्तुत्यं स्तोत्रार्हं।। एतिस्तु
शास्वादृजुषः क्यबितिक्यप्प्रत्ययः वाक्चमनश्च वाङ्मनसे अचतुरेत्यादिना अच्प्रत्ययांतोनिपातः। तयोर्गोचरो
विषयोभवतीत्यवाङ्मनसगोचरस्तं एनं विष्णुं तुष्टुवुः अस्तुवन्।।१६।। नमइति। पूर्वमादौ विश्वसृजे विश्वस्रष्ट्रे तद
नुसर्गानंतरं विश्वं बिभ्रते पुष्णते अथ विश्वस्य संहर्त्रे एवं त्रेधा सृष्टिस्थितिसंहारकर्तृत्वेन स्थित आत्मा स्वरूपं य
स्य तस्मै ब्रह्मविष्णुहरात्मने तुभ्यं नमः।।१७।। ।।५।। ।।५।। ।।५।। ।।५।। ।।५।। ३

284
1947

ननु कूटस्थस्य कथं त्रैरूप्यमित्याशंक्योपाधिकमित्याह रसांतराणीति। एकरसं मधुरैकरसं दिविभवं दिव्यं पयो वर्षो
दकं देशे देशे अन्यान् रसान्तरसांतरादीनि अश्नुते प्राप्नोति। एवमविक्रियो निर्विकारः एकइत्यर्थः। उपाधितः नानावस्था प्र
तिपद्यसे। तस्मात्ते नानात्वं। रज्यतेऽनेनेति रागः रागद्रव्यं जपाकुसुमादि तद्योगात्स्फटिकस्येव प्रक्षिप्तमेतदुपमाना
र्थम्।।१८।। अमेयमिति। हेदेव त्वममेयः लोकैरियत्तयानपरिच्छेद्यः अनर्थो निःस्पृहः आह्वतीत्यर्थहः पचाद्यच्। प्रा
र्थनामावहः कामदः अजितः अन्यैर्नजितः अव्यक्तः अव्यक्तः सूक्ष्मरूपः व्यक्तस्य स्थूलस्य कारणं।।१९।। हृदयेति। हे
व त्वां हृदयस्थं सर्वांतर्यामित्वात् नित्यसंनिहितं तथाप्यनासन्नं अगम्यरूपत्वाद्दिप्रकृष्टं च विदुः स निरूप स्यापि विर

रसांतराण्येकरसं यथा दिव्यं पयोऽश्नुते।। देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः।।१८।।
एकः कारणतस्तां तामवस्थां प्रतिपद्यसे।। नानात्वं रागसंयोगात्स्फटिकस्येव ते स्मृतं।।१९।।
अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः।। अजितो जिष्णुरत्यंतमव्यक्तो व्यक्तकारणं।।२०।।
हृदयस्थमनासन्नमकामं त्वां तपस्विनं।। दयालुमदयास्पृष्टं पुराणमजरं विदुः।।२१।।

क्तत्वमितिविरोधः। अकामं नित्यपरिपूर्णत्वात्निःकामं। तथापि तपस्विनं लोकयात्रार्थं तापसं विदुः। तद्रूकंगीतासु नान
वाप्तमवाप्तव्यं वर्त एव च कर्मणीति। किंच। यद्यप्यनित्यो स्तप एवेतिविरोधः दयालुं परदुःखप्रहरणे कृतं तथाप्यनघ स्
स्पृष्टं नित्यानंदरूपत्वाददुःखिनं विदुः। अघदुरितदुःखयोरितिविश्वः। दयालुरदुःखी चेतिविरोधः पुराणत्वस
दुष्टकोपनोनित्यशंकितः परभाग्योपजीवी च षडेते नित्यदुःखिताइति महाभारते पुराणं अनादिं अजरं निर्विका
रत्वाद्वृद्धं विदुः। चिरंतनं न जर्यतीतिविभालंकारः उक्तं च आभासत्वे विरोधस्य विरोधलिक्तिमत्ततिविरोधो
न चालौकिकमहिमत्वं व्यज्यते।।२०।।२१।। ।। ।। ।। ।। ।। ।। ।। ।।

र॰ मू॰ टी॰
४

सर्वज्ञ इति। त्वं सर्वज्ञः इगुपधज्ञाप्रीकिरः क इति कः प्रत्ययः। अविज्ञातः नेकेनापिज्ञात इत्यर्थः। त्वं सर्वस्य योनिः स १०
कारणं त्वं आत्मन एव भवतीत्यात्मभूः न ते किंचित्करणमस्तीत्यर्थः। त्वं सर्वस्य प्रभुः नियामकस्त्वमनीशस्त्वमेकः सर्व
रूपभाक्। त्वमेक एव सर्वात्मना वर्तस इत्यर्थः॥२२॥ सप्तेति। हे देव त्वा सप्तभिः सामभिः रथंतरादिभिर्मुखैः उपगीतं। त
द्धितोत्तरपदस्थानाउत्तरपद समासः। सप्तानामर्णवानां जलं सप्तार्णवजलं पूर्ववत्समासः तत्र शेते यस्तं सप्तार्णव
जलेशयं शय वासवासिष्वकालादिति लुक्। सप्तार्चिरग्निः मुखं यस्य तं। अग्निर्मुखं वै देवा इति श्रुतेः। सप्तानां लोकानां

सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः॥ सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक्॥२२॥
सप्तसामोपगीतं त्वां सप्तार्णवजलेशयं॥ सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयं॥२३॥
चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः॥ चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात्॥२४॥
अभ्यासनिगृहीतेन मनसा हृदयाश्रयं॥ ज्योतिर्मयं विचिन्वंति योगिनस्त्वां विमुक्तये॥ ॥२५॥

भूर्भुवः स्वरादीनां एकं संश्रयं। पूर्ववत्समासः एवंभूतमाचख्युः॥२३॥ चतुरिति। चतुर्णां धर्मार्थकाममोक्षाणां वर्गः त्रि
वर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैरित्यमरः। तत्फलं च तज्ज्ञानं चत्वारि युगानि कृतत्रेतादीनि यस्यां सा चतु
र्युगा च चनेन मयट् तद्धितार्थेत्यादिना तद्धितार्थविषये तत्पुरुषसमासः। स लोकः इत्येवं रूपं चतुर्मुखा चतुर्मुखरू
पिणः त्वत्तः जात इति शेषः इदं सर्वमसृजत यदिदं किंचेति श्रुतेः॥२४॥ अभ्यासेति। अभ्यासेन निगृहीतं वि
षयांतरेभ्यो निवर्तितं तेन मनसा योगिनो हृदयाश्रयं हृत्पद्मस्थं ज्योतिर्मयं त्वां विमुक्तये मोक्षार्थं विचिन्वंति ४
अन्विष्यंति ध्यायंतीत्यर्थः॥ २५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

2-91
1947

अजस्येति। न जायत इत्यजः। अन्येष्वपि दृश्यत इति डप्रत्ययः तस्याजन्मनः अन्यस्यापि जन्मग्रहणं हतः। मत्स्यादिरूपेण
जायमानस्य। निरीहस्य निःस्पृहस्यापि हतद्विषः शत्रुघ्नहंतवत इत्यर्थः जागरूकस्य सर्वसाक्षितया नित्य
प्रबुद्धस्यापि स्वपतः योगनिद्रामनुभवतः। इत्थं विरुद्धचेष्टस्यापि तव याथात्म्यं को वेदेति॥२६॥ शब्देति। किं
चित्कृष्णादिरूपेण शब्दादीन् विषयान् भोक्तुं नरनारायणादिरूपेण दुश्चरं तपः चरितुं तथा दैत्यमर्दनेन प्रजाः
पातुमौदासीन्येन तटस्थेन वर्तितुं पर्याप्तः समर्थोसि। भोगतपसोः पालनौदासीन्ययोश्च परस्परविरुद्धयो
राचरणात्त्वदन्यः कः समर्थ इत्यर्थः॥२७॥ बहुधेति। आगमैः त्रयीसांख्यादिभिर्दर्शनैर्भिन्नापि सिद्धिहेतवः।

अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः॥ स्वपतो जागरूकस्य याथात्म्यं वेद कस्तव॥२६॥
शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः॥ पर्याप्तोसि प्रजाः पातुमौदासीन्येन वर्तितुं॥२७॥
बहुधाप्यागमैर्भिन्नाः पंथानः सिद्धिहेतवः॥ त्वय्येव निपतंत्योघा जान्हवीया इवार्णवे॥२८॥
त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणां॥ गतिस्त्वं वीतरागाणामभूयः सन्निवृत्तये॥२९॥

पुरुषार्थसाधकाः पंथानः उपायाः जन्हव्या इमे जान्हवीयाः गंगायाः वृद्धा इति छप्रत्ययः। ओघाः प्रवाहा इव ते
प्यागमैः रागभिभिर्बहुधाभिन्नाः सिद्धिहेतवश्च अर्णव इव त्वय्येव निपतंति। प्रविशंति। येन केनापि रूपेण त्वमे
व प्राप्य इत्यर्थः। किं बहुना कारवो पि विश्वकर्मैत्युपासत इति॥२८॥ त्वय्यावेशितं चित्तं येषां तेषां तुभ्यं समर्पि
तानि कर्माणि येषां ते षां मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु॥ मामेवैष्यसि कौंतेय प्रतिजाने प्रियोसि मे
इति भगवद्वचनात्। वीतरागाणां विरक्तानां अभूयः सन्निवृत्तये मोक्षायेत्यर्थः। त्वमेव गतिः। तमेव विदित्वाऽमृत इह भ वति। नान्यः पंथा विद्यतेऽयनायेति श्रुतेरित्यर्थः॥२९॥

र·वं·टी· १०

प्रत्यक्ष इति। प्रत्यक्षः प्रत्यक्षप्रमाणगम्यः तव मह्यादिः पृथिव्यादिः महिमा ऐश्वर्यं च अपरिच्छेद्यः अनवधार्यः। आप्तस्य वाक् वेदः। यतो वा इमानि भूतानि जायन्ते इत्यादिश्रुतेः। अनुमानं। क्षित्यादिकं कर्तृकं कार्यत्वात्। इत्यादिकं। ताभ्यां साध्यं गम्यं त्वां प्रति का कथा। प्रत्यक्षमपि तावत् कृतं जगत् अपरिच्छेद्यं कारणं अप्रत्यक्षं त्वं अपरिच्छेद्य इति किमु वक्तव्यं इत्यर्थः।।२०।। केवलेति। स्मरणेन चिन्तनेन केवलं कृत्स्नं। केवलः कृत्स्न एकश्चेति विश्वः। पुरुषं स्मर्तारं जनं पुनासि यतो यदि इत्यर्थः। अनेन स्मृतिकार्येण वृत्तयो विषयेयाः शिष्टाः अवशिष्टाः वृत्तयो दर्शनस्पर्श

प्रत्यक्षोप्यपरिच्छेद्यो मह्यादिर्महिमा तव।। आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा।।२०।।
केवलं स्मरणेनैव पुनासि पुरुषं यदा।। अनेन वृत्तयः शेषा निवेदितफलास्त्वयि।।२१।।
उदधेरिव रत्नानि तेजांसीव विवस्वतः।। स्तुतिभ्यो व्यतिरिच्यन्ते दूरेण चरितानि ते।।२२।।
अनवाप्तमवाप्तव्यं न ते किंचन विद्यते।। लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोः।।२३।।

नादयो व्यापारास्ताः निवेदितफला विज्ञापितकार्याः तव स्मरणस्येदं फलं।।२१।। उदधेरिति। उदधेः रत्नानीव विवस्वतः तेजांसीव रूपाणि वा ज्वलनसंगोचराणि ते चरितानि स्तुतिभ्यो व्यतिरिच्यन्ते विशेषं स्तोतुं न शक्यन्त इति।।२२।। अनवाप्तमिति। अनवाप्तं अप्राप्तं अवाप्तव्यं प्राप्तव्यं ते तव किंचन न किंचिदपि विद्यते नित्यपरिपूर्णत्वादिति भावः। तर्हि किंनिबंधने जन्मकर्मणी तत्राह लोकेति। एको लोकानुग्रह एव ते तव जन्मकर्मणोर्हेतुः परमकारुणिकस्य ते परार्थैव प्रवृत्तिः।।२३।। ।।छ।। ।।छ।। ।।छ।। ।।छ।। ।।छ।। ।।छ।। ।।छ।।

293
1947

महिमानमिति। तव महिमा उत्कीर्य वचः संह्रियत इति यत् तद्वचः संहरणं श्रमेण वाग्व्यापारश्रान्त्या अशक्त्या वा कात्स्न्येन वक्तुमशक्यत्वात् वा गुणानां इयत्तया एतावत्त्वेन न ते प्रमानं स्यादिति भावः।।२४।। इतीति। इति ते सुराः तं अधोक्षजं अधोभूतं अक्षजं इंद्रियज्ञानं यस्मिन् तमधोक्षजं विष्णुं प्रसादयामासुः प्रसन्नं चक्रुः हि यस्मात् परमेष्ठिनः सर्वेति प्रसादवैः कृता व्याहृतिः भूतस्य सत्यस्यार्थ उक्तिः युक्तेः अर्थादावृत्ते भूतमित्यमरः। तत्स्तुतिः प्रशंसामात्रं महान्तो हियया कथंचन सुलभा इति भावः।।२५।। तस्मा इति। सुरा देवाः कुशलस्य प्र

महिमानं यदुत्कीर्य तव संह्रियते वचः।। श्रमेण तदशक्त्या वा न गुणानामियत्तया।।२४।।
इति प्रसादयामासुस्ते सुरास्तमधोक्षजं।। भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः।।२५।।
तस्मै कुशलसंप्रश्नव्यंजितप्रीतये सुराः।। भयमप्रलयोद्वेलादाचख्युर्नैरृतोदधेः।।२६।।
अथ वेलासमासन्नशैलरंध्रानुवादिना।। स्वरेण भगवानाह परिभूतार्णवध्वनिः।।२७।।

श्नेन व्यंजिता तिप्रीतिर्यस्य तस्मै लक्षितप्रसादायेत्यर्थः अन्यथा भवसरादिशान्तिर्मुखरारागामिवाविफलास्यादिति भावः। तस्मै विष्णवे अप्रलये प्रलयाभावेप्युद्वेलादुन्मर्यादात्। नैरृतो राक्षस एव उदधिः तस्माद्भयमाचख्युः कथितवंतः।।२६।। अथेति। अथ वेलायामब्धिकूले समासन्नानां सन्निकृष्टानां शैलानां रंध्रेषु गह्वरेषु अनुनादिना ध्वनिमता स्वरेण परिभूतार्णवध्वनिः तिरस्कृतघोषो भगवानुवाच।।२७।। ।।छ।।

र॰म॰टी॰
६

पुराणस्येति। पुराणस्य चिरंतनस्य कवेस्तस्य भगवतो वर्णस्थानेषु उरःकंठादिषु समीरिता सम्यगुच्चारि स१०
ताएव कृतः संपादितः संस्कारः साधुत्वं स्पष्टतादि प्रयत्नो यस्याः सा भारती वाणी चरितार्था कृतार्थैव ब
भूव वैवएवकारस्त्वसंभावनाविपरीतभावनाव्युदासार्थः।।३९।। बभाविति। विभोर्विष्णोर्वदनादुद्गतानि:
सृता सदशनज्योत्स्ना दंतकांतिसहिता इदं च विशेषणं धावल्यातिशयार्थं। अत एव भारती चरणादंघ्रे
र्निर्याता सा शेषा सा गंगैवेति समानाधिकरण्यनिर्वाहात् निर्यातायाः शेषेवेति भाषायहेतुवद्भावो दुर्घ

पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता।। बभूव कृतसंस्कारा चरितार्थैव भारती।।३९।।
बभौ सदशनज्योत्स्ना सा विभोर्वदनोद्गता।। निर्यातशेषा चरणाद्गंगेवोर्ध्वप्रवर्त्तिनी।।४०।।
जाने वो रक्षसाक्रांतावनुभावपराक्रमौ।। अंगिनां तमसेवोभौ गुणौ प्रथममध्यमौ।।४१।।
विदितं तप्यमानं च तेन मे भुवनत्रयं।। अकामोपनतेनेव साधोर्हृदयमेनसा।।४२।।

ट। ऊर्ध्वप्रवर्त्तिनी ऊर्ध्वप्रवाहिनी गंगेव बभावित्युत्प्रेक्षा।।४०।। यदाह भगवान्तदाह। जानेइति। हे देवाः वोयु
ष्माकं अनुभावपराक्रमौ महिमापुरुषकारौ रक्षसा रावणेन अंगिनां शरीरिणां प्रथममध्यमौ उभौ गुणौ सत्वर
जसी तमसेव तमोगुणेनेव क्रांतौ जानौ वाक्यार्थः कर्म।।४१।। विदितमिति। किंच अकामेनानिच्छयोपनतेन ६
प्रमादागतेन एनसा पापेन साधोः सज्जनस्य हृदयमिव तेन रक्षसा संतप्यमानं तपेर्भौवादिकात्। कर्मणि
शानच्। भुवनत्रयं च मे विदितं मया ज्ञातं मतिबुद्धीत्यादिना वर्त्तमाने क्तः स्य च वर्त्तमान इति षष्ठी।।४२।।

295
1947

कार्येष्विति। किंच एककार्यत्वात् अवयोरेकार्थत्वात् कार्येषु कर्त्तव्येषु विषये वज्रिणा इंद्रेण अभ्यर्थ्य इदं कु
र्विति प्रार्थनीयो नास्मि। तथाहि वातः स्वयमेवाग्नेः सारथ्यं साहाय्यं प्रतिपद्यते प्राप्नोति। न तु वह्निप्रार्थनये
ति भवकारार्थः।। प्रेक्षावतां हि स्वार्थे स्वत एव प्रवृत्तिः न परप्रार्थनया स्वार्थश्चायमेव इत्यर्थः।।४३।।
स्वेति। पुरा किल त्रिपुरारिप्रीणनाय स्वशिरांसि छिंदता दशकंधरेण यत् दशमं शिरो वशेषितं तन्मुक्त्वार्थमि
त्याह। स्वासिधारया स्वखड्गधारया परिहृतः अच्छिन्न इत्यर्थः। दशमो मूर्द्धा मे चक्रस्य कर्मपर्यासः लभ्यांप्राप्त

कार्येषु चैककार्यत्वादभ्यार्थ्योऽस्मि न वज्रिणा।। स्वयमेव हि वातोऽग्नेः सारथ्यं प्रतिपद्यते।।४३।।
स्वासिधारापरिहृतः कामं चक्रस्य तेन मे।। स्थापितो दशमो मूर्द्धा लभ्यांश इव रक्षसा।।४४।।
स्रष्टुर्वरातिसर्गात्तु मया तस्य दुरात्मनः।। अत्यारूढं रिपोः सत्यं चंदनेनेव भोगिनः।।४५।।
धातारं तपसा प्रीतं ययाचे स हि राक्षसः।। दैवात्सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः।।४६।।

यांग इव तेन रक्षसा स्थापितः न सर्वथा तमहं हनिष्यामीत्यर्थः।।४४।। तर्हि किं प्रागुपेक्षितोऽसि तत्राह स्रष्टुरिति।
किंतु स्रष्टुर्ब्रह्मणो वरातिसर्गाद्वीरदानाद्धेतोः मया तस्य दुरात्मनो रिपोः रावणस्यात्यारूढमत्यारोहणमतिवृद्धिरि
त्यर्थः। नपुंसके भावे क्तः। भोगिनः पर्यास्यात्यारूढं चंदनेनेव सोढं सह्यमिति पादे स एवार्थः। चंदनद्रुमस्यापि सर्पवेष्टि
तत्वेति द्रष्टव्यं।।४५।। संप्रति वरस्वरूपमाह। धातारमिति। राक्षसः तपसा प्रीतं संतुष्टं धातारं ब्रह्मणं मर्त्येषु विषये
आस्था पराङ्मुखः आदरविमुखः सन् मर्त्यान्यनादृत्येत्यर्थः दैवात्सर्गादष्टविधाद्देवसृष्टेरवध्यत्वं ययाचे हि।
।।४६।।

नहिं काकगतिरित्याशंक्यमनुष्यावतारेण हनिष्यामीत्याह। सोहमिति। सोहं दशरथस्यापत्यं पुमान्दाशरथिः अत
इञितिइञ्प्रत्ययः। रामो भूत्वा तीक्ष्णैः शरैस्तस्य रावणस्य शिरांस्येव कमलानि तेषामुच्चयं राशिं रणभूमेर्बलि
क्षमं पूजार्हं करिष्यामि पुष्पाणिष्वाद्याहि पूजेति भावः॥४७॥ अचिरादिति। यज्वभिर्याज्ञिकैर्विधिवत्कल्पित
मुपहृतं हविर्भागं मायाविद्भिः अस्मायामेधास्रजोविनिरिति विनिप्रत्ययः निशाचरैरक्षोभिरनालीढं अनास्वा
तं यथा तथा। चिरात्पुनराहास्यथ प्रहीष्यथ॥४८॥ वैमानिका इति। मरुतां देवानां पथि व्योम्नि वैमानिकाः

सोहं दाशरथिर्भूत्वा रणभूमेर्बलिक्षमं॥ करिष्यामि शरैस्तीक्ष्णैस्तच्छिरः कमलोच्चयं॥४७॥
अचिराद्यज्वभिर्भागं कल्पितं विधिवत्पुनः॥ मायाविभिरनालीढमादास्यध्वे निशाचरैः॥४८॥
वैमानिकाः पुण्यकृतस्त्यजंतु मरुतां पथि॥ पुष्पकालोकसंक्षोभं मेघावरणतत्पराः॥४९॥
मोक्ष्यध्वे सुरबंदीनां वेणीर्वधान दूषितान्॥ शापयंत्रितपौलस्त्यबलात्कारकचग्रहैः॥५०॥

विमानैश्चरंतः चरंतीति ठक्प्रत्ययः। मेघावरणतत्पराः रावणभयान्मेघांतर्हीनतत्पराः पुण्यकृतः सुकृतिनः पु
ष्पकालोकनेन यद्दृष्ट्या रावणविमानदर्शनेयः संक्षोभस्तं त्यजंतु॥४९॥ मोक्ष्यध्व इति। हे देवाः यूयं शापेन नल
कूबरशापेन यंत्रिताः प्रतिबद्धाः पौलस्त्यस्य रावणस्य बलात्कारेण ये कचग्रहाः केशाकर्षास्तैर्दूषितानन्नुपहृ
तान्स्वर्गांगनानां वेणीबंधान्मोक्ष्यध्वे मोचयिष्यथ॥ पुरा किल नलकूबरेणात्मानमभिसरंत्या रंभायाः बलात्का
रेण संभोगात्क्रुद्धेन रावणः शप्तः स्त्रीणां बलात्ग्रहणे मूर्धा ते शतधा भविष्यतीति — रथकथानुसंधेया॥५०॥ ७

2-97
1947

रावणेति। स कृष्ण एव मेघः श्यामेश्वा विश्रवसोपत्यं रावण इति विग्रहः। विश्रवः शब्दात्तस्यापत्यमित्यणि कृतावि
श्रवणरवणावितिविश्रवःशब्दस्य वृत्तिविषये वरणादेशरावणा इति रूपं सिद्धं स एवावग्रहो वर्षप्रतिबंधस्तेन क्लां
तं म्लानं शुष्यमाणं मरुतो देवा एव सस्यगि — वंरूपेण वागमृत्येन वाक्सलिलेन अमृतं यज्ञशीषे स्यात्॥ पीयूषे
सलिलेमृतामिति विश्वः। अभिवृष्याभिसिच्याति रोदधेंतर्दधे॥५१॥ पुरुहूतेति। पुरुहूतप्रभृतयः इंद्राद्याः सुराः

रावणावग्रहक्लांतमिति वागमृतेन सः॥ अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे॥५१॥
पुरुहूतप्रभृतयः सुरकार्योद्यतं सुराः॥ अंशैरनुययुर्विष्णुं पुष्पैर्वायुमिव द्रुमाः॥५२॥
अथ तस्य विशांपत्युरंते काम्यस्य कर्मणः॥ पुरुषः प्रबभूवाग्नेर्विस्मयेन सहर्त्विजां॥५३॥

सुरकार्ये रावणवधरूपे उद्यतं विष्णुमंशैर्मर्त्यादिभिः द्रुमाः पुष्पैः स्वांशैर्वायुमिवानुययुः। सुग्रीवादिरूपेण वा
नरयोनिषु जाता इति भावः॥५२॥ अथेति। अथ तस्य विशांपतेर्दशरथस्य संबंधिनः काम्यस्य कर्मणः पुत्रकामेष्ट्ये
रंते वसानेऽग्नेः पावकात्पुरुषः किं दिव्यः पुमान् ऋत्विजां विस्मयेन सह प्रबभूव प्रादुरभवत् तदा विवोवातेषा
मपि विस्मयो भूदित्यर्थः॥५३॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ।

र॰ मू॰ टी॰ ८ तमेव पुरुषं विशिनष्टि हेमपात्रेति। अथास्य पुंसो विष्णोरनुप्रवेशादधिष्ठानाद्धेतोः तेनापि दिव्यपुरुषेणापि स॰१०
दुर्वहं चतुर्दशभुवनोदरस्य भगवतो हरेरन्तर्गर्भितत्वाद्वोढुमशक्यं हेमपात्रगतं पयसि पक्वं चरुं पयश्चरुं पा
यसान्नं दोर्भ्यामादधानो वहन्। अनवस्थावीनिरूप्य क उदनवरचितियाज्ञिकाः॥ ५४॥ प्राजापत्येनेति।
नृपो दशरथः। प्राजापत्येन प्रजापतिसंबन्धिना पुरुषेणोपनीतं नतु वसिष्ठेन प्राजापत्यं नरं विद्धि मामिहाभ्या
गतं नृपतिं रामायणात्। तदन्नं पायसान्नं उदन्वता उदधिना आविःकृतं प्रकाशितं पयसां सारममृतं वृषा वा

हेमपात्रगतं दोर्भ्यामादधानः पयश्चरुम्॥ अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम्॥ ५४॥
प्राजापत्योपनीतं तदन्नं प्रत्यग्रहीन्नृपः॥ वृषेव पयसां सारमाविष्कृतमुदन्वता॥ ५५॥
अनेन कथिता राज्ञो गुणास्तस्यान्यदुर्लभाः॥ प्रसूतिं चकमे तस्मिंस्त्रैलोक्यप्रभवोऽपि यत्
॥ ५६॥

मघवा। वासवो वृत्रारिर्वृषेत्यमरः। प्रत्यग्रहीत् स्वीचकार॥ ५५॥ अनेनेति। तस्य राज्ञो दशरथस्य गुणाः अन्यैर्दुर्ल
भाः असाधारणाः अनेन कथिताः व्याख्याताः यद्यस्मात् त्रयो लोकास्त्रैलोक्यं। चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् प्र
त्ययः। तस्य प्रभवः कारणं विष्णुरपि तस्मिन् राज्ञि प्रसूतिमुत्पत्तिं चकमे कामितवान् त्रिभुवनकारणस्यापि
कारणमिति परमावधिर्गुणसमुदायस्येत्यर्थः॥ ५६॥ ॥५७॥ ॥५७॥ ॥५७॥ ॥

2/99
1947

सेति। स नृपः चरुसंज्ञस्य संजातं चरुसंज्ञितं वैष्णवं तेजः पत्न्योः कौशल्याकैकेय्योः द्यौश्च पृथिवी च द्यावा
पृथिव्यौ। दिवश्च पृथिव्यामिति दिवशब्दस्य द्यावादेशः तयोर्द्यावापृथिव्योः अह्नः पतिरहर्पतिः सूर्यः अ
ह्रादीनां पत्यादिषु उपसंख्यानमिति वैकल्पिको रेफादेशः। प्रत्यग्रं नूतनमातपं बालातपमिव विभेजे विभ
ज्य ददावित्यर्थः॥ ५७॥ पत्नीत्रये सति द्वयोरेव विभागकारणमाह अर्चितेति। तस्य राज्ञः कोशलस्य राज्ञो
ऽपत्यं स्त्री कौशल्या वृद्धेत्कोशलाजादाञ्ञ्य इति ञ्यप्रत्ययः। यङश्चापिति चाप्। अर्चिता ज्येष्ठा मान्या केकयवंश
जा कैकेयी प्रिया इष्टा अतो हेतोरीश्वरो भर्ता नृपः सुमित्रां ताभ्यां कौशल्याकैकेयीभ्यां संभावितां भागदानेन

स तेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितम्॥ द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपम्॥ ५७॥
अर्चिता तस्य कौशल्या प्रिया केकयवंशजा॥ अतः संभावितां ताभ्यां सुमित्रामैच्छदीश्वरः॥ ५८॥
ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः॥ चरोरर्धार्धभागाभ्यां तामयोजयतामुभे॥ ५९॥

मानितां सुमित्रामैच्छत्। इच्छति स्म। एवं च सामान्यं तिसृणां च भागप्राप्तिमिति राज्ञि उचितज्ञतां कौशलं च लभ्यते॥ ५८॥
बहुज्ञस्य सर्वज्ञस्य चित्तज्ञस्येत्यर्थः पत्युर्महीक्षितः क्षितीश्वरस्य विशेषणत्रयेण राज्ञोऽनुसरणीयतामाह चित्त
ज्ञे अभिप्रायज्ञे ते कौशल्याकैकेय्यौ चरोरर्धे। अर्धं समभागे तयोर्यो अर्द्धौ चितौ भागौ वेत्यर्धं भागावेकदेशौ ताभ्यामर्धा
र्धभागाभ्यां चरुस्यार्धार्धसमंशकस्य नरः। तां सुमित्रामयोजयतां युक्तामकुरुताम्। अयं च विभागो न रामायणसंवादी तत्र
चरोरर्धं कौसल्यायै अवशिष्टार्धं कैकेय्यै शिष्टं पुनः पत्युर्दिष्टं सुमित्राया इत्यभिधानात् किं तु पुराणान्तरसंवादी
द्रष्टव्यः उक्तं च नारसिंहे। ते पिंडप्राशने काले सुमित्रायामहीयत पिंडाभ्यामल्पमल्पं भगिन्यै प्रयच्छत इति एवं जन्य
त्रापि सति विरोधे पुराणान्तरात् समाधातव्यम्॥ ५९॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

र·घु·टी·
९

नचैवंतस्यपीर्ष्यास्यादित्याह॥ सापीति। सासुमित्राप्युभयोरपिसमानप्रणयःपतिर्ययोस्तयोः सपत्न्योः नित्यंसप प१०
त्न्यादिपुंड्रूप्रकारश्च। भ्रमरीभृंगांगनावारणस्यमदनिस्यंदरेखयोरिवगंडद्वयगतयोरितिभावः। प्रणयव
तीप्रेमवत्यासीत्। सपत्न्योरित्यत्रसमासांतर्गतस्यपत्युरुपमनेवारणस्येति॥६०॥ ताभिरिति। ताभिःकौसल्या
दिभिःप्रजानांभूत्यैअभ्युदयायदेवस्यविष्णोरंशःसंभवःकारणंयस्यसगर्भः सूर्यस्येमाःसौर्यस्ताभिःसौरीभिः
सूर्यतिष्येत्यादिनाउपधायकारलोपः अमृताख्याख्याताभिर्जलवहनसामर्थ्यान्नाडीभिरिवना
डीभिर्वृष्टिविसर्जनीभिर्दीधितिभिरपांविकारोऽम्मयोजलमयोगर्भइवदध्रेधृतःजातावेकवचनंगर्भादधिरइत्यर्थः।

सापिप्रणयवत्यासीत्सपत्न्योरुभयोरपि॥ भ्रमरीवारणस्येवमदनिस्यंदलेखयोः॥६०॥
ताभिर्गर्भःप्रजाभूत्यैदध्रेदेवांशसंभवः॥ सौरीभिरिवनाडीभिरमृताख्याभिरम्मयः॥६१॥
सममापन्नसत्वास्तारेजुरापांडुरत्विषः॥ अंतर्गतफलारंभाःसस्यानामिवसंपदः॥६२॥

अत्रयादवः। तासांशतानिचत्वारिरश्मीनांवृष्टिविसर्जनेशतत्रयंहिमोत्सर्गेतावत्तुगर्भस्यसर्जने। आनंदाश्च
हिमेध्याश्चनूतनाःघृतनाइति। चतुःशतंवृष्टिवाहास्ताःसर्वाअमृतास्त्रिधइति॥६१॥ सममिति। समंयुगपत्
आपन्नाःप्राप्ताःसत्वाःप्राणिनोयाभिस्ताःआपन्नसत्वाःगर्भिण्यः आपन्नसत्त्वास्यात्गुर्विण्यंतर्वत्नीचगर्भि
णीत्यमरः। अतएवआपांडुवर्णास्तताराजपत्न्यःतान्अंतर्गताःगुप्ताःफलारंभाःफलप्रादुर्भावायासांताःसस्या
नांसंपदइवरेजुःबभुः॥६२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

301
1947

संप्रतितासांस्वप्नदर्शनान्याह॥ गुप्तमिति। सर्वाःस्वप्नेषुजलजःशंखोअसीःखड्गःगदाशार्ङ्गंधनुश्चक्रंचतैर्लां
छितामूर्तयोयेषांतैर्वामनैःह्रस्वैःपुरुषैःगुप्तंरक्षितंआत्मानंस्वस्वरूपंददृशुः॥६३॥ हेमेति। किंचेतिचार्थः
हेम्नःसुवर्णस्यपक्षाणांप्रभाजालंकांतिपुंजंवितन्वताविस्तारयतावेगेनाकृष्टाःपयोमुचोमेघायेनतेन
सुपर्णेनगरुत्मतागगनेनाउह्यंतेस्माकृष्टाः॥६४॥ बिभ्रत्येति। किंचस्तनयोरंतरेमध्येविलंबिनंलंबमानं
न्यस्यतइतिन्यासः। कौस्तुभएवन्यासस्तंपस्याकौस्तुभन्यासंकौस्तुभमित्यर्थः। बिभ्रत्यापद्ममेवव्यजनंह

गुप्तंददृशुरात्मानंसर्वाःस्वप्नेषुवामनैः॥ जलजासिगदाशार्ङ्गचक्रलांछितमूर्तिभिः॥६३॥
हेमपक्षप्रभाजालंगगनेचवितन्वता॥ उह्यंतेस्मसुपर्णेनवेगाकृष्टपयोमुचा॥६४॥
बिभ्रत्याकौस्तुभन्यासंस्तनांतरविलंबिनं॥ पर्युपास्यंतलक्ष्म्याचपद्मव्यजनहस्तया॥६५॥
कृताभिषेकैर्दिव्यायांत्रिस्रोतसिचसप्तभिः॥ ब्रह्मर्षिभिःपरंब्रह्मगृणद्भिरुपतस्थिरे॥६६॥
ताभ्यस्तथाविधान्स्वप्नान्श्रुत्वाप्रीतोथपार्थिवः॥ मेनेपरार्ध्यमात्मानंगुरुत्वेनजगद्गुरोः॥६७॥

स्तेयस्यास्तयालक्ष्म्यापर्युपास्यंतउपासिताः॥६५॥ कृतेति। दिविभवायांदिव्यायांस्रोतसिआकाशगंगायांकृता
भिषेकैःकृतावगाहैःपरंब्रह्मवेदरहस्यंगृणद्भिःसप्तभिर्ब्रह्मर्षिभिःकश्यपप्रभृतिभिःउपतस्थिरेउपासांच
क्रिरे॥६६॥ ताभ्यइति। पार्थिवोदशरथःताभ्यःपत्नीभ्यःआख्यातोपयोगइत्यपादानात्पंचमीतथाविधानुक्त
प्रकारान्स्वप्नान्श्रुत्वाप्रीतःआत्मानंजगद्गुरोर्विष्णोरपिगुरुत्वेनपितृत्वेनहेतुनापरार्ध्यंसर्वोत्कृष्टंमेने।
॥६७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

विभक्तेति। एकरूपो विभुर्विष्णुः तासां राजपत्नीनां कुक्षिषु गर्भेषु प्रसन्नानां निर्मलानां अपां जलानां कुक्षिषु प्रति
माचंद्रः प्रतिबिंबचंद्र इव अनेकधा विभक्तात्मा आसन् बभूव स॥ ६८॥ अथेति। अथ राज्ञो दशरथस्य सतीयतिव्रता अ
ग्र्या वा सा महिषी चाग्र्या महिषी कौशल्या प्रसूतिसमये प्रसवलेकाओषधिगकुरात्रिसमये तमोपहं नीतितमोप
हं। अप क्रूशा तमसो रीतिड प्रत्य। ज्योतिरिव तथा तमोपहं तमः संसारतं निवर्त्तकं पुत्रं लेभे॥ ६९॥ रामइति। अभिरम
ते: अत्यभिरामं मनोहरं अधिकरणघञ् प्रत्ययः तेन वपुषा चोदितः प्रेरितो गुरुः पिता दशरथः तस्य पुत्रस्य जगतां प्रथ

विभक्तात्मा विभुस्तासामेककुक्षिषनेकधा॥ उवास प्रतिमाचंद्रः प्रसन्नानामपामिव॥ ६८॥
अथाग्रमहिषी राज्ञः प्रसूतिसमये सती॥ पुत्रं तमोपहं लेभे नक्तं ज्योतिरिवौषधिः॥ ६९॥
राम इत्यभिरामेण वपुषा तस्य चोदितः॥ नामधेयं गुरुश्चक्रे जगत्प्रथममंगलं॥ ७०॥ ॥
रघुवंशप्रदीपेन तेनाप्रतिमतेजसा॥ रक्षागृहगता दीपाः प्रत्यादिष्टा इवाभवन्॥ ७१॥ ॥
शय्यागतेन रामेण माता शातोदरी बभौ॥ सैकतांभोजबलिना जान्हवीव शरत्कृशा॥ ७२॥

मं मंगलं राम इति नामधेयं चक्रे। अभिरामत्वमेव रामशब्दप्रवृत्तिनिमित्तमित्यर्थः॥ ७०॥ रघ्विति। रघुवंशस्य प्र
दीपेन प्रकाशकेनाप्रतिमतेजसा तेन रामेण रक्षागृहगताः सूतिकागृहमावर्तमाना दीपाः प्रत्यादिष्टाः प्रतिबद्धा
इवाभवन्। महादीपसमीपे शान्त्ये स्फुरंता भावः॥ ७१॥ शय्येति। शातोदरी गर्भमोचनात् कृशोदरी माता श
य्यागतेन रामेण सैकते पुलिने यो भोजबलिः पद्मोपहारः तेन शारीरादि कृशा जान्हवीव बभौ॥ ७२॥ ॥

303
1947

कैकेय्या इति। केकयस्य राज्ञोऽपत्यं स्त्री कैकेयी तस्यापत्यमित्यणि कृते कैकेयं सौमित्रेयं प्रलयादेरिव शब्दस्येया
देशः। तस्याः भरतो नाम शीलवान् तनयो जज्ञे जातः। यः तनयः प्रश्रयो विनयः श्रियमिव जननीं श्रीमानलंचक्रे॥ ७३॥
सुताविति। सुमित्रा लक्ष्मणशत्रुघ्नौ नाम यमौ युग्मजातौ सुतौ सम्यगाराधितास्वभ्यस्ता विद्या प्रबोधविनयौ तत्व
ज्ञानेंद्रिया विव सुषुवे॥ ७४॥ निर्दोषमिति। सर्वजगद्भूलोको निर्दोषं दुर्भिक्षादिदोषरहितं आविःकृतगुणं प्रक
टीकृतारोग्यादिगुणं चाभवत्। अत्रोत्प्रेक्षते। गां भुवं गतं अवितीर्णं पुरुषोत्तमं विष्णुं स्वर्गोऽप्यन्वयादिव। स्वर्गोऽपि

कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान्॥ जननीं श्रीमलंचक्रे यः प्रश्रय इव श्रियं॥ ७३॥
सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ॥ सम्यगाराधिता विद्या प्रबोधविनयाविव॥ ७४॥
निर्दोषमभवत्सर्वं माविष्कृतगुणं जगत्॥ अन्वगादिव हि स्वर्गो गां गतं पुरुषोत्तमं॥ ७५॥
तस्योदये चतुर्मूर्तेः पौलस्त्याचकितेश्वराः॥ विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव॥ ७६॥

गुणवान्निर्दोषश्चेत्यागमः स्वर्गतुल्यमभूदित्यर्थः॥ ७५॥ तस्येति। चतुर्मूर्तिः रामादिरूपेण चतुरूपस्य संतः त
स्योदये सति पौलस्त्याद्रावणाच्चकिता भीताः ईश्वरा नाथाः इंद्रादयो यासां ता दिशश्च तस्यः विरजस्कैरपधूनि
भिर्नभस्वद्भिर्वायुभिर्निमिषेणोच्छ्वसिता इवेत्युत्प्रेक्षा उच्छ्वसिः कर्त्तरि क्तः स्वनाथशरणसंतुष्टानां दिशामुच्छ्वासवता इव ता बभुरित्यर्थः चतुर्दिगीशरणं मूर्त्तिचतुष्टयजननमिति भावः॥ ७६॥ ॥ ५॥ ॥ ५॥

कृशानुरिति। रक्षसा रावणेनाविप्रकृतौ अपकृतौ पीडितौ इत्यर्थः। कृशानुरग्निः प्रभाकरः सूर्यश्च यथासंख्यं अपधूमत्वात्प्रसन्नत्वाच्चापविघ्नौ निरस्तदुःखौ विशास्तामभवतां॥७७॥ दशाननेति। तत्क्षणे तस्मिन्क्षणे रामो ऽस्यन्यवसरे राक्षसश्रियो ऽश्रुबिंदवः दशाननकिरीटेभ्यः मणीनां व्याजेन मिषेण पृथिव्यां पर्यस्ताः पतिताः रामोदयसमये तद्ध्वंसस्य रावणस्य किरीटमणिभ्रंशलक्षणं दुर्निमित्तमभूदित्यर्थः॥७८॥ पुत्रेति। पुत्रिणो जातपुत्रस्य दशरथस्य जन्मनि प्रवेशनां प्रवेशयितव्यानां वादनीयानामित्यर्थः। तूर्याणां वाद्यानां दिवि

कृशानुरपधूमत्वात्प्रसन्नत्वात्प्रभाकरः॥ रक्षोविप्रकृतावास्तामपविद्धशुचाविव॥७७॥
द—ननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः॥ मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिंदवः ७८
पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः॥ आरंभं प्रथमं चक्रुर्देवदुंदुभयो दिवि॥७९॥
संतानकमयी वृष्टिर्भवने चास्य पेतुषी॥ सन्मंगलोपचाराणां सैवादिरचनाभवत्॥८०॥
कुमाराः कृतसंस्कारास्ते धात्रीस्तन्यपायिनः॥ आनंदेनाग्रजेनेव समं ववृधिरे पितुः॥८१॥

थमं आरंभमुपक्रमं देवदुंदुभयश्चक्रुः साक्षात्पितुर्दशरथादपि देवा अधिकं प्रहृष्टा इत्यर्थः॥७९॥ अस्य राज्ञो भवने संतानकानां कल्पवृक्षकुसुमानां विकारः संतानमयी वृष्टिश्च पेतुषी पपात। कुसुमेति कुसुमस्य यः। उगितश्चेति ङीप्। सा वृष्टिरेव सतः पुत्रजन्मज्ञापकाय मंगलोपचारास्तेषां आदि रचना प्रथमा क्रियाभवत्॥८०॥ कुमाराइति कृताः संस्काराः जातकर्मादयो येषां ते धात्रीणां उपमातॄणां स्तन्यानि पयांसि पिबंतीति तथोक्तास्ते कुमाराः अग्रजातेन अग्रजेन ज्येष्ठेन वर्धिनेनापि तु रानंदेन समं ववृधिरे कुमारवृद्ध्या पितामहीं तमानंदमापेत्यर्थः कुमारजन्मनः प्रागेव जातत्वा ११

305
1947

स्वाभाविकमिति। तेषां कुमाराणां संबंधि स्वाभाविकं सहजं विनीतत्वं विनयकर्मणा शिक्षया हविर्भुजामग्नीनां सहजं तेजः हविषाज्यादिनेव प्रवृद्धं ववृधे। निसर्गसंस्काराभ्यां विनीता इत्यर्थः॥८२॥ परस्परेति। परस्परमविरुद्धा अविद्विष्टा सौभ्रात्रगुणवंत इत्यर्थः। ते कुमाराः तत्प्रसिद्धमनघं निःपापं रघोः कुलं ऋतवो वसंतादयो नंदनं इंद्रवनमिव सहज विरोधानामपि ऋतूनां सदा वस्थानसंभवार्थं देवाविशेषणं। अलं अत्यंतं उद्योतयामासुः सौभ्रातृवंतः कुलभूषणा यन्त इति भावः॥८३॥ समानेति। शोभनाः स्निग्धा भ्रातरो येषां ते सुभ्रातरः नद्यृतश्चेति कप्प्रत्ययो न भवति विहिते भ्रातुरिति निषेधात्तेषां भावः सौभ्रात्रं युवादित्वादण् तस्मिन्समाने ऽपि चतुर्णां तुल्ये ऽपि यथा उभौ रामलक्ष्मणौ प्रीत्या

स्वाभाविकं विनीतत्वं तेषां विनयकर्मणा॥ मुमूर्छ सहजं तेजो हविषेव हविर्भुजां॥८२॥
परस्पराविरुद्धास्ते तद्रघोरनघं कुलं॥ अलमुद्योतयामासुर्देवारण्यमिवर्तवः॥८३॥
समाने ऽपि हि सौभ्रात्रे यथोभौ रामलक्ष्मणौ॥ तथा भरतशत्रुघ्नौ प्रीत्या द्वंद्वं बभूवतुः॥८४॥
तेषां द्वयोर्द्वयोरैक्यं विभिदे न कदाचन॥ यथा वायुविभावस्वोर्यथा चंद्रसमुद्रयोः॥ ॥८५॥

द्वंद्वं बभूवतुः। तथा भरतशत्रुघ्नौ द्वंद्वं द्वौ द्वौ साहचर्येणाभिव्यक्तौ बभूवतुः। द्वंद्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिष्विति अभिव्यक्त्यर्थे निपातः क्वचित्कस्य चित्केनैव द्वौ नारिति व्यत इति भावः॥८४॥ तेषामिति। तेषां चतुर्णां मध्ये द्वयो रामलक्ष्मणयोर्भरतशत्रुघ्नयोश्चेत्यर्थः वायुविभावस्वोर्यथा वातवह्न्योरिव चंद्रसमुद्रयोरिव ऐक्यं एकमत्यं कदाचिन्न विभिदे। एककार्यत्वं समानसुखदुःखत्वं चक्रमाद्युपमाद्वयात्कथ्यते सहजासहकारी दिवह्नेर्वायुः चंद्रस्य द्रीवर्द्धने सिंधुः ततक्षये वक्षीयत इति॥८५॥ ॥ ५॥ ॥५॥ ॥५ ॥

तेप्रजानामिति। प्रजानाथास्ते कुमाराः तेजसा प्रभावेन प्रश्रयेण विनयेन च निदाघांते ग्रीष्मांते श्यामाभ्रा
णि मेघा येषां ते श्यामाभ्राः नातिशीतोष्णा इत्यर्थः। दिवसा इव प्रजानां मनो जह्रुः॥ ८६॥ स इति। चतुर्धा व्यस्तो वि
भक्तः। पृथ्वीपतेर्दशरथस्य प्रसवः संतानः चतुरंगवान् मूर्तिमान् धर्मार्थकाममोक्षाणामवतार इव बभौ॥ ८७॥
गुणैरिति। गुरुवत्सला गुरुभक्तास्ते कुमाराः गुणैर्विनयादिभिः गुरुं पितरं चतुर्णामंतानां दिगंतानां दिशां चतुरंतं
तां। तद्धितार्थेत्यादिना उत्तरपदसमासः। तं दशरथमेव महार्णवाश्चत्वारो वेलैरिवाराधयामासुरानंदयामासुः॥ ८८॥
सुरगज इति। भग्नाः दैत्यानामसिधारा यैस्तैश्चतुर्भिर्दंतैः सुरगज ऐरावत इव पणबंधेन फलसिद्ध्या व्यक्तयोगैरनु

तेप्रजानां प्रजानाथास्तेजसा प्रश्रयेण च। मनो जह्रुर्निदाघांते श्यामाभ्रा दिवसा इव॥ ८६॥
स चतुर्धा बभौ व्यस्तः प्रसवः पृथिवीपतेः। धर्मार्थकाममोक्षाणामवतार इवांगभाक्॥ ८७॥
गुणैराराधयामासुस्ते गुरुं गुरुवत्सलाः। तमेव चतुरंतेशं रत्नैरिव महार्णवाः॥ ८८॥
सुरगज इव दंतैर्भग्नदैत्यासिधारैर्नय इव पणबंधव्यक्तयोगैरुपायैः। हरिरिव युगदीर्घै
र्दोर्भिरंशैस्तदीयैः पतिरवनिपतीनां तैश्चकासे चतुर्भिः॥ ८९॥ इति रघुः दशमः॥ १०॥

मितनयोगैरुपायैश्चतुर्भिः सामादिभिर्नयो नीतिरिव युगपदीर्घैश्चतुर्भिर्भुजैर्हरिर्विष्णुरिव तदीयैर्हरिसंबंधिभिरंशै १२
श्चतुर्भिः स्वैः पुत्रैरवनीपतीनां पतिः राजराजो दशरथः च कासे दिद्युते॥ ८९॥ ॥ इति श्रीपदवाक्यप्रमाणपारावा
रीणमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशव्याख्यायां संजीवनीसमाख्यायां दशमः सर्गः॥ १०॥

307
1947

॥श्रीः॥ ॥ रामचंद्रचरणारविंदयोरंतरंगचलभृंगलीलया॥ तत्र संति हि रसाश्च तुर्विधास्तान्यथा रुचि समंदेचनिर्विशा॥१॥ कौशिकेनेति। कौशिकेन कुशिकापत्येन विश्वामित्रेणाऽऽलेत्य आगत्य स क्षितीश्वरः दशरथः अध्वरविघातशांतये यज्ञविघ्नविध्वंसाय काकपक्षधरो बलकोचितशिखाधरः बालानां तु शिखा प्रोक्ता काकपक्षशिखंडिक इति हलायुधः। तं रामं याचितः किल खलु याचेर्द्विकर्मकाद्दप्रधाने कर्मणि क्तः अप्रधाने दुहादीनामिति वचनात्। नायं बालोऽधिकाकारी स्यादाशंक्याह। तेजसां तेजस्विनां वयो बाल्यादि न समीक्ष्यते हि।

> कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशांतये॥ काकपक्षधरमेत्य याचितस्तेजसां हि न वयः समीक्ष्यते॥१॥ कृच्छ्रलब्धमपि मेदिनीपतिस्तं दिदेश मुनये सलक्ष्मणं॥ अप्यसुप्रणयिनां रघोः कुले न व्यहन्यत कदाचिदर्थिता॥२॥

अप्रयोजकमित्यर्थः। अत्र सर्गे रथोद्धता वृत्तं। उक्तं च। रान्नराविह रथोद्धता लगाविति॥१॥ कृच्छ्रलब्धमिति। लब्धावर्णाः प्रसिद्धयो यैस्ते लब्धवर्णाः विचक्षणाः लब्धवर्णो विचक्षण इत्यमरः। तान् भजतीति लब्धवर्णभाक् विद्वत्सेवी अत एव विवेकी स राजा कृच्छ्रलब्धमपि लक्ष्मणं रामं मुनये दिदेश अतिसृष्टवान्। तथाहि। असुप्रणयिनामपि प्राणार्थिनामपि अर्थिता यांचा रघोः कुले कदाचिदपि न व्यहन्यत न विहताः विफलीकृतेत्यर्थः। ये रार्थिभ्यः प्राणानपि समर्पयंते तेषां पुत्रादित्यागो न विस्मयावह इति भावः॥२॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

309
1947

यावदिति। पार्थिवः पृथिवीश्वरो तयो राम लक्ष्मणयोर्निर्गमाय पुरमार्गसत्क्रियां धूलिसंमार्जनं गम्यत स पुष्पजलवर्षिभिः पुष्प सहित जलवर्षिभिर्घनैः यावत् आदिशानि तावत् मार्गसत्क्रिया आशु विदधे विहिता। एतेन देवकार्यप्रवृत्तयोर्दैवानुकूल्यमत्र चितं विज्ञेयं॥३॥ ताविति। निदेशाकरणोद्यतौ। पित्रा — करणो द्युक्तौ धन्विनी विद्यते ययोस्तौ व्रीह्यादित्वादिभिः। अस्त्रियां धनुश्चापो धन्वशरासनकोदंडकामुपमित्यमरः धन्विनौ धनुष्मंतौ कुमारौ पितुश्चरणयोर्निपेतुः प्रणतावित्यर्थः भूपतेरपि बाष्पबिंदवः प्रवत्स्यतोः अत एव नम्रयोः प्रणतयोः नमिकंपीति

> यावदादिशति पार्थिवस्तयोर्निर्गमाय पुरमार्गसत्क्रियां॥ तावदाशु विदधे मरुत्सखैः सा द्पुष्पजलवर्षिभिर्घनैः॥३॥ तौ निदेशकरणोद्यतौ पितुर्धन्विनौ चरणयोर्निपेततुः॥ भूपतेरपि तयोः प्रवत्स्यतोर्नम्रयोरुपरि बाष्पबिंदवः॥४॥ लक्ष्मणानुचरमेव राघवं नेतुमैच्छदृषिरित्यसौ नृपः॥ आशिषं प्रयुयुजे न वाहिनीं सा हि रक्षणविधौ तयोः क्षमा॥६॥ ॥

रप्रत्ययः। तयोरुपरि निपेतुः पतिताः॥४॥ ताविति। पितुर्नयनजेन वारिणा किंचिदुक्षितशिखंडिकौ ईषत्सिक्तचूडौ। शिखा चूडा शिखंडः स्यादित्यमरः। शेषाद्विभाषेति कप्प्रत्ययः। धन्विनौ ताउभौ पौरदृष्टिभिः कृतनिमार्गतोरणानि कुवलयानि संपाद्यानि यथास्तां तथोक्तौ। संघशो नरीक्ष्यमाणावित्यर्थः। तम्दषिमन्वगच्छतां॥६॥ ॥

र॰ मू॰ टी॰ २

लक्ष्मणेति। ऋषिः लक्ष्मणानुमेव लक्ष्मणमात्रानुचरं तं राघवं नेतुं मे छद्दिति देतो रस्तो नृपः आशिषं प्रयुयुजे प्रयुक्तवान् वाहिनीं सेनां न प्रयुयुजे प्रेषितवान् हि यस्मात् सा आशीरेतयोः कुमारयोः रक्षणविधौ क्षमा शक्ता हि ॥६॥ मातृवर्गेति। मातृवर्गस्य चरक्षणात् स्पृश्यत इति मातृवर्गचरणस्पृशौ कृतमातृवर्गनमस्काराविस्यर्थः। स्पृशोनुदके क्किनिति क्किन्प्रत्ययः। तौ महौजसो मुनेः पदवीं प्रपद्य महौजसो भास्करस्य गतिवशात् मेषादिराशिसंक्रान्त्यनुसारात् प्रवर्त्तिनौ मधुमाधवाविव चैत्रवैशाखाविव रेजतुः। फाल्गुनचैत्रावित्युक्ते ... ॥ ३११

तौ पितुर्नयनजेन वारिणा किंचिदुक्षितशिखण्डकावुभौ॥ धन्विनौ तमृषिमन्वगच्छतां पौरदृष्टिकृतमार्गतोरणौ॥६॥ मातृवर्गचरणस्पृशौ मुने स्तौ प्रपद्य पदवीं महौजसः॥ रेजतुर्गतिवशात् प्रवर्त्तिनौ भास्करस्य मधुमाधवाविव॥७॥ वीचिलोलभुजयोस्तयोर्गतं शैशवाच्चपलमप्यशोभत॥ तोयदागमइवोध्यभिद्ययोर्नामधेयसदृशं विचेष्टितं॥८॥ ॥

स्यात्सलोपो स्याञ्चैत्रे चैत्रिकमधुः वैशाखमाधवो राध इत्यमरः॥७॥ वीचीति। वीची लोलभुजयोस्तरंगचंचलबाहोरिदं विशेषणं नदोपमानसिध्यर्थं वेदितव्यं। तयोश्च चपलमपि गतं गतिः शैशववहेतोरशोभत। किमिव तोयदागमे वर्षासमये उष्णानुदकमित्युष्णः। भिनत्ति कूलमिति भिद्यः। भिद्योध्योनद इति क्यबन्तौ निपातितौ। उध्यभिद्ययोर्नदविशेषयोर्नामधेयसदृशं नामानुरूपं विचेष्टितमिव उदकोनुकूलं नेदनरूपव्यापार इव समयोत्पन्नं चापलमपि शोभत इति भावः॥ ॥८॥ २

311
1947

ताविति। मणिकुट्टिमोचितौ मणिबद्धसंचारोचितौ मुनिप्रदिष्टयोः कौशिकेन उपदिष्टयो बलातिबलयोर्विद्ययोर्मंत्रयोः प्रभावतः सामर्थ्यात् मातृपार्श्वपरिवर्त्तिनौ मातृसमीपवर्त्तिनाविव पथि न मम्लतुः म्लानाविस्यर्थः। अत्र रामायणश्लोकः। क्षुत्पिपासे न ते राम भविष्यति नरोत्तम। बलामतिबलां चैव पठतः पथि राघव॥९॥ पूर्वेति। वाहनोचितः सानुजो राघवः पुराविदः पूर्ववृत्ताभिज्ञस्य पितृसखस्य मुनेः पूर्ववृत्तकथनैः पूर्ववृत्तकथाभिः उह्यमान इव वाहनेन प्राप्यमाण इव वहधातोः कर्मणि शानच्। पादचारमपि न व्यभावयत् न ज्ञातवान् उत्सम

तौ बलातिबलयोः प्रभावतो विद्ययोः पथि मुनिप्रदिष्टयोः॥ मम्लतुर्न मणिकुट्टिमोचितौ मातृपार्श्वपरिवर्त्तिनाविव॥९॥ पूर्ववृत्तकथितैः पुराविदः सानुजः पितृसखस्य राघवः॥ उह्यमान इव वाहनोचितः पादचारमपि न व्यभावयत्॥१०॥ तौ सरांसि रसवद्भिरंबुभिः कूजितैः श्रुतिसुखैः पतत्रिणः॥ वायवः सुरभिपुष्परेणुभिः छायया च जलदाः सिषेविरे॥११॥ नांभसां कमलशोभिनां तथा शाखिनां न च परिश्रमच्छिदां॥ दर्शनेन लघुना यथा तयोः प्रीतिमापुरुभयोस्तपस्विनः॥१२॥ ॥ ॥

न इत्यत्र दीर्घादिरपपाठः दीर्घप्राप्त्यभावात्॥१०॥ ताविति। तौ राघवौ कर्मभूतौ सरांसि कर्तॄणि रसवद्भिर्मधुरैरंबुभिः सिषेविरे। पतत्रिणः पक्षिणः सुखानि पचाद्यच्। श्रुतीनां सुखानि तैः कूजितैः वायवः सुरभिपुष्परेणुभिः जलदाः छायया च सिषेविरे इति सर्वत्र संबध्यते॥११॥ नेति। तपः येषामस्तीति तपस्विनः तपः सहाभ्यां विनिरिति विनिः। लघुनुइ एन क्षिप्रेण ल्पेल घुरित्यमरः। तयोः उभयोः कर्मभूतयोर्दर्शनेन या प्रीतिमापुस्तथा कमलशोभिनां अंभसां दर्शनेन प्रीतिं न आपुः। परिश्रमच्छिदां शाखिनां दर्शनेन न आपुः॥१२॥ ॥ ॥ ॥ ॥

र॰व॰टी॰ स्थाणिति। आत्तकार्मुको दशरथस्यापत्यं पुमान् दाशरथिः रामः अतइञ् इतीञ्। स्थाणुर्हरः। स्थाणुः कीले ह स॰११
३ रोऽस्थिर इति विश्वः। तेन दग्धवपुषो मदनस्य तपोवनं प्राप्य चारुणा विग्रहेण कायेन विग्रहः। समरे काय इति विश्वः
प्रतिनिधिः प्रकृतिसदृशोऽभवत्। कर्मणा न पुनर्दहनेन मदनसुंदर इति भावः॥१३॥ ताविति। अगस्त्यः परमः क्रुद्धस्ता
डकाभिशप्तवान्। इदं रूपमपहाय दारुणं रूपमस्तु त इति तद्वाक्यं। विदितशापयेति। कौशिकादाख्यातुः आख्याते:
आख्यातोपयोगे इत्यपादाने पंचमी। विदितशापया सुकेतुसुतया ताडकया खिलीकृते पथि खिलमप्रहतं स्थान
मिति हलायुधः। तौ रामलक्ष्मणौ स्थले निवेशिते अटनी। निवेशिते अटनी धनुःकोटी याभ्यां तौ कोटिरस्याटनिर्द्व

स्थाणुदग्धवपुषस्तपोवनं प्राप्य दाशरथिरात्तकार्मुकः॥ विग्रहेण मदनस्य चारुणा सो
भवत्प्रतिनिधिर्न कर्मणा॥१३॥ तौ सुकेतुसुतया खिलीकृते कौशिकाद्विदितशापया प
थि॥ निन्यतुः स्थलनिवेशिताटनी लीलयैव धनुषी अधिज्यतां॥१४॥ ज्यानिनादमनुगृ
ह्णती तयोः प्रादुरास बहुलक्षपाछविः॥ ताटका चलकपालकुंडला कालिकेव निबिडा बलाकिनी
॥१५॥

योरित्यमरः। लीलयैव धनुषी अधिगते ज्ये मौर्व्यौ ययोस्ते अधिज्ये ज्या मौर्वी मातृभूमिष्विति विश्वः। तयोर्भावं अधिज्यतां नि
न्यतुः नीतवंतौ। नयतिर्द्विकर्मकः॥१५॥ ज्येति। अथ तयोर्ज्यानिनादं गृह्णती जानती शृण्वतीत्यर्थः बहुलक्षपाछविः कृत
पक्षरात्रिवर्णा बहुलः पावके शीतौ कृष्णपक्षे इति विश्वः चलकपाले एव कुंडले यस्याः सा ताडका निबिडा सांद्रा ब
लाकिनी बलाकावती बलाकाद्याश्चित्यादिनि। कालिके घनावलीव। कालिका योगिनीभेदे कार्ष्ण्ये गौर्यां घनावलावि २
ति विश्वः। प्रादुरास प्रादुर्बभूव। आसेति तिङ्प्रतिरूपकमव्ययं॥१५॥ ॥ ॥ ॥ ॥ ॥

313/1947

तीव्रेति। तीव्रवेगेन धुताः कंपिता मार्गवृक्षा यया सा प्रेतचीवराणि वस्ते सा प्रेतचीवरा यथा: तया प्रेतचीवरव
सा। वसतेराच्छादनात्। क्विप्। स्वनेन सिंहनादेनोग्रया तया ताडकया पितृकानने श्मशाने उत्थया उत्स्थानुस्थ
आतश्चोपसर्ग इति उत्पूर्वात्तिष्ठतेः कर्तरि कः। तया वात्ययेव वातसमूहेनेव पाशादिभ्यो य इति यप्रत्ययः। भर
ताग्रजो रामोऽभ्यभावि अभिभूतः कर्मणि लुङ्। तीव्रवेगेत्यादि विशेषणानि वात्यायामपि यो — नि॥१६॥ उद्य
तेति। उद्यता उन्नमिता एका भुज एव यष्टिर्यस्यास्तां। आयतीं इणो धातोः शतरि उगितश्चेति ङीप्। श्रोणिलंबि
नी पुरुषाणामंत्राण्येव मेखला यस्याः सा तां इति विशेषणद्वयेनापि आततायिनीत्वं सूचितं। अतएव विलो

तीव्रवेगधुतमार्गवृक्षया प्रेतचीवरवसा स्ववोग्रया॥ अभ्यभावि भरताग्रजस्तया वात्ययेव
पितृकाननोत्थया॥१६॥ उद्यतैकभुजयष्टिमायतीं श्रोणिलंबिपुरुषांत्रमेखलां॥ तां विलो
क्य वनितावधे घृणां पत्रिणा सह मुमोच राघवः॥१७॥ यच्चकार विवरं शिलाघने ताडकोरसि
स रामसायकः॥ अप्रविष्टविषयस्य रक्षसां द्वारतामगमदंतकस्य तत्॥१८॥ ॥ ॥

क्य राघवः वनितावधे घृणां जुगुप्सां करुणां वा। जुगुप्साकरुणा घृणेत्यमरः। पत्रिणा सह पत्त्री रोपइषुर्द्वयोरित्यमरः
मुमोच मुक्तवान्। आततायिवधे मनुः आततायिनमायांतं हन्यादेवाविचारयन्। नाततायिवधे दोषो हंतुर्भवति क
श्चनेति॥१७॥ यदिति। स रामसायकः शिलावत् घने तांडकोरसि यद्विवरं रंध्रं चकार। तद्विवरं रक्षसां अप्र
विष्टविषयस्य अप्रविष्टरक्षोदेशस्येत्यर्थः। सापेक्षत्वेऽपि गमकत्वात्समासः। विषयस्त्विन्द्रियार्थे देशे जनपदेऽपि इति
विश्वः। अंतकस्य यमद्वारतामगमत्। इयं प्रथमा रक्षोमृतिरिति भावः॥१८॥ ॥ ॥ ॥ ।

बाणेति। बाणाभिन्नहृदयानिपेतुषीपातितासतिक्कुसुश्चेकुसुः। उगितश्चेति ङीप्। साकेवलएका। केवलमिति। त्रिलिंगत्वेकक्रत्स्नयोरित्यमरः। स्वकाननभुवंनव्यकंपयत् तु किंतुविस्पत्रयस्यपराजयेविश्वेच्छिरांरावणभियमपिव्यकंपयत्। ताडकावधश्रवणेनरावणस्यापिभयमुत्पन्नमितिभावः॥१९॥ अत्र ताडकायां अभिसारिकायांसमाधिरभिधीयते रामेति। सानिशासुचरतीतिनिशाचरीराक्षसी अभिसारिकावतदुःसहेनसोढुमशक्येनरामएवमन्मथः। अन्यत्रापिरामोमन्मथः तस्यशरेणहृदये उरसि मनसिच। हृदयंमनउरसोरितिविश्वः। ताडकाविद्धांगागंधवतदुर्गंधियद्रुधिरं असृक्‌तदेवचंदनंतेनउक्षितालिप्ता अपरत्रगंधवतीसुगंधिनी येरुधिर

बाणभिन्नहृदयानिपेतुषीसास्वकाननभुवंनकेवलं॥ विश्वपत्रयपराजयस्थिरांरावणश्रियमपिव्यकंपयत्॥१९॥ राममन्मथशरेणताडितादुःसहेनहृदयेनिशाचरी॥ गंधवद्रुधिरचंदनोक्षिताजीवितेशवसतिंजगामसा॥२०॥ नैर्ऋतघ्नमथमंत्रवन्मुनेःप्रापदस्त्रमवदानतोषितात्॥ ज्योतिरिंधननिपातिभास्करात्सूर्यकांतइवताडकांतकः॥२१॥ ॥ ॥

चंदने कुंकुमचंदनेताभ्यांउक्षितारुधिरंकुंकुमासृजोरित्यभयत्रापिविश्वः। जीवितेशस्य अंतकस्यप्राणेश्वरस्यच। जीवितेशोयमेप्रियेइत्यमरः। वसतिंजगाम॥२०॥ नैर्ऋतेति। अथानंतरंताडकांतकोरामः अवदानंपराक्रमः पराक्रमोवदानंस्यादितिभागुरिः। तेनतोषितान्मुनेः नैर्ऋताराक्षसास्तान्घ्नतीतिनैर्ऋतघ्नं। अमनुष्यकर्तृकेतिठक्‌मंत्रवन्मंत्रयुक्तं अस्त्रंसूर्यकांतोमणिविशेषःभास्करादिवइंधनानिनिपातयतीतिइंधननिपातिकाष्ठदाहि ज्योतिरिवप्रापत्। प्राप्तवान्॥२१॥ ॥ ॥ ॥ ॥ ॥ ॥

315/1947

वामनेति। ततःपरंराघवः ऋषेःकौशिकादाख्यातुःश्रुतंपावनंशोधनंवामनस्यस्वपूर्वावतारविशेषस्याश्रमस्यमठस्यपदंस्थानं। आश्रमोव्रतिनांमठेब्रह्मचर्यादिचतुष्कइतिहेमः। उपेयिवान्‌उपगतवान्। उपेयिवाननाश्वाननूचानश्चेतिनिपातः। प्रथमजन्मचेष्टितानिरामवामनयोरैक्यात्। स्मृतियोग्यान्यपिरामस्याज्ञानावतारत्वेनसंस्कारदौर्बल्यादस्मरन्नपिउन्मनाउत्कंठोबभूव॥२२॥ आससादेति। ततोमुनिःशिष्यवर्गेणपरिकल्पितसजिताअर्हणापूजासामग्रीयस्मिंस्तत्तथोक्ता। बद्धाःपल्लवपुटाएवअंजलयोयैस्तथाभूताःद्रुमायस्मिन्‌तत्

वामनाश्रमपदंततःपरंपावनंश्रुतमृषेरुपेयिवान्॥ उन्मनाःप्रथमजन्मचेष्टितान्यस्मरन्नपिबभूवराघवः॥२२॥ आससादमुनिरात्मनस्ततःशिष्यवर्गपरिकल्पितार्हणं॥ बद्धपल्लवपुटांजलिद्रुमंदर्शनोन्मुखमृगंतपोवनं॥२३॥ तत्रदीक्षितमृषिंररक्षतुर्विघ्नतोदशरथात्मजौशरैः॥ लोकमंधतमसात्क्रमोदितौरश्मिभिःशशिदिवाकराविव॥२४॥

तथोक्तं दर्शनेउन्मुखाःमृगायस्मिंस्तत्‌तदात्मनःतपोवनंआससाद। एतेनाविशेषणत्रयेणअतिथिसत्कारताशाल्यविनयाःसूचिताः॥२३॥ तत्रेति। तत्रतपोवनेदशरथात्मजौदीक्षितंदीक्षासंस्कृतंऋषिंशरैर्विघ्नतोविघ्नेभ्यःक्रमेणपर्यायेणरात्रिदिवसयोरुदितौशशिदिवाकरौरश्मिभिःअंधतमसात्‌गाढाध्वांतात्। ध्वांतेगाढेंधतमसमित्यमरः। अवसमंधेभ्यस्तमसइतिसमासांतोऽच्प्रत्ययः लोकमिवररक्षतुःरक्षणमकुरुतांबभूतामित्यर्थः॥२४॥ ॥

र॰ मू॰ टी॰
९

वीक्ष्येति। अथ बंधुजीवपृथुभिः बंधुकुसुमस्थूलैः। रक्तस्तु बंधुको बंधुजीवक इत्यमरः। रक्तबिंदुभिः प्रदूषितामुप हतां वेदीं वीक्ष्य अपोढकर्मणां त्यक्तव्यापाराणां च्युताः विकंकतस्रुचो येभ्यस्तेषां ऋत्विजां याजकानां संभ्रमः भव त्। विकंकतग्रहणं खादिराद्युपलक्षणं। स्रुचादीनां खादिरप्रकृतिकत्वात् स्रुवादिपात्रस्यैव विकंकतप्रकृतिकत्वात्। वि कंकतः स्रुवावृक्ष इत्यमरः। यद्वास्य पात्रस्य विकंकतप्रकृतिकत्वमस्तु। यथापि शाखासंभवाद्यथाह भगवानापस्तंबः खादिरः स्रुवः पर्णमयी जुहूराश्वत्थ्युपभृद्वैकंकती ध्रुवैवं वैतेषां वृक्षाणामेकस्य स्रुचः कारयेदिति।।२५।। उन्मुख इति। सपदि ल

वीक्ष्य वेदिमथ रक्तबिंदुभिर्बंधुजीवपृथुभिः प्रदूषितां।। संभ्रमोभवदपोढकर्मणामृ
त्विजां च्युतविकंकतस्रुचां।।२५।। उन्मुखः सपदि लक्ष्मणाग्रजो बाणमाश्रयमुखात्स
मुद्धरन्।। रक्षसां बलमपश्यदंबरे गृध्रपक्षपवनेरितध्वजं।।२६।। तत्र यावधिपती म
खद्विषां तौ शरव्यमकरोत्स नेतरान्।। किं महोरगविसर्पिविक्रमो राजिलेषु गरुडः प्रवर्त्तते।।२७।।

क्ष्मणाग्रजो रामो बाणमाश्रयमुखात् समुद्धरन् उन्मुखः ऊर्ध्वमुखः मुखमुपाये प्रारंभेऽश्रेष्ठे निः सरणास्ययोरितिविश्वः। अं बरे गृध्रपक्षपवनेरिताः कंपिता ध्वजाः यस्य तत्तथोक्तं रक्षसां दुर्निमित्तसूचनमेतत्। तदुक्तं। शकुनार्णवे। आसन्नमृत्यो र्नि कटे चरंति गृध्रादयो मूर्ध्नि गृहोर्ध्वभाग इति रक्षसां बलमपश्यत्।।२६।। तत्रेति। स रामः तत्र रक्षसां बले यौ मखद्विषामधिपती तौ सुबाहुमरीचौ शरव्यं लक्ष्यमकरोत् वेध्यं लक्ष्यं शरव्यं चेति हलायुधः। इतरान्नाकरोत्। तथाहि महोरगविसर्पिविक्रमो गरुडः गरुत्मान् राजिलेषु प्रवर्त्तते किं न प्रवर्त्तत इत्यर्थः। अलगर्दो जलसमो राजिलडुंडुभावित्यमरः।।२७।। न ।

317
1947

स इति। अस्त्रकोविदः अस्त्रज्ञो रामः उग्रजवं उग्रः क्षत्रियतः श्रूद्यां सूनावुत्कटरुद्रयोः। उग्रावच्छाभिकि क्रयोरितिविश्वः। उ क्तं वायुदैवतं वायुर्दैवतं वायुर्देवता यस्य तत् वायव्यमस्त्रं धनुषि संदधे संधितवान्। कर्तरि लिट्। तेनास्त्रेण पर्वतोल्लघु रुमपि ताडकासुतं मारीचं पांडुपत्रमिव परिणतपर्णमिवेत्यर्थः। अपातयत्स्यातितवान्।।२८।। य इति। सुबाहुरि ति यः परो राक्षसः तत्र तत्र मायया शंबरविद्यया विससर्प संचाराक्षुरधेः शकलीकृतं खंडीकृतं तं सुबाहुं कृतीकुशलो रा मः कृती च कुशलः समावित्यमरः। आश्रमाद्बहिः पतन्निर्गां पक्षिणां पतत्रिणोशरपक्षिणावित्यमरः। व्यभजत्। वि

सोस्त्रमुग्रजवमस्त्रकोविदः संदधे धनुषि वायुदैवतं।। तेन शैलगुरुमप्यपातयत्पांडु
पत्रमिव ताडकासुतं।।२८।। यः सुबाहुरिति राक्षसोपरस्तत्र तत्र विससर्प मायया।। तं क्षु
रप्रशकलीकृतं कृती पक्षिणां व्यभजदाश्रमाद्बहिः।।२९।। इत्यपास्तमखविघ्नयोस्तयोः
सांयुगीनमभिनंद्य विक्रमं।। ऋत्विजः कुलपतेर्यथाक्रमं वाग्यतस्य निरवर्तयन्क्रियाः।।३०।।

भज्यदत्तवानित्यर्थः।।२९।। इतीति। इत्यपास्तमखविघ्नयोस्तयोः राघवयोः संयुगे रणे साधुः सांयुगीनः प्रतिजनादिभ्यः खञिति खञ् सांयुगीनो रणे साधुरित्यमरः। तं विक्रममभिनंद्य ऋत्विजो याजकाः वाचि यतो वाग्यतो मौनी तस्य कुलपतेः मुनिकुलेश्वरस्य क्रतुक्रियाः यथाक्रमं निरवर्तयन्। निःपादितवंतः।।३०।। ।।६९।। ।।६९।। ।।

ताविति। अवभृते दीक्षान्ते आप्लुतः स्नातः मुनिः दीक्षान्तोवभृथो यज्ञ इत्यमरः। प्रणामेन चलकाकपक्षकौ चचलचूडौ तौ भ्रातरौ आशिषां अनुपदम् अन्वक् दर्भपाटिततलेन कुशाक्षतान्तः प्रदेशेन पवित्रेणेत्यर्थः पाणिना समस्पृशत् संस्पृष्टवान् संतोषादिति भावः॥२१॥ तमिति। संभृतक्रतुः संकल्पितसंभारः मिथिलायां भवो मैथिलो जनकः तं विश्वामित्रं न्यमन्त्रयत् आहूतवान्। सः मुनिः। मिथिलां जनकनगरीं व्रजन् स्वजनकयज्ञ्वनुः नञ्कुवणाजंकुतूहलं विभ्रतो राघवावपि निनायतीनवान्॥२२॥ तैरिति। गताध्वभिः लंघितमार्गैः त्रिभिः सायं विश्रेषु रम्येष्वाश्रमतरुषु वसतिः निवासो

तौ प्रणामचलकाकपक्षकौ भ्रातरावभृथाप्लुतो मुनिः॥ आशिषामनुपदं समस्पृशद्दर्भपाटिततलेन पाणिना॥२१॥ तन्न्यमंत्रयत संभृतक्रतुर्मैथिलः स मिथिलां व्रजन्वशी॥ राघवावपि निनाय बिभ्रतौ तद्धनुःश्रवणजं कुतूहलं॥२२॥ तैः शिवेषु वसतिर्गताध्वभिः सायमाश्रमतरुष्वगृह्यत॥ येषु दीर्घतपसः परिग्रहो वासवक्षणकलत्रतां ययौ॥२३॥ प्रत्यपद्यत चिराय यत्पुनश्चारु गौतमवधूः शिलामयी॥ स्वं वपुः सकलकल्मषच्छिदां रामपादरजसामनुग्रहः
॥२४॥

ऽगृह्यत येषु तरुषु दीर्घतमसो गौतमस्य परिग्रहो पत्नी। पत्नीपरिजनादानमूलशापाः परिग्रह इत्यमरः। अहल्येति यावत्। वासवस्य इंद्रस्य क्षणं कलत्रतां ययौ॥२३॥ प्रत्यपद्यतेति। शिलामयी भर्तृशापात्किल तं प्राप्ता गौतमवधूरहल्या चारु स्वं वपुः चिराय प्रत्यपद्यत प्राप्तवती यत्। सकलकल्मषच्छिदां पापं किल्बिषकल्मषेत्यमरः॥ रामपादरजसामनुग्रहः प्रसादः॥२४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

319
1947

राघवेति। जनेश्वरः जनकः। राघवाभ्यामन्वितं युक्तं उपस्थितं आगतं तं मुनिं जनको निशम्य अर्थकामाभ्यां सहितं तं देहं मूर्तिमंतमित्यर्थः। वाहिताग्न्याहिताद्वा साधुः धर्ममिव सपर्यया अभ्यगात् प्रत्युत्तवान्॥२५॥ ताविति। तौ दिवः आकाशात् द्यौः स्वर्गसुरवर्त्मनोरिति विश्वः। गां भुवं तौ। स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले लक्ष्यदृष्ट्या स्त्रियां पुंसि गौरित्यमरः। पुनर्वसु इव नभोमककनक्षत्राधिदेवते इव स्थितौ राघवौ विलोचनैः पिबतां अत्यस्पृष्ट्या पश्यतामित्यर्थः विदेहनगरी मिथिला तन्निवासिनां मनः पक्ष्मपातमपि निमेषमपि तद्दर्शनप्रतिबंधकत्वाद् इंचनां भ्रमादेम

राघवान्वितमुपस्थितं मुनिं तं निशम्य जनको जनेश्वरः॥ अर्थकामसहितं सपर्यया देहवद्धमिव धर्ममभ्यगात्॥२५॥ तौ विदेहपुरभेदनौकसां गां गताविव दिवः पुनर्वसू॥ मन्यते स्म पिबतां विलोचनैः पक्ष्मपातमपि वंचनां मनः॥२६॥ यूपवत्यवसिते क्रियाविधौ कालवित्कुशिकवंशवर्द्धनः॥ राममिष्वसनदर्शनोत्सुकं मैथिलाय कथयां बभूव सः॥२७॥ ॥ ॥ ॥

न्यं तेस्मलट्स्मेति भूतार्थे लट्॥२६॥ यूपेति। यूपवति क्रियाविधौ कर्मानुष्ठाने कृताविस्यर्थः॥ अवसिते समाप्ते सति कालवित् अवसरज्ञः कुशिकवंशवर्द्धनः सः मुनिः रामं अस्यंते अनेनेत्यसनं इषूणां असनं चापं तस्य दर्शने उत्सुकं मैथिलाय कथयां बभूव॥२८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तस्येति। पार्थिवो जनकः प्रथितवंशे जन्म यस्य तस्य एतेन वरसंपत्तिरुक्ता। शिशोस्तस्य रामस्य ललितं कोमलं वपुः
वीक्ष्य स्वीयं स्वकीयं दुरानमं आनमयितुमशक्यं नमेयं तावत् खलु। धनुः विचिंत्य दुहितृशुल्कं कन्यामूल्यं जामात्
देयं शुल्कं घटादिदेयं स्याज्जामातृबंधुके पि चेति विश्वः। तस्य धनुर्भंगरूपस्य संस्थया स्थित्वा। संस्था स्थि
तौ शरे नाशे इत्यमरः पीडितः बाधितः शिशुना रामेण दुःखित इति भावः॥ ३८॥ अब्रवीच्च मुनिमिति शेषः। किमि
ति। हे भगवन् मुने बृहद्भिर्मतंगजैर्महागजैरपि दुष्करं यत् कर्म तत्र कर्मणि कलभस्य कलभः करिशावक इत्यमोघव

तस्य लस्य ललितं वपुः शिशोः पार्थिवः प्रथितवंशजन्मनः॥ स्वं विचिंत्य च धनुर्दुरानमं पीडितो
दुहितृशुल्कसंस्थया॥ ३८॥ अब्रवीच्च भगवन्मतंगजैर्यद्बृहद्भिरपि कर्म दुष्करं॥ तत्र नाह
मनुमंतुमुत्सहे मोघवृत्ति कलभस्य साहसं॥ ३९॥ ह्रेपिता हि बहवो नरेश्वरास्तेन तात धनुषा धनु
र्भृतः॥ ज्यानिघातकठिनत्वचो भुजान् स्वान्विधूय धिगिति प्रतस्थिरे॥ ४०॥ प्रत्युवाच तमृषिर्निश
म्यतां सारतोयमथवा कृतं गिरा॥ चाप एव भवतो भविष्यति व्यक्तशक्तिरशनिर्गिराविव॥ ४१॥

त्तिर्व्यर्थव्यापारं साहसं अनुमंतुं अहं नोत्सहे॥ ३९॥ ह्रेपिता इति। हे तात तेन धनुषा बहवो धनुर्भृतो नरेश्वरा ह्रेपिता हि यं
प्राप्तास्त्वचः स्वान् भुजान् धिगिति विधूय अवमन्य प्रतस्थिरे प्रस्थिताः॥ ४०॥ प्रतीति। ऋषिस्तं प्रत्युवाच किमिति।
अयं रामः सारतो बलतः निशम्यतां श्रूयतां। अथवा गिरा भारतीवर्णनया कृतं अलं गीर्निवृत्त्व्येत्यर्थः। युगपयां
त्तयोः कृतमित्यर्थः। अव्ययं चैतत्। कृतमिति वारणनिषेधयोरिति गणव्याख्याने गिरेति करणे तृतीया। निषधक्रि ७
यां प्रति करणत्वादिति। किं तु अशनिर्वज्रः गिरौ इव चापे धनुष्येव भवतस्ते व्यक्तशक्तिर्दृष्टसारो भविष्यति॥ ४१॥

321
1947

एवमिति। एवमाप्तस्य मुनेर्वचनात्स जनकः काकपक्षकधरे पि राघवे पुरुषस्य कर्म पौरुषं पराक्रमं हायनानां नयुच्चादिभ्यो तियु
वादित्वादण्। पौरुषं पुरुषस्योक्तभावकर्मणि तेजसीति विश्वः। त्रिदशगोपः इंद्रगोपकीटः प्रमाणमस्य त्रिदशगोपमात्रकः
।प्रमाणे द्वयसज्दघ्नञ्मात्रच इत्यादिना मात्रच् ततः स्वार्थे कः। तस्मात्रिके कृष्णवर्त्मनि वह्नौ दाहशक्तिमिव श्रद्दधे विश्वस्तवान्॥ ४२॥
व्यादिदेशेति। अथेति मैथिलः। पार्श्वगान् पुरुषान् कार्मुकाभिहरणाय कार्मुकमानेतुं। तुमर्थाच्चेत्यादिना चतुर्थी। सह
स्रलोचनः इंद्रः तेजसस्य तेजोमयस्य धनुषः प्रवृत्तये आविर्भावाय तोयदान्मेघानिव गणानुगणशः संख्येकवचना

एवमाप्तवचनात्स पौरुषं काकपक्षकधरे पि राघवे॥ श्रद्दधे त्रिदशगोपमात्रके दाहशक्तिमिव कृ
ष्णवर्त्मनि॥ ४२॥ व्यादिदेश गणशो थ पार्श्वगान् कार्मुकाभिहरणाय मैथिलः॥ तेजसस्य धनुषः प्रवृ
त्तये तोयदानिव सहस्रलोचनः॥ ४३॥ तत्प्रसुप्तभुजगेंद्रभीषणं वीक्ष्य दाशरथिराददे धनुः॥ विद्रु
तक्रतुमृगानुसारिणं येन बाणमसृजद्वृषध्वजः॥ ४४॥ आततज्यमकरोत्स संसदा विस्मयस्ति
मितनेत्रमीक्षितः॥ शैलसारमपि नातियत्नतः पुष्पचापमिव कोमलं स्मरः॥ ४५॥ ॥ ॥

वीप्सायामिति। शस्प्रत्ययः। व्यादिदेश आजिघाय॥ ४३॥ तदिति। दाशरथी रामः प्रसुप्तभुजगेंद्र इव भीषणं भयंकरं तद्ध
नुः वीक्ष्य आददे जग्राह। वृषो ध्वजश्चिन्हं यस्य स शिवो येन धनुषा क्रतुरेव मृगः विद्रुतं पलायिनं क्रतुमृगमनुसरतीति त
च्छीलेणिनिः तं विद्रुतक्रतुमृगानुसारिणं असृजन्मुमोच॥ ४४॥ आततज्यमिति। स रामः संसदा सभया विस्मयेन स्तिमिते
नेत्रे यथा भवति तथा वीक्षितः सन् शैलसारमपि तद्धनुः स्मरः पेशलं पुष्पचापमिव नातियत्नः तानाति यत्नात् नञर्थ
स्य नशब्दस्य सुप्सुपेति समासः आततज्ज्यमधिज्यमकरोत्॥ ४५॥ ॥ ॥ ५ ॥ ॥ ७ ॥ ॥

भज्यमानमिति। तेनरामेणाकर्षणात् भज्यमानमत एव वज्रपरुषस्वनं वज्रमिव परुषः स्वनो यस्य तद्धनुः दृढमन्युर्दृढक्रो धायमन्युः क्रोधे क्रतौ दैन्ये। इतिविश्वः। भार्गवाय क्षत्रं क्षत्रं कुलं पुनरुद्यतमिति न्यवेदयदिव ज्ञापयामासेव॥ ॥४६॥ दृष्टेति। मैथिलः पार्थिवो रुद्रकार्मुके दृष्टसारः स्थिरांशो यस्य तं दृष्टसारं सारो बले स्थिरांशे चेति विश्वः। वीर्यमिव शुल्कं धनुर्भंगरूपं अभिनंद्य राघवाय रामाय अयोनिजां देवयजनसंभवां तनयां सीतां श्रियमिव साक्षाल्लक्ष्मी मिव न्यवेदयत् अर्पितवान् अयोनिजेति विशेषः॥४७॥ उक्तमेवार्थं सोपस्कारमाह। मैथिलमिति। सपदि सत्यसंगरः सत्यप्र

भज्यमानमतिमात्रकर्षणात्तेन वज्रपरुषस्वनं धनुः॥ भार्गवाय दृढमन्यवे पुनः क्षत्रमुद्यतमि
व न्यवेदयत्॥४६॥ मैथिलः सपदि सत्यसंगरो राघवाय तनयामयोनिजां॥ संनिधौ द्युतिमत
स्तपोनिधेरग्निसाक्षिकमिवातिसृष्टवान्॥४८॥ प्राहिणोच्च महितं महाद्युतिः कोशलाधिपतये पु
रोधसं॥ भृत्यभावि दुहितुः परिग्रहाद्दिश्यतां कुलमिदं निमेरिति॥४९॥ ॥ ॥ ॥

तिज्ञः अथ प्रतिज्ञाजि संपदापदा पत्स्क संगरं इत्यमरः। मैथिलो राघवाय अयोनिजां तनयां द्युतिमतस्तेजस्विनस्तपोनिधेः कौशिकस्य संनिधौ अग्निसाक्षिकः शेषाद्विभापेतिकप्रत्ययः। सृष्टवानिसृष्टवान्॥४८॥ प्राहिणोदिति महाद्युतिर्ज नको महितं पूजितं कोशलाधिपतये दशलाधिपतये दशरथाय प्राहिणोत्। प्रहितवान्। किमिति निमिर्नाम जनकानां पूर्वः कश्चित्। इदं निमेः कुलं दुहितुः सीतायाः परिग्रहात्। स्नुषात्वेन स्वीकाराद्धेतोः भृत्यस्य भावः भृत्यत्वं सोऽस्या स्तीति भृत्यभावि दिश्यतां चानुमन्यतां॥४९॥ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ॥ ९

323
1947

अन्विष्येति। सदृशीं अनुरूपां स्नुषामन्विष्य रामविवाहमाकांक्षेत्यर्थः। अनुकूलवाक् स्नुषासि द्धिरूपानुकूलार्थवादी द्विजो जनकपुरोधाश्चैनं दशरथं प्राप तथाहि कल्पवृक्षस्य फलस्य योधर्मः सद्यः पाकरूपः सोऽस्यास्तीति कल्पवृक्षफलधर्मी। अतः सुकृतां पुण्यकारिणां कांक्षितं मनोरथः सद्यः। पच्यते हि। कर्मकर्त्तरि लिट्। स्वयमेव पक्वं भवतीत्यर्थः कर्मवत्कर्मणा तुल्यक्रियत इति कर्मभावात्। भावकर्मणोरित्यात्मनेपदं॥५०॥ त स्येति। तस्य लवत्सरवः इंद्रसहचरः वशी स्वाधीनतावान्। वश आयत्ततायां चेति विश्वः। कल्पितपुरस्क्रिया

अन्विष्य सदृशीं स च स्नुषां प्राप चैनमनुकूलवाक् द्विजः॥ सद्य एव सुकृतां हि पच्यते कल्प
वृक्षफलधर्मि कांक्षितं॥५०॥ तस्य कल्पितपुरस्क्रियाविधेः शुश्रुवान् वचनमग्रजन्म
नः॥ उच्चचाल बलभित्सखो वशी सैन्यरेणुमुषितार्कदीधितिः॥५१॥ आससाद मिथिलां
स वेष्टयन् पीडितोपवनपादपैर्बलैः॥ प्रीतिरोधमसहिष्ट सा पुरी स्त्रीव कांतपरिभोगमायतं॥५२॥

विधेः कृतपूर्वजाविधेः तस्याग्रजन्मनो द्विजस्य वचनं जनकेन संदिष्टं शुश्रुवान् श्रुतवान्। शृणोतेः क्वसुः सैन्यरे णुमुषितार्कदीधितिः सन् उच्चचाल प्रतस्थे॥५१॥ आससादेति। स दशरथो बलैः सेनाभिः पीडितोपवनपादपां मिथिलां वेष्टयन्। परिधीकुर्वन्नाससाद। सा पुरी स्त्री युवतिरायतं अतिप्रसक्तं कांतपरिभोगं प्रियसंभोग मिव प्रीत्या रोधं प्रीतिरोधं असहिष्ट सोढवती। द्वेषरोधं तु न सहत इति भावः॥५२॥ ॥ ॥ ॥ ॥

ताविति। तौ सत्यसमयेऽस्थितावाचारनिष्ठौ। समयाः शपथाचारकालसिद्धान्तसंविदः इत्यमरः। वरुणवासवौ
उपमाउपमानं ययोस्तौ तथोक्तौ तथाभूतौ उभौ भूतौ भूपती जनकदशरथौ स्वप्रभावसदृशा आत्ममहिम्नानुरू
पां कन्यकातांसीतादानातनयानां रामादीनां च कौतुकक्रियां विवाहोत्सवं वितेनतुः विस्तारयन्तौ। तनोतेर्लिट्।
॥५२॥ पार्थिवीमिति। उद्वहतीत्युद्वहः पचाद्यच्। रघूणामुद्वहो रघूद्वहो रामः पृथिव्या अपत्यं स्त्री पार्थिवी
सीता तामुदवहत् परिणीतवान्। अथ लक्ष्मणस्तस्याः सीताया अनुजां जनकस्यौरसीं ऊर्मिलां उदवहत्। व
रौजसौ तथा तयोः रामलक्ष्मणयोरवरजौ अनुजौ भरतशत्रुघ्नौ यौ तौ सुमध्यमे कुशध्वजसुते जनकानुजस्य सु

तौ समेत्य समये स्थितावुभौ भूपती वरुणवासवोपमौ॥ कन्यकातनयकौतुकक्रियां स्वप्रभावस
दृशीं वितेनतुः॥५२॥ पार्थिवीमुदवहद्रघूद्वहो लक्ष्मणस्तदनुजामथोर्मिलां॥ यौ तयोरवर
जौ वरौजसौ तौ कुशध्वजसुते सुमध्यमे॥५४॥ ते चतुर्थसहितास्त्रयो बभुः सूनवो नववधूपरि
ग्रहाः॥ सामदानविधिभेदनिग्रहाः सिद्धिमन्त इव तस्य भूपतेः॥५५॥ ॥ ॥ ॥

ते कन्यके मांडवीं श्रुतकीर्तिं चोदवहतां नात्र व्युत्क्रमविवाहदोषो भिन्नोदरत्वाद्दोषां। न चयोस्मृतिः पितृव्यपुत्रे सा
पत्नेपरनारीसुते षु च विवाहाध्ययनयज्ञादौ परिवेत्ताद्यदूषणं इति॥५४॥ त इति। चतुर्थसहितास्ते त्रयश्चत्वार
इत्यर्थः। वृत्तानुसारादेवमुक्तं। सूनवः नववधूपरिग्रहाः सिद्धिमन्तः फलसिद्धियुक्ताः तस्य नृपतेर्दशरथस्य सामदान
विधिभेदनिग्रहा इव चत्वार उपाया इव बभुः। विप्रियत इति विधिर्दानमेव विधिः निग्रहो दंडः सूनूनामुपायैर्वधू १
नां सिद्धिभिश्चौपम्यामित्यनुसंधेयं॥५५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

325/1947

ताइति। तान्नराधिपसुताञ्जनककन्यकान्नृपात्मजैः दशरथात्मजैः पुत्रैः च कृतार्थतां कुलशीलवयोरूपादिसाफ
ल्यमगमन्। तेषु ताभिस्तथा किं च स वराणां वधूनां समागमः प्रत्ययानां प्रकृतीनां च योग इव सन्निभातीति स
न्निभः अभवत् पचाद्यच् प्रत्ययः। सनाद्यो येभ्यो विधीयन्ते ताः प्रकृतयः। यथा प्रकृतिप्रत्यययोः सहैका
र्थसाधकत्वं तद्वत्रापीति भावः॥५६॥ एवमिति। एवमानरं तरतनुरागबात्यनिवेशः शिबिरोद्वाहविनये पुत्रकी

तानराधिपसुतान्नृपात्मजैस्ते च ताभिरगमन्कृतार्थतां॥ सोऽभवद्वरवधूसमागमः प्रत्य
यप्रकृतियोगसन्निभः॥५६॥ एवमात्तरतिरात्मसंभवांस्तान्निवेश्य चतुरोऽपि तत्र सः॥
अध्वसु त्रिषु विसृष्टमैथिलः स्वां पुरीं दशरथोऽन्यवर्त्तत॥५७॥ तस्य जातु मरुतः प्रतीपगा
वर्त्मनि ध्वजतरुप्रमाथिनः॥ चिक्लिशुर्भृशतया वरूथिनीमुत्तटा इव नदीरयाः स्थलीं॥५८॥

र्तित इति विश्वः॥ त्रिषध्वसु मार्गेषु सत्सु विसृष्टमैथिलः सन् स्वां पुरीं न्यवर्तत। उद्देशक्रियापेक्षाकर्मत्वं पुयः
॥५७॥ तस्येति। जातु कदाचित्तस्य राज्ञो वर्त्मसु ध्वजा एव तरवस्तान्प्रमथ्नन्तीति ते प्रतीपगाः प्रतिकूल
गामिनो गन्तउत्तटा नदीरयाः स्थलीं अकृत्रिमां भुवमिव जानपदकुहेत्यादिना ङीप्॥ तस्य वरूथिनीं सेनां भृ
शतया भृशं चिक्लिशुः क्लिश्यंति स्म॥५८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

र॰ म्र॰ टी॰ लक्ष्यत इति। तदनंतरं प्रतीपद्यवचानंतरं बद्धंभीमं परिवेषस्य परिधिमंडलं यस्य सः परिवेषस्तु परिधिरूपसूर्यमंडल इत्य स११
१० मरः। रविः वैनतेयशमितस्य गरुडहतस्य भोगिनः सर्पस्य भोगेन कायेन। भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोरि
त्यमरः। वेष्टितः श्च्युतः शिरोभ्रष्टो मणिरिव लक्ष्यत स्म॥ ५९॥ श्येनेति। श्येनपक्षा एव परिधूसराः अलकायासां ताः
सांद्रमेघा एव रुधिराई वासांसि यासां ताः। रजः धूलिरासामस्तीति रजस्वलाः रजः कृष्यसुतीत्यादिना वलच् प्रत्ययः। दि
द्य इति रजस्वला ऋतुमत्यो अंगना इव। स्यात् रजः पुष्पमार्तवमित्यमरः। अवलोकनक्षमा दर्शनार्हा नो बभूवुः। एकत्र दृष्टदोषा

लक्ष्यते स्म तदनंतरं रविर्बद्धभीमपरिवेषमंडलः॥ वैनतेयशमितस्य भोगिनो भोगवेष्टित इ
वच्युतो मणिः॥ ५९॥ श्येनपक्षपरिधूसरालकाः सांद्रमेघरुधिराईवाससः॥ अंगना इव र
जस्वला दिशो नो बभूवुरवलोकनक्षमां॥ ६०॥ भास्करश्च दिशमध्युवास यां तां श्रिताः प्र
तिभयं ववासिरे॥ क्षत्रशोणितपितृक्रियोचितं चोदयंत्य इव भार्गवं शिवाः॥ ६१॥ ॥

दपरत्र शास्त्रदोषादिति विज्ञेयं। अत्र रजो वृष्टिरुत्पात उक्तः॥ ६०॥ भास्करइति भास्करो यां दिशमध्युवास यस्यां दि
शि उषितः। उपान्वध्याङ्वस इति कर्मत्वं तां दिशं श्रिताः शिवा गोमायवः स्त्रियां शिवा भूरिमायुगोमायुमृगधूर्तकाः शृगाल
वंचकक्रोष्टुफेरुफेरवजंबुका इत्यमरः। क्षत्रशोणितेन पितृक्रिया पितृतर्पणं तत्रोचितं परिचितं भार्गवं चोदयंत्यः १०
प्रेरयंत्य इव प्रतिभयं भयंकरं ववासिरे रुरुचुः। वास्तृशब्दे इति धातोर्लिट्। तिरश्चो वासितं रुतमित्यमरः॥ ६१॥ ॥

327
1947

तदिति। तत्प्रतीपपवनादि वैकृतं दुर्निमित्तं प्रेक्ष्य कृत्यवित् कार्यज्ञः क्षितेरीश्वरः शांतिमनर्थनिवृत्तिमधिकृत्य उद्दि
श्य गुरुं वसिष्ठमन्वयुंक्त अपृच्छत्। प्रश्नोनुयोगः पृच्छा चेत्यमरः। सगुरुः तं शुभोदर्कं भावीति तस्य राज्ञो व्यथां अलंघ
यत् लघूकृतवान्॥ ६२॥ तेजस इति। सपदि उत्थितः तेजसो राशिः वाहिनीमुखे सेनामुखे प्रादुरास। यः सैनिकैर्नय
नानि प्रमृज्य चिरात् लक्षणीयाभाविनीया पुरुषाकृतिर्यस्य सः ददृशे इति शेषः॥ ६३॥ पित्र्यमिति। उपवीतं लक्षणं चि
ह्नं यस्य तं पितुरयं पित्र्यः वाघ्रतु पितृवसो यदिति यत् प्रत्ययः। तमंशं च दधौ भार्गवः ससोमचंद्र स्फोधर्मदी

तत्प्रतीपपवनादि वैकृतं प्रेक्ष्य शांतिमधिकृत्य कृत्यवित्॥ अन्वयुंक्त गुरुमीश्वरः क्षितेः स्वंतमि
त्यलघयत्तत द्व्यथां॥ ६२॥ तेजसः सपदि राशिरुत्थितः प्रादुरास किल वाहिनीमुखे॥ यः प्रमृज्य न
यनानि सैनिकैर्लक्षणीयपुरुषाकृतिश्चिरात्॥ ६३॥ पित्र्यमंशमुपवीतलक्षणं मातृकं च धनुरू
र्जितं दधत्॥ यः ससोम इव धर्मदीधितिः सद्विजिह्व इव चंदनद्रुमः॥ ६४॥ युग्मं॥ येन रोषपरुषात्मनः
पितुः शासने स्थितिभिदोपि तस्थुषा॥ वेपमानजननीशिरश्छिदा प्राग जीयत घृणा ततो मही॥ ६५॥ ॥

धितिः सूर्य इव द्विजिह्वः स सर्पश्चंदनद्रुम इव स्थितः॥ ६४॥ येनेति। रोषेण परुष आत्मा बुद्धिर्यस्य तस्य आत्मा जीवे
धृतौ बुद्धिरित्यमरः। तस्य रोषपरुषात्मनः। स्थितिभेदो मर्यादालंघिनोपि पितुः शासने तस्थुषा स्थितेन वेप
मानजननीशिरश्छिदा येन प्राक् घृणा अजीयत। ततोनंतरं मही अजीयत जिता। मातृं हतु क्षत्रवधात् कृतो जु
गुप्सेति भावः॥ ६५॥ ॥ ५॥ ॥ ॥ ५॥ ॥ ॥ ५॥ ॥ ॥ ५॥ ॥ ॥

अक्षेति। योभार्गवः दक्षिणश्रवणसंस्थितेन अक्षबीजवलयेन अक्षमालयाक्षत्रियांतकरणानांक्षत्रियवधा
नांएकविंशतेरेकविंशतिसंख्यायाः व्याजोक्षमालारूपः पूर्वायस्यास्तांगणनामुद्वहन्निवनिबभौ॥६६॥ ता
मिति। पितुर्जमदग्नेर्वधभवेनक्षत्रियकर्तृकवधोद्भवेनमन्युनाक्रोधेनराजवंशानांनिधनाय। निधनंस्यात्कुले
नाशइतिविश्वः। दीक्षितंप्रवृत्तमित्यर्थः। तंभार्गवंस्वांदशांचावलोक्यबालाःस्तनवोयस्यसपार्थिवःविषसाद।
स्वस्यातिदौर्बल्यात्क्षत्रोश्चातिक्रौर्यात्कांदिशिकोभवदित्यर्थः॥६७॥ रामेति। आत्मजेपुत्रेसुदारुणेघोरेअहितेश

अक्षबिजीवलयेननिर्बभौदक्षिणश्रवणसंस्थितेनयः॥ क्षत्रियांतकरणैकविंशतेर्व्याजपूर्वगण
नामिवोद्वहन्॥६६॥ तंपितुर्वधभवेनमन्युनाराजवंशनिधनायदीक्षितं॥ बालसूनुरवलोक्यभार्ग
वंस्वांदशांविषसादपार्थिवः॥६७॥ रामनामइतितुल्यमात्मजेवर्तमानमहितेचदारुणे॥ हृद्यमस्य
भयदायिचाभवद्रत्नजातमिवहारसर्पयोः॥६८॥ अर्घ्यमर्घ्यमितिवादिनंनृपंसोनवेक्ष्यभरता
ग्रजोयतः॥ क्षत्रकोपदहनार्चिषंततःसंदधेदृशमुदग्रतारकां॥६९॥ ॥ ॥ ५ ॥

त्रोचतुल्यमविशेषेणवर्तमानंरामइतिनाम॥ हारसर्पयोर्वर्तमानंरत्नजातंरत्नजातिमिवतस्यदशरथस्यहृद्यंहृदयं
गमंभयदायिभयंकरंचअभवत्॥६८॥ अर्घ्यमिति। सभार्गवः अर्घ्यंअर्घ्यंइतिवादिनंनृपंअनवेक्ष्ययतोयत्र
भरताग्रजःततःतत्रइतराभ्योपिदृश्यतइतिसार्वविभक्तिकस्तसिः। क्षत्रेक्षत्रकुलेविषयेयःकोपदहनोरोषाग्निःतस्या
र्चिषःज्वालामिवस्थितां। ज्वालाभासौनपुंस्यर्चिरित्यमरः। उदग्रातारकाकनीनिकायस्यास्तांतारकाक्ष्णःकनीनि
केत्यमरः। दृशंसंदधे॥६९॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥

329/1947

तेनेति। कार्मुकविषक्तमुष्टिनामशरमंगुलीविवरचारिणंकुर्वतायोद्धुमिच्छतायुयुत्सुनातेनभार्गवेणरुक्तोविगतभी
र्निर्भीकःसन्पुरोगतःअग्रगतःसन्राघवोनिजदे। उक्तःकर्मणिलट्॥७०॥ क्षत्रेति। क्षत्रजंतंक्षत्रजातिंअपकारेण
पितृवधरूपेणवैरि दूषितत्क्षत्रजातंबहुशःएकविंशतिवारान्निहत्यशमंगतोस्मितथापिसुप्तसर्पःदंडघट्टनादिव
तवविक्रमस्यश्रवणादाकर्णनाद्दीपितःरोषंप्रापितोस्मि॥७१॥ मैथिलस्येति। अन्यैःपार्थिवैःअनमितपूर्वंपूर्वमन

तेनकार्मुकविषक्तमुष्टिनाराघवोविगतभीःपुरोगतः॥ अंगुलीविवरचारिणंशरंकुर्वतानिजगदे
युयुत्सुना॥७०॥ क्षत्रजातमपकारवैरिमेतंनिहत्यबहुशःशमंगतः॥ सुप्तसर्पइवदंडघट्टनाद्दी
पितःस्मितवविक्रमश्रवात्॥७१॥ मैथिलस्यधनुरन्यपार्थिवैस्त्वंकिलानमितपूर्वमक्षणोः
॥ तन्निशम्यभवतासमर्थयेवीर्यशृंगमिवभग्नमात्मनः॥७२॥ अन्यदाजगतिरामइत्ययंश
ब्दउच्चरितएवमामगात्॥ व्रीडमावहतिमेससंप्रतिव्यस्तवृत्तिरुदयोन्मुखेत्वयि॥७३॥ ॥

मितंसुखरूपेतिसमासः। अस्यमैथिलस्यधनुस्त्वमक्षणोःक्षततवान्किलेतिवार्त्तायांवार्त्तासंभाव्ययोःकिले
त्यमरः॥ तंधनुर्भंगंनिशम्यआकर्ण्यभवताआत्मनोममवीर्यमेवशृंगंभग्नमिवसमर्थयेमन्ये॥७२॥ अन्यदि
ति। अन्यदान्यस्मिन्कालेजगतिरामइत्ययंशब्दःउच्चरितःसन्मामेवागात्। संप्रतित्वयिउदयोन्मुखेसति
व्यस्तवृत्तिर्विपरीतवृत्तिःअन्यगामीतियावत्। सशब्दोमेव्रीडमावहतिलज्जांकरोति॥७३॥ ॥ ॥

र·भ्टी·
१२

विभ्रतइति। अचलेक्रौंचाद्रावपि अकुंठितं अस्त्रं बिभ्रतो ममसमागसोतुल्यपराधोरिपुर्मतो। कौद्वौ। धेनोः पितृहो स११
मधे। नीवत्सस्यहरणाद्धैहयः कार्तवीर्यस्यकीर्तिमपहर्तुं उद्यतः त्वचावत्सधेनुहरणेभारतश्लोकः। प्रमत्तस्याश्रमान्न
स्यहोमधेन्वाम्सपोवलात्। जहारवत्सं क्रोशंत्याबभंज च महाद्रुमानिति॥७४॥क्षत्रियेति। तेनकारणेनक्रियतनयेन
सौकरणः। क्षत्रियांतस्यकरणोपिविक्रमः त्वयि अजिते मां नावतिनप्रीणाति। तथाहि। पावकस्याग्नेः समहिमाग
ण्यतेयः कक्षतृणेकक्षइवतत्रनस्येवेतिसमभ्यर्थवातिः सागरेपिज्वलनि॥७५॥ विद्धीति। किंच। ऐश्वरं धनुहरे

बिभ्रतोस्त्रमचलेप्यकुंठितं द्वौ मतौ ममरिपू समागसौ॥ तात धेनुहरणाच्च हैहयस्त्वं च कीर्तिमप
हर्तुमुद्यतः॥७४॥ क्षत्रियांतकरणोपि विक्रमस्तेन मामवति नाजिते त्वयि॥ पावकस्य महिमा
सगण्यते कक्षवज्ज्वलति सागरेपि यः॥७५॥ विद्धि चात्तरसमोजसा हरेरैश्वरं धनुरभाजि यत्त्व
या॥ खातमूलमनिलो नदीरयैः पातयत्यपि मृदुस्तटद्रुमं॥७६॥ तन्मदीयमिदमायुधं ज्यया
संगमय्य सशरं विकृष्यतां॥ तिष्ठतु प्रधनमेवमप्यहं तुल्यबाहुतरसा जितस्त्वया॥७७॥ ॥

विष्णोरोजसा बलेनात्तवलं त्वत्तसारं च विद्धि। यद्धनुस्त्वया अभाजि अभंजि। भजतेश्चविणीतिविभाषनलोपः
तथाहि। नदीरयैः खातमूलं अवदारितया दंतद्रुमं मृदुरप्यनिलः पातयति तनः शिशुरपि रौद्रं धनुअनममितिभागवी
तभावः॥७६॥ सहिति। तत्तस्मान्मदीयमिदमायुधं कार्मुकं ज्यया संगमय्य संयोज्य। ल्यपिलघुपूर्वादितिणेरयादेशः
। सशरं त्वया विकृष्यतां प्रधनं रणास्तिष्ठतु प्रधनं तावदास्तामित्यर्थः प्रधनं वारणेरणइतिविश्वः एवमपि मद्धनुकर्षणे १२
पि अहं तुल्यबाहुतरसा समबाहुबलेन तरसाबलरंहसोरित्यमरः। त्वया जितः॥७७॥ ॥ ७ ॥ ॥ ७ ॥

331.
1947

कातरइति। यदि च उद्गतार्चिषा उद्गताग्निशिखा मम परशुधारया तर्जितः कातरो भीतश्चवृथा ज्यानिघातकठिनांगुल
योयस्य सः अभययाचनांजलिः अभयप्रार्थनांजलिबध्यतांनोद्युतावंजलिः पुमानित्यमरः। सोपाणी॥७८॥ एवमि
ति। भीमदर्शने भार्गवे एवं उक्तवति सति राघवः स्मितेन हासेन विकंपिताधरः सन् धनुर्ग्रहणमेव समर्थं उत्तरं प्रत्यपतां
गीचकार॥७९॥ पूर्वेति। पूर्वजन्मनि नारायणावतारे यद्धनुस्तेन समागतः संगतः सरामः अतिमात्रलघुदर्शनः
अत्यंतप्रियदर्शनोभवत्। तथाहि। नवांबुदः केवलः रिक्तोपि सुभगः त्रिदशचापेन इंद्रधनुषा लांछितः चिन्हितः

कातरोसि यदि चोद्गतार्चिषा तर्जितः परशुधारया मम॥ ज्यानिघातकठिनांगुलिर्वृथा बध्यताम
भययाचनांजलिः॥७८॥ एवमुक्तवति भीमदर्शने भार्गवे स्मितविकंपिताधरः॥ तद्धनुर्ग्रहणमेव रा
घवः प्रत्यपद्यत समर्थमुत्तरं॥७९॥ पूर्वजन्मधनुषा समागतः सोतिमात्रलघुदर्शनोभवत्॥ केव
लोपि सुभगो नवांबुदः किंपुनस्त्रिदशचापलांछितः॥८०॥ तेन भूमिनिहितैककोटि तत्कार्मुकं च
बलिनाधिरोपितं॥ प्रापवर्णविकृतिं च भार्गवो दृष्टिधौत इव दामपध्वगः॥८१॥ तावुभावपि परस्प
रास्थितौ वर्धमानपरिहीनतेजसौ॥ पश्यति स्म जनता दिनात्यये पार्वणौ शशिदिवाकराविव॥८२॥

किंपुनः॥८०॥ तेनेति। बलिना तेन रामेण भूमिनिहिता एका कोटिर्यस्य तत्। कर्मणायभवतीतिकार्मुकं धनुश्च कर्मण
उकञित्युकञ्। अधिरोपितं। भूभृतां रिपुर्भार्गवश्च धूमशेषो धूमकेतनः अग्निरवनिः प्रभोनिःस्तेजस्क आसबभूव
। आसेलङ्तप्रतिरूपकमव्ययं॥८१॥ ताविति। परस्परं स्थितौ अन्योन्याभिमुखौ। वर्धमानं च परिहीनं च वर्तिहंद्वः तेजसो
ययोस्तौ उभौ राघवभार्गवौ दिनात्यये सायंकाले पर्वणि भवौ शशिदिवाकराविव जनता जनसमूहः ग्रामजनेत्यादि
नातल्। पश्यति स्म। अत्र राघवस्य शशिना भार्गवस्य भानुनौपम्यं द्रष्टव्यं॥८२॥ ॥ ॥ ॥ ॥ ॥

तमिति। हरस्नुसंनिभः स्कंदसमः कृपयामृदुः राघवः आत्मनिविषये स्खलितवीर्यं कुंठितशार्ङ्गं भार्गवं स्वं स्वकीयं संहितममोघं आशुगं बाणं चावेक्ष्य व्याजहार बभाषे ॥८३॥ नेति। अभिभवत्यपि त्वयि विप्र इति हेतोर्निर्दयं प्रहर्तुं अलं शक्तो नास्मि किं त्वनेन पत्रिणा ते गतिं गमनं हन्मि। उत तव स्वार्जितं लोकं स्वर्गं हन्मि इति स ब्रूहि ॥८४॥ प्रतीति। ऋषिर्भार्गवः तं रामं प्रत्युवाच किमिति। त्वत्तः स्वरूपतः त्वां पुरातनं पुरुषं न वेद्मि इति न किंतु वेद्म्येवेत्यर्थः। किं तु गां गतस्य भुवनमवतीर्णस्य तव वैष्णवं धाम तेजो दिदृक्षुणा मया कोपितश्चासि ॥८५॥ भस्मसादिति। पितृद्वि

तं कृपामृदुरवेक्ष्य भार्गवं राघवः स्खलितवीर्यमात्मनि ॥ स्वं च संहितममोघमाशुगं व्याजहार हरसूनुसंनिभः ॥८३॥ न प्रहर्तुमलमस्मि निर्दयं विप्र इत्यभिभवत्यपि त्वयि ॥ शंस किं गतिमनेन पत्रिणा हन्मि लोकमथ ते मखार्जितं ॥८४॥ प्रत्युवाच तमृषिर्न तत्त्वतस्त्वां न वेद्मि पुरुषं पुरातनं ॥ गां गतस्य तव धाम वैष्णवं कोपितो ह्यसि मया दिदृक्षुणा ॥८५॥ भस्मसात्कृतवतः पितृद्विषः पात्रसाच्च वसुधां ससागरां ॥ आहितो जयविपर्ययोऽपि मे श्लाघ्य एव परमेष्ठिना त्वया ॥८६॥ तद्गतिं मतिमतां वरेप्सितां पुण्यतीर्थगमनाय रक्ष मे ॥ पीडयिष्यति न मां खिलीकृता स्वर्गपद्धतिरभोगलोलुपं ॥८७॥ ॥ ॥

षः पितृवैरिणो भस्मसात्कृतवतः कोपेन भस्मीकुर्वतः विभाषा साति कार्त्स्न्ये इति सातिः ससागरां वसुधां पात्रसात् पात्राधीनं दत्तवतः देयं त्रा चेति। कृतकृत्यस्य मे परमेष्ठिना परमपुरुषेण त्वया आहितो जयविपर्ययः पराजयोऽपि श्लाघ्यः आशास्य ॥८६॥ तदिति। तत् तस्मात्कारणात् हे मतिमतां वर पुण्यतीर्थगमनाय ईप्सितां गतिं रक्ष। किं तु खिलीकृता दुर्गमीकृता स्वर्गपद्धतिः अभोगलोलुपं निस्पृहं मां न पीडयिष्यति। अतस्तामेव जहीत्यर्थः ॥८७॥ । ३२

333/1947

प्रत्यपद्यतेति। राघवः तथेति। प्रतिपद्य तदंगीकृतवान्। प्राङ्मुखः सायकं विसर्ज च। स सायकः सुकृतोऽपि साधुकारिणोऽपि करोतेः क्विप्। भार्गवस्य दुरत्ययः दुरितक्रमः स्वर्गस्य परिघः प्रतिबंधो भवत् ॥८८॥ राघव इति। राघवोऽपि क्षम्यतां इति वदन्। तपोनिधेर्भार्गवस्य चरणौ समस्पृशत्। प्रणनामेत्यर्थः। तथा हि। तरस्विनां बलवतां तरसा बलेन निर्जितेषु शत्रुषु प्रणतिरेव कीर्त्तये भवतीति शेषः ॥८९॥ राजसत्त्वमिति। यदा मातुरागतं मातृकं राजतत्त्वं राजो गुणप्रधानत्वं अवधूय पितुरागतं पित्र्यं शममगमितोऽस्मि। तदा त्वया मम अनपेक्षितत्वात् अनिंदितं फलं स्वर्गदानि ल

प्रत्यपद्यत तथेति राघवः प्राङ्मुखश्च विससर्ज सायकं ॥ भार्गवस्य सुकृतोऽपि सोऽभवत् स्वर्गमार्गपरिघो दुरत्ययः ॥८८॥ राघवोऽपि चरणौ तपोनिधेः क्षम्यतामिति वदन् समस्पृशत् ॥ निर्जितेषु तरसा तरस्विनां शत्रुषु प्रणतिरेव कीर्त्तये ॥८९॥ राजसत्त्वमवधूय मातृकं पित्र्यमस्मि गमितः शमं यदा ॥ नन्वनिंदितफलो मयि त्वया निग्रहोऽप्ययमनुग्रहीकृतः ॥९०॥ साधयाम्यहमविघ्नमस्तु ते देवकार्यमुपपादयिष्यतः ॥ ऊचिवानिति वचः सलक्ष्मणं लक्ष्मणाग्रजमृषिस्तिरोदधे ॥९१॥

क्षणं यस्य सोऽयं निग्रहोऽप्यकारोऽप्यनुग्रहीकृतः ॥९०॥ साधयामीति। निगच्छामि देवकार्यं उपपादयिष्यतः संपादयिनस्ते अविघ्नमस्तु विघ्नाभावोऽस्तु अव्ययं विभक्तीत्यादिनार्थाभावेऽव्ययीभावः सह लक्ष्मणेन सलक्ष्मणः। तेन सहेति तुल्ययोग इति बहुव्रीहिः। लक्ष्मणाग्रजं रामं इति वचः ऊचिवान् उक्तवान् ब्रुवः वचः ऋषिः तिरोदधे। अंतर्दधे ॥९१॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तस्मिन्निति। तस्मिन्भार्गवेगते सति विजयिनरामं पितास्नेहात्परिरभ्य पुनर्जातमेवामन्यत। क्षणं शुक्यस्ये
तिविग्रहः। क्षणशुच स्तस्य दशरथस्य परितोषलाभः संतोषप्राप्तिः। कक्षः शुष्ककारकनवीरुधोरितिविश्वः।
अतः कक्षाग्निना दावानलेन लंघितस्याभिहतस्य तरोर्वृष्टिपातइवाभावात्॥ ९२॥ अथेति। अथईषदसमा
प्तः शर्वशर्वकल्पः। ईषदसमाप्ताविति कल्पः प्रत्ययः। अवनिपालः। कृतारम्या तवाउपकार्या यस्मिन्सः त
स्मिन्पथि कतिचित्शर्वरीरात्राः गमयित्वा मैथिलीदर्शनानामंगनानां लोचनैः कुवलयानियेषां संजा

तन्निपश्यकिलधामवैष्णवेवैष्णवं विदितविष्णुतेजसे॥ स्वस्तिदानमधिकृत्यराक्षरंभार्गवो
थनिजमाश्रमंययौ॥ ९२॥ युग्मं तस्मिन्गते विजयिनं परिरभ्य रामं स्नेहादमन्यत पिता पुनरेव
जात॥ तस्याभवत्क्षणशुचः परितोषलाभः कक्षाग्निलंघिततरोरिव दृष्टिसेकः॥ ९३॥ अथप
थिगमयित्वा कृतरम्योपकार्ये कतिचिदवनिपालः शर्वरीः शर्वकल्पः॥ पुरमविशदयोध्यां
मैथिलीदर्शिनीनां कुवलयितगवाक्षां लोचनैरंगनानां॥ ९४॥ ॥ इति रघुवंशे महा
काव्ये कविश्रीकालिदासकृतौ परशुरामसंवादोनाम एकादशः सर्गः॥ ११॥ ॥ ॥

तानिकुवलयितानि॥ तदस्यसंजातं तारकादिभ्यइति इतच्प्रत्ययः॥ कुवलयितागवाक्षायस्यास्तां पुरमयो
ध्यामविशत्। प्रविष्टवान्॥ ९३॥ ॥ इतिश्रीमहोपाध्यायमल्लिनाथसूरिविरचितायां रघुवंशटीका
यां संजीविनीसमाख्यायां एकादशः सर्गः॥ ११॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

335
1947

श्रीः॥ ॥वंदामहेमहोदंडदोर्दंडौरघुनंदनौ॥ तेजोगलितमार्त्तंड — लोलोकमंडलौ॥१॥ निर्विष्टेति। स्नेह
यंति प्रीणयंति। पुरुषानिति स्नेहाः प चाद्यच्। स्निह्यति येषु पुरुषा इति वा स्नेहाः अधिकरणार्थे घञ् प्रत्ययः।
विषयाः शब्दादयः तएव स्नेहाः निर्विष्टाः भुक्ताः विषयस्नेहाः येन स तथोक्तः। निर्वेशो भृतिभोगयोरिति विश्वः।
दशा योवनावस्था तस्याः अंतं बाधकं उपेयिवान् सदशान्तः उषसि प्रदीपार्चिरिव दीपज्वालेव आसन्नं निर्वाणं मोक्षो
यस्य स तथोक्तः आसीत्। अर्चिपं तु विषयो देशआश्रयो भजनमिति यादवः। विषयस्यादिंद्रियार्थे देशे जनपदे
ति विश्वः। स्नेहस्तैलादिके रसद्रव्ये स्यात् सौहृदेपि चेति विश्वः। दशावर्त्तावस्थायामिति निर्वाणं विनाशो निर्वाणं नि

निर्विष्टविषयस्नेहः सदशांतमुपेयिवान्॥ आसीदासन्ननिर्वाणः प्रदीपार्चिरिवोषसि॥१॥
तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति॥ कैकेयीशंकयेवाह पलितच्छद्मना जरा॥२॥
सा पौरान्पौरकांतस्य रामस्याभ्युदयश्रुतिः॥ प्रत्येकं ह्लादयांचक्रे कुल्येवोद्यानपादपान्॥३॥

वृत्तो मेक्षे विनाशे गजमज्जने इति यादवः॥१॥ तमिति। जरा कैकेयीशंकयेव पलितस्य केशादिशौक्ल्यस्य छद्मना
मिषेण पलितं जरसः शौक्ल्यं केशादाविस्यमरः। कर्णमूलं कर्णोपकंठमागत्य रामे श्रीः। राज्यलक्ष्मीर्न्यस्यतां
निधीतामिति विचर्य रामस्य यौवराज्याभिषेकं चिकीर्षितुं चकांक्षेत्यर्थः॥२॥ सेति। स पौरकांतस्य रामस्याभ्युदय ३
श्रुतिः अभिषेकवार्त्ता कुल्याकृमासरिदित्यमरः। उद्यानपादपानिव पौरान्प्रत्येकं ह्लादयांचक्रे॥३॥ ॥ ७॥

337/1947

तस्येति। क्रूरनिश्चया कैकेयी तस्य रामस्य कल्पितं संभृतं। अभिषेकस्य संभारं उपकरणं शोकोष्णैः पार्थिवाश्रुभिः
दूषयामास स्वर्वैमुख्यमूलेनः राजशोकेन भर्तिबबंधेत्यर्थः॥४॥ सेति। चंड अतिकोपना चंड स्त्वत्यंतकोपनइ
त्यमरः॥ सा भर्त्राश्वासिता अनुनीता तेन भर्त्रा संश्रुतौ इंद्रेणसिक्ता अभिवृष्टा भूर्बिलेवल्मीकादौ मग्नावुरगाविवो
द्वावामोज्जगाद॥५॥ तयोरिति। सा तयोर्वरयोर्मध्ये एकेन वरेण रामं चतुर्दश समाः संवत्सरान्। अत्यंतसंयोगा

तस्याभिषेकसंभारं कल्पितं क्रूरनिश्चया॥ दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः॥४॥
सा किलाश्वासिता चंडी भर्त्रा तत्संश्रुतौ वरौ॥ उद्ववामेंद्रसिक्ता भूर्बिलमग्नाविवोरगौ॥५॥
तयोश्चतुर्दशैकेन रामं प्राव्राजयत्समाः॥ द्वितीयेन सुतस्यैच्छद्वैधव्यैकफलां श्रियं॥६॥
पित्रा दत्तां रुदन्रामः प्राङ्महीं प्रत्यपद्यत॥ पश्चाद्वनाय गच्छेति तदाज्ञां मुदितोग्रहीत्॥७॥
दधतो मंगलक्षौमे वसानस्य च वल्कले॥ ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः॥८॥

द्वितीया प्राव्राजयत्। द्वितीयेन सुतस्य भरतस्य वैधव्यैकफलां स्ववैधव्यमात्रफलां श्रियमैच्छत्। इयेषन रूपभोग
फलामिति भावः॥६॥ पित्रेति। रामः प्राक् पित्रा दत्तां महीं रुदन् प्रत्यपद्यत अंगीचकार स्वस्यागदुःखादिति भा
वः। पश्चाद्वनाय गच्छेत्येवंरूपां तदाज्ञां मुदितोग्रहीत पित्राज्ञाकरणलाभादिति भावः॥७॥ दधत इति। मंगलक्षौमे द
धतः व — वसनस्याच्छादयतश्च तस्य रामस्य समं एकविधं मुखरागं मुखवर्णं जनाः विस्मिता ददृशुः॥८॥ ॥

सइति। सरामः गुरुंपितरंसत्याद्वरदानरूपात् अलोपयन् अभ्रंशयन् सीतालक्ष्मणयोः सखेति विग्रहः ताभ्यां सहि
तः सन् दंडकारण्यं विवेश सतां मनश्च प्रत्येकं विवेशयित्र्यभत्स्यात्सर्वे संतुतः संतुष्टा इतिभावः॥९॥ राजेति।
ताद्वियोगार्तः पुत्रवियोगदुःखितः राजा स्वकर्मणा पुत्रवधरूपेण जातः स्वकर्मजः तं शापं पुत्रशोकं मरणात्मकं
स्मृत्वा शरीरत्यागमात्रेण देहत्यागमात्रेणैव शुद्धिलाभं प्रायश्चित्तमालभत मन्यत इत्यर्थः॥१०॥ विप्रोषिते
ति। विप्रोषिताः कुमारा यस्या तथोक्तं तद्राज्यं अस्तमितेश्वरं अस्तमितः ईश्वरो राजा यस्य तत्तथोक्तं मृत दशरथं र
न्ध्रान्वेषणदक्षाणां द्विषां अभिषर्ताभोग्यवस्तुतां ययौ। आमिषं भोग्यवस्तु निति केशवः॥११॥ अथेति। अथा नाथाः

ससीतालक्ष्मणसखः सत्याद्गुरुमलोपयत्॥ विवेश दंडकारण्यं प्रत्येकं च सतां मन॥९॥ राजापि तद्वियोगा
र्तस्मृत्वा शापं स्वकर्मजं॥ शरीरत्यागमात्रेण शुद्धिलाभममन्यत॥१०॥ विप्रोषितकुमारं तद्राज्यमस्तमिते
श्वरं॥ रंध्रान्वेषणदक्षणां द्विषामामिषतां ययौ॥११॥ अथानाथाः प्रकृतयो मातृबंधुनिवासिनं॥ मौलैरानाय
यामासुर्भरतं स्तंभिताश्रुभिः॥१२॥ श्रुत्वा तथाविधं मृत्युं कैकयीतनयः पितुः॥ मातुर्न केवलं स्वस्याः श्रियोप्यासी
त्पराङ्मुखः॥१३॥ ससैन्यश्चान्वगाद्रामं दर्शितानाश्रमालये॥ तस्य पश्यन्स सौमित्रेरुदश्रुर्वसतिद्रुमान्॥१४॥

प्रकृतयो मात्याः प्रकृतिः सहजे योनावमात्ये परमात्मनीति विश्वः॥ मातृबंधुषु निवासिनं भरतं स्तंभिताश्रुभिः पितृ
मरणमुख्यर्थमिति भा मौलैरानाययमासुः आगमयांचक्रुः॥१२॥ श्रुत्वेति। कैकयीतनयो भरतः पितुः तथाविधं
स्वमातृभर्तृकं मरणं मृत्युं श्रुत्वा स्वमातुः केवलं मातुरेव न किंतु श्रियोपि पराङ्मुखः आसीत्॥१३॥ ससैन्य इति।
स सैन्यो रामम न्वगात् किं कुर्वन् आश्रमालये वनिवासिभि र्दर्शितान् एते रामनिवासा इति रुत्थिता न्स सौमित्रे ल
क्ष्मणसहितस्य रामस्य वसतिद्रुमान् निवासवृक्षान् उदश्रुः रुदन् पश्यन्॥१४॥ ॥५९॥ ॥७॥ ॥

339.
1947

चित्रेति। चित्रकूटवनस्थं तं रामं गुरोः पितुः कथितः स्वर्गतिः कथितपितृमरणः सन्भिन्नस्यर्थः अनुच्छिष्टा संपद्गुणो
त्कर्षो यस्याः सा संपद्भूतो गुणोत्कर्ष इति केशवः तया लक्ष्म्या करणेन निमंत्रयां चक्रे आकृतवान्॥१५॥ सहीति।
सहि भरतः। प्रथमजे अग्रजे रामे कृतश्रीपरिग्रहे सति स्वयंभुवः स्वीकरणात् आत्मानं परिवेत्तारं मेने। राज्यदाराग्नि
होत्राणि यः करोत्यग्रजे स्थिते॥ परिवेत्तासविज्ञेयः परिवेत्तिस्तु पूर्वजः। परिवेत्तानुज्येष्ठे अनूढे दारपरिग्रहादि

चित्रकूटवनस्थं च कथितः स्वर्गतिर्गुरोः॥ लक्ष्म्या निमंत्रयां चक्रे तमनुच्छिष्टसंपदा॥१५॥
सहि प्रथमजे तस्मिन्नकृतश्रीपरिग्रहे॥ परिवेत्तारमात्मानं मेने स्वीकरणाद्भुवः॥ ॥१६॥
तमशक्यमपाक्रष्टुं निदेशात्स्वर्गिणः पितुः॥ ययाचे पादुके पश्चात्कर्तुं राज्याधिदेवते॥१७॥
सविसृष्टस्तथेत्युक्त्वा भ्राता नैवाविशत्पुरीं॥ नंदिग्रामगतस्तस्य राज्यं न्यासमिवाभुनक्॥१८॥

त्यमरः। भूपरिग्रहोपि दारपरिग्रहसम इति भावः॥१६॥ तमिति। स्वर्गिणः पितुर्निदेशात् अपाक्रष्टुं निर्वर्तयितुमश
क्यं तं पश्चाद्राज्याधिदेवते स्वामिन्यौ कर्तुं पादुके ययाचे॥१७॥ स भरतः भ्राता रामेण तथेत्युक्त्वा विसृष्टः सन् पुरीं
मुख्यां नाविशदेव किंतु नंदिग्रामगतः तस्य रामस्य न्यासमिव निक्षेपमिवाभुनक् अपालयत्। न—पमुक्त्वा नित्य
र्थः अन्यथा भुजो जनदन इत्यात्मनेपदप्रसंगात्। भूते लङ्॥१८॥ ॥५९॥ ॥५९॥ ॥५९॥ ॥

दृढेति। ज्येष्ठे दृढभक्तिः राज्यच पराङ्मुखोभवत्। इतिपूर्वोक्तानुष्ठानेमातुः पापस्यप्रायश्चित्तंतदपानोदकंक
र्मकरोदिवेत्युत्प्रेक्षा। दृढभक्तिरित्यत्रभक्तिशब्दस्यस्त्रियाः पुंवदित्यादिनापुंवद्भावोदुर्घटः। अप्रियादिष्वि
तिनिषेधात्। भक्तिशब्दस्यप्रियादिपाठात् दतोदृढंभक्तिरस्येतिनपुंसकपूर्वपदोबहुव्रीहिरितिगुणव्याख्या
नेदृढभक्तिरित्येवमादिषुपूर्वपदस्यविवक्षितत्वात्सिद्धमितिसमाधेयंवृत्तिकारश्च दीर्घनिवृत्तिमात्रपरेदृ
ढभक्तिशब्दलिंगविशेषस्यानुपकारत्वात्स्त्रीत्वमविवक्षितमेवतस्मात्स्त्रीलिंगस्वदृढभक्तिशब्दस्यायंप्रयोग

दृढभक्तिरितिज्येष्ठे राज्यतृष्णापराङ्मुखः॥ मातुःपापस्यभरतः प्रायश्चित्तमिवाकरोत्
॥१९॥ रामोपिसहवैदेह्यावनेवन्येनुव र्तयन्॥ चचारसानुजः शांतोवृद्धेक्ष्वाकुव्रतंयुवा॥२०॥
प्रभावस्तंभितछायमाश्रितः सवनस्पतिं॥ कदाचिदंकेसीतायाः शिश्येकिंचिदिवश्रमात्॥२१॥

इत्यभिप्रायः न्यासकारोपिभोजराजस्तुकर्मसाधनस्यैवभक्तिशब्दस्यप्रियादिष्वितिपाठात्भवानाभक्तिरित्यादौपुं
वद्भावप्रतिषेधः। दृढभक्तिरित्यादौभावेसाधनत्वात्पुंवद्भावसिद्धिः पूर्वपदमेवेत्याहभक्तोपूर्वसाधनायांअन्यत्रसूत्रे
॥१९॥ रामइति। सानुजः शांतोरामोपिवैदेह्यासहवनेवन्येनवनभवेनकंदमूलादिनावर्तयन् वृत्तंकुर्वन्जीवे
न्वृद्धेक्ष्वाकूणांव्रतंवनवासात्मकंयुवायौवनस्थएवचचार॥२०॥ प्रभावेति। सरामः कदाचित्प्रभावेनस्वमहि २
म्नास्तंभितास्थिरीकृताछायायस्यतंवनस्पतिमाश्रितः सन्किंचिदिषत्श्रमादिवसीतायाअंकेशिश्येसुष्वाप॥२१॥ ॥

341.
1947

ऐंद्रिरिति। ऐंद्रिः इंद्रस्यपुत्रोद्विजःपक्षिकाकः तस्याः सीतायाः स्तनौप्रियस्यरामस्योपभोगचिन्हेषुतत्कृतनखक्ष
तेष्वित्यर्थः पुरोभागिनोदोषैकदर्शिनः कर्मपौरुषंभाग्यंदोषैकदृक्पुरोभागीत्यमरः। दुर्लिप्तदोषाधानमाचरन्
कुर्वन्निवनखैर्विददारविलिलेख॥२२॥ तस्मिन्निति। रामयासीतयाबोधितोरामस्तस्मिन्कालेइषितास्त्रंका
शास्त्रंइषिकामुच्यतेइतिहलायुधः। तदास्यन्। अस्यतिस्मअसुक्षेपणेइत्यस्यस्यधातोर्लुङि अस्यातिव
क्तिख्यातिभ्योङितिअङ्प्रत्ययः अस्येतेस्थगितियुगागमः॥ सकाकएकनेत्रस्यव्ययेनतदर्निनत्तस्मात्तस्मा

ऐंद्रिः किलनखैस्तस्याः विददारस्तनौद्विजः॥ प्रियोपभोगचिन्हेषुपौरोभाग्यमिवाचरन्॥२२॥
मृगमांसंततः सीतांरक्षंतीमातपेखलः॥ पक्षतुंडनखाघातैर्बाधेयामसोबलात्॥२३॥ क्षे॰
तस्मिन्नास्थदिषीकास्त्रंरामोरामावबोधितः॥ आत्मानंमुमुचेतस्माद्देकनेत्रव्ययेनसः॥२४॥
रामस्त्वासन्नदेशत्वाद्भरतागमनंपुनः॥ आशंक्योत्सुकसारंगांचित्रकूटस्थलींजहौ॥२५॥
प्रययावातिथेयेषुवसन्नृषिकुलेषुसः॥ दक्षिणांदशमृक्षेषुवार्षिकेष्विवभास्करः॥२६॥

दस्त्रादात्मानंमुमोचमुक्तवान्। मुचतेःकर्तरिलट्। धेनुर्मुमोचेतिवत्प्रत्ययः॥२३॥ रामइति। रामस्त्वासन्नदेश
त्वाद्भरतागमनमाशंक्यउत्सुकसारंगात्कंठितहरिणांचित्रकूटस्थलींजहौतस्याजआसन्नश्चासौदेशश्चे
तिविग्रहः॥२५॥ प्रययाविति। सरामः अतिथिषुसाधुन्यातिथेयानिथ्यातिवसतिस्वयतेर्दर्भितिठप्रत्ययः। तेषुऋषि
कुलेषुऋष्याश्रमेषुकुलंकुल्येगणेदेहेगेहेजनपदेन्वयइतिहेमः। वर्षासुभानिवर्षिकानिवर्षाभ्यष्ठगितिठक्
प्रत्ययः। तेषुऋक्षेषुरात्रिषुभास्करइवसन्दक्षिणांदिशंप्रययौ॥२६॥ ॥ ॥ ॥ ॥ ॥ ॥

बभाविति। तं रामं अनुगच्छंती विदेहाधिपतेः सुता सीता कैकेय्याप्रतिषिद्धापि वारितापि गुणोन्मुखी गुणोत्सुका लक्ष्मीराज्यलक्ष्मीरिव बभौ॥२७॥ अनुसूयेति। सा सीता अनुसूयया अत्रिभार्यया निसृष्टेन दत्तेन गंधेनांगरागेण काननं वनं पुष्पेभ्यउच्चलितानिर्गताषट्पदा यस्मिन्तत्तथाभूतं चकार॥२८॥ संध्येति। संध्याभ्रकपिशो विराधो नाम राक्षसो ग्रहो राहुरिवेंदोस्तस्य रामस्य मार्गवृत्य अवरुध्यातिष्ठत्॥२९॥ स इति। लोक—स्य शोषणशोषकः स राक्षसः तयोः रामलक्ष्मणयोर्मध्येमैथिलीनभोनभस्ययोः श्रावणभाद्रपदयोः अंतरे मध्ये वृष्टिमेव अवग्रहो वर्ष

बभौतमनुगच्छंती विदेहाधिपतेः सुता॥ प्रतिषिद्धापि कैकेय्यालक्ष्मीरिव गुणोन्मुखी॥२७॥
अनुसूयानिसृष्टेनपुण्यगंधेन काननं॥ साचकारांगरागेण पुष्पोच्चलितषट्पदं॥२८॥ ॥
संध्याभ्रकपिशस्तस्य विराधोनामराक्षसः॥ अतिष्ठन्मार्गमावृत्य रामस्येंदोरिव ग्रहः॥२९॥
सजहारतयोर्मध्येमैथिलींलोकशोषणः॥ नभो नभ—स्ययोर्वृष्टिमवग्रह इवांतरे॥३०॥ ॥
तंविनिःपिष्य काकुत्स्थो पुरादूषयतिस्थलीं॥ गंधेनाशुचिनाचेति वसुधायांनिचख्नतुः॥३०॥ ॥

मनिबंधइवजहार। अवग्रहो वृष्टिप्रतिबंध इत्यर्थः। वृष्टिर्वर्षतद्विघातेवग्रहावग्रहौसमावित्यमरः॥३०॥ तमिति। काकुत्स्थस्यगोत्रापत्यंपुमान्सौ काकुत्स्थौ रामलक्ष्मणौ तं विराधं विनिपिष्य हत्वा अशुचिना अपवित्रेण गंधेन स्थलीमाश्रयभुवं पुरादूषयतीति हेतोर्यावत्पुरानिपातयोर्लडिति भविष्यदर्थेलट् वसुधायांनिचख्नतुर्भुविनिक्षिप्तवंतौ॥३१॥ ॥ ४

343
1947

पंचवट्यामिति। ततो रामः कुंभजन्मनोगस्त्यस्य शासनात् पंचानां वटानां समाहारः पंचवटी तद्धितार्थोत्तरपदेति तत्पुरुषः। संख्यापूर्वोद्विगुरिति द्विगुसंज्ञायां द्विगोरिति ङीप्। द्विगुरेकवचनमित्येकवचनं तस्यां पंचवट्यां विंध्याद्रिः प्रकृतौ वृद्धोपूर्वावस्थायामिवानपोढस्थितिरनतिक्रांतमर्यादस्तस्थौ॥३३॥ रावणावरजेति। तत्र पंचवट्यां मदनातुरा रावणावरजा शूर्पणखा राघवं निदाघार्ताधर्मव्यस्ताव्याकुला व्यालीभुजंगी मलयद्रुमं चंदनमिवाभिपदे प्राप॥३२॥ सा सीतासमेति। सा शूर्पणखा सीतासंनिधावेव कथितस्ववंशा सती तं रामं वव्रेव्रतवती। तथाहि। अ

पंचवट्यांततो रामः शासनात्कुंभजन्मनः॥ अनपोढस्थितिस्तस्थौ विंध्याद्रिः प्रकृताविव
॥३१॥ रावणावरजातत्रराघवं मदनातुरा॥ प्रतिपदेनिदाघार्ताव्यालीवमलयद्रुमं॥३२॥
सासीतासंनिधावेवतंवव्रेकथितान्वया॥ अत्यारूढो हि नारीणामकालज्ञोमनोभवः॥३३॥
कलत्रवानहंबाले कनीयांसंभजस्वमे॥ इति रामो वृषस्यंतीं वृषस्कंधः शशासतां॥ ॥३४॥

त्यारूढेति। नारीणां प्रवृद्धो मनोभवः कामः कालज्ञोवसरज्ञो न भवतीति अकालज्ञो हि॥३३॥ कलत्रवानिति। वृषः पुमान्वृषः स्याद्वासवे धर्मे सौरभेयवशुल्कले। पुरास्त्रिस्वेदर्थोः श्रृंग्यां मूषकश्रेष्ठयोरपीति विश्वः॥ वृषं पुरुषमात्मार्थ इच्छंतीति वृषस्यंती कामुकी। वृषस्यंती तु कामुकीत्यमरः। सुप आत्मनः क्यजिति क्यच्प्रत्ययः। अश्वक्षीरवृषेत्यादिना सुगागमः। ततः शतृप्रत्ययः उगितश्चेति ङीप्। अक्षरार्थस्तु वृषस्कंधो रामः वृषस्यंती राक्षसीं हे बाले अहं कलत्रवान् मे कनीयांसं कनिष्ठं भजस्वेति शशास आज्ञापितवान्॥३४॥ ॥५२॥ ॥५१॥ ॥

ज्येष्ठाभिगमनादिति। पूर्वं ज्येष्ठाभिगमनात्तेन लक्ष्मणेनाप्यनभिनंदिता नांगीकृता भूयो रामाश्रया सा राक्षसी उभेकूले भजंतीत्युभयकुलभाक्। उदीवाभूत्। सा द्वियानायाताभ्यां पर्यायेण कूलद्वयगामिनी नदीसदृशुवुरुत्यर्थ इत्यर्थः॥२९॥ संरभमिति त्वं आदौ मत्सकाशं आगमस्त्वमिति न त्वां गतागतं कुर्वंती जानकी हासेति मैथिली हासः क्षणसौम्यां सौम्याकारां तां निवातनिस्तिमितां निश्चलां उदधेर्वेलां अंबुविकृतिं। अंबुपूरमित्यर्थः। अथ्यंबुविकृतो वेलेत्यरः। चंद्रोदय इव संरंभक्षोभं निनाय॥३६॥ फलमिति। श्लोकद्वयेनान्वयः अस्योपहासस्य फलं सद्यः संप्रत्येव प्राप्स्य

ज्येष्ठाभिगमनात्पूर्वं तेनाप्यनभिनंदिता॥ साभूद्रामाश्रया भूयो नदीवोभयकुलभाक्॥२९॥
संरंभं मैथिलीहासः क्षणसौम्यां निनाय तां॥ निवातनिस्तिमितां वेलां चंद्रोदय इवोदधेः॥३६॥
फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य मां॥ मृग्याः परिभवो व्याघ्र्यामित्यवेहि त्वया कृतः॥३७॥
इत्युक्त्वा मैथिलीं भर्तुरंके निर्विशतीं भयात्॥ रूपं शूर्पणखा नाम्नः सदृशं प्रत्यपद्यत॥३८॥
लक्ष्मणः प्रथमं श्रुत्वा कोकिलामंजुवादिनीं॥ शिवाघोरस्वनां पश्चाद्बुबुधे विकृतेति तां॥३९॥

सि मां पश्य त्वया कृत्या कृतमहारूपं करणं व्याघ्र्यां विषये मृग्याः परिभवो मत्यवेहि॥३७॥ इत्युक्त्वेति। भयाद्भर्तुरंकं निर्विशंतीं आलिंगंतीं मैथिलीं इत्युक्त्वा शूर्पणखा कर्कशा नाम्नः स्वसदृशं शूर्पकारनखयुक्तमित्यर्थः। रूपमाकारं प्रत्यपद्यत स्वीचकार अदर्शयदित्यर्थः॥३८॥ लक्ष्मण इति। लक्ष्मणः प्रथमं कोकिलामंजुवादिनीं पश्चाच्छिवाघोरस्वनां तां शूर्पणखां श्रुत्वा तस्याः स्वनं श्रुत्वेत्यर्थः। मुखभागे रवः। श्रूयत इति वत्प्रयोगः विकृता मायाविनीति बुबुधे — ज्ञवान् कर्तरि लिट्॥२९॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

345
1947

पर्णेति। स लक्ष्मणो विधृतासिः कोशादुध्धृतखड्गः सन् क्षिप्रं आशु पर्णशालां प्रविश्य भीषयतीति भीषणां तां द्यादित्वात्स्यु कर्तरि। एतेन भीषणाख्यानां राक्षसीं वैरूप्यस्य पौनरुक्त्यं द्वैगुण्यं लक्षणया तेनायोजयत् योजितवान्। स्वभावत एव विकृतां। तां कर्णादिच्छेदने न पुनरतिविकृतामकरोदित्यर्थः॥४०॥ सेति। सा वक्रनखधारयतीति वक्रनखधारिणी तया वेणुरिव कर्कशपर्वतया ग्रंथितपर्वयोरूपीत्यमरः। अत एवांकुशाकारा इवाकारो यस्याः सा तया अंगुल्यैतौ राघवौ अंबरे स्थिता। व्योम्नि स्थिता अंबरव्योम्नि वाससीत्यमरः। अतर्जयत् अभर्त्सयत्। अर्जिभर्त्स्यौ श्वोरदि

पर्णशालामथ क्षिप्रं विधृतासिः प्रविश्य सः॥ वैरूप्यपुनरुक्तेन भीषणां तामयोजयत्॥४०॥
सा वक्रनखधारिण्या वेणुकर्कशपर्वया॥ अंकुशाकारयांगुल्या तावतर्जयदंबरे॥४१॥ ॥
प्राप्य चाशु जनस्थानं खरादिभ्यस्तथाविधं॥ रामोपक्रममाचख्यौ रक्षःपरिभवं नवं॥४२॥
मुखावयवलूनां तां नैरृता यत्पुरो दधुः॥ रामाभियायिनां तेषां तदेवाभूदमंगलं॥ ॥४३॥

कयोरनुदात्तत्वेपि चक्षिङः ख्याकरयोनानुदात्तनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनात्परस्मैपदमित्युक्तं। इदमारख्यातं भट्टमल्लेन चंद्रिकानर्जयेत् तर्जयती त्यपि च दृश्यते कविभिरिति॥४१॥ प्राप्येति। सा शूर्पणखा जनस्थानं प्राप्य खरादिभ्यो राक्षसेभ्यस्तथाविधं स्वागच्छेदात्मकं उपक्रम्यत इत्युपक्रमः। कर्मणि लट्। रामस्य कर्तुरुपक्रमं रामेणाद्यावुपक्रांतमित्यर्थः। उपज्ञोपक्रमनमिति पुंसकत्वं नवं रक्षसां कर्मभूतानां परिभवमाचख्यौ च॥४२॥ ॥ ॥

मुखेति। नैर्ऋता राक्षसाः नैर्ऋतो यातु राक्षसीत्यमरः। मुखावयवेषु वक्रनासादिषु रूक्षनाछिन्नानां पुरोऽग्रतः अमेव
कुरितिखरदेवरामाभियायिनां राममभिद्रवतां तेषाममंगलमभूत्॥४३॥ उदिति। उदायुधान् उद्यतायुधान्
आपततः आगच्छतो दृप्तास्तान् खरादीन्वीक्ष्य राघवश्चापे विजयस्याशां सां आशां लक्ष्मणे सीतां च निदधे सीतां र
क्षणे नियुज्य स्वयं युद्धाय सन्नद्ध इति भावः॥४४॥ एक इति। दशरथि रामः एकः संतीति यातुधानाः सहस्रशः संती
ति शेषः। तैस्तु स रामः अजीनं यातुधाना यावंतो यावत्संख्या वंतः तावत्संख्याकः ददृशे॥४५॥ असदिति। अथ

उदायुधानापततस्तान्दृप्तान्प्रेक्ष्य राघवः॥ विदधे विजयाशंसां चापे सीतां च लक्ष्मणे॥
॥४४॥ एको दाशरथिः कामं यातुधानाः सहस्रशः॥ ते तु यावंत एवाजौ तावांश्च ददृशे स तैः॥४५॥
असज्जनेन काकुत्स्थः प्रयुक्तमथ दूषणं॥ न चक्षमे शुभाचारः स दूषणमिवात्मनः॥४६॥
तं शरैः प्रतिजग्राह खरत्रिशिरसौ च सः॥ क्रमशस्ते पुनस्तस्य चापात्सममिवोद्ययुः॥४७॥

शुभाचारो रणे साधुर्नारी स हृत्तश्च स काकुत्स्थो। सज्जनेन च प्रयुक्तं प्रेषितं उच्चारितं दूषणं दूषणाख्यं राक्षसं आत्मनो
दूषणं दोषमिव न चक्षमे न सेहे प्रतिर्तुं प्रवृत्त इत्यर्थः॥४६॥ तमिति। स रामः तं दूषणं खरत्रिशिरसौ च शरैः क्रमशः प्र
तिजग्राह प्रतिजहारेत्यर्थः। ते शराः पुनस्तस्य रामस्य चापात् समं युगपदेवोद्ययुः अतिलघुहस्त इत्यर्थः॥४७॥

347/1947

तैरिति। देहमतीत्य भिवागच्छंतीति देहातिगाः। तैर्यथा स्थिता पूर्वसिद्धिर्येषां तैः शितिवेगत्वेन देहभेदात् प्रागिव रुधिर ले
पैरित्यर्थः। शितैस्तैर्बाणैस्त्रयाणां खरादीनां आयुः पीतं रुधिरं तु पतत्रिभिः पीतं॥४८॥ तस्मिन्निति। तस्मिन् रामश
रोत्कृत्ते छिन्ने महति रक्षसां बले उच्छ्रितं उत्थानं क्रियाविशिष्टं प्राणिकबंधेभ्यः शिरोहीन शरीरेभ्यः कबंधोऽस्त्रि
क्रियायुक्तेमपमूर्द्ध कलेवरमित्यमरः। अन्यत्र किंचन न ददृशे कबंधेभ्य इत्यन्यारादितरर्ते इति पंचमी निःशेषं
नमित्यर्थः॥४९॥ सेति। सासुरद्विषां वरूथिनी बाणवर्षिणं रामं योधयित्वा युद्धं कारयित्वा गृध्रच्छायं छाया बा

तैस्त्रयाणां शितैर्बाणैर्यथापूर्वविशुद्धिभिः॥ आयुर्देहातिगैः पीतं रुधिरं तु पतत्रिभिः॥४८॥
तस्मिन्रामशरोत्कृत्ते बले महति रक्षसां॥ उच्छ्रितं ददृशेऽन्यच्च कबंधेभ्यो न किंचन॥४९॥
सा बाणवर्षिणं रामं योधयित्वा सुरद्विषां॥ अप्रबोधाय सुष्वाप गृध्रच्छाये वरूथिनी॥५०॥
राघवास्त्रविदीर्णानां रावणं प्रति रक्षसां॥ तेषां शूर्पणखैवैका दुष्प्रवृत्तिहराभवत्॥५१॥

तुल्य इति नपुंसकत्वं तस्मिंश्च अप्रबोधाय पुनर्बोधाय सुष्वाप ममारेत्यर्थः अत्र सुरतश्रांतानां समाधिर्ध्वन्यते॥५०॥ राघवे
ति। एका शूर्पवन्नानियस्याः सा शूर्पणखा॥ पूर्वपदात्संज्ञायामग इति णत्वं। नखमुखात्संज्ञायामिति ङीप् प्रतिषेध
से खरावणं प्रति राघवास्त्रविदीर्णानां हतानां तेषां रक्षसां खरादीनां दुःप्रवृत्तिं दुर्वार्त्तां हरति प्रापयतीति दुष्प्रवृत्तिहरा
भवत्। हरतेरुद्यमनेऽजित्यच्प्रत्ययः॥५१॥ ॥५२॥ ॥५३॥ ॥५४॥ ॥५५॥ ॥

नियहादिति। स्वसुः शूर्पणखायाः नियहाद्‌गंडच्छेदात् आत्मानां बधूनां खरादीनां वधाच्च कारणाद्धनदानुजेनाव
णेोरामेणदशमुमूर्धसुपदंपादंहितंमेने॥५२॥ रक्षसेति। सरावणः मृगरूपेणरक्षसामारीचेनराघवौ वंचयित्वाम
नार्थपक्षीन्द्रस्यजटायुषस्यभयासनयुद्धरूपेणाक्षणविघ्नितः संजातविघ्नः सीतांजहार॥५३॥ ताविति। सीतान्वेषि
णेोराघवौलूनपक्षं रावणेनछिन्नपक्षंकंठवर्त्तिभिः प्राणैः दशरथस्यप्रीतेः सख्यस्यानृणं हतोविमुक्तं गृध्रंजटायु

नियहात्स्यसुरात्मानांबधाच्चधनदानुजः॥ रामेणनिहितंमेनेपदंदशसुमूर्धसु॥५२॥ ॥
रक्षसामृगरूपेणवंचयित्वासराघवौ॥ जहारसीतांपक्षीन्द्रप्रयासक्षणविघ्नितः॥५३॥
तौसीतान्वेषिणौगृध्रंलूनपक्षमपश्यतां॥ प्राणैर्दशरथप्रीतेरनृणंकंठवर्तिभिः॥५४॥
सरावणहृतांताभ्यांवचसाचष्टमैथिलीं॥ आत्मनःसुमहत्कर्मव्रणैरावेद्यसंस्थितः॥५५॥
तयोस्तस्मिन्नवीभूतपितृव्यापत्तिशोकयोः॥ पितरीवाग्निसंस्कारात्परावर्त्तिरेक्रियाः॥५६॥

पंअपश्यतां दृष्टवंतौदृशेर्लिङ्रूपं॥५४॥ सइति। सजटायुःरावणहृतांमैथिलींताभ्यांरामलक्ष्मणाभ्यांक्रियायद्ग्र
हणमपिसंप्रदानाच्चतुर्थी। वचसावाग्व्यावृत्याचष्टात्मनः सुमहत्कर्मयुद्धरूपंव्रणैराघेवेसंस्थितःमृतः॥५५॥ तयोरिति।
पितृव्यापत्तिमरणेनवीभूतः पितुर्व्यापत्तिमरणंशोकोययोस्तौतयोराघवयोस्तस्मिन्गृध्रेपितरीवाग्निसंस्का
रमारभ्यपराक्रियानिर्वर्त्तेअवर्त्ततस्यपितृवदौर्ध्वदेहिकः वक्रतुरित्यर्थः॥५६॥ ॥ ॥ ॥ ॥

७

349/1947

वधेति। वधेनरामकृष्णेननिर्धूतशापस्यदेवभुवगतस्यकवंधस्यपक्षिविशेषस्योपदेशात्तोराममानवस्यसनेस
मानपदिसख्यानीत्यर्थः दरीकपीसुग्रीवेभुकाहिकपिभेकहरिनामकपिलोचिधित्यमरः। सख्यमुमूर्च्छेववधे।
॥५७॥ सइति। वीरःसरामोवालिनंहत्वाचिरकांक्षितेतसदे वालिस्थानेधातोःस्थानेआदेशमिवआदेशभूतंधात्वं
तरमिवेत्यर्थः सुग्रीवंसन्यवेशयत्स्थापितवान्। अस्तेर्भूरितिअसिधातोःस्थानेआदेशोभूधातुरस्तिकर्यमशेष
समभिव्यक्तोतद्दितिभावः। आदेशानामशब्दांतरस्थानेशब्दाविधीयमानंशब्दांतरमभिधीयते॥५८॥ इतःत

वधनिर्धूतशापस्यकवंधस्योपदेशतः॥ मुमूर्च्छसख्यंरामस्यसमानव्यसनेहरौ॥५७॥ सह
त्वावालिनंवीरस्तत्पदेचिरकांक्षिते॥ धातोःस्थानइवादेशंसुग्रीवंसंन्यवेशयत्॥५८॥ इत
स्ततश्चवैदेहीमन्वेष्टुंभर्तृचोदिताः॥ कपयश्चेरुरार्त्तस्यरामस्येवमनोरथाः॥५९॥ प्रवृ
त्तावुपलब्धायांतस्याःसंपातिदर्शनात्॥ मारुतिःसागरंतीर्णःसंसारमिवनिर्ममः॥६०॥

तश्चेति। वैदेहीमन्वेष्टुंमार्गितुंभ्रात्रासुग्रीवेणचोदिताः कपयोहनुमत्प्रमुखाआर्त्तस्यविरहातुरस्यरामस्यमनोर
थः कामइवइतस्ततश्चेरुःनानादेशेषुबभ्रमुः॥५९॥ प्रवृत्ताविति। संपातिनामाजटायुयोज्यायान्भ्रातातस्यदर्शनात्
तन्मुखादित्यर्थः। तस्याःसीतायाःप्रवृत्तौवार्त्तायांवर्त्तप्रवृत्तिवृत्तांतइत्यमरः। उपलब्धायांसत्यांमारुतस्यापत्यंपुमा
न्मारुतिःहनुमान्सागरंममेत्यव्ययंममतावाचितइतिहोनिर्ममः। निःस्पृहःसंसारमविद्यावंधनमिवअवतीर्ण
स्ततारतरतेःकर्त्तरिक्तः॥६०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

दृष्टेति। लंकायांरावणराजधान्यांविचिन्वतामृगयमाणेनतेनमारुतिनाराक्षसीभिर्वृताजानकीविषवल्लिभिः परितापरिवृतामहौषधिःसंजीविनीलतेवदृष्टा॥ ६१॥ तस्माइति। कपिर्हनुमान्भर्त्तुरामस्यसंबंधिअभिज्ञान प्रत्यभिज्ञानसाधकंअंगुल्यांभवंअंगुलीयकंऊर्मिकंठअंगुलीयकंमूर्मिकाइत्यमरः। जिह्वामूलंगुलीछश् तिछस्यप्रत्ययः। ततस्तस्यैजानक्यैददौअनुष्णैःशीतलैस्तस्याआनंदाश्रुबिंदुभिःप्रत्युद्गतमिवस्थितंभर्त्रभिज्ञा नदर्शनानंदबाष्पोजातइत्यर्थः॥ ६२॥ निर्वाप्येति। सकपिःप्रियस्यरामस्यसंदेशैर्वाचिकैःसीतांनिर्वाप्यसुख

दृष्टाविचिन्वतातेनलंकायांराक्षसीवृता॥ जानकीविषवल्लीभिःपरितेवमहौषधिः॥ ६१॥
तस्यैभर्त्तुरभिज्ञानमंगुलीयंददौकपिः॥ प्रत्युद्गतमिवानुष्णैस्तदानंदाश्रुबिंदुभिः॥ ६२॥
निर्वाप्यप्रियसंदेशैःसीतामक्षवधोद्धतः॥ सददाहपुरींलंकांक्षणसोढारिनिग्रहः॥ ६३॥
प्रत्यभिज्ञानरत्नंचरामायादर्शयत्कृती॥ हृदयंस्वयमायातंवैदेह्याइवमूर्त्तिमत्॥ ॥ ६४॥
श्रुत्वारामःप्रियोदंतंमेनेतत्संगमोत्सुकः॥ महार्णवपरिक्षेपंलंकायाःपरिखालघुं॥ ६५॥

इत्वा अक्षस्यरावणकुमारस्यवधेनोद्धतःदृप्तःसन्क्षणंसोढःअरेरिंद्रजातस्यकर्त्तुर्निग्रहोबंधोब्रह्मास्त्रबंधनरू पोयेनसतथोक्तःसन्लंकांपुरींददाहभस्मीचकार॥ ६३॥ कृतीकृतकृत्यःकपिःस्वयमायातंमूर्त्तिमत्वैदेह्याःहृ दयमिवस्थितंतस्याएवप्रत्यभिज्ञानरत्नंचरामायादर्शयत्॥ ६४॥ श्रुत्वेति। प्रियायाःतदंतंवात्तउदंतःसाधुवार्त्ते योरितिविश्वः। श्रुत्वातस्याःसीतायाःसंगमेउत्सुकोरामःलंकायाःसंबंधीयोमहार्णवएवपरिक्षेपःपरिखा लघुंदुर्गवेष्टनवत्कृतरांमेने॥ ६५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ८

351/1947

सइति। हृदयेवक्षसिन्यस्तस्यधृतस्यमणेरभिज्ञानरत्नस्पर्शोस्पर्शनेननिमीलितमोहितःसरामःअविद्यमानपयो धरसंसर्गाअविद्यमानःस्तनसंसर्गोयस्यास्तांतथोक्तांप्रियायाःआलिंगनेनयानिर्वृत्तिरानंदस्तांप्राप॥ ६६॥ सइति। केवलमेकंभुवःपृष्ठेभूतलेन — तुव्योम्निसंबाधवर्त्मभिःसंकरगामिभिःहरिसैन्यैःकपिबलैरनुद्रुतोअनि तःसचरामोरिनाशायप्रतस्थे॥ ६७॥ निर्दिष्टमिति। उदधेःकुलेनिर्विष्टंतंरामंविभीषयतिशत्रून्इतिविभीषणोरावणात् रजोराक्षसलक्ष्म्यास्नेहात्। बुद्धिज्ञानमाचोदितःप्रेरितइवप्रपेदेप्राप्तः॥ ६८॥ तस्माइति। राघवस्तस्मैविभीषणाय

संप्राप्तहृदयन्यस्तमणिस्पर्शनिमीलितः॥ अपायोधरसंसर्गांप्रियालिंगननिर्वृतिं॥ ६६॥
सप्रतस्थेरिनाशायहरिसैन्यैरनुद्रुतः॥ नकेवलंभुवःपृष्ठेव्योम्निसंबाधवर्त्मभिः॥ ६७॥ ॥
निर्दिष्टामुदधेःकूलेतंप्रपेदेविभीषणः॥ स्नेहाद्राक्षसलक्ष्म्येवबुद्धिमाविश्यचोदितः॥ ६८॥
तस्मैनिशाचरैश्वर्यंप्रतिशुश्रावराघवः॥ कालेखलुसमारब्धाःफलंबध्नंतिनीतयः॥ ६९॥
ससेतुंबंधयामाससंप्लवगैर्लवणांभसि॥ रसातलादिवोन्मग्नंशेषंस्वप्नायशार्ङ्गिणः॥ ॥ ७०॥

प्रत्याउ॰ भ्यांभुवःप्रवस्यकर्त्तरीतिसंप्रदानत्वाच्चतुर्थी। निशाचरैश्वर्यंराक्षसाधिपत्यंप्रतिशुश्रावप्रत्यभिज्ञातवान्। तथाहि। कालेवसरेसमारब्धाःप्रक्रांतानीतयःफलंबध्नंतिगृह्णंतिजनयंतीत्यर्थः॥ ६९॥ सइति। सरामःलवणं क्षारंअंभोयस्यासौलवणांभास्तस्मिंलवणाब्धौप्लवगैःप्रयोज्यैःशार्ङ्गिणोविष्णोःस्वप्नाशयनायरसातलात्पाता लादुन्मग्नमुद्गतंशेषमिवस्थितंसेतुंबंधयामास॥ ७०॥ ॥ ॥ ॥ ॥ ॥ ॥ ।

र॰ म॰ टी॰ ९ तेनेति। तेनसेतुनायथाउत्तीर्यसमुद्रमितिशेषः। पिंगलैः सुवर्णवर्णैः अतएवंद्वितीयप्राकारंकुर्वद्भिरिवस्थि स१२
तैर्वानरैर्लंकांरोधयामास॥७१॥ रणइति। तत्रलंकायां प्लवगानांरक्षसांचभीमोभयंकरः दिग्विजृंभितकाकुस्थ
पौलस्त्ययोः रामरावणयोर्जयघोषणोजयशब्दोयस्मिन्स्तथोक्तोरणः प्रववृते प्रवृत्तः। अस्त्रियांसम— कर
णः लहविग्रहावित्यमरः॥७२॥ पादपेति। किंविधोरणः पादपैर्वृक्षैः राविद्धाभग्नाः परिघाः लोहबद्धकाष्ठानियस्मि
न्सतथोक्तः परिघातनइत्यमरः। शिलाभिर्निष्पिष्टाश्चूर्णितामुद्गराअयोघनायस्मिन्सतथोक्तः द्रुघणोमुद्गरघनावि

तेनोत्तीर्यपथालंकांरोधयामासपिंगलैः॥ द्वितीयंहेमप्रकारंकुर्वद्भिरिववानरैः॥७२॥
रणःप्रववृतेतत्रभीमप्लवगरक्षसां॥ दिग्विजृंभितकाकुस्थपौलस्त्यजयघोषणः॥७३॥
पादपाविद्धपरिघःशिलानिष्पिष्टमुद्गरः॥ अतिशस्त्रनखन्यासःशैलरुग्णमतंगजः॥७४॥
युग्म॥ अथरामशिरछेददर्शनोद्भ्रांतचेतनां॥ सीतांमायेतिशंसंतीत्रिजटासमजीवयत्॥७५॥

त्यमरः। अतिशस्त्राः। शस्त्राण्यतिक्रांतामुखन्यासायस्मिन्सतथोक्तः। शैलैरुग्णाभग्नायस्मिन्सतथोक्तः॥७४
अथेति। अथानंतरंछिद्यतइतिछेदः खंडः शिरएवछेदइतिविग्रहः। रामशिरछेदस्यराक्षसीमायानिर्मितस्यदर्श
नेनोद्भ्रांतचेतनांगतसंज्ञांसीतांत्रिजटानामकाचित्सीतापक्षपातिनीराक्षसीमायाकल्पितंनत्वेतसत्यमितिशंसंती ९
ब्रुवाणाशापृच्छयनीर्नित्यमितिनित्यंनुमागमः समजीवयत्। सांत्वयामास॥७५॥ ॥ ॥ ॥

353/1947

काममिति। सासीतामेनाथःजीवतीतिहेतोः शुचंशोकंकामंविजहौ। किंतुप्राकृपूर्वंतस्यनाथस्यांतंनाशंय
थार्थंमत्वाजीविता। कर्त्तरिक्तः। जीवितव्यस्यासातिहतोलज्जितवती कर्त्तरिक्तः। इत्वाहपिडुःसह्येलज्जाभ
रइतिभावः॥७६॥ गरुडेति। गरुडस्यतार्क्ष्यस्यापातेनागमनेनविश्लिष्टः मेघनादस्येंद्रजितोस्त्रेणनागपाशेन
बंधनंयस्मिन्सतथोक्तः क्षणक्लेशः दाशरथ्योः रामलक्ष्मणयोः स्वप्नवृत्तः स्वप्नावस्थानभूतइवाभवत्॥७६॥
ततइति। ततःपौलस्त्योरावणः शक्त्याकास्त्रनामकेनायुधेनकासुसामर्थ्योः शक्तिरित्यमः लक्ष्मणंवक्षसि

कामंजीवतिमेनाथइतिसाविजहौशुचं॥ प्रा— त्वासत्तुमस्यांतंजीवितास्मीतिलज्जि
ता॥७६॥ गरुडापातविश्लिष्टोमेघनादास्त्रबंधनः॥ दाशरथ्योःक्षणक्लेशःस्वप्नवृत्तइवाभ
वत्॥७६॥ ततोबिभेदपौलस्त्यशक्त्यावक्षसिलक्ष्मणं॥ रामस्त्वनाहतोप्यासीद्विदीर्ण
हृदयःशुचा॥७७॥ समारुतिसमानीतमहौषधिहृतव्यथः॥ लंकास्त्रीणांपुनश्चक्रेवि
लापाचार्यशंकरैः॥७८॥ नादंसमेघनादस्यधनुश्चेंद्रायुधप्रभं॥ मेघस्येवशरत्कालीन
॥ किंचित्पर्यशेषयत्॥७९॥
बिभेदविदारयामास। रामस्त्वनाहतोपिशुचाशोकेनविदीर्णहृदयः आसीत्॥७७॥ सइति। सलक्ष्मणोमारु
तिनामरुत्कृतेहनुमतासमनीतयामहौषध्यासंजीवन्यात्हृतव्यथः सन्पुनर्लंशरैर्लंकास्त्रीणांविलापेपरिदे
वनेविलापः परिदेवनइत्यमरः॥ आचार्यंआचार्यकर्मयोपधाद्गुरुपोत्तमाद्वुञितिवुञ्प्रत्ययः। चक्रेपुनरपिरा
क्षसान्जघानेतिव्यज्यते। नादमिति। सलक्ष्मणः शरत्कालोमेघस्येवमेघनादस्येंद्रजितोनादंचान्यत्रगर्जितं
चेंद्रायुधप्रभंशक्रधनुषःप्रभंधनुश्चकिंचिदल्पमपिनशेषंयथाविशोषितवान् अवधीदित्यर्थः॥७९॥

कुंभकर्ण इति। कपींद्रेण सुग्रीवेण स्वसुः शूर्पणखायाः तुल्यावस्थः नासाकर्णच्छेदेन सदृशः कृतः कुंभकर्णः
टंकेन शिलाभेदकशस्त्रेण छिन्नामनःशिलारक्तकर्णधातुविशेषो यस्य स तथोक्तः। टंकः पाषाणभेदकः धातु
र्मनःशिला ह्वे इति चामरः। शृंगी रवरीव रामं रुरोध॥८०॥ अकाल इति। प्रियस्वप्न इष्टनिद्रो भवान् वृथा भ्रात्रा रा
वणेनाकाले बोधित इति वा असौ कुंभकर्णः रामेषुभिर्दीर्घनिद्रां मरणं प्रवेशितो गमितो यथाकालेषु इष्टवस्तु

कुंभकर्णः कपींद्रेण तुल्यावस्थः स्वसुः कृतः॥ रुरोध रामं शृंगीव टंकच्छिन्नमनःशिलः॥८०॥
कुंभकर्णं महतीं निद्रां त्याजितं रणदुर्जयं॥ रावणः प्रेषयामास युद्धायानुजमात्मनः॥८१॥ क्षे॰
जघान स तदादेशात् कपीनुद्यानने कशः॥ विवेश च पुरीं लंकां समादाय हरीश्वरं॥ ॥८१॥ क्षे॰
अकाले बोधितो भ्रात्रा प्रियस्वप्नो यथा भवान्॥ रामेषुभिरतीवासौ दीर्घनिद्रां प्रवेशितः॥८१॥
इतराण्यपि रक्षांसि पेतुर्वानरकोटिषु॥ रजांसि समरोत्थानि तच्छोणितनदीष्विव॥८२॥ ॥
निर्ययावथ पौलस्त्यः पुनर्युद्धाय मंदिरात्॥ अरावणमरामं वा जगदद्येति निश्चितः॥८३॥ ॥

विनाशकाले दुःखितस्य ततोऽपि भूयिष्टमुपाद्यते तद्वदिति भावः॥८१॥ इतराणीति। इतराण्यपि रक्षांस्यपि वानरकोटिषु स
मरोत्थानि रजांसि तेषां रक्षसां शोणितनदीषु रक्तप्रवाहेष्विव पेतुः निपत्य मृता इत्यर्थः॥८२॥ निर्ययाविति। अथ पौल
स्त्यो रावणो घजगत्॥ अवरावणं रावणशून्यं अरामं रामशून्यं वा भवेदिति निश्चितो निश्चितवान् कर्त्तरि क्तः
विजयमरणयोरन्यतर निश्चयवान् पुनर्युद्धाय मंदिरान्निर्ययौ निर्जगाम॥८३॥ ॥५॥ ॥५॥

355
1447

राम इति। पादाभ्यामततीति पदा— स्तं पादचारिणं वरूथो रथगुप्तिः रथगुप्तिर्वरूथेत्यमरः। अत्र वरूथे भर
थोऽक्षस्तेन वरूथिनं रथिनं लंकेशं चालोक्य पुरंदरः इंद्रः युगं वहंतीति युग्याः तद्वहति रथयुगमिति यत्प्रत्ययः
॥ हरियुग्मं कपिलवर्णाश्वं हरितकपिलेत्रिषु इत्यमरः। रथं तस्मै रामाय प्रतिघाय प्रहितवान्॥८४॥ तमि
ति। राघवो व्योमगंगोर्मिवायुभिराधूतध्वजपटं मार्गवशादिति भावः। जतेव जैत्रः जयशीलः तं जैत्रं जेत्रशब्दात्
स्वनं तात् प्रज्ञादिभ्यश्चेत्स्वार्थेण प्रत्ययः। तं रथं देवस्तृतभुजालंबी मातलिहस्तावलंबः सन् अध्यास्त अधिष्ठि

रामं पदातिमालोक्य लंकेशं च वरूथिनं॥ हरियुग्मं रथं तस्मै प्रजिघाय पुरंदरः॥८४॥
तमाधूतध्वजपटं व्योमगंगोर्मिवायुभिः॥ देवसूतभुजालंबी जैत्रमध्यास्त राघवः॥८५॥
मातलिस्तस्य माहेंद्रमामुमोच तनुच्छदं॥ यत्रोत्पलदलक्लैब्यमस्त्राण्यापुः सुरद्विषां॥८६॥
अन्योन्यदर्शनप्राप्तविक्रमावसरं चिरात्॥ रामरावणयोर्युद्धं चरितार्थमिवाभवत्॥ ॥८७॥

तवान्। असेर्लङ्॥८५॥ मातलिरिति। मातलीरिंद्रसारथिः महींद्रं तनुच्छाद्यते नेनेति तनुच्छदो वर्म पुंसि संज्ञा
यां घः प्रायेणेति घः प्रत्ययः तं तस्य रामस्यामुमोच आसंजयामास यत्र तनुच्छदे सुरद्विषाम स्त्राणि उत्पलदलानां
क्लैब्यं नपुंसकं निरर्थकं तदापुः॥८६॥ अन्येति। चिरादन्योन्यदर्शने न प्राप्तविक्रमावसरो यत्र तत्तु रामरावण
योर्युद्धं अयोधनं चरितार्थं सफलमिवाभवत्। प्राप्तपराक्रमावसरदौर्बल्याद्विफलस्यास्य तल्लाभात्सफलमुत्प्रेक्षा॥८७॥

भुजेनेति। यथाभूतास्त्वैवंयथापूर्वः सुप्सुपेति समासः। यथापूर्वोनभवतीत्यथापूर्वः निहतबंधुत्वात्‌रक्षःपरिवारशू
न्यइत्यर्थः। अतएवैकोपि सन्‌धनदानजोरावणः भुजाश्वमूर्द्धनिश्चोरवपादाश्च भुजमूर्द्धोरुभाण्यंगान्‌ हृद्रैकव
द्भावःतस्यबाहुबहुलाइतोः बहुत्वेयादवःदशास्योविंशतिभुजाश्चतुष्पात्मानमंदिरइतिमातृवंशोमातृसंबंधिनि
वंशावर्गेस्थितइवदृढमनोदृष्टोहि। वंशोवेणौकुलेवर्गेइतिविश्वः अत्ररावणमातुःरक्षोजातित्वात्‌सइगोरक्षोवर्गइ
तिलभ्यते॥ अतश्चैकोप्यनेकरक्षःपरिवृतइवलक्ष्यतइत्यर्थः॥८८॥ जेतारमिति। लोकपालानांइंद्रादीनांजेतारं
॥कर्तृकर्मणोःकृतीतिकर्मणिषष्ठी। मुखैर्शिरोभिरर्चितेश्वरंतुलितकैलाशंउत्क्षिप्यसरुद्रादिंतमेवंशौर्यधैर्यसत्वसं

भुजमूर्द्धोरुबाहुल्यादेकोपिधनदानुजः॥ ददृशेसोयथापूर्वंमातृवंशइवस्थितः॥८८॥
जेतारंलोकपालानांस्वमुखैरर्चितेश्वरं॥ रामस्तुलितकैलासमारातिंबहुमन्यत॥८९॥ ॥
तस्यस्फुरतिपौलस्त्यः सीतासंगमशंसिनि॥ निचखानाधिकः क्रोधाच्छरंसव्येतरेभुजे॥९०॥
रावणस्यापिरामास्तोभित्वाहृदयमाशुगः॥ विवेशभुवमाख्यातुमुरगेभ्यइवप्रियं॥ ॥९१॥ ॥

पन्नंमहावीर्यमरातिंशत्रुंरामोगुणग्राहित्वाज्जेतव्योत्कर्षस्यजेतुःस्वोत्कर्षहेतुत्वाच्चबहुमन्यतसाधुमाद्विक्रम
स्यायंपर्याप्तोविषयइतिबमानमकरोदित्यर्थः। बहिति क्रियाविशेषणं॥८९॥ तस्येति। अधिकक्रोधः पौलस्त्यस्फु
रतिस्पंदमानेअतएवसीतासंगमशंसिनितस्यरामस्यसव्यःइतरोयस्मिन्सव्येतरेदक्षिणेनबहुव्रीहाविति इतरश
ब्दस्यसर्वनामसंज्ञाप्रतिषेधः भुजेशरंनिचखाननिखातवान्‌॥९०॥ रावणस्येति। रामेणास्तःक्षिप्तःआशुगो
बाणः विश्रवसोपत्यंविश्रवःशब्दादपत्यार्थप्रत्ययेसतिविश्रवणरावणाविति विश्रवः। शब्दस्यरावणादेशःतस्यरा
वणस्यापिहृदयंवक्षोभित्वाउरगेभ्यःपातालवासिभ्यःप्रियमाख्यातुमिवभुवंभुविवेश॥९१॥ ॥ ७ ॥

वचसेति। काव्यंवचःसैवास्त्रंअस्त्रेणानिघ्नतोःप्रतिकुर्वतोःतयोरामरावणयोः। वादिनयोःकथकयोरिवान्योन्य
विषयेसरंभोववृधे॥९२॥ विक्रमेति। जयश्रीविक्रमस्यव्यतिहारेणविपर्ययकरणेनतयोर्द्वयोरपिअंतराअन्य
मेतत्‌। विदिर्वेद्याकाराभित्तिमत्तवारणयोरिवसमान्यासाधारणाभूत्‌। नत्वन्यतरनियतेत्यर्थः। अत्रमत्तवार
णयोरित्यत्रान्तरांतरेणयुक्तइतिद्वितीयानभवतीतिप्रसिद्धः॥९३॥ कृतेति। स्वयमस्त्रप्रयोगः कृतंप्रतिकृतंपर
तप्रतीकारः। ताभ्यांप्रीतेसुरासुरैर्यथासंख्यंतयोरामरावणयोर्मुक्तंपुष्पवृष्टिंद्वितीयामितिशेषः। परस्परंशरवृ
ताःनसेहिरे। अहमेवाल्लंकंस्थयेतिवांतरालंएवेतरेतरपुष्पवृष्टिमवारयदित्यर्थः॥९४॥ यइति। अथरक्षोरावणः

वचसैवतयोर्वाक्यमस्त्रमस्त्रेणनिघ्नतोः॥ अन्योन्यजयसंरंभोववृधेवादिनोरिव॥९२॥
विक्रमव्यतिहारेणसामान्याभूद्द्वयोरपि॥ जयश्रीरंतरावेदिर्मत्तवारणयोरिव॥९३॥ ॥
कृतप्रतिकृतप्रीतैस्तयोर्मुक्तांसुरासुरैः॥ परस्परशरव्राताःपुष्पवृष्टिंनसेहिरे॥९४॥ अयःशं
कुचितांरक्षःशतघ्नीमथशत्रवे॥ हृतांवैवस्वतस्येवकूटशाल्मलिमाक्षिपत्‌॥९५॥ ॥ ॥

अयसःशंकुभिःकीलैःचितांकीर्णांशतघ्नीचतुस्तालालोहकंटकसंचितायष्टिरिति केशवः। हृतांकजयध्वजांवैवस्वतकूट
शाल्मलिमिवशत्रवेराघवायअक्षिपत्‌क्षिप्तवान्‌। कूटशाल्मलिरितिव्युत्पत्त्यावैवस्वतपदायागौणीसंज्ञाकूटशाल्म
लिनाममूलप्रकृतिःकूटवृक्षविशेषःरोचनःकूटशाल्मलीरित्यमरः। तत्सदृश्यंगवाःअयाःशंकुचितेत्यनुसंधेयं॥९६॥

357/1947

राघवइति। राघवाः रथं अमामां सुरद्विषां रक्षसां आशां विजयतृष्णां च आशादिशोभोक्ते इति विश्वः अर्द्धचंद्र इव मु
खं येषां तैर्बाणैः कदली च सुखं यथा तथा चिच्छेद अथवा कदल्यामिव सुखं अक्लेशो यस्मिन् कर्मणि तद्यथा इति विग्रहः।
।।९६।। अमोघमिति। एकोद्वितीयः एकधनुर्धरो रामः प्रियाशोकशल्यं तस्य निकर्षणं उद्धारकं यदौषधं तदमो
घं ब्राह्मं ब्रह्मदेवताकं अस्त्रं अभिमंत्रितं बाणं रावणाय तद्वधार्थमित्यर्थः। धनुषि संदधे।।९७।। ।। तद्दिति।

राघवो रथमप्राप्तां तामाशां च सुरद्विषां।। अर्द्धचंद्रमुखैर्बाणैश्चिच्छेद कदलीसुखं।।९६।।
अमोघं संदधे चास्मै धनुष्येकधनुर्धरः।। ब्राह्ममस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधं।।९७।।
तद्व्योम्नि शतधा भिन्नं ददृशे दीप्तिमन्मुखं।। वपुर्महोरगस्येव करालफणमंडलं।।९८।।
तेन मंत्रप्रयुक्तेन निमेषार्द्धादपातयत्।। स रावणशिरःपंक्तिमज्ञातव्रणवेदनां।।९९।।

व्योम्नि शतधा भिन्नं प्रसृतं दीप्तिमंति मुखानि यस्य तद्ब्रह्मास्त्रं करालं भीषणं वा फणमंडलं यस्य तत्तथोक्तं करालो दं
तुरे तुंगे करालो भीषणेपि चेति विश्वः महोरगस्य शेषस्य वपुरिव ददृशे ददृशे।।९८।। तेनेति। स रामो मंत्रयुक्तेन ते
नास्त्रेणाज्ञातव्रणवेदनां अतिशैघ्र्यात् न अनुभूतव्रणदुःखां रावणशिरःपंक्तिं निमेषार्धादपातयत् पातयामास।।९९।। १२

359/1947

बालेति। पतिष्यतः। आसन्नपातस्य रक्षःकायस्य रावणकलेवरस्य छिद्यंत इति छेदः कंठानां छेदाः तेषां परं प
रा पंक्तिः वीचिभिर्भिन्ना नाना कृता अप्सु बालार्कस्य प्रतिमा प्रतिबिंबमिव रराज अर्कस्य बाल विशेषणमारुण्यार्थ
मित्यर्थः।।१००।। मरुतामिति। पतितानि तस्य रावणस्य शिरांसि पश्यतामपि पुनः संधानशंकिना पूर्वं यथा त
था दर्शनादिति भावः। मरुताममराणां मरुतो पवना अमरा विबुधा इत्यमरः मनो नाति विश्वास नातिश्वासं न प्राप।।१०१।।
अथेति। अथ गजमदेन गजगंडसंचारसंक्रांतेन गुरुपक्षैः संचारायमाणपक्षैरलिवृंदैर्लोकपालद्विपानां ऐरावता
दीनां गगनवर्तिनां गंडभित्ती विहायानुगतं सुरभि सुगंधि सुरभिश्चंपके वर्णे जातिफलवसंतयोः। गंधोपसोरभ

बालार्कप्रतिमेवाप्सु वीचिभिन्ना पतिष्यतः।। रराज रक्षःकायस्य कंठच्छेदपरंपरा।।१००।। मरुतां
पश्यतां तस्य शिरांसि पतितान्यपि।। मनो नातिविश्वास पुनःसंधानशंकिनां।।१०१।। अथ
मदगुरुपक्षैर्लोकपालद्विपानामनुगतमलिवृंदैर्गंडभित्तीर्विहाय।। उपनतमणिबंधे मूर्ध्नि
पौलस्त्यशत्रोः सुरभि सुरविमुक्तं पुष्पवर्षं पपात।।१०२।। यंता हरेः सपदि संहृतकार्मुकज्यमापृच्छ्य
राघवमनुष्ठितदेवकार्यं।। नामांकरावणशरांकितकेतुयष्टिमूर्ध्वं रथं हरिसहस्रयुजं निनाय।।१०३।।

य्यां सल्लकी मातृभेदयोः सुगंधौ च मनोज्ञे च वाच्यवत्सुरभिस्मृतमिति विश्वः। सुरैर्विमुक्तं पुष्पवर्षं उपनत
आसन्नो मणिबंधो राज्याभिषेके समयभावी यस्य तस्मिन् पौलस्त्यशत्रो रामस्य मूर्ध्नि पपात इदमेव राज्याभिषेकसू
चकमिति भावः।।१०२।। यंतेति। हरेरिंद्रस्य यंता मातलिः सपदि संहृतकार्मुकज्यं अनुष्ठितं देवकार्यं रावणवधरूपं येन तं रा
घवमापृच्छ्य सामी स्वामी नामांकेन नामरक्षचिह्नेन रावणशरैरंकिता चिह्निता केतुयष्टिर्ध्वजदंडो यस्य तं हरिणां वाजिनां
सहस्रेण युज्यत इति हरिसहस्रयुक् यमानीलेंद्रचंद्रार्कविष्णुसिंहांशुवाजिषु हरिरित्युभयत्राप्यमरः। रथं ऊर्ध्वं निनाय नीतवा
न्।।१०३।।

र॰मू॰टी॰ १२ रघुपतिरिति। रघुपतिरपिजातवेदस्यग्नौ विशुद्धां ज्ञातशुद्धिं प्रियां सीतां प्रगृह्य स्वीकृत्य प्रियसुहृदि विभीष स१२
णे वैरिणो रावणस्य श्रियं राज्यलक्ष्मीं संगमय्य संगतां कृत्वा गमेर्ण्यन्तात्ल्यपि मितां ह्रस्व इति ह्रस्वः॥ ल्यपि
लघुपूर्वादित्ययादेशः। रविसुतसहितेन सुग्रीवयुक्तेन स सौमित्रिणा सलक्ष्मणेन तेन विभीषणेनानुयातो
नुगतः सन् विमानं रत्नमिव मानं रत्नमित्युपमितसमासः। भुजविजितं यद्विमानरत्नं तदारूढः सन् पुरीम

रघुरपि जातवेदोविशुद्धां प्रगृह्य प्रियां प्रियसुहृदि विभीषणे संगमय्य श्रियं
वैरिणः॥ रविसुतसहितेन तेनानुयातः स सौमित्रिणा भुजविजितविमानरत्ना—
रूढः प्रतस्थे पुरीं॥१०४॥ इति रघुवंशे महाकाव्ये रावणवधे द्वादशः सर्गः॥ १२॥

योध्यां प्रतस्थे समवप्रविभ्यः स्थ इत्यात्मनेपदं अत्र प्रस्थानक्रियाकर्मकत्वपि तदंगभूतो देशाक्रियापेक्ष
या कर्मास्तिबद्धातूनांक्रियान्तरोपसर्जनत्वस्वार्थाभिधायकत्वं यथा कुशलान् पचतीत्यादौ अदानक्रियागर्भः
पाको विधीयत इति॥१०४॥ ॥ ॥ इति रघुवंशे महाकाव्य टीकायां द्वादशः सर्गः ॥ १२ ॥ ३३

361

श्री त्रैलोक्यत्राण्योद्धरणीयसिं धोश्चकारं बंधं कदनं रिपूणां॥ पुण्यप्रणामं भक्तवनाभिरामं रामं विरामं विपदामुपासे १ अ
थेति। जानातीतिज्ञः इगुपधेत्यादिना कप्रत्ययः॥ गुणानां ज्ञः रत्नाकरादिवर्ण्यगुणाभिज्ञ इत्यर्थः॥ सरामाभिधानो हरिवि
ष्णुः शब्दो गुणो यस्य तच्छब्दगुणं आत्मनः पदं विपदमाकाशमित्यर्थः॥ वियद्विष्णुपदमित्यर्थः॥ शब्दगुणमाकाशमितिता
र्किकाः विमानेन पुष्पकेण विगाह्यमानः सन् रत्नाकरं विक्ष्य मिथो रहसि मिथोन्योन्यं रहसि योग्ग्रहणं गोष्ठिविश्रंभसूच
र्थं॥ १॥ विदेहीति॥ वैदेही सीते आमलयात् मलयाचलपर्वतपर्यंतं पंचम्यपाङ् परिभिरिति पंचमी॥ पदद्वयं वैतत्व

अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः॥ रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो
हरिरित्युवाच॥ १॥ वैदेहि पश्यामलयाद्विभक्तं मत्सेतुना फेनिलमंबुराशिं॥ छायापथेनेव शर
त्प्रसन्नमाकाशमाविष्कृतचारुतारं॥ २॥

मत्सेतुना विभक्तं द्विधाकृतं॥ अत्राय तसेतुनाद्रस्यर्थः हर्षाधिक्याच्च मद्ग्रहणं॥ फेनिलं फेनवंतं फेनादिलच्चेति लच्
प्रत्ययः॥ क्षिप्रकारी चाहमिति भावः अंबुराशिं छायापथेन स्वातिपथेन विभक्तं शरत्प्रसन्नमाविष्कृतचारुता
रं आकाशमिव पश्य॥ महानयं प्रयासस्त्वदर्थ इति द्वयं॥ छायापथेनाकमज्योतिश्चक्रमध्यवर्ती कश्चित्तिरश्चीनो
वकाशः॥ २॥ ॥५२॥ ॥५२॥ ॥५२॥ ॥५२॥ ॥५२॥ ॥५२॥

गुरोरिति। यियक्षोर्यष्टुमिच्छोर्यजेः सन्नंतादुप्रत्ययः। गुरोः सगरस्य मेध्ये अश्वमेधार्हे तुरंगे कपिलेन मुनिना रसातलं संक्रमिते तदर्थमुर्वीमवदारयद्भिः अस्माकं पूर्वैर्वृद्धैः सगरसुतैरयं समुद्रः परिवर्धितः किलेत्यैतिह्ये। अतो नः पूज्यतर इति भावः। यद्यपि तुरंगहारी शतक्रतुः तथापि तस्य कपिलसमीपे दर्शनात्तस्यैवेति तेषां भ्रांतिः। तन्मूलैव कविना कपिलेनेति निर्दिष्टं तु॥ ३॥ गर्भमिति। अर्कमरीचयोऽस्मादब्धेः रपादानात् गर्भमपूमयं दधति। वृष्ट्यर्थमित्यर्थः। अयमर्थो दिशामसंगतिभिर्गर्भमित्यत्र स्पष्टीकृतः अयं लोकोपकारीति भावः। अत्राब्धौ स्वनिधनानि धनेरत्नेव स्त्र्य

गुरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते तुरंगे॥ तदर्थमुर्वीमवदारयद्भिः पूर्वैः किलायं परिवर्धितो नः॥ ३॥ गर्भं दधत्यर्कमरीचयोऽस्माद्विवृद्धिमत्राश्नुवते वसूनि॥ अबिंधनं वह्निमसौ बिभर्ति प्रल्हादनं ज्योतिरजन्यनेन॥ ४॥ तां तामवस्थां प्रतिपद्यमानं स्थितं दश व्याप्य दिशो महिम्ना॥ विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा॥ ५॥

त इति विश्वः। विवृद्धिमश्नुवते प्राप्नुवंति। संपतवन्ति इत्यर्थः। असौ आपः इंधनं यस्य तं दाहकं वह्निं बिभर्ति। अपकारिण्याश्रितं न त्यजतीति भावः। अनेन प्रल्हादनं ज्योतिश्चंद्रोऽजनि जनितं जनेर्ण्यंतात् कर्मणि लुङ् प्रत्ययः। सौम्य इति भावः॥ ४॥ तां तामिति। तां तामनेकं नित्यवीप्सयोरिति वीप्सायां द्विरुक्तिः अन्यस्था अभा क्षोद्यवस्थां वृष्णुपक्षे। सत्वाद्यवस्थां प्रतिपद्यमानं अजमानं दश दिशो व्याप्य विष्णोरिवास्य रूपं उक्तरीत्या बहुप्रकारत्वाद्व्यापकत्वाच्च ईदृक्तया इयत्तया वा प्रकारतः परिमाणतः अनवधारणीयं दुर्निरूपं॥ ५॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ १

363/1947

नाभीति। कल्पांते युगांते उचिता परिचिता योगः स्वात्मनिष्ठेव निद्रेव निद्रा यस्य स पुरुषो विष्णुर्लोकान् संहृत्य नाभ्यां प्ररूढं यदंबुरुहं तदासनेन पिकमलाश्रयेण प्रथमेन धात्रा दक्षादीनामपि स्रष्टृपितामहेन संस्तूयमानः सन् अमुं अधिशेते। अस्मिन् शेते इत्यर्थः कल्पांतेऽप्यस्तीति भावः॥ ६॥ पक्षेति। पक्षच्छिदा गोत्रभिदा इंद्रेण उभयत्र सत्सूद्विषेत्यादिना क्विप्। आत्तगंधाः हृतगर्वा अभिभूता इत्यर्थः। गंधो गंधक आमोदे लेशे संबंधगर्वयोरिति विश्वः। आत्तगंधोऽभिभूतः स्यादित्यमरः। महीं धारयंतीति महीध्राः पर्वताः मूलविभुजादित्वात्कः प्रत्ययः। शतशः शरण्यं रक्षणं सम

नाभिप्ररूढांबुरुहासनेन संस्तूयमानः प्रथमेन धात्रा॥ अमुं युगांतोचितयोगनिद्रः संहृत्य लोकान्पुरुषोऽधिशेते॥ ६॥ पक्षच्छिदा गोत्रभिदात्तगर्वाः शरण्यमेनं शतशो महीध्राः॥ नृपा इवोपप्लविनः परेभ्यो धर्मोत्तरं मध्यममाश्रयंते॥ ७॥ रसातलादादिभवेन पुंसा भुवः प्रयुक्तोद्वहनक्रियायाः॥ अस्याच्छमंभः प्रलयप्रवृद्धं मुहूर्तवक्त्राभरणं बभूव॥ ८॥

र्थमेनं समुद्रं परेभ्यः शत्रुभ्यः उपप्लविनो भयवंतो नृपाः धर्मोत्तरं धर्मप्रधानं मध्यमं मध्यमभूपालमिव आश्रयंते। अरेश्च विजिगीषोश्च मध्यमो भूम्यनंतर इति कामंदकः। आर्तबंधुरिति भावः॥ ७॥ रसातलादिति। आदिभवेन पुंसा आदिवराहेण रसातलात् प्रयुक्तोद्वहनक्रियायाः। कृतोद्वाहक्रियायाः विवाहक्रिया च व्यज्यते। भुवो देवतायाः प्रलये प्रवृद्धमस्याब्धेरच्छमंभो मुहूर्तं वक्त्राभरणं लज्जारक्षणार्थं मुखावगुंठनं बभूव। तदुक्तं उद्धृतासि वराहेण कृष्णेन शतबाहुना॥ ८॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

मुखेति। अन्येषां पुंसां सामान्या साधारण न भवतीति अनन्य साधारणा कलत्रेषु वृत्ति र्भोगो यस्य स तथोक्तः। इदमेवा
र्थं प्रतिपादयति। तरंगण वाधरस्तस्य दाने समर्पणे दक्षश्चतुरोसौ समुद्रो मुखार्पणेषु प्रकृत्या संत्यादि विशेषणं विना
प्रगल्भाः धृष्टाः सिंधूः समुद्रेण धौ चेति विश्वः स्वयं पिप्यति पाययते च तरंगाधरमिति शेषः न पादम्यामित्यादिना पि
बतेर्ण्यंतात्तन्नित्यं परस्मैपद निषेधः गतिबुद्धीत्यादिना सिंधूनां द्विकर्मकत्वं। दंपत्योर्युगपत्स्वरस्य राधरपानमस्य अ
नन्यसाधारमिति भावः॥९॥ ससत्व मिति। अमीति मयो मत्स्य विशेषाः। तदुक्तं। अस्ति मत्स्यस्ति मिर्नाम शतयोजनमा

मुखार्पणेषु प्रकृति प्रगल्भाः स्वयं तरंगाधरदानदक्षः॥ अनन्यसामान्यकलत्रवृत्तिः पिबत्यसौ पा
ययति च सिंधूः॥९॥ ससत्वमादाय नदीमुखांभः समीलयंतो विवृताननत्वात्॥ अमी शिरोभिस्तिमयः
सरंध्रैः रूर्ध्वं वितन्वंति जलप्रवाहान्॥१०॥ मातंगनक्रैः सहसोत्पतद्भिर्भिन्नान्द्विधा पश्य समुद्रफेना
न्॥ कपोलसंसर्पितया य एषां व्रजंति कर्णक्षणचामरत्वं॥११॥

यत इति विवृताननत्वा द्व्यस्तमुखत्वाद्धेतो राननानि विवृत्येत्यर्थः। ससत्वं मत्स्यादि प्राणि सहितं नदीमुखांभः आदाय
समीलयंतः। चंचुपुटानि घटयंतः सरंध्रैः शिरोभिः जलप्रवाहान् ऊर्ध्वं वितन्वंति जलयंत्र क्रीडा समाधिर्व्यज्यते॥१०॥
मातंगेति। सहसोत्पतद्भिः मत्तंगनक्रा मातंगाकारैर्ग्राहैर्द्विधाभिन्नांश्च समुद्रफेनान्पश्य। ये फेना येषां जलमातंग
नक्राणां कपोलेषु संसर्पितया संसर्पणेन हेतुना कर्णेषु क्षणं च। मरत्वं व्रजंति॥११॥ ॥र्छ॥ ॥र्छ॥ २

365
1947

वेलेति। वेलानिलाय वेलायामनिलं पातुं इत्यर्थः क्रियार्थोपपदेत्यादिना चतुर्थी प्रसृताः निर्गताः महर्मणां विस्फूर्जथुः तु
द्रकः द्वितो धुजित्यथुच् प्रत्ययः तस्मान्निर्विशेषाः दुर्ग्रहभेदा एते भुजंगाः सूर्यांशुसंपर्कात् समृद्ध रागैः प्रवृद्ध कांति
भिः फणरत्नैर्मणिभिर्व्यज्यंते उन्नीयंते॥१२॥ तवेति। तवाधरस्य द्विषु अधर सदृशेष्वित्यर्थः विद्रुमेषु प्रवालेषु सहसो
र्मिवेगात् पर्यस्तं प्रोत्क्षिप्तं ऊर्ध्वांकुरे विद्रुसंप्रवाल प्ररोहैः प्रोतमुखं स्यूतवदनमेतत् शंखानां यूथं वृंदं कथंचित् क्लेशा

वेलानिलाय प्रसृता भुजंगा महोर्मिविस्फूर्जथुनिर्विशेषाः॥ सूर्यांशुसंपर्कसमृद्धरागै
र्व्यज्यंत एते मणिभिः फणस्थैः॥१२॥ तवाधरस्पर्धिषु विद्रुमेषु पर्यस्तमेतत्सहसोर्मिवे
गात्॥ ऊर्ध्वांकुरप्रोतमुखं कथंचित् क्लेशादपक्रामति शंखयूथं॥१३॥ प्रवृत्तमात्रेण
पयांसि पातुमावर्तवेगात् भ्रमता घनेन॥ आभाति भूयिष्ठमयं समुद्रः प्रमथ्यमानो
गिरिणेव भूयः॥१४॥

दपक्रामति विलंघ्य अपसरति इत्यर्थः॥१३॥ प्रवृत्तेति। पयांसि पातुं प्रवृत्त एव प्रवृत्तमानः न तु पीतवान् तेन आव
र्तवेगात् स्यादावर्तोंभसां भ्रम इइद्गत्यमरः। भ्रमता घनेनायं समुद्रो भूयः पुनरपि गिरिणा मंदरेण प्रमथ्यमान
इव भूयिष्ठमत्यंतमाभाति॥१४॥ ५ ५ ५ ५ ५

दूरादिति। अयश्चक्रनिभस्य लवणांबुराशेः दूरात्तन्वी अणुत्वेन वृथा समाना तमालताली वनराजिनी ला वेलतीरभूमिव बद्धचक्रा श्रिता कलंककली रवामालिन्यं रेखेवाभिति मालिन्यं रेखा उपकलंकमारुरिति चंडीमते॥१५॥ वेलानिलेति। हे आयताक्षी। वेलास्याल्ली रतीरयोरिति विश्वः। वेलानिलः केतकरेणुभिः ते आननं संभावयति किमर्थमित्यपेक्षायामुत्प्रेक्षते। बिंबाधरे बद्धतृष्णं मां मंडनेनाभरणक्रियया हानि विलंबः तस्याः अक्षमम सहमानं कर्मणि षष्ठी कलहानिम सहमानं वेत्तीव किंनो चेत् कथं संभावयेदित्यर्थः॥१६॥ एतादृति। एते वयं सैकतेषु भिन्नाभिभिः प

दूरादयश्चक्रनिभस्य तन्वी तमालतालीवनराजिनीला॥ आभाति वेला लवणांबुराशेर्धारानिबद्धेव कलंकरेखा॥१५॥ वेलानिलः केतकरेणुभिस्ते संभावयत्याननमायताक्षी॥ मामक्षमं मंडनकालहानेर्वेत्तीव बिंबाधरबद्धतृष्णं॥१६॥ एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलं पयोधेः॥ प्राप्ता मुहूर्तेन विमानवेगात्कूलं फलावर्जितपूगमालं॥१७॥ कुरुष्व तावत्करभोरु पश्चान्मार्गे मृगप्रेक्षिणि दृष्टिपातं॥ एषा विदूरीभवतः समुद्रात्सकानना निःपततीव भूमिः॥१८॥

र्यस्तानि परितः क्षिप्तानि मुक्तानां पटलानि यस्मिंस्तत्तथोक्तं। फलैरावर्जिता आनमिता पूगमाला यस्मिंस्तत्पयोधेः कूलं विमानवेगात् मुहूर्तेन प्राप्ताः॥१७॥ कुरुष्वेति। मणिबंधादाकनिष्ठं करस्य करभो बहिरित्यमरः। करभ इव करु यस्याः सा करभोरूः उत्तरपदादौपम्ये इत्यूङ्प्रत्ययः तस्याः संबुद्धौ हे करभोरु मृग इव प्रेक्षते इति विग्रहः। हे मृगप्रेक्षिणि तावत् पश्चान्मार्गे लंघिताध्वः नि दृष्टिपातं कुरुष्व। एषा सकानना भूमिर्विदूरीभवतः समुद्रान्निःपततीनिष्क्रामतीव दूरशब्दात् विषिष्यनिष्क्रान्तश्च्विप्रत्ययः॥१८॥

367
1947

क्वचिदिति। हे देवि इदं विमानं पुष्पकं मे मनसोऽभिषो यथा विधिः तथा प्रवर्तते पश्य क्वचित्सुराणां पथा संचरते क्वचित् घनानां क्वचित् पततां पक्षीणां च पथा संचरते। समस्तृतीयायुक्तादिति संपूर्वाच्चरतेरात्मनेपदं॥१९॥ असाविति। महेंद्रद्विपदानगंधः ऐरावतमदगंधी त्रिभिर्मार्गैर्गच्छतीति त्रिमार्गगा गंगा तद्धितार्थेत्यादिना उत्तरपदसमाहारः समासः तस्याः वीचीनां संपर्केण विमर्देन शीतः आकाशवायुर्दिनयौवनोत्थान् मध्याह्नसंभवान् ते मुखे स्वेदलवान् आचामति हरति अनेन सुरपथसंचारो दर्शितः॥२०॥ करेणेति। हे चंडि कोपने चंडस्त्वत्यंतकोपन इत्यमरः। कुतूहलिविनी

क्वचित्पथा संचरते सुराणां क्वचिद्घनानां पततां क्वचिच्च॥ यथाविधो मे मनसोऽभिलाषः प्रवर्तते पश्य तथा विमानं॥१९॥ असौ महेंद्रद्विपदानगंधी त्रिमार्गगावीचिविमर्दशीतः॥ आकाशवायुर्दिनयौवनोत्थानाचामति स्वेदलवान्मुखे ते॥२०॥ करेण वातायनलंबितेन स्पृष्टस्त्वया चंडि कुतूहलिन्या॥ आमुंचतीवाभरणं द्वितीयमुद्भिन्नविद्युद्वलयो घनस्ते॥२१॥ अमी जनस्थानमपोढविघ्नं मत्वा समारब्धनवोटजानि॥ अध्यासते चीरभृतो यथास्वं चिरोज्झितान्याश्रममंडलानि॥२२॥

दार्थिन्या त्वया कन्या वातायने गवाक्षे लंबितेन आवलंबितेन करेण स्पृष्टः उद्भिन्नविद्युद्वलयो घनस्ते द्वितीयं आभरणं वलयमामुंचती वचंडी त्वनेन कोपनशीलत्वात् भीतः। क्षिप्तं त्वां मुंचतीव मेघ इत्युत्प्रेक्षते॥२१॥ अमीति। चीरभृतस्तापसाः जनस्थानमापाट विघ्नं अस्त विघ्नं मत्वा ज्ञात्वा समारब्धाः नवोटजाः पर्णशाला चिरोज्झिता निराक्षसमया दित्यर्थः आश्रमं मंडला आश्रमभागान् यथास्वं स्वभनति क्रम्य अध्यासते अधितिष्ठंति॥२२॥

र० स०टी० सेषेति। सापूर्वानुभूता स्थली एषा दृश्यत इत्यर्थः। यत्र स्थल्यां त्वां विचिन्वता अन्विष्यता मया त्वच्चरणारविंदेनयो विश्लेषो स०१३
४ वियोगः तेन यद्दुःखं तस्मादिव बद्धमौनं निःशब्दं ऊर्व्यां भ्रष्टं एकं नूपुरं मंजीरः मञ्जीरो नूपुरोऽस्त्रियामित्यमरः। अदृश्य
त दृष्टं॥२३॥त्वमिति। हे भीरु भयशालि ऊरु उत इति ऊ ऊत ला सं बुधिः। त्वं रक्षसा रावणेन येन मार्गेण सा र्वविक्ति क
स्तसिः। अपनीता अपहृता तं मार्गं वागिंद्रियाभावाद्वक्तुमशक्नुवं — एता लतावीरुधः लता एता निवावीरु त्गुल्म पु
— इत्यमरः। आवर्जिताः नमिताः पल्लवाः पाणिस्थानीयाः याभिस्ताभिः शाखाभिः स्वावयवभूताभिः रूपयामे दर्शि

सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्यां॥ अदृश्यत त्वच्चरणारविंदविश्लेषदुःखादिव
बद्धमौनं॥२३॥ त्वं रक्षसा भीरु यतोपनीता तं मार्गमेताः कृपया लता मे॥ अदर्शयन्वक्तुमशक्नुवंत्यः
शाखाभिरावर्जितपल्लवाभिः॥२४॥ मृग्यश्च दर्भांकुरनिर्व्यपेक्षास्तवागतिज्ञं समबोधयन्मां॥ व्यापार
यंत्यो दिशि दक्षिणस्यामुत्पक्ष्मराजीनि विलोचनानि॥२५॥ एतद्गिरेर्माल्यवतः पुरस्तादाविर्भवत्यंबरले
खिशृंगं॥ नवं पयो यत्र घनैर्मया च त्वद्विप्रयोगाश्रु समं विसृष्टं॥२६॥ ५५ ५५ ५५॥

यत् हस्तविष्टया दर्शयन्ति इत्यर्थः। शाखापक्षांतरेषु अद्गति विश्वः लतादीनामपि ज्ञानमस्त्येव। तदुक्तं मनुना। अंतः संज्ञा
भवत्येते सुखदुःखसमन्विता इति॥२४॥ मृग्यश्चेति। दर्भांकुरेषु भक्ष्ये षु निर्व्यपेक्षाभिः स्पृहामृग्यो मृगांगनाश्चउत्प ४
क्ष्मराजीनि विलोचनानि दक्षिणस्यां दिशि व्यापारयंत्यः सत्यः तवागतिज्ञं गत्यनभिज्ञं मां समबोधयन् दृष्टिचेष्टयत्व द्गं
तिमेवाबोधयन्नित्यर्थः॥२५॥ एतदिति। माल्यवतो नाम गिरेः अंबरलेखि अभ्रंकषं शृंगमेतत् पुरस्तात् अग्रे आविर्भवति। यत्र
शृंगे घनैर्मेघैर्नवं पयो मया त्वद्विप्रयोगेण यदश्रु तच्च समं युगपद्विसृष्टं। मेघदर्शनादुभयतुल्यमश्रुमुक्तमिति भावः॥२६॥

361
1947

गंधश्चेति। यस्मिन् शृंगे धाराभिर्वर्षधाराभिराहतानां पल्वलानां गंधश्च येऽर्धोद्गत केसरकादंबनीपकुसुमं च स्निग्धाः
मधुराः शिखिनां बर्हिणां शिखी बर्हि बर्हिणा वित्यमरः। केका श्चत्वया विना मे असह्यानि बभूवुः नपुंसकमनपुंसकेनेत्या
दिना नपुंसके कशेषः॥२७॥ पूर्वेति। किंचा हे भीरु यत्र शृंगे पूर्वानुभूतं कंपोत्तरं कंपप्रधानं तवोपगूढं उपगूढनं स्मरता
मया गुहा विसारिणि घनगर्जितानि कथंचिदतिवाहितानि स्मारकत्वेनोद्दीपकत्वात्क्लेशेन मतितानीत्यर्थः॥२८॥ असारेति
यत्र शृंगे विभिन्नकोशैर्विसितकुड्मलैः कंदलैः कदलीपुष्पैः अरुणवर्णैः असारेण धारासंपातेन सिक्तायाः धारासंपा

गंधश्च धाराहतपल्वलानां कादंबमर्धोद्गतकेसरं च॥ स्निग्धाश्च केकाः शिखिनां त्वया मे यस्मिन्नसह्यानि
विना बभूवुः॥२७॥ पूर्वानुभूतं स्मरता च यत्र कंपोत्तरं भीरु तवोपगूढं॥ गुहा विसारिण्यतिवाहितानि मया
कथंचिद्घनगर्जितानि॥२८॥ आसारसिक्तक्षितिबाष्पयोगान्मामक्षिणोद्यत्र विभिन्नकोशैः॥ विडंबमा
नानवकंदलैस्ते विवाहधूमारुणलोचनश्रीः॥२९॥ उपांतवानीरवनोपगूढान्यालक्ष्यपारिप्लवसारसा
नि॥ दूरावतीर्णा पिबतीव खेदादमूनि पंपासलिलानि दृष्टिः॥३०॥ ५५ ५५ ५५ ५५ ५५॥

तेनेन सिक्तायाः धारासंपात आसार इत्यमरः। क्षितेर्बाष्पस्य योगाद्धेतोर्विडंब्यमाना अनुक्रियमाणा ते विवाहधूमेनारुण
लोचनश्रीः सादृश्यात् स्मर्यमाणे ति शेषः मामक्षिणोत् अपीडयत्॥२९॥ उपांतेति। उपांतवानीरवनोपगूढानि पार्श्ववं
जुलवनच्छन्नानि आलक्ष्याः ईषत् दृश्याः पारिप्लवाश्चंचलाः सारसा येषु तानि अमूनि पंपासलिलानि पंपासरोजलानि दू
रादवतीर्णा मे दृष्टिरत एव खेदात् पिबतीव नविरक्तानुत्सहत इत्यर्थः॥३०॥

BOMBAY BRANCH OF THE ASIATIC SOC.

अत्रेति। अत्र पंपासरसि अन्योन्यस्मै दत्तोत्पलकेसराणि। अवियुक्तानि रथांगनाम्नां द्वंद्वानि चक्रमिथुनानि तेन तव दूरांत
रवर्त्तिना मया हे प्रिये सस्पृहं साभिषं लोभात् वीक्षितानि तदानीं ता सस्मार्षमित्यर्थः॥ ३१॥ इमामिति। किंच स्तनवदभिरा
माभ्यां स्तबकाभ्यां अभिनम्रां तन्वीं इमां तटाशोकस्य लतां शाखां अतस्त्वत्प्राप्तिबुध्या त्वमेव प्राप्तेति भ्रांत्या परिरब्धुमा
लिंगितुं कामोयस्य सोहं सौमित्रिणा लक्ष्मणेन बक्षादिभ्यश्च अदुःप्रत्ययः सस्त्रं निषिद्धं तेयंसीतेति विवारितः परिरब्धुं कमङ्
त्यक्तुं काममनो सोरपीति वचनात् मकारलोपः॥ ३२॥ अमूरिति। विमानस्यांतरेषु अवकाशेषु लंबंतिया स्ताःसां कांचनकि

अत्राविमुक्तानि रथांगनाम्नामन्योन्यदत्तोत्पलकेसराणि॥ द्वंद्वानि दूरांतरवर्त्तिना ते मया प्रिये सस्पृह
मीक्षितानि॥ ३१॥ इमां तटाशोकलतां च तन्वीं स्तनाभिरामस्तबकाभिनम्रां॥ त्वत्प्राप्तिबुध्या परिरब्धुका
मः सौमित्रिणा साश्रुरहं निषिद्धः॥ ३२॥ अमूर्विमानांतरलंबिनीनां श्रुत्वा स्वनं कांचनकिंकिणीनां॥ प्र
त्युद्व्रजंतीव खमुत्पतंत्यो गोदावरीसारसपंक्तयस्त्वां॥ ३३॥ एषा त्वया पेशलमध्ययापि घटांबुसंव
र्द्धितबालचूता॥ आह्लादयत्युन्मुखकृष्णसारा दृष्टा चिरात्पंचवटी मनो मे॥ ३४॥

कणीनां स्वर्णक्षुद्रघंटिकानां किंकणी क्षुद्रघंटिकेत्यमरः। स्वनं श्रुत्वा स्वपूर्वशब्दभ्रमात्। खमाकाशमुत्पतंत्यो गोदा
वरीसारसपंक्तयस्त्वां प्रत्युद्व्रजंतीव॥ ३३॥ एषेति। पेशलमध्ययापि भारक्षमयापीत्यर्थः त्वया घटांबुभिः संवर्धिताःबा
लचूता यस्याः सा उन्मुखाः कृष्णसारास्त्वत्संवर्द्धिता एव यस्याः सा चिरात् दृष्टा एषा पंचवटी मे मनः। आह्लादयति। पंचव
टीशब्दः पूर्वमेव व्याख्यातः॥ ३४॥ ५ ५ ५ ५ ५ ५ ५

371/1947

अत्रेति। अत्र पंचवट्यां गोदावरी तस्याः समीपे अनुगोदं अनुर्यत्समयेति अव्ययीभावः मृगयानिवृत्तः तरंगवातेन
विनीतखेदः। रहो रहसी अत्यंतयोगे द्वितीया। तदुत्संगे निषण्णमूर्द्धा सन् अहं वानीरगृहेषु सुप्तः स्मरामि वाक्यार्थः
कर्मसुप्त इतियत्स्तत्समीपेत्यर्थः॥ ३५॥ भ्रूभेदेति। येमुनिः भ्रूभेदमात्रेण भ्रूभंगमात्रेण वनघुषं राजानं मघोनः
पदात् इंद्रत्वात् भ्रंशयांचकार भ्रंशयतिस्म। आविलांभः परिशुद्धिहेतोः कलुषजलप्रसादहेतोस्तस्य मुनेरगस्त्यो
दये शारदि जलं प्रसीदतीत्युक्तं प्राक् असौ भौमः स्थानमेव परिग्रहः आश्रमो यं दृश्यत इति शेषः भौमदृत्यनेन दिव्यो

अत्रानुगोदं मृगयानिवृत्तस्तरंगवातेन विनीतखेदः॥ रहस्त्वदुत्संगनिषण्णमूर्द्धा स्मरामि वानीरगृहेषु सुप्त
सं॥ ३५॥ भ्रूभेदमात्रेण पदान्मघोनः प्रभ्रंशयां यो नघुषं चकार॥ तस्याविलांभःपरिशुद्धिहेतोर्भौमो
मुनेः स्थानपरिग्रहोयं॥ ३६॥ त्रेताग्निधूमाग्रमनिंद्यकीर्त्तेस्तस्येदमाक्रांतविमानमार्गं॥ घ्रात्वा हविर्गंधि
रजोविमुक्तः समश्नुते मे लघिमानमात्मा॥ ३७॥ एतन्मुनेर्मानिनि शातकर्णेः पंचाप्सरो नाम विहारवा
रि॥ आभाति पर्यंतवनं विदूरान्मेघांतरालक्ष्यमिवेंदुबिंबं॥ ३८॥

प्यस्तीत्युक्तं। परिगृह्यत इति परिग्रहः स्थानमेव परिग्रह इति विग्रहः॥ ३६॥ त्रेतेति। अनंद्यकीर्तेस्तस्यागस्त्यस्याक्रांत
विमार्गं हविर्गंधोस्यास्तीति हविर्गंधि त्रेताग्नित्रयं आग्नित्रयमिदं स्येतेत्यमरः। त्रिणि इति त्रेता तारषो दशादित्वा दूत्वं त्रेतिस
यस्तेताग्नय स्तेषां धूमाग्रं भ्रात्वा आघ्राय रजसा गुणाद्विमुक्तो मे आत्मांतःकरणं लघिमानं लत्वगुणं समश्नुते॥ ३७॥
एतदिति। हे मानिनि शातकर्णेर्मुनेः संबंधि पंचाप्सरोनाम पंचाप्सर इति प्रसिद्धं। पंचाप्सरसो यस्मिन्निति विग्रहः पर्यंते
षु वनं यस्य तत् पर्यंतवनं विहारवारि क्रीडासरो इंदुबिंबमिवाभाति॥ ३८॥ ५ ५

र· मू·टी· ६

पुरेति। पुरा पूर्वस्मिन्काले दर्भांकुरमात्रवृत्तिस्तन्मात्राहारैः मृगैः सार्धं सह चरन् सञ्चरन् सन्नृषिः समाधिस्तपसो भीतेन महेन्द्रेण पंचाप्सरसां यौवनं तद्धितार्थेत्यादिना उत्तरपदसमासः। तदेव कूटबंधं कपटयंत्रमुपनीतः उन्मादः कपटयंत्रं स्यादित्यमरः। मृगसाचर्यात् मृगवदेव बद्ध इति भावः॥३९॥ तस्येति। अंतर्हितसौधभाजः अलंतरगतप्रासादगतस्य शातकर्णेः प्रसक्तः संततः संगीतमृदंगघोषो वियद्गतः सन् पुष्पकस्य चंद्रशालाः शिरोगृहाणि। चंद्रशाला शिरोगृहमिति हलायुधः। प्रतिश्रुद्भिः प्रतिध्वानैः मुखराः ध्वनंतीः करोति। स्त्री प्रतिश्रुत् प्रतिध्वान इत्य स·१३

पुरा स दर्भांकुरमात्रवृत्तिश्चरन्मृगैः सार्धमृषिर्मघोना॥ समाधिभीतेन किलोपनीतः पंचाप्सरोयौवनकूटबंधं॥३९॥ तस्यायमंतर्हितसौधभाजः प्रसक्तसंगीतमृदंगघोषः॥ वियद्गतः पुष्पकचंद्रशालाः क्षणः प्रतिश्रुन्मुखराः करोति॥४०॥ हविर्भुजामेधवतां चतुर्णां मध्ये ललाटंतपसप्तसप्तिः॥ असौ तपस्यत्यपरस्तपस्वी नाम्ना सुतीक्ष्णश्चरितेन दांतः॥४१॥

मरः॥४०॥ हविरिति। नाम्ना सुतीक्ष्णः सुतीक्ष्णनामा चरितेन दांतः सौम्यः असौ अपरस्तपस्वी एधवतामिंधनवतां काष्ठं दार्विंधनं त्वेधनमित्यमरः। चतुर्णां अग्नीनां मध्ये ललाटंतपमिति ललाटंतपः असूर्यललाटयोर्दृशितपोरिति खश्प्रत्ययः अरुर्द्विषदित्यादिना मुमागमः। ललाटंतपः सप्तसप्तिः सप्ताश्वः सूर्यो यस्य स तथोक्तः सन् तपश्चरति तपस्यति कर्मणो रोमंथतपोभ्यां वर्तिचरोरिति क्यङ् तपसः परस्मैपदं च वक्तव्यं॥४१॥ ६ ६

373
1947

अमुमिति। अनिर्विंद्रशांकं तपसेति शेषः अमुं सुतीक्ष्णं सहसंप्रति प्रहितानि प्रेषितानि दृष्टयोपेषु तानि व्याजेन केनचिद्विषणार्द्धं खंडे समेशाक इति विश्वः। अर्द्ध इषत्संदर्शितानि मेखलायेषु तानि सुरांगनानामिंद्रप्रेषितानां विभ्रमाः विलासा एव चेष्टितानि किं कर्तुं स्खलयितुं अलं समर्थानि न बभूवुरिति शेषः॥४२॥ एष इति। ऊर्ध्वबाहुरेषः सुतीक्ष्णः अक्षमालेव वलयं यस्य तं मृगाणां कंडूयितारं कंडूपानोदकं कुशा एव सूच्यः तालुना ताभिः कुसूचिलावः तं कर्मण्यणित्यण् एभिर्विशेषणैरर्थशीलसंभृतदयाकमक्षमत्वं वैयात्यते। सव्यादितरं दक्षिणं भुजं मे मम सभाजने संमानेन निमित्ते निमित्तात्कर्मयोगे इति स

अमुं सहसप्रहितक्षणानि व्याजार्धसंदर्शितमेखलानि॥ नालं विकर्तुं जनितेंद्रशंकं सुरांगनाविभ्रमचेष्टितानि॥४२॥ एषोक्षमालावलयं मृगाणां कंडूयितारं कुशसूचिलावं॥ सभाजने मे भुजमूर्ध्वबाहुः सव्येतरं प्राध्वमितः प्रयुंक्ते॥४३॥ वाचंयमत्वात्प्रणतिं ममैषां कंपेन किंचित्प्रतिगृह्य मूर्ध्नः॥ दृष्टिं विमानव्यवधानमुक्तां पुनः सहस्रार्चिषि संनिधत्ते॥४४॥

समीइतः प्राध्वं प्रकृतानुकूलबंधं प्रयुंक्ते। अनुकूलार्थे प्राध्वमित्यमरः अव्ययं चैतत्॥४३॥ वाचंयमत्वादिति। एष सुतीक्ष्णः वाचं यच्छतीति वाचंयमो व्रत इति खच् प्रत्ययः। तस्य भावस्तस्मात् मम प्रणतिं किंचित् मूर्ध्नः कंपेन प्रतिगृह्य स्वीकृत्य विमानेन व्यवधानं तिरोधानं तस्मान्मुक्तां। अपेतापोढमुक्तपतितेत्यादिना पंचमीससमासः दृष्टिं पुनः सहस्रार्चिषि सूर्ये संनिधत्ते सम्यक् निधत्त इत्यर्थः अन्यथा कर्मत्वप्रसंगात्॥४४॥ ६ ६

अद इति। शरणे रक्षणे साधुः शरण्यं पावयतीति पावनमदो दृश्यमानं तपोवनं आहिताग्नेः शरभंगनाम्नो मुनेः संबं
धियः शरभंगश्चिराय चिरमग्निं समिद्भिः संतर्प्य मन्त्रैः पूतां शुद्धां तनुमप्यहौषीत् हुतवान्। अहो तेजः॥
॥४५॥ छायेति। अधुना अस्मिन्काले तस्य शरभंगस्य संबंधिनी अर्थिनां सपर्या अतिथिपूजा छाया अपि विनीतापनीतो ऽध्व
परिश्रमो येस्तेषु प्रभूतानि बहूनि सम्भाव्यानि श्लाघ्यानि फलानि येषां तेषु अभ्रंलिहपादपेषु सत्पुत्रेष्विव स्थिताः सत्
पुत्रैरिव पादपैरनुष्ठीयत इति शेषः॥४६॥ धारेति। धारानिर्झराः पद्मा। धारया सांततत्येन स्वनो वर्गारिंदर्यविमुखं यस्य

अदः शरण्यं शरभंगनाम्नस्तपोवनं पावनमाहिताग्नेः॥ चिराय संतर्प्य समिद्भिरग्निं यो मन्त्रपूतां तनुम
प्यहौषीत्॥४५॥ छायाविनीताध्वपरिश्रमेषु भूयिष्ठसंभाव्यफलेष्वमीषु॥ तस्यातिथीनामधुना सपर्या
स्थिता सुपुत्रेष्विव पादपेषु॥४६॥ धारास्वनोद्गारिदरीमुखोऽसौ शृंगाग्रलग्नांबुदवप्रपंकः॥ बध्नाति मे
बंधुरगात्रि चक्षुर्दृप्तः ककुद्मानिव चित्रकूटः॥४७॥ एषा प्रसन्नस्तिमितप्रवाहा सरिद्विदूरांतरभा
वतन्वी॥ मंदाकिनी भाति नगोपकंठे मुक्तावली कंठगतेव भूमेः॥४८॥

शृंगं शिरं विषाणं च तस्याग्रे लग्नो ऽंबुद एव वप्रपंको वप्रक्रीडासक्तपंको यस्य सः असौ चित्रकूटः हे बंधुरगात्रि उन्नता
नतांगि बंधुरं तून्नतानतमित्यमरः। दृप्तः ककुद्मान् वृषभ इव मे चक्षुः प्रतिबध्नाति नान्यासक्तं करोति॥४७॥ प्रसन्नो
निर्मलः स्तिमितो निष्पंदः प्रवाहो यस्याः सा विदूरस्थांतरस्य मध्यवर्तिवस्त्वाशस्य भावात्तन्वी दूरदेशावस्थितत्वेनावभास
माना मंदाकिनी नाम काचित्चित्रकूटनिकटगा एषा सरित्। नगोपकंठे भूमेः कंठगता मुक्तावलीव भाति। अत्र नगस्य शिरस्त्व
वदुपकंठस्य च गम्यते॥४८॥

375
1947

अयमिति। गिरेः समीपे अनुगिरं गिरेश्च सेनकस्येति समासांतष्टच् प्रत्ययः। स्रुतः जातः स माल्यो यं दृश्यते शोभनो गंधो
यस्य सुगंधि गंधस्येत्वादिना समासांत इकारादेशः यस्य तमालस्य प्रवालपल्लवमादाय मया तेयवांकुरवत्पांडुरे कपो
लशोभिते यः सो ऽवतंसः कर्णावतंसः परिकल्पितः॥४९॥ आनिग्रहेति। अनिग्रहत्रासाः दंडभयरहिता अपि विनीताः
सत्वा जंतवो यस्मिन्नतत्। अपुष्पलिंगात् पुष्परूपनिमित्तं विनैव फलबंधिनः फलग्राहिणः वृक्षा यस्मिन्नतत् अत एवा
विष्कृतो दर्शितस्तरप्रभावः मंत्रैर्मुनेस्तपसः साधनं वनमेतत्॥५०॥ अत्रेति। अत्र वने अनुसूया अत्रिपत्नी सप्त च ते ऋ
षयश्च सप्तर्षयः दिक्संख्ये संज्ञायामिति तत्पुरुषः तेषां हस्तैरुद्धृतानि हेमपद्मानि यस्यास्तां त्र्यंबकमौलिमालां हरशिर

अयं सुजातोऽनुगिरं तमालः प्रवालमादाय सुगंधि यस्य॥ यवांकुरापांडुकपोलशोभी मयावतंसः परिकल्पितस्ते॥४९॥ अनिग्रहत्रासविनीतसत्त्वमपुष्पलिंगात्फलबंधिवृक्षं॥ वनं तपः
साधनमेतदत्रेराविष्कृतोदग्रतरप्रभावं॥५०॥ अत्राभिषेकाय तपोधनानां सप्तर्षिहस्तोद्धृ
तहेमपद्मां॥ प्रवर्तयामास सलिलानुसूया त्रिस्रोतसं त्र्यंबकमौलिमालां॥५१॥ वीरासनैर्ध्यान
जुषामृषीणाममी समाध्यासितवेदिमध्याः॥ निवातनिःकंपतया विभांति योगाधिरूढा इव
शाखिनोपि॥५२॥ ५२

स्रजं त्रिस्रोतसं भागीरथीं तपोधनानामृषीणामभिषेकाय स्नानाय प्रवर्त्तयामास। प्रवाहयामास। किलेत्यैतिह्ये॥५१॥
वीरेति। वीरासनैः ध्यानं जुषंति सेवंत इति ध्यानजुषः। तेषां तैरुपविश्य ध्यायतां ऋषीणां संबंधिनः समाध्यासितवेदि
मध्याः इदं वीरासनस्थानाय अमी शाखिनोपि निःकंपतया योगाधिरूढा इव ध्यानमग्ना इव विभांति। ध्यायंतो पि निश्चलं
गा भवंति। वीरासनेन वसिष्ठः एकपादमथैकस्मिन्विन्यस्योरुणि संस्थितं। इतरस्मिंस्तथा चान्यं वीरासनमुदाहृतं ५२

त्वयेति। त्वया पुरस्तात्पूर्वमुपयाचितः प्रार्थितात्तथा यमायणे। नमस्ते स्कमहावृक्ष पालये मे पतिव्रतां। पातिरितिश्या
मइति प्रतीतः स चायं फलितः सम्यक् पद्मरागो गारुडानां राशिरिव विभाति॥ ५३॥ क्वचिदिति। क्वापि दिग्भिश्च तुर्भिश्लो
कैः प्रयागे गंगायमुनासंगमं वर्णयति। हे अनवद्यांगी यमुनातरंगैर्भिन्नप्रवाहोर्मिश्रो धा गंगा जन्हवी विभाति केवा। क्व
चिप्रदेशे प्रभयालिंपंति संदिह्नतइति प्रभालिपिभिन्नामेंद्रनीलैर्गुंध्रायर्हगुंफितामुक्तामयी यष्टिरिति हारावलीव
विभातीति सर्वत्र संबंधः॥ ५४॥ क्वचित्कादंबसंसर्गवती नीलहंससंस्पृष्टाप्रियंमानसं नाम सरोयेषां तेषां खगानां रा

त्वया पुरस्तादुपयाचितो यः सोयं वटः श्याम इति प्रकाशः॥ राशिर्मणीनां इव गारुडानां संपन्नरागः फलितो
विभाति॥ ५३॥ कुलकं॥ क्वचित्प्रभालिपिभिरिंद्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा॥ अन्यत्र माला सितपंकजा
नामिंदीवरैरुत्खचितांतरेव॥ ५४॥ क्वचित्खगानामिव मानसानां कादंबसंसर्गवतीव पंक्तिः॥ अन्यत्र काला
गरुदत्तपत्रा भक्तिर्भुवश्चंदनकल्पितेव॥ ५५॥ क्वचित्प्रभा चांद्रमसी तमोभिश्छाया विलीनैः शवलीकृतेव॥
अन्यत्र शुभ्रा शारदभ्रलेखा रंध्रेष्विवालक्ष्यनमः प्रदेशाः॥ ५६॥

जहंसानां पंक्तिरिव। राजहंसास्क्तेचंचुचरणे लोहितैः सिता इत्यमरः। अन्यत्र कालागरुणा दत्तपत्ररचितमकरि
कापत्रभुवश्चंदनकल्पिता भक्तिरिव॥ ५५॥ क्वचिदिति। क्वचिच्छायास्कविलीनैस्तमोभिः शवलीकृता चांद्रमसी प्रभा
चांद्रिकेवान्यत्र रंध्रेषालक्ष्यनभःप्रदेशाः शुभ्राः शारदभ्रलेखा शारन्मेघपंक्तिरिव॥ ५६॥ ६५ ॥

377
1447

क्वचिदिति। क्वचित्कृष्णोरगभूषणभस्मांगरागा ईश्वरस्य तनुरिवाभाति। शेषोव्याख्यातः॥ ५७॥ अत्र समुद्रपत्न्योर्गं
गायमुनयोर्जलसंनिपाते संगमे अभिषेकात्स्नानात् पूतात्मनां शुद्धात्मनां तत्त्वज्ञानं पुंसां प्रारब्धशरीरत्यागानंतरं
भूयः पुनः शरीरबंधः शरीरयोगो नास्ति किल अन्यत्र ज्ञानादेव मुक्तिः अत्र स्नानादेव मुक्तिरित्यर्थः अर्थवादश्चायं कि
त्तु ज्ञानमेव सद्यो भवतीत्यर्थः॥ ५८॥ पुरमिति। निषादाधिपतेर्गुहस्य तत्पुरमिदं यस्मिन्मया मणिं विहाय जयास्कबद्धास

कलापकं॥ समुद्रपत्न्योर्जलसंनिपाते पूतात्मनामत्र किलाभिषेकात्॥ तत्त्वावबोधेन विनापि भूय
स्तनुत्यजां नास्ति शरीरबंधः॥ ५८॥ पुरं निषादाधिपतेरिदं तद्यस्मिन्मया मौलिमणिं विहाय॥ जटा
स्कबद्धास्वरुदत्सुमंत्रः कैकेयि कामाः फलितास्तवेति॥ ५९॥ पयोधरैः पुण्यजनांगनानां निर्विष्टहे
मांबुजरेणु यस्याः॥ ब्राह्मं सरः कारणमाप्तवाचो बुद्धेरिवाव्यक्तमुदाहरंति॥ ६०॥ जलानि या तीर
निखातयूपैर्वहत्ययोध्यामनुराजधानीं॥ तुरंगमेधावभृथावतीर्णैरिक्ष्वाकुभिः पुण्यतरीकृतानि ६१

रचिता स्कसतीषु सुमंत्रः हे कैकेयि तव कामा मनोरथाः फलिताः सफला जाता इत्यरुदत् रुदितवानित्यर्थः॥ ५९॥ पयोध
रैरिति। पुण्यजनांगनानां यक्षस्त्रीणां पयोधरैः स्तनैर्निविष्ट उपभुक्तो हेमांबुजरेणुर्यस्य तत्। तत्रेमतः क्रीडंतीत्यर्थः अ
तिबुधेमहत्तत्वस्याव्यक्तं प्रधानमिवौवेरण आप्तस्य परमात्मनः वाचः आप्तवाचो वेदाः। यद्वा बहुव्रीहिणा मुनयः उदा
हरंति प्रचक्षते॥ ६०॥ ॥

र॰भू॰टी॰ जलानीति। यूपः संस्कृतः पशुबंधनार्थो दारुविशेषः तीरनिखातयूपा या तरयूः तुरंगमेधाः अश्वमेधाः तेषु वभृतार्थ स॰१३
९ मिवावतीर्णैरिक्ष्वाकुगोत्रापत्यैः पूर्वैः तद्राजत्वादणो लुक्। पुंण्यतरीकृतानि जलानि अयोध्यां राजधानीं नगरी
मनु समीपे लक्षणेत्थंभूतेत्यादिना कर्मप्रवचनीयत्वात्तद्योगे द्वितीया॥६१॥ वहति प्रापयति॥६१॥ यामिति। यां सरयू
मिमानसंकर्तसैकतं पुलिनं तदेवोत्संगः तत्र यत्सुखं तत्रोचितानां प्राज्यैः प्रभूतैः पयोभिरंबुभिः क्षीरैश्च पयः क्षीरं प
योंबु चेत्यमरः। परिवर्द्धितानां पुष्टानामुत्तरकोशलेश्वराणां सामान्या धात्री साधारणमातरमिव संभावयति धात्री जन

जलानि या तीरनिखातयूपा वहत्ययोध्यामनु राजधानीं॥ तुरंगमेधावभृथावतीर्णैरिक्ष्वाकुभिः पुण्य
तरीकृतानि॥६१॥ यां सैकतोत्संगसुखोचितानां प्राज्यैः पयोभिः परिवर्धितानां॥ सामान्यधात्रीरिव
मानसं मे संभावयत्युत्तरकोशलानां॥६२॥ सेयं मदीया जननीव तेन मान्येन राज्ञा सरयुर्वियुक्ता
॥दूरे वसंतं शिशिरानिलैर्मां तरंगहस्तैरुपगूहतीव॥६३॥ विरक्तसंध्याकपिशं पुरस्ताद्यतो रजः
पार्थिवमुज्जिहीते॥ शंके हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्यः॥६४॥

न्यामलकी वसुमुत्युपमातृ धपीति विश्वः॥६२॥ सेति। मदीया जननी कौसल्येव मान्येन पूज्येन तेन राज्ञा दशरथेनावि ९
युक्ता सेयं सरयूर्दूरे वसंतं प्रवसंतं प्राप्यागच्छंतमित्यर्थः। मां पुत्रभूतं शिशिरानिलैस्तरंगैरेव हस्तैरुपगूहतीव आ
लिंगतीव॥६३॥ विरक्तेति। विरक्ता अतिरिक्ताया संध्या तद्वत्कपिशं तान्नं पृथिव्या इदं पार्थिवं रजो धूलिः पुरस्तादग्रे
यतो यस्मात्कारणादुज्जिहीते उद्गच्छति। तस्माद्धनुरस्यास्तीति हनुमान् शरादीनां चेति दीर्घः तेन कथिता प्रवृत्तिर्
स्मदागमनवार्ता यस्य स भरतः ससैन्यः सन् प्रत्युद्गत इति शंके तर्कयामि अत्र यत्तदोर्नित्यसंबंधात्तच्छब्दलाभः॥६४

379
19117

अस्येति। किंच साधुः सज्जनः स भरतः साधुर्वार्धुषिके चारौ सज्जने चापि वाच्यवदिति विश्वः पलितसंगराय पालितप्र
तिज्ञाय मे मह्यं अनघां अदोषां भागावादनुच्छिष्टां किंतु रक्षितां श्रियं मृधे युद्धे खरादीन् हत्वा निवृत्ताय लक्ष्म
णः संरक्षितामनघां तामिव प्रत्यर्पयिष्यति असत्यं सत्ये त्वद्धा असाद्वयमित्यमरः॥६५॥ असाविति। असौ पदातिः
पादचारी चीरवाताः वल्कवसानो भरतः पश्चात् पृष्ठभागे स्थापिता वाहिनी सेना येन स तथोक्तः सन् वृद्धैश्चेति कपु
गुरुं वसिष्ठं पुरस्कृत्य वृद्धैरमात्यैः सहार्घ्यपाणिः सन् मामभ्युपैति॥६६॥ पित्रेयो भरत पित्रा निसृष्टां दत्तामंकमुत्सं

अद्य श्रियं पालितसंगराय प्रत्यर्पयिष्यत्यनघां स साधुः॥ हत्वा निवृत्ताय मृधे खरादीन् संरक्षितां
त्वामिव लक्ष्मणो मे॥६५॥ असौ पुरस्कृत्य गुरुं पदातिः पश्चादवस्थापितवाहिनीकः॥ वृद्धैरमात्यैः
सह चीरवासा मामर्घ्यपाणिरभितोऽभ्युपैति॥६६॥ पित्रा विसृष्टां मदपेक्षया यः श्रियं युवाप्यंकगता
मभोक्ता॥ इयंति वर्षाणि तया सहाग्रमभ्यस्यतीव व्रतमासिधारं॥६७॥

गं गतामपि यां श्रियं युवापि मदपेक्षया मद्भक्त्या भोक्ता सन् लुन्नातृन् लोके त्यादिना षष्ठीप्रतिषेधः इयंति वर्षाणि ए
तावतो वत्सरान् अत्यंतसंयोगे द्वितीया। तया श्रिया सह स्त्रियेति गम्यते उग्रं दुश्चरं असिधाराव्रतं अभ्यस्यतीव वर्त
यतीव युवा युवत्या सार्धं यन्मुग्धमर्तृवदाचरेत्। अंतर्निहितसंगः स्यादसिधाराव्रतं हि तदिति यादवः। इदं चासि
धाराचंक्रमणतुल्यत्वादसिधाराव्रतमित्युक्तं॥६७॥ ५९ ५९ ५९ ५९

१० २ एतावदिति। दाशरथौ रामेण तावदुक्तवति सति विमानं पुष्पकं विमानं कर्तृ तदीयां रामसंबंधिनीमिच्छां अधिदेवतायामिषेण विदित्वा तले रितं सदिस्यर्थः। स विस्मयाभिर्भृतानुगाभिः प्रकृतिभिः प्रजाभिः रुद्वीक्षितं ज्योतिर्थ्येदावकाशादवततारो॥६८॥तस्मादिति। रामे सेवायां विचक्षणः कुशलो हरीश्वरः सुग्रीव स्तेन दत्तो हस्तो यस्य दत्तहस्तावलंबः सन् खल ज्ञात्वात्पुरसरो विभीषण स्तेनादर्शितेना दूरं महीतलं यस्य तेन भंगिभिर्विच्छित्तिभिरचितस्फटिकसोपानपर्वणा माणतस्मात् यानात् पुष्पकाद वातरत् अवतीर्णवान्।तरतेर्लुङ्॥६९॥इक्ष्वाक्विति। प्रयतः सरा

एतावदुक्तावति दाशरथौ तदीयामिच्छां विमानमधिदेवतयाविदित्वा॥ज्योतिःपथादवततार सविस्मयाभिरुद्वीक्षितं प्रकृतिभिर्भरतानुगाभिः॥६८॥तस्मात्पुरःसर विभीषण दर्शितेन सेवाविचक्षण हरीश्वरदत्तहस्तः॥यानादवातरददूरमहीतलेन मार्गेण भंगिरचितस्फटिकेन रामः॥६९॥इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य संभ्रातरं भरतमर्घ्यपरिग्रहान्ते॥पर्यश्रुरस्वजत मूर्धनि चोपजघ्रौ तद्भक्त्यपोढपितृराज्यमहाभिषेके॥७०॥श्मश्रुप्रवृद्धिजनिताननविक्रियांस्तान्प्लक्षान्प्ररोहजटिलानिव मंत्रिवृद्धान्॥अन्वग्रहीत्प्रणमतः शुभदृष्टिपातैर्वार्तानुयोगमधुराक्षरया च वाचा ७१

तः इक्ष्वाकुवंशगुरवे वशिष्ठाय प्रणम्य अर्घ्यस्य परिग्रहः स्वीकारः तस्यांते पर्यश्रु परिस्रुतानंदबाष्पः सन् सभ्रातरं भरतं अस्वजत आलिंगत्।तस्मिन् रामे भक्त्या अपोढः परिहृतः पितृराज्यमहाभिषेको येन तस्मिन् मूर्धन्युपजघ्रौ च॥७०॥श्मश्र्विति। श्मश्रूणां मुखरोम्णां संस्काराभावादभिवृध्या जनिता आनने विक्रिया विकृतिर्येषां तान् १०
अत एव प्ररोहैः शाखालंबिभिरधोमुखैर्मूलैर्जटीलान् जटावतः प्लक्षान् न्यग्रोधानिवास्थितान् प्रणमतो मंत्रिवृद्धान् शुभैः कृपार्द्रैर्दृष्टिपातैर्वार्तस्यानुप्रयोगेण कुशलप्रश्नेन मधुराक्षरया वाचा चान्वग्रहीत् अनुगृहीतवान्
७१

381 / 1947

दुर्जात इति। अयमे दुर्जातबंधुः दुर्जातिं व्यसनं भोक्तुमिति विश्वः। ऋक्षः हरीश्वरः सुग्रीव एषः समरेषु पुरः प्रहर्ता पौलस्त्यो विभीषण सः इति आदृतेन आदरवता कर्तरि क्तः। रघुणां नंदने रामे कथितौ उभौ विभीषणं सुग्रीवौ लक्ष्मणमनुज्ञमपि व्युत्क्रम्य अलिंगनादिभिः संभाव्य ववंदे ७२ सौमित्रिणेति। तदनु सुग्रीवादिवंदनानंतरं सभरतः सौमित्रिणा संसस्जे संगतः सृज विसर्गे दैवादिकात् कर्तरि लिट्। नम्रशिरसं प्रणतमेनं सौमित्रिमुत्थाप्य भृशं गाढमालिलिंग। किं कुर्वन् रूढेंद्रजित्प्रहरणव्रणैः कर्कशौ नास्य सौमित्रेरुरस्थ भुजमध्यं स्वयं श्लिष्यपीडयन् श्लिष्यतिरयं सकर्मकः श्लि

दुर्जातबंधुरयमृक्षहरीश्वरो मे पौलस्त्य एष समरेषु पुरःप्रहर्ता॥इत्यादृतेन कथितौ रघुनंदनेन व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववंदे॥७२॥सौमित्रिणा तदनु संससृजे स चैनमुत्थाप्य नम्रशिरसं भृशमालिलिंग॥रूढेंद्रजित्प्रहरणव्रणकर्कशेन क्लिश्यन्निवास्य भुजमध्यमुरस्थलेन।७३।रामाज्ञया हरिचमूपतयस्तदानीं कृत्वा मनुष्यवपुरारुरुहुर्गजेंद्रान्॥तेषु क्षरत्सु बहुधा मदवारिधाराः शैलाधिरोहणसुखान्युपलेभिरे ते ७४

भ्राति भुवनत्रयमिति दर्शनात् ननु रामायणे ततो लक्ष्मणमासाद्य वैदेहिं च परंतप।अभिवाद्य ततः प्रीतो भरतो नामवाग्रवीदिति भरतस्य कानिष्ठ्यं प्रतीयते किमर्थं ज्येष्ठमवलंब्य अनार्जवेन श्लोको व्याख्याता तः सत्यं रामायणे श्लोकस्य टीकाकारोक्तः श्रूयते। ततो लक्ष्मणमासाद्येत्यादि श्लोके आसदनं लक्ष्मणवैदेह्योः अभिवादनं तु वैदेह्या एव अन्यथा पूर्वोक्तिं भरतस्य ज्येष्ठं विरुध्यतेति॥७३॥रामेतीति तदानीं हरीचमूपतयः रामाज्ञया मनुष्यवपुः कृत्वा गजेंद्रानारुरुहुः बहुधा मदवारिधाराः क्षरत्सु तेषु गजेंद्रेषु ते कपियूपाः शैलाधिरोहणसुखा उपलेभिरे अनुबभूवुः॥ ७४॥ ६२

सानुप्लव इति। सानुप्लवः सानुचरः। अभिसारस्त्वनुसरः सहायोऽनुप्लवोऽनुग इति यादवः। क्षणदाचराणां प्रभुर्विभीषणोऽपि प्रभवत्यस्मादिति प्रभवो जनको दशरथः प्रभवो यस्य स दशरथप्रभवो रामः तेनानुशिष्टः सन् रथान् भेजे॥ तानेव विशिनष्टि। तैः परमायाविकल्परचितैः संकल्पविशेषनिर्मितैरपि तदीयैर्विभीषणीयैः स्यन्दनैः रथैः स्फलितकृत्रिमभक्तिशोभा न भवंति तुल्ली तासमीकृता कृत्रिमा क्रियया निर्वृत्ता भक्ती नां शोभा येषां ते तथोक्ताः। तेऽपि तत्साम्येन लभन्त इत्यर्थः। कृत्रिमे त्वत्र द्वितक्त्रिरिति क्त्रिलत्प्रत्ययः। क्रेर्मम्नित्यमिति मगमः॥ ७५॥ भूय इति। ततो रघुपतिः सावरजो भरतलक्ष्मणस

सानुप्लवः प्रभुरपि क्षणदाचराणां भेजे रथं दशरथप्रभवानुशिष्टः॥ मायाविकल्परचितैरपि यस्तदीयैर्न स्यन्दनैः स्फलितकृत्रिमभक्तिशोभः॥ ७५॥ भूयस्ततो रघुपतिर्विलसत्पताकमध्यास्त कामगति सावरजो विमानं॥ दोषातनं बुधबृहस्पतियोगदृश्यस्तारापतिस्तरलविद्युदिवाभ्रवृन्दं॥ ७६॥ तत्रेश्वरेण जगतां प्रलयादिवोर्वीं वर्षात्ययेन रुचमभ्रघनादिवेन्दोः॥ रामेण मैथिलसुतां दशकण्ठकृच्छ्रात्प्रत्युद्

[illegible]

हितः सन् विलसत्पताकं कामेन इच्छानुसारेण गतिर्यस्य तद्विमानं तारापतिश्चन्द्रो दोषाभवं दोषातनं सायं चिरं प्राह्णेत्यादिना शाश्वद्दादव्ययात्त्युप्रत्ययः। बुधबृहस्पतिभ्यां योगेन दृश्यः। दर्शनीयः तरलविद्युच्चंचला तडित् अभ्रवृन्दमिवाध्यास्त अधिष्ठितवान्॥ ७६॥ तत्रेति। तत्र विमाने जगतामीश्वरेणादिवराहेण प्रलयादुर्वीमिव वर्षात्ययेन शरदागमेन अभ्रघनादभ्रघसंघादिन्दोः रुचं चन्द्रिकामिव रामेण दशकण्ठ एव कृच्छ्रः संकटस्तस्मात्प्रत्युद्धृतां धृतिमतीं संतोषवतीं मैथिलसुतां भरतो ववंदे॥ ७७॥

383
1947

लंकेश्वरेति। लंकेश्वरस्य रावणस्य प्रणतीनां भंगेन निरासेन दृढव्रतमखंडितपतिव्रत्यं अत एव तद्वंद्यं तज्जनकात्मया श्चरणयोर्युगं ज्येष्ठानुवृत्त्या जटिलं जटायुक्तं सो भोः सज्जनस्यास्य भरतस्य शिरश्चेत्युभयं समित्यमिलितावन्योन्यस्य पावनं शोधकमभूत्॥ ७८॥ क्रोशेति। आर्यः पूज्यः काकुत्स्थो रामः। प्रकृतयः प्रजाः पुरःसरा यस्य तेन स्तिमितजवेन मंदवेगेन पुष्पकेण क्रोशार्धं परिमाणविशेषः क्रोशार्धं क्रोशैकदेशं गत्वा शत्रुघ्नप्रतिविहिता सज्जिताः उपकार्या पटभवनानि यस्मिंस्तत्साकेतस्य अयोध्याया उपवनं अध्युवास। साकेतः स्यादयोध्यायां कोशलानंदिनीत्यपीति यादवः॥ इति श्री

लंकेश्वरप्रणतिभंगदृढव्रतं तद्वंद्यं युगं चरणयोर्जनकात्मजायाः॥ ज्येष्ठानुवृत्तिजटिलं च शिरोऽस्य साधोरन्योन्यपावनमभूदुभयं समेत्य॥ ७८॥ क्रोशार्धं प्रकृतिपुरःसरेण गत्वा काकुत्स्थः स्तिमितजवेन पुष्पकेण॥ शत्रुघ्नप्रतिविहितोपकार्यमार्यः साकेतोपवनमुदारमध्युवास॥ ७९॥ इति रघुवंशे महाकाव्ये कविश्रीकालि॰ रामप्रत्याभिगमनो नाम त्रयोदशः ॥१३॥

महोपाध्यायकोशलाचलमल्लिनाथविरचितायां संजीवनीसमाख्यायां रघुवंशटीकायां रामप्रत्याभिगमनो नाम त्रयोदशः सर्गः॥ १३॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

र·स्तु·टी

९२

स·९२

९२

385/1947

र॰म॰टी॰
१

॥ श्रीः॥ ॥ भर्तुरिति। अथदाशरथीराम लक्ष्मणौउपघ्नतरोराश्रवृक्षस्य आश्रयउपघ्न आश्रयइतिनिपा स १४
तः। तस्यछेदात्प्रतस्योलताइववल्लीतुव्रततीलतेत्यमरः। भर्तुःप्रणाशात्शोचनीयं दशांतरमवस्थांतरंमप्र
प्तेजनन्योकौशिल्यासुमित्रेतत्रसाकेतापवनेसमंयुगपदपश्यतां॥१॥ उभाविति। यथाक्रमंस्वस्वमातृपू
र्वकंप्रणतौनमस्कृतवंतौहतारीहतशत्रुकौविक्रमशोभितावुभौरामलक्ष्मणावुभाभ्यांमातृभ्यांअस्रैर
श्रुभिःअंधतयाहेतुनाअस्वमश्रुरश्रोणितमितियादवः। विस्पष्टौकिंतुसुतस्पर्शेनयत्सुखंतस्योपलंभा
दनुभवात्ज्ञातौ॥२॥ आनंदजइतितयोर्मात्रोःआनंदजःशिशिरोबाष्पःशोकजमशीतमुष्णमश्रुउष्ण

भर्तुःप्रणाशादथशोचनीयंदशांतरंतत्रसमंप्रसन्ने॥ अपश्यतांदाशरथीजनन्योछेदादिवोप
घ्नतरोर्व्रतत्यौ॥१॥ उभावुभाभ्यांप्रणतौहतारीयथाक्रमंविक्रमशोभिनौतौ॥ विस्पष्टमस्रांधतयान
दृष्टौज्ञातौसुतस्पर्शसुखोपलंभात्॥२॥ आनंदजःशोकजमश्रुबाष्पस्तयोरशीतंशिशिरोबिभेद। गं
गासरय्वोर्जलमुष्णतप्तंहिमाद्रिनिःस्यंदइवावतीर्णः॥३॥ तेपुत्रयोर्नैरृतशस्त्रमार्गानार्द्रा
निवांगेसदयंस्पृशन्त्यौ॥ अपीप्सितंक्षत्रकुलांगनानांनवीरसुशब्दमकामयेतां॥४॥ ॥ ॥

तप्तंग्रीष्मतप्तंगंगासरय्वोर्जलंकर्मअवतीर्णोहिमाद्रिनिस्यंदोनिर्झरइवबिभेद। आनंदेनशोकस्तिरस्कृतइत्य
र्थः। तेइति। तेमातरौपुत्रयोरंगेशरीरेनैरृतशस्त्राणांराक्षसशस्त्राणांमार्गान्व्रणान्आर्द्रान्सरसान्स १
दयंस्पृशंत्यौक्षत्रकुलांगनामीप्सितमिष्टमपिवीरसूर्वीरमातेतिशब्देनाकामयेतांवीरप्रसवोदुःखहेतुरितिभावः॥४॥

387/19417

क्लेशावहेति। आवहतीत्यावहाभर्तुःक्लेशावहाक्लेशकारिणीअतएवालक्षणाहंसीतेतिस्वंनामउदीरयंतीस्वर्गःप्रति
ष्ठाआस्पदंयस्यतस्यस्वर्गस्थितस्यगुरोःश्वसुरस्यमहिष्योश्वश्र्वोवधूःस्नुषावधूर्जायेत्यमरः। अभिक्तिभेदेन
ववंदे। स्वर्गप्रतिष्ठस्येत्यनेनश्वश्र्वोर्वैधव्यदुःखंसूचयति॥५॥ उत्तिष्ठेति। ननुवत्सेउत्तिष्ठ। असौसानुजोभर्तातवैववृ
त्तेमदरूर्द्धःखंतीक्ष्णःतीर्णवान्। इतिप्रियार्हांतांवधूंप्रियमप्यमिथ्यासत्यतयाश्वश्र्वौऊचतुःउभयंदुर्वचन

क्लेशावहाभर्तुरलक्षणाहंसीतेतिनामस्वमुदीरयंती॥ स्वर्गप्रतिष्ठस्यगुरोर्महिष्यावभक्तिभेदेनव
धूर्ववंदे॥५॥ उत्तिष्ठवत्सेननुसानुजोसौवृत्तेनभर्त्ताशुचिनातवैव॥ कृच्छ्रंमहत्तीर्णइतिप्रियार्हां
तामूचतुस्तेप्रियमप्यमिथ्या॥६॥ अथाभिषेकंरघुवंशकेतोःप्रारब्धमानंदजलैर्जनन्योः॥
निवर्तयामासुरमात्यवृद्धास्तीर्थाहृतैःकांचनकुंभतोयैः॥७॥ सरित्समुद्रान्सरसीश्चगत्वार
क्षःकपींद्रैरुपपादितानि॥ तस्यातन्मूर्ध्निजलानिजिष्णोर्विंध्यस्यमेघप्रभवाइवापः॥८॥ ॥

मितिभावः॥६॥ अथेति। अथजनन्योरानंदबाष्पैःप्रारब्धप्रक्रांतंरघुवंशकेतोरामस्याभिषेकममात्यवृद्धास्तीर्थे
भ्योगंगाप्रमुखेभ्यआहृतैरानीतैःकांचनकुंभतोयैःनिवर्तयामासुःनिष्पादयामासुः॥७॥ सइति। रक्षःकपींद्रैः
सरितोगंगाद्याःसमुद्रान्पूर्वादीन्सरसीर्मानसादीश्चगत्वाउपपादिताउपनीतानिजलानिजिष्णोर्जयनशी
लस्यालाजिस्नुश्चस्नुरितिस्नुप्रत्ययः। तस्यरामस्यविंध्याद्रेर्मूर्ध्निमेघप्रभवाआपइवअपतत्॥८॥ ॥ ॥

तपस्वीति। योरामस्तपस्वीवेषक्रिययातपस्विवेषरचनयापिसुतरांप्रेक्षणीयस्तावत्दर्शनीयोबभूवतस्यराजें
द्रनेपथ्यस्यविधानेनराजवेषरचनयाउद्दिताशोभासापुनरुक्तानमदोषोयस्याःसापुनरुक्तदोषासीत्द्विगुणाआ
सीत्।।९।। सइति। सरामःससैन्यतूर्यस्वनैरानंदितपौरवर्गःसन्मूलेभवामौलामंत्रिवृद्धास्तैरक्षोभिःहरिभिश्च
सहसौधेभ्यउद्धतलाजवर्षामुत्तोरणामन्वयराजधानींविवेशाप्रविष्टवान्।।१०।। सौमित्रिणेति। सावरजेनश

तपस्विवेषक्रिययापितावत्सप्रेक्षणीयःसुतरांबभूव।। राजेंद्रनेपथ्यविधानशोभातस्योदि
तासीत्पुनरुक्तदोषा।।९।। समौलरक्षोहरिभिश्चसैन्यःतूर्यस्वनानंदितपौरवर्गः।। विवेशसौ
धोद्गतलाजवर्षामुत्तोरणामन्वयराजधानीं।।१०।। सौमित्रिणासावरजेनमंदमाधूतवालव्य
जनोरथस्थः।। धृतातपत्रोभरतेनसाक्षात्उपायसंघातइववृद्धः।।११।। युग्मं।। प्रासादकाला
गरुधूमराजिस्तस्याःपुरोवायुवशेनभिन्ना।। वनान्निवृत्तेनरघूद्वहेनमुक्तास्वयंवेणिरिवाबभासे।।१२।।

नुग्रयुक्तेनसौमित्रिणामंदमाधूतेवालव्यजनेचामरेयस्यसरथस्थःभरतेनधृतातपत्रःएवंचतुर्व्यूहोरामःप्रव
द्धःसाक्षादुपायानांसामादीनांसंघातःसमाष्टिरिवेतिपूर्वेणसंबंधः।।११।। प्रासादेतिवायुवशेनभिन्नाःप्रासादे
यःकालागरुधूमस्तस्यराजिःरेखावनान्निवृत्तेनरघूद्वहेनरामेणस्वयंमुक्तातस्याःपुरःपुर्यावेणिरिवाबभासे।पु २
रोपिपतिव्रतासमाधिरक्तःनमोषितेतुसंस्कुर्यान्नवेणींचनमोचयेदितिहारितः।।१२।। ।। ७।। ।।

389
1947

श्वश्रूजनेति। श्वश्रूजनेनानुष्ठितचारुवेषांकृतसौम्यनेपथ्यां। आकल्पवेषोनेपथ्यमित्यमरः। कर्णीरथःस्त्री
योग्यः।।ल्परथःप्रवहणंडयनंरथगर्भकइतियादवः। तत्रस्थांरघुवीरपत्नींसीतांसकेतनार्यःप्रासादवा
तायनेषुदृश्यबंधैर्लक्ष्यपुटैरंजलिभिःप्रणेमुः।।१३।। स्फुरदिति। स्फुरत्प्रभामंडलमानुसूयेअनसूयादत्तमशा
श्वतंसदातनंमंगरागंबिभ्रतीसासीताभर्तास्वपूर्येरुद्धेतिसंदर्शितापुनर्वह्निगतेवरराज।।१४।। वेश्मानीति। सु
हृदोभावःसौहार्दंजन्यंतदुभंगासिध्वंतेपूर्वपदस्येत्युभयपदवृद्धिः। सौहार्दनिधिःरामःसुहृद्भ्यःसुग्रीवा
दिभ्यःपरिवर्हवंतिउपकरणवंति। वेश्मानिविश्राणयदत्वाआलेख्यशेषस्यचित्रमात्रशेषस्यपितुर्बलिमसृ

श्वश्रूजनानुष्ठितचारुवेषांकर्णीरथस्थांरघुवीरपत्नीं।। प्रासादवातायनदृश्यबंधैःसाकेतनार्यो
जंलिभिःप्रणेमुः।।१३।। स्फुरत्प्रभामंडलमानुसूयंसाबिभ्रतीशाश्वतमंगरागं।। रराजशुद्धेतिपुनः
स्वपुर्येसंदर्शितावह्निगतेवसंध्या।।१४।। वेश्मानिरामपरिवर्ह---विश्राण्यसौहार्दनिधिसुहृ
द्भ्यः।। बाष्पायमाणोबलिमंनिकेतमालेख्यशेषस्यपितुर्विवेश।।१५।। कृतांजलिस्तत्रयदंब
सत्यान्नाभ्रश्यतस्वर्गफलाद्गुरुर्नः।। तंचिंत्यमानंसुकृतंतवेतिजहारलज्जांभरतस्यमातुः।। १६।।

जायुक्तंनिकेतगृहंव्यापारमाणोबाष्पमुद्वहन्विवेश। बाष्पोष्मभ्यामुद्वमने।। इतिक्यङःप्रत्ययः।।१५।। कृतांज
लिरिति। तत्रनिकेतनेकृतांजलिःसन्रामःहेअंबनोगुरुःपितास्वर्गफलंयेस्यतस्यांसत्यान्नाभ्रश्यतनभ्रष्टवान्। इ
तियत्दिव्यादृभ्रंशानांचिंत्यमानंविचार्यमाणंतवसुकृतंइतिएवंप्रकारेणभरतस्यमातुःकैकेय्याःलज्जांजहार। अपान
यत्। राज्ञांप्रतिज्ञापरिपालनंस्वर्गसाधनमित्यर्थः। भरतग्रहणंतदपेक्षयापिकैकेय्यनुसरणमितिद्योतनार्थं।।१६।।

तथेति। तथा सुग्रीवविभीषणादीन् संविधीयंत इति संविधः भोग्यवस्तूनि कृत्रिमसंविधाभिः तयातेनप्रकारेणोपाच
रत्। यथा संकल्पमात्रेणेच्छामात्रेणोदितसिद्धयस्ते सुग्रीवादयश्चेतसि विस्मयेन क्रांता आक्रांताः॥१७॥ सभाजना
येति। सरामः सभाजनायाभिवंदनायोगतान्दिव्यान् दिविभवान्मुनीनगस्त्यादीन् पुरस्कृत्य पूजयित्वा हतस्य श
त्रोः रावणस्य प्रभावादिकं जन्मादिकं स्वविक्रमे गौरवमुत्कर्षमादधानं वृत्तं तेभ्यः सुश्राव॥ श्रुतवान्॥ विजितोत्क
र्षाजेतुरुत्कर्ष इत्यर्थः॥१८॥ प्रतीति। तपोधनेषु मुनिषु प्रतियातेषु प्रतिनिवृत्य गतेषु सत्सु सुखाद्विज्ञाता एव

तथैव सुग्रीवविभीषणादीनुपाचरत्कृत्रिमसंविधाभिः॥ संकल्पमात्रोदितसिद्धयस्ते क्रांता
यथा चेतसि विस्मयेन॥१७॥ सभाजनायोपगतान्स दिव्यान्मुनीन्पुरस्कृत्य हतस्य शत्रोः॥ सुश्रा
व तेभ्यः प्रभवादि वृत्तं स्वविक्रमे गौरवमादधानं॥१८॥ प्रतिप्रयातेषु तपोधनेषु सुखादविज्ञात
गतार्द्धमासान्॥ सीतास्वहस्तोपहृतार्घ्यपूजान्रक्षःकपींद्रान्विससर्ज रामः॥१९॥ तच्चात्म
चिंतासुलभं विमानं हृतं सुरारेः सह जीवितेन॥ कैलाशनाथोद्वहनाय भूयः पुष्पं दिवः पुष्पकमन्वमं
स्त॥२०॥

गतोऽर्द्धमासोऽयं येषां ताननंतरं सीतायाः स्वहस्तेनोपहृता दत्ता अर्घ्यपूजा उत्तमसंभावना येभ्यस्तान् येतेन सौदा
र्यातिशय उक्तः। रक्षःकपींद्रान् रामो विससर्ज विसृष्टवान्। तच्चेति। आत्मचिंतासुलभं स्वेच्छामात्रलभ्यं सु
रारेः रावणस्य जीवितेन सह हृतं दिवः पुष्पं पुष्पवदाभरणभूतं पुष्पकं भूयः पुनरपि कैलाशनाथस्य कुबेर
स्योद्वहनाया न्वमंस्त। अनुज्ञातवान्। मन्यतेर्लुङ्। भूयोग्रहणेन पूर्वमप्येतत् कौबेरमेवेति सूच्यते॥२०॥ ॥

391
1947

पितुरिति। राम एवं पितुर्नियोगात् शासनात् वनवासं निस्तीर्यानंतरं प्रतिपन्नराज्यः सन् धर्मार्थकामेषु यथा तथैवा
वरजेष्वनुजेषु समां वृत्तिं प्रपेदे। अवैषम्येन व्यवहृतवानित्यर्थः॥२१॥ सर्वास्विति। स रामो वत्सल — तू स्निग्धत्वा
त् न तु लौकप्रतीत्यर्थे स्निग्धस्तु वत्सल इत्यमरः। सर्वासु मातृष्वपि निर्विशेषः। प्रतिपत्तिः तुल्यसत्कार आसीत्क
थमिव चमूनां तेनारन्मुखः षड्राननेनापीतः पयोधरास्तनायासां तासु कृत्तिकास्विव॥२२॥ तेनेति। लोको लोभप
राङ्मुखेन वदान्येन तेन रामेणार्थवान्॥ धनिक आस बभूवेति उं-तत्प्रतिरूपकमव्ययमेतत्। विघ्नेभ्यो भयं घ्नतानु

पितुर्नियोगाद्वनवासमेवं निस्तीर्य रामः प्रतिपन्नराज्यः॥ धर्मार्थकामेषु समां प्रपेदे यथा तथैवाव
रजेषु वृत्तिं॥२१॥ सर्वासु मातृष्वपि वत्सलत्वात्स निर्विशेषप्रतिपत्तिरासीत्॥ षडाननापीतपयोध
रासु नेता चमूनामिव कृत्तिकासु॥२२॥ तेनार्थवान् लोभपराङ्मुखेन तेन घ्नता विघ्नभयं क्रियावत्॥ ते
नास लोकः पितृमान्विनेत्रा तेनैव शोकापनुदेन पुत्री॥२३॥ स पौरकार्याणि समीक्ष्य काले रेमे विदेहा
धिपतेर्दुहित्रा॥ उपस्थितश्चारुवपुस्तदीयं कृत्वोपभोगोत्सुकयेव लक्ष्म्या॥२४॥ ॥ ॥

दृता तेन क्रियावान् अनुष्ठानवान् विनेत्रा नियामकेन तेन पितृमान् पितृवान्नियच्छतेत्यर्थः॥ शोकमपनुदतीति शोका
पनुदः सुखस्यार्द्दतातुंद शोकयोः परिमृजापनुदोरिति कप्रत्ययः। तेन पुत्री पुत्रवानासा पुत्रवदानंदयतीत्यर्थः
॥२३॥ स इति। स रामः कालेऽवसरे पौराणां कार्याणि प्रयोजनानि समीक्ष्य विदेहाधिपतेर्दुहित्रा सीतया तत एव त
वं सीताः सर्ववधिचारुवपुः कृत्वा स्थितयाल लक्ष्म्येवोपस्थितः संगतः सन् रेमे उपसंस्थानं संगतिरिति यादवः॥२४॥ ॥

तयोरिति। चित्रवत्सु वनवासवृत्तांतालेख्यवत्सु सत्सु यथाप्रार्थितं यथेष्टं इंद्रियार्थान् इंद्रियविषयान् शब्दा स १४
दीनासेदुषोप्राप्तवतोः तयोः सीतारामयोः दंडकेषु दंडकारण्येषु प्राप्तानि दुःखान्यपि विरहविलापान्वेषणा
दिनिसंचिंत्यमानानि स्मर्यमाणानि सुखान्यभूवन्। स्मारकं तु चित्रदर्शनमिति द्रष्टव्यं॥२५॥ अथेति। अथानंत
रं सीता अधिकस्निग्धविलोचनेनात्यंतमरुणालोचनेन शरखसांडुरेण तएवानक्षरमवाग्व्यापारं यथा भवति
तथा व्यंजितं दोह्रदं गर्भो येन तेन मुखेन परिणेतुः भर्तुरानंदयित्री आसीत्। तामिति। प्रतीतो गर्भज्ञानात् प्रतीतः

तयोर्यथाप्रार्थितमिंद्रियार्थानासेदुषोः सुसुचित्रवत्सु॥ प्राप्तानि दुःखान्यपि दंडकेषु संचिंत्यमा
नानि सुखान्यभूवन्॥२५॥ अथाधिकस्निग्धविलोचनेन मुखेन सीता शरपांडुरेण॥ आनंदयित्री
परिणेतुरासीदनक्षरव्यंजितदोह्रदेन॥२६॥ तामंकमारोप्य कृशांगयष्टिं वर्णांतराक्रांतपयोध
राग्रां॥ विलज्जमानां रहसि प्रतीतः पप्रच्छ रामा रमणोभिलाषं॥२७॥ सा दृष्टनीवारफलानि हिंस्रैः
संबद्धवैखानसकन्यकानि॥ इयेष भूयः कुशवंति गंतुं भागीरथीतीरतपोवनानि॥२८॥ ॥ ॥

रमयतीति रमणः प्रियः कृशांगयष्टिं वर्णांतरेण नीलिम्नाक्रांतपयोधराग्रां विलज्जमानां तां रामां रहस्यंकमारोप्याभि
लाषमनं पप्रच्छ एतत् दोह्रदस्याप्रदानेन गर्भो दोषमवाप्नुयादिति शास्त्रज्ञातेन न तु लौल्यादित्यनुसंधेयं॥२७॥ से
ति। सा सीता हिंस्रैर्दृष्टानि वाराणवबलयोयेषु तानि तिर्यग्भिक्षुकादिदानं बालिः। संबद्धाः कृतसख्या वैखानसानां ४
कन्याका येषु तानि कुशवंति भागीरथी तीरतपोवनानि भूयः पुनर्गंतुमियेष अभिललाष॥२८॥ ॥ ॥ ॥

393
1947

तस्या इति। रघुप्रवीरो रामस्तस्मै सीतायै तत्पूर्वोक्तमनोरथं इप्सितं प्रतिश्रुत्य पार्श्वचरैस्तत्कालोचितैरनुयातः सन्
मुदिताम् अयोध्यामालोकयिष्यन् अभ्रंलेढी स्यभ्रंकषं प्रासादमारुरोह दोभ्रंलिह इति खश्प्रत्ययः। अरुर्द्विष
— तस्य मुगिति मुगागमः॥२९॥ ऋद्धापणमिति। स रामः ऋद्धाः आपणाः पण्य — यस्मिन् तं राजपथं नौभिः
समुद्रवत्सु वहिनीभिः विगाह्यमानां सरयूं पौरैर्विलासिभिरध्यूषितानि पुरोपवनानि च पश्यन् रेमे विलासिन्य
श्च विलासिनश्च विलासिनः पुमान्स्त्रियेत्येकशेषः॥३०॥ स इति। वदतां वाग्मिनां पुरोगः श्रेष्ठः विशुद्धवृत्तः सपा

तस्यै प्रतिश्रुत्य रघुप्रवीरस्तदीप्सितं पार्श्वचरानुयातः॥ आलोकयिष्यन्मुदितामयोध्यां प्रासादमभ्रंलि
हमारुरोह॥२९॥ ऋद्धापणं राजपथं स पश्यन्विगाह्यमानां सरयूं च नौभिः॥ विलासिभिश्चाध्युषितानि
पौरैः पुरोपकंठोपवनानि रेमे॥३०॥ स किंवदंतीं वदतां पुरोगः स्ववृत्तमुद्दिश्य विशुद्धवृत्तः॥ सपाधिरा
जोरुभुजोपसर्पं पप्रच्छ भद्रं विजितारिभद्रः॥३१॥ निर्बंधपृष्टः स जगाद सर्वं स्तुवंति पौराश्चरितं त्व
दीयं॥ अन्यत्र रक्षोभवनोषिताया परिग्रहान्मानवदेव देव्याः॥३२॥ ॥ ॥ ॥ ॥

धिराजः शेषः तद्वद्द्रुरुभुजोयस्य सः विजितारिभद्रः विजितारिश्रेष्ठः स रामः स्ववृत्तमुद्दिश्य भद्रं भद्रनामकं अपसर्पं
चारं किंवदंतीं जनवादं पप्रच्छ। अपसर्पः पार्श्वचरः किंवदंती जनश्रुतिरित्यमरः॥३१॥ निर्बंधेति। निर्बंधेन पृष्टः
सोपसर्पः जगाद किमिति हे मानवदेव रक्षोभवने उषितायाः स्थितायाः देव्याः सीतायाः परिग्रहात्स्वीकारात् अन्यत्र इतः
रत्नं वर्जयित्वेत्यर्थः पौरास्त्वदीयं चरितं स्तुवंति॥३२॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥

कलत्रेति। एवंकलत्रनिंदयागुरुणादुर्वहेणकीर्तिविपर्ययेणाऽपकीर्त्याऽभ्याहतंवैदेहिबंधोर्वैदेहिवल्लभस्यहृ
स्यात्छंदसोबहुलमितिहवः। कालिदासवत्। हृदयमयोघनेनाभ्याहतमभितप्तमयस्त्विवविदद्रेविदीर्णंकर्तरि
लिट्॥ ३३॥ किमात्मेति। आत्मनोनिर्वादोऽपवादएवकथातामुपेक्षे। उतआदोषांसाध्वींजायांसंत्यजामि। उभ
यत्रापिप्रश्नेलोट्। इत्येकपक्षाश्रयेअन्यतरपक्षपरिग्रहेविक्लवात्त्वादपरिछेत्तत्वात्सरामोदोलाचलचि
त्तवृत्तिर्यस्यसआसीत्॥ ३४॥ निश्चित्येति। किंचवाच्यमपवादंअन्येनपत्न्यास्त्यागातिरिक्तेनोपायेननि

कलत्रनिंदागुरुणाकिलैवमभ्याहतंकीर्तिविपर्ययेण॥ अयोघनेनायइवाभितप्तंवैदेहिबंधोर्हृ
दयंविदद्रे॥ ३३॥ किमात्मनिर्वादकथामुपेक्षेजायामदोषामुतसंत्यजामि॥ इत्येकपक्षाश्रयवि
क्लवत्वादासीत्सदोलाचलचित्तवृत्तिः॥ ३४॥ निश्चित्यचानन्यनिवृत्तिवाच्यंत्यागेनपत्न्याःपरिमा
र्ष्टुमैछत्॥ अपिस्वदेहात्किमुतेंद्रियार्थाद्यशोधनानांहियशोगरीयः॥ ३५॥ ससंनिपात्यावरजान्हृ
तौजास्तद्विक्रियादर्शनलुप्तहर्षान्॥ कौलीनमात्माश्रयमाचचक्षेतेभ्यःपुनश्चेदमुवाचवाक्यं॥ ३६॥

वृत्तिर्यस्यनास्तितदनन्यनिवृत्तिनिश्चित्यपत्न्यास्त्यागेनपरिमार्ष्टुंपरिहर्तुमैछत्। तथाहि। यशोधनानांपुंसांस्वदेहा
दपियशोगरीयोगुरुतरंइंद्रियार्थाः॥ स्रक्चंदनवनितादिरिंद्रियविषयाइतिकिमुतपंचमीविभक्तीत्युभयत्रापिपं
चमी। सीताचेंद्रियार्थएव॥ ३५॥ सइति। हृतौजानिस्तेजस्कःसरामस्तस्यरामस्यविक्रियादर्शनेनलुप्तहर्षान् अव ९
रजान्सन्निपात्यसमागमय्यआत्माश्रयकौलीनंनिंदातेभ्यआचचक्षेपुनरिदंवाक्यंचोवाच॥ ३६॥ ॥ ॥

395
1947

राजर्षीति। रवेःप्रसूतिर्यस्यतस्यराजर्षिवंशस्यसदाचारशुचेःसद्वृत्तशुद्धान्मत्तोमत्सकाशाद्दर्पणस्यपयोदवा
तादिवांभःकणादित्यर्थःकीदृशोयंकलंकउपस्थितःप्राप्तःपश्यत॥ ३७॥ पौरेष्विति। सोहमयांतरंगेषुतैलबिं
दुमिवपौरेषुचबहुलीभवंततदेवपूर्वपस्यतत्स्वर्णमवर्णमपवादंअवर्णाक्षेपनिवादपरिवादापवादवदित्यमरः।
द्विपेंद्रआलानमेवालानिकंविभयादित्वात्स्वार्थेटक्। आलानंबंधनंप्रयोजनमस्यालानिकंप्रयोजनमितिट
स्थाणुंस्तंभमिवचूतवृक्षतिवत्सामान्यविशेषाभावात्पौनरुक्त्यंद्रष्टव्यंसोढुंनेशेनशक्नोमि॥ ३८॥ तस्येति।

राजर्षिवंशस्यरविप्रसूतेरुपस्थितःपश्यतकीदृशोयं॥ मत्तःसदाचारशुचेःकलंकःपयोद
वातादिवदर्पणस्य॥ ३७॥ पौरेषुसोहंबहुलीभवंतमपांतरंगेष्विवतैलबिंदुं॥ सोढुंनतत्पूर्वमवर्ण
मीशेआलानिकस्थाणुमिवद्विपेंद्रः॥ ३८॥ तस्यापनोदायफलप्रवृत्तावुपस्थितायामपिनिर्व्यपेक्षः
त्यक्ष्यामिवैदेहसुतांपुरस्तात्समुद्रनेमिंपितुराज्ञयेव॥ ३९॥ अवैमिचैनामनघेतिकिंतुलोकापवा
दोबलवान्मतोमे॥ छायाहिभूमेःशशिनोमलत्वेनारोपिताशुद्धिमतःप्रजाभिः॥ ४०॥ ॥

तस्यावर्णस्यापनोदायकिलप्रवृत्तावुपस्थितायांसत्यामपिनिर्व्यपेक्षोनिःस्पृहःसन्वैदेहसुतांपुरस्तात्पूर्वंपितु
राज्ञयासमुद्रनेमिंरिवनेमिर्यस्याःसाभूमिस्तामिवत्यक्ष्यामि। ३९॥ ननुसाध्वीसात्याज्येतिवाच्यमित्याह॥ अवैमी
ति। एनांसीतांअनघेतिसाध्वीतिअवैमिकिंतुमेममलोकापवादःबलवान्मतःकुतःहियस्मात्कारणात्प्रजाभिर्भू
मेःछायाप्रतिबिंबंशुभतोनिर्मलस्यशशिनोमलत्वेनकलंकत्वेनारोपिताअतोलोकापवादएवबलवानित्यर्थः॥ ४०॥

रक्ष इति। किंच रक्षोवधांतः समे प्रयासः स व्यर्थो न किंतु वैरप्रतिमोचनाय वैरिशत्रुनिधनाय निधनं वैरशुश्रुम इत्य
मरः। तथाहि। अमर्षणो सहनो द्विजिह्वः सर्पः पदा पादेन स्पृशंतं पुरुषं शोणितकांक्षया दशति — — — दशतिकिंतु
वैरनिरासनायेत्यर्थः॥४१॥ तदिति। तत्तस्मादेषमे सर्गो निश्चयः। निसर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसर्गे
ष्वित्यमरः। करुणार्द्रचित्तैर्भवद्भिर्न प्रतिषेधनीयः। निर्गतं वाच्यमेव शल्यं येषां तान्प्राणान्मया चिरं धारयितुं धा
रणं कारयितुं वो युष्माकं अर्थिता अर्थितुमिच्छा वद्यस्तीति शेषः॥४२॥ इतीति। इत्युक्तवंतं जनकात्मजायांवि

रक्षोवधांतो न च मे प्रयासो व्यर्थः स वैरप्रतिमोचनाय॥ अमर्षणः शोणितकांक्षया किं पदा स्पृशं
तं दशति द्विजिह्वः॥४१॥ तदेष सर्गः करुणार्द्रचित्तैर्न मे भवद्भिः प्रतिषेधनीयः॥ यद्यर्थिता निर्गतवा
च्यशल्यान्प्राणान्मया धारयितुं चिरं वः॥४२॥ इत्युक्तवंतं जनकात्मजायां नितांतरक्षाभिनिवेशमीशं॥
न कश्चन भ्रातृषु तेषु शक्तो निषेद्धुमासीदनुवर्तितुं वा॥४३॥ स लक्ष्मणं लक्ष्मणपूर्वजन्मा विलो
क्य लोकत्रयगीतकीर्तिः॥ सौम्येति चाभाष्य यथार्थभाषी स्थितं निदेशे पृथगादिदेश॥४४॥

षयेनितांतरक्षाभिनिवेशं। अतिक्रूराग्रहमीशं स्वामिनं तेषु भ्रातृषु मध्ये कश्चन भ्रातापि निषेद्धुं निवारयितुं अनि
वर्तितुं वा शक्तो नासीत् पक्षद्वयस्यापि प्रबलत्वादित्यर्थः॥४३॥ स इति। लोकत्रयगीतकीर्तिर्यथार्थभाषी
लक्ष्मणपूर्वजन्मा लक्ष्मणाग्रजः स रामः निदेशे स्थितमाज्ञाकरं लक्ष्मणं विलोक्य सौम्य सुभगेत्याभाष्य
पृथक् भरतशत्रुघ्नाभ्यां विनाकृत्यं आदिदेश आज्ञापयामास॥४४॥ ॥ ॥ ॥ ॥ ॥

397
1947

प्रजावतीति। दोहदः गर्भिणीमनोरथः दोहदशंसिनी ते प्रजावती भ्रातृजाया। प्रजावती भ्रातृजायेत्यमरः। तपोवनेषु स्पृ
हयालुरेव सस्पृहैव। स्पृहीगृही त्यादिनालुप्रत्ययः। स त्वं रथी सन् तद्व्यपदेशेन दोहदमिषेण नियां तें तव्यामेनां वाल्मीकेः
पदं स्थानं प्राप्य गमयित्वा विलीय इत्ययादेशः। त्यज॥४५॥ स इति। पितुर्जमदग्नेर्नियोगात् शासनात् भार्गवेण जामदग्न्ये
न कर्ता न लोके तिषष्ठी प्रतिषेधः। मातरि द्विषद्वत् तत्र तस्येवेति। वतिप्रत्ययः प्रकृतं प्रहारं श्रुतवान् भाषणात् स दवसश्रुवान्

प्रजावती दोहदशंसिनी ते तपोवनेषु स्पृहयालुरेव॥ स त्वं रथी तद्व्यपदेशनेयां प्राप्य वा
ल्मीकिपदं त्यजैनां॥४५॥ स शुश्रुवान्मातरि भार्गवेण पितुर्नियोगात्प्रहृतं द्विषद्वत्॥
प्रत्यग्रहीदग्रजशासनं तदाज्ञा गुरूणां ह्यविचारणीया॥४६॥ अथानुकूलश्रवणप्र
तीतामत्रस्नुभिर्युक्तधुरं तुरंगैः॥ रथं सुमंत्रप्रतिपन्नरश्मिमारोप्य वैदेहसुतां प्रतस्थे॥४७॥

ति क्तुप्रत्ययः॥ स लक्ष्मणः तदग्रजशासनं प्रत्यग्रहीत्। हि यस्माद्गुरूणामाज्ञा अविचारणी॥४६॥ अथेति। अथा
सौ लक्ष्मणः अनुकूलश्रवणप्रतीतमिष्टाकर्णनेन तुष्टां वैदेहसुतां अत्रस्नुभिरगुरुभिर्गर्भिणीवहनयोग्यैः। त्र
सिगृधिधृषिक्षिपेः क्नुरिति क्नुप्रत्ययः। तुरंगैर्युक्तं सुमंत्रेण प्रतिपन्नरश्मिं गृहीतप्रग्रहं रथमारोप्य प्रतस्थे॥
॥४७॥ ॥७२॥ ॥७२॥ ॥७२॥ ॥७२॥ ॥७२॥ ॥७२॥ ॥७२॥ ॥

सेति। सासीतारुचिरप्रदेशान्नीयमानानाप्यमाणासतीमेप्रियः प्रियंकरोतीति प्रियंकरः प्रियकारीइत्यनंदत॥ क्षे
मप्रेमभरैरेवेतिरवच्छप्रत्ययः। तंप्रियंआत्मनिविषयेकल्पद्रुमतांविहायअसिपत्रवृक्षंजानंनाबुद्धज्ञानासीत्नबुध्यते
र्बुद्धः। असिपत्रः खड्गाकारदलोनारकवृक्षविशेषः। असिपत्रोभवेत्कोपकारेचनरकांतरइतिविश्वः। अयंनाबाधुकइ
तिभावः॥४८॥ जुगूहेति। पथिलक्ष्मणोप्युदुःखतस्याः सीतायाः जुगूहतांप्रतिसंदृतवान्। तदुरुभाविभविष्यत्

सानीयमानारुचिरप्रदेशान्प्रियंकरोमेप्रियइत्यनंदत्॥ नाबुद्धकल्पद्रुमतांविहायजातंतमात्म
न्यसिपत्रवृक्षं॥४८॥ जुगूहतस्याःपथिलक्ष्मणोयत्सव्येतरेणस्फुरतातदक्ष्णा॥ आख्यातम
स्यैगुरुभाविदुःखमत्यंतलुप्तप्रियदर्शनेन॥४९॥ सादुर्निमित्तोपगमाद्विषादात्सद्यःपरिम्लान
मुखारविंदा॥ राज्ञःशिवंसावरजस्यभूयादित्याशशंसेकरणैरबाह्यैः॥५०॥ ॥ ॥

दुःखजत्यंतलुप्तंप्रियस्यदर्शनंयस्यतत्तेनस्फुरतासव्येतरेणदक्षिणेनाक्ष्णाअस्यैसीतायैआख्यातंस्त्रीणां
दक्षिणाक्षिस्फुरणंदुर्निमित्तमाहुः॥४९॥ सेति। सासीतादुर्निमित्तेनाक्षिस्फुरणरूपेणोपगतास्मात्ताद्वि
षादात्सद्यःपरिम्लानमुखामुखार विंदासतीसावरजस्यराज्ञोरामस्यशिवंभूयादितिआबाह्यैःकरणैःअं ७
तःकरणैराशशंसाकरणैरितिबहुवचनंक्रियाभ्यावृत्तिरभिप्रायपुनःपुनराशशंसेत्यर्थः॥५०॥ ॥ ॥

399/1947

गुरोरिति। गुरोर्ज्येष्ठस्यनियोगात्साध्वीमपिअनिंद्यामित्यर्थः। वनांतेविहास्यन्त्यक्ष्यन्सुमित्रातनयोलक्ष्मणःपुर
स्तादग्रेस्थितयाजह्नोर्दुहित्रा गंगयाउत्थितैः वीचिहस्तैरवार्यतेव अकार्यमाकुरुइतिवारितइवेत्युत्प्रेक्षा॥५१॥ र
थादिति। सत्यसंधःसत्यप्रतिज्ञःसलक्ष्मणोयंसारथिनागृहीतवाहान्निरुद्धाश्वाद्रथात्नांभ्रातृजायांपुलिनेअवता
र्यारोप्यनिषादेनकिरातेनआहृतनौविशेषः। आनीतदृढनौकः सन्सतयासममित्यध्याहार्यव्याख्येयांअन्य
थासीतातदुत्थाप्यजगादेतिवक्ष्यमाणेनाविरोधः गंगांभागीरथींसंधांप्रतिज्ञामिवततारसंधाप्रतिज्ञामर्यादा

गुरोर्निदेशादपितांवनांतेसाध्वींसुमित्रातनयोविहास्यन्॥ आवार्यतेवोत्थितवीचिहस्तैर्जह्नोर्दुहित्रा
स्थितयापुरस्तात्॥५१॥ रथात्सयंत्रप्रगृहीतवाहात्तांभ्रातृजायांपुलिनेवतार्य॥ गंगांनिषादाहृतनौवि
शेषस्ततारसंधामिवसत्यसंधः॥५२॥ अथव्यवस्थापितवाक्कथंचित्सौमित्रिरंतर्गतबाष्पकंठः॥ औ
त्पातिकंमेघइवाश्मवर्षंमहीपतेःशासनमुज्जगार॥५३॥ तत्राभिषंगानिलविप्रविद्धाप्रभ्रश्यमाना
भरणप्रसूना॥ स्वमूर्तिलाभप्रकृतिंधरित्रींलतेवसीतासहसाजगाम॥५४॥ ॥ ॥ ॥ ॥

इत्यमरः॥५२॥ अथेति। अथकथंचिद्व्यवस्थापिताप्रकृतिमापादितावाग्यस्यसोंतर्गतबाष्पःकंठोयस्यसःकंठस्तंभिता
श्रुतिरित्यर्थः सौमित्रिर्महीपतेःशासनंउत्पातेभवःऔत्पातिकोमेघःअश्मवर्षंशिलावर्षमिवोज्जगारउद्गीर्णवान्द्वार
ण्यत्वेनाव्येवामुज्जगारेत्युक्तं॥५३॥ तत्रेति। तत्रअभिषंगःपरिभवःशापेत्यत्वभिषंगः। पराभवइत्यमरः। सएवानिलस्तेन
विप्रविद्धाभिहताप्रभ्रश्यमानानिपतंतिआभरणान्येवप्रसूनानियस्याःसासीतालतेवसहसास्वमूर्तिलाभस्वशरीरला
भस्यस्रोसतेःप्रकृतिकारणंधरित्रींजगामभूमौपपातेत्यर्थःस्त्रीणामापदिमातैवशरणमितिभावः॥५४॥ ॥ ॥

र॰मू॰टी॰ ८

इक्ष्वाकिति। इक्ष्वाकुवंशप्रभवो महाकुलप्रसूत इत्यर्थः। आर्यवृत्तः साधुचरितः पतिर्भर्ता त्वामकस्मादकारणात्क स १४
थं त्यजेत् असंभावितमित्यर्थः। इति संशयिते बसंदिहाने वनाबत्त्यागहेतुनाना दधः प्रागित्यर्थः। जननीक्षितिः त
स्यै सीतायै प्रवेशं आ रंध्रभूमिः रोप्रः नददौ॥९३॥ सेति। लुप्तसंज्ञा नष्टचेतनामूर्छितासती दुःखनाविवेदप्रत्यागता
सुः लब्धसंज्ञा सती भृंतः सम्रतप्यत दुःखेनादह्यतेत्यर्थः। तपेः कर्मणिलङ्। कर्मकर्तरीति केचित् नतपस्तपः

इक्ष्वाकुवंशप्रभवः कथंत्वां त्यजेदकस्मात्पतिरार्यवृत्तः॥ इतिक्षितिः संशयितेवतस्यै ददौ
प्रवेशं जननीनतावत्॥९३॥ तासुप्तसंज्ञा नविवेद दुःखंप्रत्यागतासुः समतप्यतांतः॥ तस्याः
सुमित्रात्मजयत्नलब्धो मोहादभूत् दुःखतरः प्रबोधः॥९६॥ नचावदद्भर्तुरवर्णमार्या निराक
रिष्णोर्वृजिनाद्दतेपि॥ आत्मानमेव स्थिरदुःखभाजं पुनः पुनर्दुष्कृतिनं निनिंद॥९७॥ ॥

कर्मकस्यैवेति नियमात्तस्याः सीतायाः सुमित्रात्मजयत्नेन लब्धप्रबोधः मोहात्कष्टतरोऽतिदुः सहोभूत् दुःखवेद
नसंभावनादितिभावः॥९६॥ नचेति। आर्या साध्वी सीता वृजिनाद्दतेपेन सोबिनापि कलुषं वृजिनैनोसमित्यमरः।
अन्याराद्दितरर्त्तेइति पञ्चिराकरिष्णोर्निकासस्य अलंकृत्तनिराकृत् इत्यादिना ष्णुच्प्रत्ययः। भर्त्तुरवर्णमपादानं न ९
चावदत्नैवावदीत् किंतु स्थिरदुःखभाजं अतएव दुष्कृतिनमात्मानं पुनः पुनर्निनिंद॥९७॥ ॥ ॥ ॥ ॥

401
1947

आश्वास्येति। रामावरजो लक्ष्मणः सतीं साध्वीं तामाश्वास्य आख्यात उपदिष्टो वाल्मीकिनिकेतस्याश्रमस्य
मार्गो येन सतथोक्तः सन् विघ्नस्य पराधीनस्य आधीनो निघ्न आयत्त इत्यमरः। मे भर्तृनिदेशेन स्वाम्याज्ञया हेतुना
रौक्ष्यं पारुष्यं तत्तद्वेदेहि क्षमस्वेति विनम्रः प्रणवो बभूव॥९८॥ सीतेति। सीतां तं लक्ष्मणं उत्थाप्य वाक्यं जगाद
किमिति हे सौम्य साधो ते प्रीतास्मि चिराय चिरं जीवाय द्यस्माद्विजो सेंद्रेण विष्णुरिव उपेंद्र इवाग्रजेन भ्रात्रा इ

आश्वास्य रामवरजः ससीतामाख्यातवाल्मीकिनिकेतमार्गः॥ निघ्नस्य मे भर्तृनिदेशरौक्ष्यं
देवि क्षमस्वेति बभूव नम्रः॥९८॥ सीता तमुत्थाप्य जगाद वाक्यं प्रीतास्मि ते सौम्य ---- चि
राय॥ बिडौजसा विष्णुरिवाग्रजेन भ्रात्रा यदित्थं परवानसित्वं॥५९॥ श्वश्रूजनं सर्वमनुक्रमे
णविज्ञापय प्रापितमत्प्रणामः॥ प्रजानिषेकं मयि वर्तमानं सूनोरनुध्यायत चेतसेति॥ ६०॥

त्थं परवान् परतंत्रोसि॥५९॥ श्वश्रूजनमिति। सर्वं स्वश्रूजनमनुक्रमेण प्रापितमत्प्रमाणः सन् प्रणाममुक्त्वेत्यर्थः।
विज्ञापयमिति निषिच्यतेइति निषेकः प्रजैव निषेकः मयि वर्तमानं सूनोस्त्वत्पुत्रस्य प्रजानिषेकं गर्भं चेतसानुध्याय
ताशिवमस्त्विति चिंतयद्दति ॥६०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

वाच्यइति। सराजात्वयामद्वचनात्मद्वचनमवलंब्य। ल्यब्लोपे पंचमी। वाच्यो वक्तव्यः। किमित्यत आह। वन्हावि
त्यादिभ्यः सप्तभिः श्लोकैः। अक्ष्णः समक्षं अव्ययं विभक्तीत्यादिना ऽव्ययीभावः अव्ययीभावे शरत्प्रभृतिभ्यइतिस
मासांतो टच्प्रत्ययः। समक्षमग्रेवन्हौ विशुद्धामपि मां लोकापवादस्य श्रवणाद्धेतोरहासीः
त्याक्षीरितियत्तत्प्रख्यातस्य कुलस्य सदृशं किं न सदृशमित्यर्थः। यद्वा श्रुतस्य श्रवणस्य कुलस्य चेति योजना। कां
महार्यसीतिभावः॥६१॥ कल्याणेति। अथवा कल्याणबुद्धेः सुधियस्तव कर्तुमपि विपर्ययं त्यागो न कामचारः

वाच्यस्त्वयामद्वचनात्सराजा वन्हौ विशुद्धामपि यत्समक्षं॥ मां लोकवादश्रवणादहासीः श्रु
तस्य किं तत्सदृशं कुलस्य॥६१॥ कल्याणबुद्धेरथवा तवायं न कामचारो मयि शंकनीयः॥
ममैव जन्मांतरपातकानां विपाकविस्फूर्जथुरप्रसह्यः॥६२॥ उपस्थितां पूर्वमपास्य लक्ष्मीं वनं म
या सार्धमसि प्रपन्नः॥ तथास्पदं प्राप्य तयाति रोषात्सोढास्मि न त्वद्भवने वसंती॥६३॥ ॥

इच्छया करणं न शंकनीयः कामचारशंकापि न क्रियत इत्यर्थः। किंतु ममैव जन्मांतरपातकानां अप्रसह्यः विपच्य
तेइति विपाकः। फलं स एव विस्फूर्जथुरशनिनिर्घोषः। स्फूर्जथुर्वज्रनिर्घोषइत्यमरः॥६२॥ उपस्थितामिति। ९
पूर्वमुपस्थितां लक्ष्मीं अपास्य मया सार्धं वनं प्रपन्नः प्राप्तोसि तत्तस्मात् तया लक्ष्म्या तिरोषाद्धेतेन आस्पदं प्रति
ष्ठायामितिनिपातः प्राप्य वसंती अहं सोढा नास्मि॥६३॥ ॥ ॥ ॥ ॥ ॥ ॥

403
1947

निशाचरेति। निशाचरैरुपप्लुताः पीडिताभर्तारो यासां तासां निशाचरोपप्लुतभर्तृकाणां नद्यृतश्चेति कप्प्रत्ययः। तपस्वि
नीनां भवतः प्रसादादनुग्रहाच्छरण्या रक्षणसमर्था भूत्वा द्य त्वयि दीप्यमाने प्रकाशमाने सत्येव शरणार्थं अन्यां तप
स्विनीं कथं प्रपत्स्ये प्राप्स्यामि॥६४॥ किंवेति। किंवाथवा तव संबंधिनात्यंतेन पुनः प्राप्ति विरहितेन वियोगेन
मोघे निष्फलेऽस्मिन्हतजीविते तुच्छजीविते उपेक्षां कुर्यां किं न कुर्यामेव रक्षणीयं रक्षणार्हं अंतर्गतं कुक्षिस्थं
त्वदीयं तेजः शुक्रं गर्भस्वरूपं। शुक्रं तेजोरेतसी च बीजवीर्येंद्रियाणि चेत्यमरः। मे मम अंतरायो विघ्नो न स्याद्यदि

निशाचरोपप्लुतभर्तृकाणां तपस्विनीनां भवतः प्रसादात्॥ भूत्वा शरण्या शरणार्थमन्यं कथं प्रप
त्स्ये त्वयि दीप्यमाने॥६४॥ किं वा तवात्यंतवियोगमोघे कुर्यामुपेक्षां हतजीवितेस्मिन्॥ स्याद्रक्षणी
यं यदि मे न तेजस्त्वदीयमंतर्गतमंतरायः॥६५॥ साहं तपः सूर्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेश्चरितुं य
तिष्ये॥ तथा यथा मे जननांतरेपि त्वमेव भर्ता न च विप्रयोगः॥६६॥ नृपस्य वर्णाश्रमरक्षणं यत्स
एव धर्मो मनुना प्रणीतः॥ निर्वासिताप्येवमतस्त्वयाहं तपस्विसामान्यमवेक्षणीया॥६७॥

॥६५॥ साहमिति। साहं प्रसूतेरूर्ध्वं सूर्यनिविष्टदृष्टिः सती। तथाविधातपश्चरितुं यतिष्ये यथाभूतेन तपसा जननां
तरेपि त्वमेव भर्ता विप्रयोगश्च न स्यात्॥६६॥ नृपस्येति। वर्णानां ब्राह्मणादीनां आश्रमाणां ब्रह्मचर्यादीनां च परि
पालनं यत्स एव नृपस्य धर्मः सन्। अत्र मनुना प्रणीत उक्तः। अतः कारणाद्देव त्वया निर्वासितानिष्कासितापि अहं तप
स्विभिः सामान्यधारणं यथा तथावेक्षणीया कलत्रदृष्ट्याभावेपि वर्णाश्रमदृष्टिः सीतायां कर्तव्येत्यर्थः॥६७॥ ॥

तथेति। तस्याः सीतायावाक्यंप्रतिगृह्याङ्गीकृत्य रामानुजेलक्ष्मणेदृष्टिपथेव्यतीते अतिक्रांतेसतिसीताव्यस
नातिभाराद्दुःखातिरेकान्मुक्तकंठंयथातथावाग्रस्येर्थः। विविग्राभीताकुररीवउच्चैःक्रोशतीव। उत्क्रोशकुररौस
मावित्यमरः। भूयोपिभूयिष्ठंचक्रंदचुक्रोश॥६८॥ नृत्यमिति। मयूरानृत्यंविजहुःत्यक्तवंतः वृक्षाःकुसुमा
निहरिणयउपातान्दर्भान्विजहुः इत्थंतस्याःसीतायाःदुःखत्वंप्राप्तिप्रपन्नमपिअत्यंतरुदितमासीत्यथारा
मगेहेस्यपिज्ञाब्दार्थः॥६९॥ तामिति। कुशेध्माहरणाययातःकविःवाल्मीकिःरुदितानुसारीसन्तांसीतांअ

तथेतितस्याःप्रतिगृह्यवाचंरामानुजेदृष्टिपथंव्यतीते॥ सामुक्तकंठंव्यसनातिभाराच्चक्रंदविग्ना
कुररीवभूयः॥६८॥ नृत्यंमयूराःकुसुमानिवृक्षादर्भानुपात्तान्विजहुर्हरिण्यः॥ तस्याःप्रपन्नेस
दुःखभावमत्यंमासीद्रुदितंवनेपि॥६९॥ तामभ्यगच्छद्रुदितानुसारीकविःकुशेध्माहरणा
ययातः॥ निषादविद्धांडजदर्शनोत्थःश्लोकत्वमापद्यतयस्यशोकः॥७०॥ ॥ ॥

भ्यगच्छत्। अभिगमनचक्रे। कथंभूतयेत्याह। निषादेति। निषादेन। व्याधेनविद्धस्यांडजस्यक्रौंचस्यदर्शनेनउ
त्थउत्पन्नोयस्यशोकःश्लोकत्वंआपद्यते। इतिश्लोकरूपेणाविर्बभूवेत्यर्थः। सचश्लोकपठ्यते। मानिषाद
प्रतिष्ठात्वमगमःशाश्वतीसमाः यत्क्रौंचमिथुनादेकमवधीःकाममोहितमिति तिरश्चामपिदुःखंमु
निवर्यदादोह्रदलिंगादृशःगर्भचिह्नदर्शी मुनितस्यैसीतायैसुपुत्रस्याःसीस्त्वंसुपुत्राशिषंतस्मादितिहेतुभू १०
तामित्यर्थः सदृतिकिमुतान्येषामितिभावः॥७०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

405/1947

तामिति। सीताविलापाद्विरतासातीनेत्रावरणंदृष्टिप्रतिबंधकंअश्रुप्रमृज्यतंदृश्वानूदत्तवान्दोहदलिंगद
र्शीमुनितस्यैआशिषं। इतिवक्ष्यमाणप्रकारेणोवाचदृश्वान्साक्षान्नम्रदृश्वेतिक्वसंतोनिपातः॥७१॥ जान
इति। तांमिथ्यापवादेनक्षुभितेनभर्त्राविसृष्टांत्यक्तांप्रणिधानतःसमाधिदृष्ट्याजानेहेवैदेहिविषयांतरस्थं
देशांतरेनिष्टांपितुर्जनकस्यैवनिकेतंगृहंप्राप्तासीतत्तस्मान्माव्यथिष्ठामाशोचीःव्यथेर्लङ्। नामा— गइ

तमश्रुनेत्रावरणंप्रमृज्यसीताविलापाद्विरतावववंदे॥ तस्यैमुनिर्दोह्रदलिंगदर्शीदाश्वा
न्सुपुत्राशिषमित्युवाच॥७१॥ जानेविसृष्टांप्रणिधानतस्त्वांमिथ्यापवादक्षुभितेनभ
र्त्रा॥ तन्माव्यथिष्टाविषयांतरस्थंप्राप्तासिवैदेहिपितुर्निकेतं॥७२॥ उत्खातलोकत्र
यकंटकेपिसत्यप्रतिज्ञेप्यविकत्थनेन॥ त्वांप्रत्यकस्मात्कलुषितप्रवृत्तावस्त्येवमन्युर्भरताग्रजेमे
॥७३॥

तिअडागमप्रतिषेधः भर्तृपक्षितानांपितृगेहएववासउचितइतिभावः॥७२॥ उत्खातेति। उत्खातलोकत्रयकं
टकेपिरावणादिकंटकोद्धरणेपिसर्वेपिकारिण्यपीत्यर्थः। सत्यप्रतिज्ञेपिसत्यसंधेअविकत्थनेप्यनाम
श्लाघिन्यपिइत्थंस्नेहपात्रेपित्वांप्रत्यकस्मादकारणात्कलुषितप्रवृत्तौगर्हितव्यापारेभरताग्रजेमेमन्युः
कोपोस्त्येवसर्वगुणाढ्यदकोयंदोषइत्यर्थः। सीतानुनयार्थोयंसमोपालंभः॥७३॥ ॥ ॥ ॥

 तवेति। इंदुकीर्तिस्तवस्वसुरोदशरथस्य मे स्वसातेपिता जनकः सतां विदुषां भवोच्छेदकरः ज्ञानोपदेशादिना सं
सारदुःखध्वंसकारित्वं पतिदेवतानां पतिव्रतानां धुर्यग्रे स्थिता तेन निमित्तेन मम मानुकंप्या नुग्राह्या नासि तात्किं न
किंचिदित्यर्थः॥७४॥ तपस्वीति। तपस्विसंसर्गेण विनीतसत्वे शांतजंतुके ऽस्मिन्तपोवने वीतभया निर्भीका वस
रतोस्मिन्ग नैज अनघप्रसूतः। सफलप्रसूते स्तेतव अपत्यसंस्कारमयो जातकर्मादिरूपो विधिरनुष्ठानं भवि

तवेंदुकीर्तिः श्वसुरः सखा मे सतां भवोच्छेदकरः पिता ते॥ धुरि स्थिता त्वं पतिदेवतानां किं
तन्न येनासि ममानुकंप्या॥७४॥ तपस्विसंसर्गविनीतसत्वे तपोवने वीतभया वसास्मिन्
॥इतो भविष्यत्यनघप्रसूतेरपत्यसंस्कारमयो विधिस्ते॥७५॥ अशून्यतीरां मुनिसंनि
वेशैस्तमोपहंत्रीं तमसां विगाह्य॥ तत्सैकतोत्संगबलिक्रियाभिः संपत्स्यते ते मनसः प्र
सादः॥७६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ष्यति॥७५॥ अशून्येति। संनिविश्यंते ऽस्मिन्निति संनिवेशाः अधिकरणार्थे घञ्प्रत्ययः। मुनीनां संनिवेशैरूटजैरशून्य
तीरां पूर्णां तमसः पापस्यापहंत्रीं। तमस्तु क्लीबे पापनरकयोरित्यमरः। तमसां नदीं विगाह्य स्नात्वा बलिक्रियापे
क्षया पूर्वजातत्वं। तस्याः सैकतोत्संगेषु बलिक्रियाभिरिष्टदेवतापूजाविधिभिस्ते मनसः प्रसादः संपत्स्यते
भविष्यति॥७६॥ ॥ ५॥

407
1947

पुष्पमिति। ऋतुरस्य प्राप्तः आर्तवं स्वकालप्राप्तमित्यर्थः। पुष्पं फलं चार्तवे ऽकृष्टरोहि अकृष्टक्षेत्रोत्थमकृष्टपच्यमित्यर्थः
। बलये हितं बालेयं पूजायोग्यं छदिरुप-- बलवत्रिति ठञ्प्रत्ययः बीजं नीवारादिधान्यं अहरंत्य उदारवाचः प्र
गल्भगिरे मुनिकन्यकाः नवाभिषंगां नूतनदुःखां विनोदयिष्यंति विनोदं कारयिष्यंति॥७७॥ पयइति। स्वब ला
नुरूपैः स्वशक्त्यनुसारिभिः प्रयादिभिः पयसामंभसां घटैः स्तनैरिति ध्वन्यते आश्रमे बालवृक्षान् संवर्धयंती

पुष्पं फलं चार्तवमाहरंत्यो बीजं च कालेयमकृष्टरोहि॥ विनोदयिष्यंति नवाभिषंगामुदार
वाचो मुनिकन्यकास्त्वां॥७७॥ पयोघटैराश्रमबालवृक्षान्संवर्धयंती स्वबलानुरूपैः॥
असंशयं प्राक्तनयोपपत्तेः स्तनंधयप्रीतिमवाप्स्यसि त्वं॥७८॥ अनुग्रहप्रत्यभिनंदिनीतां
वाल्मीकिरादाय दयार्द्रचेताः॥ सायं मृगाध्यासितवेदिपार्श्वं स्वमाश्रमं शांतमृगं निनाय।
॥७९॥

तनयोपपत्तेः प्राक् असंशयं यथा तथा स्तनंधयंतीति स्तनंधयाः शिशवः नासिकास्तनयोर्ध्माधेटो रितिखश्प्रत्ययः
अरुर्द्विषेत्यादिना मुमागमः तेषु या प्रीति स्तामवाप्स्यासि तनः परं तु सुलभ एव विनोद इति भावः॥७८॥ अनुग्रहेति।
दयार्द्रचेता वाल्मीकिरनुग्रहं प्रत्यभिनंदतीति तथोक्तां तामादाय मृगैरध्यासितवेदपार्श्वं मेधिष्ठितवेदिप्रांतं
शांतमृगं स्वमाश्रमं निनाय॥७९॥ ॥५ ॥५॥ ॥ ५ ॥ ॥५ ॥ ॥५॥ ॥

र॰ मू॰ टी॰ १२ तामिति। शोकदीनां तां तस्याः सीताया आगमने प्रीतिर्यासां तासु तपस्वीषु पितृभिरग्निष्वात्तादिभिर्निर्विष्टसारां भु स १४
क्तसारां हिमांशोः रत्यामवशिष्टां कलां दर्शोः मावास्याकाल औषधीष्विवार्प्पयामास। अत्र पराशरः बिंबान्निर्मल
सोमं विशिष्टातस्य याकलासुधामृतमयी पुण्यां तामिंदोः पितरो मुनयः इतिव्यासश्च अमावास्यायां सदासोम
औषधीः प्रतिपद्यते॥८०॥ ताइति। तास्तापस्त्स्यै सीतायै सपर्यानुपदं पूजानंतरं दिनांते सायं निवासएव हेतुः
निवसहेतुः तस्य निवासहेतोः निवासार्थमित्यर्थः। षष्ठी हेतुप्रयोग इति षष्ठी। इंगुदी तापसतरुरित्यमरः। इंगु

ताम र्प्पयामास च शोकदीनां तदागमप्रीतिषु तापसीषु॥ निर्विष्टसारां पितृभिर्हिमांशोरंत्यां क
लां दर्श इवौषधीषु॥८०॥ ताइंगुदीस्नेहकृतप्रदीपमास्तीर्णमेध्याजिनतल्पमंतः॥ तस्यै सप
र्यानुपदं दिनांते निवासहेतोरुटजं वितेरुः॥८१॥ तत्राभिषेकप्रयता वसंती प्रयुक्तपूजा विधिना
तिथिभ्यः॥ वन्येन सा वल्कलिनी शरीरं पत्युः प्रजासंततये बभार॥८२॥ ॥ ॥ ॥

दीस्नेहेन कृतप्रदीपं अंतरास्तीर्णं मेध्यं शुद्धमजिनमेव तल्पं शय्या यस्मिंस्तमुटजं पर्णशालां वितेरुः ददुः॥८१॥
तत्रेति। तत्राश्रमे अभिषेकेण स्नानेन प्रयता नियता सती विधिना शास्त्रेणातिथिभ्यः प्रयुक्तपूजा कृतसंस्कारा वल्क
लिनी सा सीता पत्युः प्रजासंततये संतानाविच्छेदाय वन्येन कंदमूलादिना शरीरं बभार॥८२॥ अपीति। भूयः स राजा ३२
नुना सानुशयः सानुतापः स्यात्किमिति काकुः उत्सुकः शंकाजिताः हंता लक्ष्मणो सीतापरिदेवनं तत्सीताविलपं
अनुष्ठितं शासनं अग्रजाय शशंस॥८२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

409/1947

बभूवेति। सहसा। स बाष्पो रामः तुषारवर्षी सहस्यचंद्र इव बभूव। अत्यंत कृपावशात्तुषारवर्षिणा पौषचंद्रेण
तुल्योभूत्। पौषेण — सहस्यो — वित्यमरः। युक्तं चैतदित्याह। कौलीनाल्लोकापवादाद्भीतेन रामेण वैदेहसुता
सीता गृहान्निरस्ता न मनसा। चित्तान्न निरस्ता पंचम्यास्तसिल्॥८४॥ निगृह्येति। धीमान्नृवर्णानामाश्र
माणां चावेक्षणे अनुसंधाने जागरूकः अप्रमत्तः जागरूक इत्यूकप्रत्ययः। रजोरिक्तमनाः रजोगुणशून्यचित्तः
स रामः स्वयमेव शोकं निगृह्य निरुध्य भ्रातृभिः साधारणभोगं शरीरस्थितिमात्रोपयुक्तं कृत्स्नं समृद्धिमु

बभूव रामः सहसा च बाष्पस्तुषारवर्षीव सहस्यचंद्रः॥ कौ
लीनभीतेन गृहान्निरस्ता न तेन वैदेहसुता मनस्तः॥८४॥ निगृ
ह्य शोकं स्वयमेव धीमान्वर्णाश्रमावेक्षणजागरूकः॥ स भ्रा
तृसाधारभोगमृद्धं राज्यं रजोरिक्तमनाः शशास॥८५॥ तामेक
भार्यां परिवादभीरोः साध्वीमपि त्यक्तवतो नृपस्य॥ वक्षस्य संघ
ट्टसुखं वसंती रेजे सपत्नीरहितेव लक्ष्मीः॥८६॥ ॥ ॥

क्तं राज्यं शशास॥८५॥ तामिति। परिवादभीरोर्निंदाभीरोरतएव एकभार्यां साध्वीमपि तां सीतां त्यक्तवतो
नृपस्य वक्षसि स्य संघट्टसुखं असंभाव्यसुखं वसंती लक्ष्मीः सपत्नीरहितेव रेजे दिदीपे। तस्यान्यतरपरिग्रहो ना
भूदितिभावः॥८६॥

र॰मू॰टी॰ १२ सीतामिति। दशमुखरिपुः रामः सीतां हित्वा त्यक्त्वा अन्यां स्त्रियं नोपयेमे न परिणीतवान् इतियत् उपयमस्वकरणइ स॰१४
त्यात्मनेपदं। किंच तस्याः सीतायाः एव प्रतिकृतेः प्रतिमयाः हिरण्मयाः सखा प्रतिकृतिमुखः सन् क्रतून् आजहार
आहृतवानितियत् तेन श्रवणविषयव्यापिना श्रोत्रदेशगामिना भर्तुर्वृत्तांतेन वार्तया हेतुना सा सीता दुर्वारं दु

सीतां हित्वा दशमुखरिपुर्नोपयेमे यदन्यां तस्या एव प्रतिकृतिसखो यत्क्रतू
नाजहार॥ वृत्तांतेन श्रवणविषयप्रापिणा तेन भर्तुः सा दुर्वारं कथमपि प
रित्यागदुःखं विषेहे॥८७॥ इतिश्रीरघुवंशे कविश्रीकालिदासकृतौ सीता
परित्यागो नाम चतुर्दशः सर्गः संपूर्णः॥१४॥ ॥ ॥ ॥

निरोधं परित्यागेन दुःखं कथमपि विषेहे सोढवती॥८७॥ इति श्रीमहोपाध्याय कोलाचल मल्लिनाथसूरिविरचिता १२
यां संजीवनीसमाख्यायां सीतापरित्यागो नाम चतुर्दशः सर्गः॥ ॥ १४॥ ॥ ॥ श्रीरामचंद्रप्रसन्नोस्तु

411/1947

श्रीः॥ ॥कृतेति। कृतसीतापरित्यागः सः पृथिवीपालो रामो रत्नाकरमेखलां समुद्ररशनां पृथ्वीं बुभुजे भुक्तवान् न तु पार्थिवीमित्यर्थः। केवलां पृथिवीमेव बुभुजे भुक्तवान् न तु पार्थिवीमित्यर्थः। केवलां कृत्स्नां अबलां। अथ केवलपदेन चरितार्थत्वात् किमिति एवकारः। अत्र एवकारो निश्चयार्थः केवलां सकलामबलां। बलचलनेय दिनमारभ्य रामो रात्र्यंचकार कृतवान् पृथिव्यमसकृत्वंनासीदित्यर्थः। अपवाके उदके बलं कमुख्ययोः केवलां मुख्यामित्यर्थः। सापि रत्नरवचितमेखला पृथिव्याः कांतासंचिन्त्यते रामस्यान्यपरिग्रहो नास्तीति श्लोकाभिप्रायः॥१॥ लवणेनेति। लवणेन लवणाख्येन तमिस्रेण तमिस्राचारिणा रक्षसेत्यर्थः विलुप्तेज्याः विलुप्तयागक्रियाः अत एव शरणार्थिनो रक्षणार्थिनः यमुनाभाजो यमुनातीरवासिनो मुनयः शरण्यं रक्षणसमर्थं तं रामं रक्षितारमभ्ययुः प्राप्ताः याति लङ्॰

कृतसीतापरित्यागस रत्नाकरमेखलां॥ बुभुजे पृथिवीपालः पृथिवीमेव केवलां॥१॥ लवणेन विलुप्तेज्यास्तामिस्रेण तमभ्ययुः॥ मुनयो यमुनाभाजः शरण्यं शरणार्थिनः॥२॥ अवेक्ष्य रामं ते तस्मिन् न प्रजह्रुः स्वतेजसा॥ त्राणाभावे हि शापास्त्राः कुर्वन्ति तपसो व्ययं॥३॥ प्रतिशुश्राव काकुत्स्थस्तेभ्यो विघ्नप्रतिक्रियां॥ धर्मसंरक्षणार्थैव प्रवृत्तिर्भुवि शार्ङ्गिणः॥४॥

॥२॥ अवेक्ष्येति। ते मुनयो रामं अवेक्ष्य रक्षितारमिति शेषः। तस्मिन् लवणे स्वतेजसा शापरूपेण न प्रजह्रुः। तथा हि। त्रायत इति त्राणां रक्षकर्तरि ल्युट्। तदभावे शाय एवास्त्रं येषां ते शापास्त्राः संतस्तपसो व्ययं कुर्वन्ति शापदाना तपःक्षयः प्रसिद्धः॥३॥ प्रतीति। काकुत्स्थो रामः तेभ्यो मुनिभ्यो विघ्नप्रतिक्रियां लवणस्वरूपामित्यर्थः। प्रतिशुश्राव प्रतिजज्ञे। तथा हि शार्ङ्गिणो विष्णोः प्रवृत्तिः रामरूपेणावतरणं धर्मसंरक्षणमेवार्थः प्रयोजनं यस्याः सा तदर्थैव॥४॥ ५ ५

413
1947

ते मुनयो रामाय विबुधद्विषः सुरारेः लवणस्य वधोपायमाचख्युः किमिति। लुनातीति लवणः। नंद्यादित्वाल्ल्युः प्रत्ययः। तत्रैव निपातनत्वात् णत्वं। लवणः शूली शूलपाणिः सन् दुर्जयः अजय्यः। विशूलः शूलरहितः प्रार्थ्यतामभिगम्यतां। याञ्चायामभियानेच प्रार्थनाकथ्यते बुधैरिति केशवः। अथवा प्रार्थ्यतामुपरुध्यतामित्यर्थः तदुक्तं प्रार्थयते आर्थप्रार्थ्यामावरोधयोरिति॥५॥ आदिदेशेति। अथ तेषां मुनीनां क्षेमाय क्षेमकरणाय राघवो रामः शत्रुघ्नमादिदेश। तत्रोत्प्रेक्षते। अस्य शत्रुघ्नस्य नामारिनिग्रहात् शत्रुहननाद्धेतोः यथाभूतः अर्थोयस्य तद्यथार्थं करिष्यन्निव शत्रून् हन्तीति शत्रुघ्नः। अमनुष्यकर्तृकेपि च

ते रामाय वधोपायमाचख्युर्विबुधद्विषः॥ दुर्जयो लवणः शूली विशूलः प्रार्थ्यतामिति॥५॥ आदिदेशाथ शत्रुघ्नं तेषां क्षेमाय राघवः॥ करिष्यन्निव नामास्य यथार्थमरिनिग्रहात्॥६॥ यः कश्चन रघूणां हि परमेकः परंतपः॥ अपवाद इवोत्सर्गं व्यावर्तयितुमीश्वरः॥७॥

त्यशब्दात् कृतघ्नशत्रुघ्नादयः सिद्धा इति दुर्गसिंहः पाणिनीयेपि बहुलग्रहणाद्यथेष्टसिद्धिः कृत्यल्युटो बहुलमिति रामस्य स्वयमत्र नेंदनुमहीं॥६॥ यइति। परं शत्रुं तापयतीति परंतपः द्विषत्परयोस्तापेरिति खच्प्रत्ययः खचि ह्रस्व इति ह्रस्वः हि यस्माद्रघूणां मध्ये परंतपः यः कश्चन एकः अपवादो विशेषशास्त्रं उत्सर्गं सामान्यशास्त्रमिव परं शत्रुं व्यावर्तयितुं बाधितुमीश्वरः समर्थः अत एव शत्रुघ्नमेवादिदेशेति पूर्वेण संबंधः॥७॥ ६ ५ ५ ५

र॰म्॰टी॰ अथजैत्रेति। तदा अजैत्ररामेणप्रयुक्ताशीः कृताशीर्वादः रथी रथिकः अभीर्निर्भयः दाशरथिः शत्रुघ्नः पुष्पाणि आसां सं स॰३५
२ जातानि पुष्पिताः ताः सुरभीः आमोदमानाः वनस्थलीः पश्यन् ययौ॥८॥ रामेति। रामदिशात् अनुपदं सेनांगं तस्य तस्य श
त्रुघ्नस्य अध्ययनमर्थोऽभिधेयं यस्य तस्य धातोः इङ् अध्ययन इत्यस्य धातोः पश्चात् अधिरुपसर्ग इव सिद्धये प्रयोजनसाध
नाय स्वैकत्रान्यत्राभिधेयबोधनाय अभवत् अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु इत्यमरः। यथा इङ् धातावध्युपसर्गं नित्य

अथजैत्रप्रयुक्ताशीस्ततोदाशरथीरथी॥ ययौवनस्थलीःपश्यन्पुष्पिताःसुरभीरभीः॥८॥
रामादेशादनुपदंसेनांगंतस्यसिद्धये॥ पश्चादध्ययनार्थस्यधातोरधिरिवाभवत्॥९॥ आदि
ष्टवर्त्मामुनिभिःसगच्छंस्तपतांवरः॥ विरराजरथप्रष्ठैर्वालखिल्यैरिवांशुमान्॥१०॥

मित्यरतद्इतिन्यायेनाध्युपसर्गः स्वयमेवार्थसाधकस्य धातोः संनिधिमात्रेणोपकरणमिति सेनापि यातस्य तद्वदिति भावः॥ २
९ आदिष्टेति। रथप्रष्ठैः रथस्य अग्रगामिभिः प्रष्ठोऽग्रगामिनीति निपातः। मुनिभिः पूर्वोक्तैरादिष्टवर्त्मा निर्दिष्टवर्त्मा गच्छन् स्त
पतां दीप्यमानानां मध्ये वरः श्रेष्ठः शत्रुघ्नो वालखिल्यैर्मुनिभिरंशुमान् सूर्य इव विरराज। तेपि तस्य रथप्रष्ठा इत्यनुसं
धेयं॥१०॥

415/1947

तस्येति। यतो गच्छतः इण धातोः शतृप्रत्ययः। तस्य शत्रुघ्नस्य मार्गवशात् रथस्वनेनोत्कंठा उद्ग्रीवा मृगा यस्मिन् वल्मीकाय
वाल्मीकि संबंधिनि वृद्धाच्छ इति छप्रत्ययः। तपोवने एकां वसतिं वसन्॥ वसतिः रात्रौ वेश्मनि इत्यमरः ११ तमिति। क्लान्तवाहनं श्रान्तयुग्यं तं कुमारं शत्रुघ्नं ऋषिर्वाल्मीकिः तपः प्रभावसिद्धाभिर्विषयप्रतिपत्तिभिः उत्कृष्टसंभा
वनाभिः पूजयामास॥ १२॥ तस्यामिति। तस्यामेव यामिन्यां रात्रौ अस्य शत्रुघ्नस्य अंतरस्यास्तीत्यंतर्वत्नी गर्भिणी। अंतर्वत्नी

तस्यमार्गवशादेकांवसन्वसतिमुत्सुकः॥ रथस्वनोत्कंठमृगेवाल्मीकीयेतपोवने॥११॥
तमृषिःपूजयामाससकुमारंश्रान्तवाहनं॥ तपःप्रभावसिद्धाभिर्विषयप्रतिपत्तिभिः॥
१२॥ तस्यामेवास्ययामिन्यामंतर्वत्नीप्रजावती॥ सुतावसूतसंपन्नौकोशदंडाविवक्षि
तिः॥१३॥ संतानश्रवणाद्भ्रातुःसौमित्रिःसौमनस्यवान्॥ प्रांजलिर्मुनिमामंत्र्यप्रातर्युक्त
रथोययौ॥१४॥

च गर्भिणी इत्यमरः। अंतर्वत्नीति वतोर्नुगिति ङीप्नुगागमश्च प्रजावती भ्रातृजाया सीता क्षितिः संपन्नौ कोशदंडाविव सुतावसूत
तकोशदंड अश्वतुरंगबलं॥ १३॥ संतानेति। भ्रातुर्ज्येष्ठस्य संतानश्रवणाद्धेतोः सौमनस्यवान् प्रीतिमान् सौमित्रिः शत्रुघ्नः प्रात
र्युक्तरथः सज्जरथः सन् प्रांजलिः कृतांजलिः मुनिमामंत्र्य आपृच्छ्य ययौ॥१४॥

सचेति। शत्रुघ्नश्च मधूपघ्नं मधुवनमिति लवणपुरं प्राप्त। कुंभीनसी नाम रावणस्य सा तस्याः कुक्षिजः पुत्रो लवणश्च वनात्करं बलिमिव सत्वानां प्राणिनां राशिमादाय उपस्थितः॥३५॥ धूमेति। किंभूतो लवणः धूम इव धूम्रः कृष्णलोहितवर्णः धूम्र — कृष्णलोहितइत्यमरः वसागंधो ह्नसेदगंधः सो स्यास्तीति वसागंधी। हृन्मेदं स्तु वपा वसेत्यमरः। ज्वाला इव बभ्रवः पिंगलाः शिरोरुहाः केशा यस्य स तथोक्तः। विपुले नकुलेवि — बभ्रुः स्यात्पिंगलेप्यमरः क्रतव्यं मांसं आदंतीति क्रव्यादः राक्षसाः तेषां गण इव परीवारो यस्य स तथोक्तः। अत एव जंगमश्चरिष्णुश्चिताग्निरिव स्थितः। तत्सक्ते धूमैर्धूम्रो धूम्रवर्णः ज्वाला एव

सच प्रापमधूपघ्नं कुंभीनस्याश्च कुक्षिजः॥ वाचात्करमिवादाय सत्वराशिमुपस्थितः॥३५॥
धूमधूम्रो वसागंधी ज्वाला बभ्रुशिरोरुहः॥ क्रव्याद्गणपरीवारश्चिताग्निरिव जंगमः॥३६॥
युग्मं अपशूलं तमासाद्य लवणं लक्ष्मणानुजः॥ रुरोध संमुखीनो हि जयो रंध्रप्रहारिणां॥ ३७॥
नातिपर्याप्तमालक्ष्य मत्कुक्षेरद्य भोजनं॥ दिष्ट्यात्वमसि मे धात्रा भीतेनेवोपपादितः॥३८॥

बभ्रवः शिरोरुहाः क्रव्यादः प्रथ्रादय इत्यनुसंधेयं॥ ३६॥ अपशूलमिति। स लक्ष्मणानुजः शत्रुघ्नः अपशूलं शूलरहितं लवणं आसाद्य रुरोध। तथाहि। रंध्रप्रहारिणां रंध्रप्रहरणशीलानां अपशूलमेवात्र रंध्रं जयः। संमुखीनो हि संमुखदर्श्यो हि। यथा संमुखस्य दर्शनं इति प्रत्ययोप्यधिकरणार्थ स्क दुर्लभ एव॥ ३७॥ नातीति युग्मं। रक्षसो लवणः अत्यमत्कुक्षेः भुज्यत इति भजनं भोज्यं मृगादिकं नातिपर्याप्तं अनतिसमग्रमालक्ष्य दृष्ट्वा भीतेनेव धात्रा दिष्ट्या मे प्रतिपादितः कल्पितोसि॥३८॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

417
1947

इतीति। इति शत्रुघ्नं संतर्ज्य राक्षसस्तस्य शत्रुघ्नस्य जिघांसया हंतुमिच्छया प्रांशुमुन्नतं द्रुमं मुस्तास्तंबमिवाक्लेशेनोत्पाटयामास॥१९॥ सौमित्रेरिति। नैर्ऋतेरितो राक्षसप्रेरितः शाखी द्रुमः अंतरामध्ये निशितैर्बाणैः शकलीकृतः। स सौमित्रेः शत्रुघ्नस्य गात्रं न प्राप किंपुष्परजः प्राप्तः॥२०॥ विनाशादिति। रक्षो लवणस्तद्वृक्षस्य विनाशात् महोपलं महांतं पाषाणं पृथक्स्थितं कृतांतस्य मुष्टिमिव द्वितीयं मुष्टिशब्दः तस्मै शत्रुघ्नाय प्रजिघाय प्रहितवान्॥२१॥ ऐंद्रमिति। समहोपलः श

इति संतर्ज्य शत्रुघ्नं राक्षसस्तज्जिघांसया॥ प्रांशुमुत्पाटयामास मुस्तास्तंबमिव द्रुमं॥ १९॥ युग्मं
सौमित्रेर्निशितैर्बाणैरंतरा शकलीकृतः॥ गात्रं पुष्परजः प्राप न शाखी नैर्ऋतेरितः॥२०॥
विनाशात्तस्य वृक्षस्य रक्षस्तस्मै महोपलं॥ प्रजिघाय कृतांतस्य मुष्टिं पृथगिव स्थितं॥२१॥
ऐंद्रं शत्रुमपायस्क शत्रुघ्नेन स ताडितः॥ सिकतात्वादपि परां प्रपेदे परमाणुतां॥२२॥ तमुपाद्रवदुद्यम्य राक्षसो दक्षिणं करं॥ एकताल इवोत्पातपवनप्रेरितो गिरिः॥ २३॥

शत्रुघ्नेन ऐंद्रमिंद्रदेवताकमस्त्रं उपादाय ताडितो भिन्नः सन् सिकतात्वादपि सिकताभावादपि परां परमाणुतां प्रपेदे। यतो णुर्नास्ति स परमाणुरित्याहुः॥२२॥ तमिति। निशाचरो राक्षसः। दक्षिणं दोः। एकाक्षरनिघंटमालायां पुनपुंसकयोर्बाहुर्दोः स्यात्सव्येतरं बाहुं उद्यम्य एकस्ताल वृक्षीयस्मिन्स एकतालः उत्पातपवनेन गिरिरिव तं शत्रुघ्नं उपद्रवन् अभिद्रुतः॥ २३॥

काष्णिनेति। कृष्णेनैव स्रष्ट्रेवेनोक्तं च रामायणे एवमेष प्रजानां तो विश्वास्ति सोऽभयः शारः। विष्णुर्नारायणः कृष्ण इत्यमरः। स शत्रु
र्लवणः कार्ष्णेन पत्रिणा बाणेन भिन्नहृदयः पतन्भुवः कंपं अनिनाय नीतवान् इहवा भारादित्यर्थः। आश्रमवासिनां मुनीनां
कंपं जहार। तन्नाशादकुतोभया बभूवुरित्यर्थः॥२४॥ वयसामिति। हतस्य रक्षस उपरि वयसां पंक्तयः पेतुः। तस्य तिद्वंद्विनः
शत्रुघ्नस्य मूर्ध्नि दिवि भवा दिव्याः कुसुमवृष्टयः पेतुः॥२५॥ स इति। वीरः शत्रुघ्नः लवणं हत्वा तदात्मानं महौजसो महाबल
स्य इंद्रजिद्वधेन शोभिनः भ्रातुर्लक्ष्मणस्य समानाद ररे शापिनं सोदर्यमेकोदरत्वं मेने। सोदराद्यदिति। यत्प्रत्ययः॥२६॥

काष्णेन पत्रिणा शत्रुः स भिन्नहृदयः पतन्॥ आनिनाय भुवः कंपं जहाराश्रयनिवासिनां॥२४॥
वयसां पंक्तयः पेतुर्हतस्योपरि रक्षसः॥ तत्प्रतिद्वंद्विनो मूर्ध्नि दिव्याः कुसुमवृष्टयः॥ ॥२५॥
स हत्वा लवणं वीरस्तदा मेने महौजसः॥ भ्रातुः सोदर्यमात्मानमिंद्रजिद्वधशोभिनः॥२६॥
तस्य संस्तूयमानस्य चरितार्थैस्तपस्विभिः॥ शुशुभे विक्रमोदग्रं व्रीडयावनतं शिरः॥ २७॥
उपकूलं स कालिंद्याः पुरं पौरुषभूषणः॥ निर्ममे निर्ममोर्थेषु मथुरां मधुराकृतिः॥ २८॥

तस्येति। चरितार्थैः कृतकार्यैस्तपस्विभिः मुनिभिः संस्तूयमानस्य तस्य शत्रुघ्नस्य विक्रमोदग्रं। उन्नतं व्रीडया लज्जया वनतं
शिरः शुशुभे विक्रांतस्य लज्जैव भूषणमिति भावः॥२७॥ उपेति। पौरुषभूषणः स्वयं अर्थेषु विषयेषु निर्ममः निस्पृहो मधुरा
कृतिः सौम्यरूपः शत्रुघ्नः। कालिंद्या यमुनायाः कूले उपकूलं विभक्त्यर्थेऽव्ययीभावः मथुरां मथुरानामपुरीं निर्ममे निर्मितवान्
निर्मम इत्याख्यातः॥२८॥

419
1947

येति। यापूः श्री मनोराजा यस्या पुरः सा स्वराज्ञी स्वराज्या। स्वराज्ञो वा भावः सौराज्यं तेन प्रकाशाभिः प्रकाशमाभिः पौराणां वि
भूतिभिरैश्वर्यैः स्वर्गस्याभिस्यंदो अतिरिक्तजनः तस्य वमनमाहरणं कृत्वोपविनेशिता उपस्थापितेव बभौ। अत्र कौटिल्यः भूत
पूर्वमभूतपूर्वं वा जनपदं परदेशप्रवाहेन स्वदेशाभिस्यंदवमनेन वेशयेदिति॥ २९॥ तत्रेति। तत्र मथुरायां सौधगतो ह
र्म्यगतः सन् स्वचक्रवाकिनीं चक्रवाकवतीं यमुनां हेमभक्तिमतीं स्ववर्णरचनावतीं प्रवेणीं वेणीमिव वेणीप्रवेणी इत्यमरः। पश्य
न्नपि प्रिये प्राङ्प्राणनदतिथातौ दैवादिकार्णल्लिङ् ॥३०॥ संप्रतिरामसंतानवृत्तांतं प्राह सखेति दशरथस्य सखा जनकस्य

या सौराज्यप्रकाशाभिर्बभौ पौरविभूतिभिः॥ स्वर्गाभिस्यंदवमनं कृत्वेवोपनिवेशिता॥२९॥
तत्र सौधगतः पश्यन्यमुनां चक्रवाकिनीं॥ हेमभक्तिमतीं भूमेः प्रवेणीमिव पिप्रिये॥३०॥
२स तौ कुशलवोन्मृष्टगर्भक्लेदौ तदाख्यया॥ कविः कुशलवावेव चकार किल नामतः॥ ३२॥
१सखा दशरथस्यापि जनकस्य च मंत्रकृत्॥ संचस्कारोभयप्रीत्या मैथिलेयौ यथाविधि॥३३॥

मंत्रकृत् मंत्रद्रष्टा स वाल्मीकिरपि। स्वकर्मणा येत्यादिना क्विप्। उभयोर्दशरथजनकयोः प्रीत्या स्नेहेन मैथिलेयौ मैथि
लीपुत्रौ यथाविधि यथाशास्त्रं संचस्कार संस्कृतवान् जातकर्मादिभिरिति शेषः॥३३॥ स इति। स कविर्वाल्मीकिः कुशै
र्दर्भैर्लवैर्गोपुच्छलोमभिश्च। लवो लवनकिंजल्कपक्ष्मगोपुच्छलोमस्विति वैजयंती। उन्मृष्टो गर्भक्लेदो गर्भोपद्रवो ययो
स्तौ कुशलवोन्मृष्टगर्भक्लेदौ मैथिलेयौ तेषां कुशानां लवानां चाख्यया नाम्ना यथासंख्यं कुशलवावेव चकार किल। कु
शोन्मृष्टः लवोन्मृष्टो लव इत्यर्थः॥३२॥ ५२ ५२ ५२ ५२ ५२

सांगमिति। किंचिदुत्क्रांतशैशवौ अतिक्रांतबाल्यौ तौ सांगं च वेदं अध्याप्य कवीनां प्रथमपद्धतिं कविताबीजमित्य
र्थः। स्वकृतिं काव्यं रामायणाख्यं गाययामास। गायतेरित्यस्य शब्दकर्मत्वादितिबुद्धिइत्यादि। नाद्रिकर्मकत्वं ॥३३॥ राम
स्येति। सुतौ रामस्य वृत्तं मातुरग्रतो मधुरं गायंतौ तद्वियोगव्यथां रामविरहवेदनां किंचिच्छिथिलीइतरेपि। रघोर्वंश्याः वं
श्यभवाः तेषां भरतादीनां संबंधात्त्रेताग्नयः तेषां तेज इव तेजो येषां ते त्रेताग्नितेजसः। इतरे रामादन्ये त्रयो भरतादयो

सांगं च वेदमध्याप्य किंचिदुत्क्रांतशैशवौ॥ स्वकृतिं गाययामास कविप्रथमपद्धतिं॥३३॥
रामस्य मधुरं वृत्तं गायंतौ मातुरग्रतः॥ तद्वियोगव्यथां किंचिच्छिथिलीचक्रतुः सुतौ॥३४॥
इतरेपि रघोर्वंश्यास्त्रयस्त्रेताग्नितेजसः॥ तद्योगात्पतिवत्नीषु पत्नीष्वासन्द्विसूनवः॥३५॥
शत्रुघातिनि शत्रुघ्नः सुबाहौ च बहुश्रुते॥ मथुराविदिशे सून्वोर्निदधे पूर्वजोत्सुकः॥३६॥

पितृयोगात् भरतादिसंबंधात्पतिवत्नीषु भर्तृमतीषु जीवितपतिकासु ख्यातिमतीष्वित्यर्थः। पतिवत्नी सभर्तृकेत्यमरः।
अंतर्वत्न्यितिवत्तो नुगिति ङीप् प्रत्यययोस्तुगागमश्च। तासु पत्नीषु द्विसूनव आसन् द्वौ द्वौ सूनू येषां ते द्विसूनवः इतिविग्रहः
क्वचित्संख्याशब्दस्येवद्वति विषयेवीप्सार्थत्वं सप्तपर्णादिवत् ॥३५॥ शत्रुघातिनीति। पूर्वजोत्सुको ज्येष्ठप्रियः शत्रुघ्नः बहुश्रु
ते शत्रुघातिनि बहुश्रुते सुबाहौ च तन्नामकयोः सून्वोः मथुरां च विदिशां च ते नगर्यौ निधाय गत इत्यर्थः ॥३६॥ ॥

421
1947

भूय इति। शत्रुघ्नः मैथिलीतनययोः कुशलवयोरुद्गीतेन गीतेन निष्पंदमृगं गानप्रियतया निश्चलहरिणं वाल्मीकेरा
श्रमं भूयः पुनरपि तपोव्ययः संविधानकरणार्थं तपोहानिर्माभूदिति हेतोः अत्यगात् अतिक्रम्यगतः ॥३७॥ वशीति। व
शी सः लवणस्य वधाद्धेतोः पौरैर्नगरस्थैः अत्यंतगौरवं यस्मिन्कर्मणि तत्तथेक्षितः सन् रथ्यासंस्कारैः तोरणादिभिः शोभ
मानया तामयोध्यां विवेश ॥३८॥ स इति। स शत्रुघ्नः सभामध्ये सभासद्भिरुपस्थितं सेवितं सीतापरित्यागाद्भुवः सामान्यप
तिमसाधारणपतिं रामं ददर्श ॥३९॥ तमिति। अग्रजो रामः लवणस्यांतकं मारितं शत्रुघ्नं कालनेमिनाम्नि राक्षसस्तस्य वधा

भूयस्तपोव्ययो माभूद्वाल्मीकेरिति सोत्यगात्॥ मैथिलीतनयोद्गीतनिस्पंदमृगमाश्रमं॥३७॥
वशी विवेश चायोध्यां रथ्यासंस्कारशोभिनीं॥ लवणस्य वधात्पौरैरधिगौरवमीक्षितः॥३८॥
स ददर्श सभामध्ये सभासद्भिरुपस्थितं॥ रामं सीतापरित्यागादसामान्यपतिं भुवः॥३९॥
तमभ्यनंदत्प्रणतं लवणांतकमग्रजः॥ कालनेमिवधात्प्रीतस्तुराषाडिव शार्ङ्गिणं॥४०॥
स पृष्टः सर्वतो वार्तमाख्यद्राज्ञे न संततिं॥ प्रत्यर्पयिष्यतः काले कवेराद्यस्य शासनात्॥४१॥

त्प्रीतः तुरां वेगं सहत इति तुराषाट् इंद्रः छंदसी सहविभू प्रत्ययः। भाषायामिति युज्यते न्येषामपि दृश्यत इति दीर्घः सहेः सो
ढः सद्गतिषत्वं शार्ङ्गिणमुपेंद्रमिवाभ्यनंदत् ॥४०॥ स इति। शत्रुघ्नः पृष्टः सन् सर्वतो वार्तं कुशलं आख्यात् आख्यातवा
न् ख्यातेर्लुङ्। संततिं कुशलवोत्पत्तिं नाख्यात् कृतः काले वसरे प्रत्यर्प्यिष्यतः आद्यस्य कवेः वाल्मीकेः शासनात् ॥४१॥
॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

423/1947

इतीति। इत्याप्तवचनाद्रामो वर्णविक्रियां वर्णपचारं चिनेष्यन् अपनेष्यन् वेगनिष्कंपं केतुना पत्रेण धाहन्नेपुष्यकेण पत्रं वाह नपक्षयोरित्यमरः। द्विजाः पपात धावति स्म ४७ अथेति। इक्ष्वाकुवंशोऽस्य एवाक्ष्वाको रामः कोपधादित्यणि कृते दंडिनायने त्यादिना उकारनिपातलोपः धूमेन पीयमानेनाभिताम्राक्षं वृक्षशाखावलंबिनं अधोमुखं तपस्यंतं तपश्चरंतं कंचित्पुरु षं ददर्श॥ ४८॥ पृष्टेति। राज्ञा नामचीन्वयश्च पृष्टो नामान्वयो यस्य स तथोक्तः॥ धूमं पिबतीति धूमपः स्कपीति योगविभाग त्कप्रत्ययः। स पुरुषः आत्मानं स्वः पदार्थिनं स्वर्गार्थिनं अनेन प्रयोजनमपि पृष्ट इति ज्ञेयः शंबुकं नाम शूद्रमाचष्ट बभाषे

इत्याप्तवचनाद्रामो विनेष्यन्वर्णविक्रियां॥ शिरःपपात पत्रेण वेगनिष्कंपकेतुना॥ ४७॥ अथ धूमाभिता म्राक्षं वृक्षशाखावलंबिनं॥ ददर्श कंचिदैक्ष्वाकस्तपस्यंतमधोमुखं॥ ४८॥ पृष्टनामान्वयो राज्ञा स किला चष्ट धूमपः॥ आत्मानं शंबुकं नाम शूद्रं स्वःपदार्थिनं॥ ४९॥ तपस्यनधिकारित्वात्प्रजानां तमघावहं॥ शीर्षच्छेद्यं परिच्छेद्य नियंता शस्त्रमाददे॥ ५०॥ स तद्वक्त्रं हिमक्लिष्टकिंजल्कमिव पंकजं॥ ज्योतिःकणा हतश्मश्रु कंठनालादपातयत्॥ ५१॥ ॥

॥ ४९॥ तपस्वीति। तपस्यनधिकारित्वात् अधिकाररहितत्वात् प्रजानामघावहं दुःखावहं कुतः जपस्तपस्तीर्थयात्रा प्रव्रज्या मंत्रसाधनं। पूजनं वासुदेवस्य स्त्रीशूद्रपतना निषट्। इति धर्मशास्त्रेण तं शूद्रं शीर्षच्छेद्यं शीर्षं मूर्धा मस्तकं मस्त्रिया मित्य मरः। शीर्षच्छिदायम्ब्वेति यत्प्रत्ययः। परिच्छिद्य निश्चित्य नियंता रक्षको रामः शस्त्रं आददे जग्राह॥ ५०॥ सइति। स रामः ज्यो तिःकणैः स्फुलिंगैः शूद्रस्याधोमुखत्वादतिवैश्वानरसान्निध्यात् आहतानि दग्धानि श्मश्रूणि यस्य तत्तथोक्तं तद्वक्त्रं हिम क्लिष्टकिंजल्कं हिमेन तुषारेण क्लिष्टा ग्लिताः किंजल्काः केसरा यस्य तत्पंकजमिव कंठ एव नालं तस्मादपाहरत्॥ ५१॥

कृतेति। शूद्रः शंबुकः राज्ञा स्वयं कृतदंडः। कृतशिक्षः सन् सतांगतिं लेभे॥ दुश्चरेणापि स्वमार्गविलंघिना व्यधिकार ३९
दुष्टेनेर्थः तथा सान लभेत। अत्र मनुः राजभिः कृतदंडास्तु कृत्वा पापानि मानवाः निर्मलाः स्वर्गमायांति संतः सुकृति
नोयथेति॥५२॥ रघुनाथ इति। रघुनाथोपि मार्गसंदर्शितात्मनामहौजसा। गस्त्येनेंदुनाशरत्काल इव संयुयुजे संग
तः इंदोरपि विशेषणं योज्यं॥५३॥ कुंभेति। कुंभयोनिरगस्त्यः पीतेन समुद्रेण आत्मनि ष्क्रयमिव ओमोचनमूल्यमिव दत्तं
। अत एव परिगृह्यते इति परिग्रहः दिव्यानां परिग्रहः इत्यर्थः। दिविभवैर्दिव्यैः परिग्राह्यमित्यर्थः। तमलंकारं तस्मै रामा

कृतदंडः स्वयं राज्ञा लेभे शूद्रः सतांगतिं॥ तपसा दुश्चरेणापि न स्वमार्गविलंघिना॥५२॥ रघुनाथोप्यगस्त्ये
न मार्गसंदर्शितात्मना॥ महौजसा संयुयुजे शरत्काल इवेंदुना॥५३॥ कुंभयोनिरलंकारं तस्मै दिव्यपरिग्र
हं॥ ददौ दत्तं समुद्रेण पीतेवात्मनिनिष्क्रयं॥५४॥ तं दधन्मैथिलीकंठनिर्व्यापारेण बाहुना॥ पश्चान्निवत्र
ते रामः प्राक् परासुर्द्विजात्मजः॥५५॥ तस्य पूर्वोदितां निंदां द्विजः पुत्रसमागतः॥ स्तुत्या निवर्तयामास त्रा
तुर्वैवस्वतादपि॥५६॥ तमध्वराय मुक्ताश्वं रक्षःकपिनरेश्वराः॥ मेघाः सस्यमिवांभोभिरभ्यवर्षन्नुपायनैः॥५७॥

यददौ॥५४॥ तमिति। मैथिलीकंठे निर्व्यापारेण बाहुना तमलंकारं दधद्रामः पश्चान्निवृत्तो निवृत्तः परासुर्मृतो द्विजा
त्मजः प्राक् रामात् पूर्वं निववृते जीवति स्मात्तस्येति पुत्रसमागतः द्विजः वैवस्वतो दंतकादपि त्रातुः रक्षकस्य नीजनार्थानां
भयहेतुरित्यपादाना संज्ञनी। तस्य रामस्य पूर्वोदितां निंदां स्तुत्या निवर्तयामास दूरीचकार॥५६॥ तमिति। अध्वराय अश्वमेधा ७
यमुक्ताश्वं तं रामं रक्षःकपिनराणामीश्वराः सुग्रीवविभीषणादयो राजानश्च। मेघाः अंभोभिः सस्यमिव उपायनैरभ्यवर्षन्॥५७॥

425
1947

दिग्भ्य इति। निर्मंत्रिता राम्रुताम हर्षयः दिग्भ्यः भूम्याः संबंधीनि भौमानि धिष्ण्यानि स्थानान्येव हित्वा न धिष्ण्यं स्थानं गृहे
क्ष्यमरः। किंतु ज्योतिर्मयानि नक्षत्ररूपाणि धिष्ण्यान्यपि हित्वा दिग्भ्य एनं राममभिजग्मुः॥५८॥ उपशल्येति। च
त्वारि द्वाराण्येव मुखानि यस्याः सा अयोध्या उपशल्येषु ग्रामांतेषु निविष्टैः ग्रामांत उपशल्यं स्यादित्यमरः। तैर्महर्षि
भिः सद्यः स्रष्टा लोकपितामहस्येयं पैतामही तनुर्मूर्तिरिव बभौ॥६१॥ श्लाघ्य इति। वैदेह्यास्त्यागोपि श्लाघ्यो वर्ण्य
एव कुतः यस्मात्त्याग्वंशः प्राचीनस्थूणो यज्ञसाविशेषः। तद्वासिनो नास्त्यन्या जाया यस्य तस्यानन्यजानेः जाया

दिग्भ्य एनं रामंत्रिताश्चैनंमभिजग्मुर्महर्षयः॥ न भौमान्येव धिष्ण्यानि हित्वा ज्योतिर्मयान्यपि॥
॥५८॥ उपशल्यनिविष्टैस्तैश्चतुर्द्वारमुखी बभौ॥ अयोध्या सृष्टलोकेव सद्यः पैतामही तनुः॥५९॥
श्लाघ्यस्त्यागोपि वैदेह्याः पत्युः प्राग्वंशवासिनः॥ अनन्यजानेस्तस्यासीत्सैव जाया हिरण्म
यी॥६०॥ विधेरधिकसंभारस्ततः प्रववृते मखः॥ आसन्यत्र क्रिया विघ्ना राक्षसा एव रक्षिणः॥६१॥

यातिङिःत्ति समासांतो निङादेशः। यलोपः प्रत्युः रामस्य हिरण्मयी सुवर्णमयी सौवर्णइंद्रं इति नायनादि सूत्रेण निपातः सा
निजैव जाया पत्नी आसीत्। यस्तु पिंडं पितुः पाणौ विज्ञातो न चदत्तवान्। इत्यत्र ------- पत्नीकः कथं व्रजेत्। पत्नी
यत्तं॥६०॥ विधेरिति। ततो विधेः शास्त्रादधिकसंभारो मखः प्रववृते प्रवृत्तः। यत्र मखे विहन्यंते एभिरिति विघ्नाः प्रत्यू
हाः। मखपचेघञर्थे कविधानमिकप्रत्ययः। अत्र कर्तृत्वलक्षणायाः क्रियायाः विघ्नाः॥ अनुष्ठाननिघातकाः राक्षसा
एव रक्षिणो रक्षका आसन्॥६१॥ ॥ ७ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

र॰मू॰टी॰ ८ अथेति। अथमैथिलेयौमैथिलीतनयौस्त्रीभ्योढगेयणप्रत्ययः कुशलवौगुरुणावाल्मीकिनाचोदितौप्रेरितौस
तौप्रचेतसोपत्यंपुमान्प्राचेतसोवाल्मीकिस्तस्यउपज्ञाअद्यज्ञानंयत्रतत्प्राचेतसोपज्ञंउपज्ञानमद्यंस्यादित्यमरः स४५
।उपज्ञोपक्रमम्इत्यादिनानपुंसकत्वंउपज्ञोपक्रमांतांश्चतदादिश्चप्रकाशितइत्यमरः। रामस्यायनंचरितंरामाय
णंरामायणाख्यंकाव्यंपूर्वपदात्संज्ञायामगइतिणत्वंउत्तरायणवत्। इतस्ततोजगतुःगायतेर्लिट्। प्राचेतसस्त्वादि
कविःस्यात्मैत्रावरुणश्चसःवाल्मीकिश्चाप्यगाधेयोविश्वामित्रश्चकौशिकइति॥६३॥ वृत्तमिति। रामस्य

अथप्राचेतसोपज्ञंरामायणमितस्ततः॥ मैथिलेयौकुशलवौजगतुर्गुरुणोदितौ॥६३॥ वृत्तंराम
स्यवाल्मीकेःकृतिस्तौकिंनरस्वरौ॥ किंतद्येनमनोहर्तुमलंस्यातांनशृण्वतां॥६४॥ रूपे
गीतेचमाधुर्यंतयोस्तज्ज्ञनिवेदितं॥ ददर्शसानुजोरामःसुश्रावनकुतूहली॥६५॥ तद्गी
तश्रवणैकाग्रासंसदश्रुमुखीबभौ॥ हिमनिस्यंदिनीप्रातर्निर्वातेववनस्थली॥६६॥॥

वृत्तंवर्ण्यवस्तुविशेषः। वाल्मीकेःकृतिःकाव्यंगेयमितिशेषः। तौकुशलवौकिंनरस्वरौकिंनरकंठौगायकौपुनरिति
शेषः। अतएवतत्किंयेननिमित्तेनतौश्रृण्वतांमनोहर्तुंअलंशक्तौनस्यातांसर्वंसरसमित्यर्थः॥६४॥ रूपेइति। त
ज्ज्ञानंतीतितज्ज्ञाःतत्ज्ञैरभिज्ञैर्निवेदितंतयोःकुशलवयोःरूपेआकारेगीतेचमाधुर्यंरामणीयकंसरामः
कुतूहलीसानुजःसन्यथासंख्यंतत्ददर्शशुश्राव॥६५॥ तदिति। तयोर्गीतिश्रवणेएकाग्राआसक्ताअश्रुमु
खीआनंदादितिभावः संसत्सभाभातार्हिमनिस्यंदिनीनिर्वातावातरहितावनस्थलीवबभौअश्रुभिआनंदपारव ८
श्यान्निस्पंदमास्थेत्यर्थः॥६६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

427
1947

वयइति। साजनताजनानांसमूहःग्रामजनेत्यादिनातल्प्रत्ययः। वयोवेषाभ्यामेवविसंवादिविलक्षणातदात
योःकुशलवयोःरामस्यचसादृश्यंप्रेक्ष्यनास्याक्षिकंपीयाम्भिन्नाक्षिकंपंयथातथानञर्थस्यनशब्दस्यबहुव्रीहिः
व्यतिष्ठत्सर्वप्रोपविभ्यस्थइत्यात्मनेपदंविस्मयादनिमिषमद्राक्षीदित्यर्थः॥६७॥ उभयोरिति। लोकोजनःउभ
योःप्राविण्येनतथानविसिस्मियेनविस्मितवान्। यथान्टपतेःप्रीतिदानेषुवीतस्पृहतयावीतस्पृहाययोस्तौवीत
स्पृहौकुशलवौतयोर्भावस्ततातयानैःस्पृहेणविसिस्मिये॥६८॥ गेयइति। गेयेकोनुविनेतावांइतिपाठः। गेयेवि

वयोवेषविसंवादिरामस्यचतयोश्चसा॥ जनतापेक्ष्यसादृश्यंनाक्षिकंपंव्यतिष्ठत॥६७॥
उभयोर्नतथालोकःप्राविण्येनविसिस्मिये॥ न्टपतेःप्रीतदानेषुवीतस्पृहतयायथा॥६८॥
गेयेकोनुविनेतांवांकस्यचेयंकृतिःकवेः॥ इतिराज्ञास्वयंपृष्टौतौवाल्मीकिमशंसतां॥६९॥
अथसावरजोरामःप्राचेतसमुपेयिवान्॥ ऊरीकृत्यात्मनोदेहंराज्यमस्मैन्यवेदयत्॥७०॥
सतावाख्यायरामायमैथिलेयौतवात्मजौ॥ कविःकारुणिकोवव्रेसीतायाःसंपरिग्रहं॥७१॥

गेयेकोनुवांयुवयोर्विनेताशिक्षकःनुशब्दःप्रश्नेनुप्रश्नानुनयेवितर्केचेत्यमरः। गेयकेनविनीतौवामितिपाठःइयंचकस्य
कवेःकृतिरितिराज्ञायंपृष्टौतौकुमारौकुशलवौवल्मीकिमत्रांसतांउक्तवंतौविनेतारंकविंचेत्यर्थः॥६९॥ अथेति।
सावरजोरामःप्राचेतसंवाल्मीकिमुपेयिवान्प्राप्तःसन्आत्मनोदेहंऊरीकृत्यआत्मानंस्थापयित्वेत्यर्थःराज्यमस्मै
प्राचेतसायन्यवेदयत्समर्पितवान्॥७०॥ सइति। करुणाप्रयोजनमस्यकारुणिकःदयालुःप्रयोजनमितिठक्दया
लुःदयालुःकारुणिकइत्यमरः। सकविःरामायतौमैथिलेयौतवात्मजौरामकृतौआख्यायसीतायाःसंपरिग्रहंस्वी
कारंवव्रेययाचे॥७१॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

र॰सू॰टी॰ १ तातेति। हे तात स्नुषा सीता नोऽस्माकं अक्ष्णोः समीपे समक्षं शात्प्रभृतिभ्यः समासान्तो टच् प्रत्ययः जातवेदसि वह्नौ विशु स१५

द्धा नोऽस्माकं विश्वासइत्यर्थः किंतु रक्षसः रावणस्य दौरात्म्यात् अत्रत्याः प्रजाः न श्रद्दधुः न विश्वासुः॥७२॥ ता इति।

मैथिलि स्वचारित्रमुद्दिश्य ताः प्रजाः प्रत्यायय तु विश्वासय तु विश्वसस्य बुद्धिरूपत्वात् णौ गमिरबोधन इति णौ ग

म्यादेशो नास्ति। ततोऽनंतरं पुत्रवतीमेनां सीतां त्वदाज्ञया प्रतिपत्स्ये स्वीकरिष्ये॥७३॥ इतीति। इति राज्ञा प्रतिश्रु

ते प्रतिज्ञाते सति मुनिराश्रमात् जानकीं शिष्यैः प्रयोज्यैः स्वसिद्धिं नियमैस्तपोभिरिवानयामास॥७४॥ अन्येद्युरि

तात शुद्धा समक्षं नः स्नुषा ते जातवेदसि॥ दौरात्म्याद्रक्षसस्तां तु नात्यत्राः श्रद्दधुः प्रजाः

॥७२॥ ताः स्वचारित्रमुद्दिश्य प्रत्याययतु मैथिली॥ ततः पुत्रवतीमेनां प्रतिपत्स्ये त्वदाज्ञ

या॥७३॥ इति प्रतिश्रुते राज्ञा जानकीमाश्रमान्मुनिः॥ शिष्यैरानाययामास स्वसिद्धिं नियमै

रिव॥७४॥ अन्येद्युरथ काकुत्स्थः संनिपात्य पुरौकसः॥ कविमाह्वाययामास प्रस्तुतप्रतिपत्त

ये॥७५॥ स्वरसंस्कारवत्यैव पुत्राभ्यां सह सीतया॥ ऋचेवोदर्चिषं सूर्यं रामं मुनिरुपस्थित॥

॥७६॥ काषायपरिवीतेन स्वपदार्पितचक्षुषा॥ अन्वमीयत शुद्धेति शान्तेन वपुषैव सा॥७७॥ ॥

ति। अथ काकुत्स्थो रामः अन्येद्युरन्यस्मिन्नहनि प्रस्तुतप्रतिपत्तये प्रकृतकार्यानुसंधानाय पुरौकसः पौरान्सन्निपात्य मेल

यित्वा कविं वाल्मिकिं आह्वाययामास आ—रमयामास॥७५॥ स्वरेति। अथ स्वर उदात्तादिः संस्कारः शब्दशुद्धिः तद्वत्या ऋ

चा साविक्येउदर्चिषं सूर्यमिव पुत्राभ्यामुपलक्षितया सीतया सह उदर्चिषं रामं मुनिरुपस्थितं उपस्थिते॥७६॥ काषाये

ति। कषायेण रक्तं काषायं तेन रक्तं रागादित्यण्प्रत्ययः तेन परिवीतेन वृतेन स्वपदार्पितचक्षुषा शान्तेन वपुषैव सा सीता ९

शुद्धा साध्वीत्यन्वमीयत। अनुमिता॥७७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

429 / 1747.

जना इति। तस्याः सीतायाः कर्मणः आलोकपथात् दर्शनमार्गात् प्रतिसंहृतचक्षुषः निवर्तितदृष्टयः सर्वे जनाः फलिताः शा

लय इव अवाङ्मुखाः नम्रमुखास्तस्थुः॥७८॥ तामिति। अस्थितविष्टरः अधिष्ठितासनो मुनिः हे वत्से भर्तुर्दृष्टिवि

षये समक्षं स्वदृत्ते स्वचरिते विषये लोकं निःसंशयं कुरु इति सीतां अशात् शास्तिस्म॥७९॥ अथेति। अथ वाल्मीकि

शिष्येण आवर्जितं दत्तं पुण्यपयः आचम्य सीता सत्यां सरस्वतीं वाचं उदीरयामास उच्चारयामास॥८०॥ वाङ्मन इ

ति॥ वाङ्मनः कायैः पत्यौ विषये मे व्यभिचारः स्खलितं यथा नास्ति यदि तर्हि विश्वं बिभर्तीति विश्वंभरा भूमिः संज्ञायां

जनास्तदालोकपथात्प्रतिसंहृतचक्षुषः॥ तस्थुस्तेऽवाङ्मुखाः सर्वे फलिता इव शालयः॥७८॥

तां दृष्टिविषये भर्तुर्मुनिरास्थितविष्टरः॥ कुरु निःसंशयं वत्से स्ववृत्ते लोकमित्यशात्॥७९॥

अथ वाल्मीकिशिष्येण पुण्यमावर्जितं पयः॥ आचम्योदीरयामास सीता सत्यां सरस्वतीम्॥८०॥

वाङ्मनःकर्मभिः पत्यौ व्यभिचारो यथा न मे॥ तथा विश्वंभरे देवि मामन्तर्धातुमर्हसि॥ ॥८१॥

एवमुक्ते तया साध्व्या रन्ध्रात्सद्यो भवाद्भुवः॥ शातह्रदमिव ज्योतिः प्रभामंडलमुद्ययौ॥८२॥

तत्र नागफणोत्क्षिप्तसिंहासननिषेदुषी॥ समुद्ररशना साक्षात्प्रादुरासीद्वसुंधरा॥ ॥८३॥

भृतवृजीत्यां दिनारवमत्ययः। आरुद्दिषदित्यादिना मुमागमः। हे विश्वंभरे हे देवि मां अन्तर्धातुं गर्भे वासयितुमर्हसि॥८१॥

एवमिति। साध्व्या पतिव्रतया सीतया एवमुक्ते सति सद्यो भवात् घोरं भ्रान्त् शातह्रदं वैद्युतं ज्योतिरिव प्रभामंडलमुद्ययौ

॥८२॥ तत्रेति। तत्र प्रभामंडले नागफणोत्क्षिप्ते सिंहासने निषेदुषी आसीना समुद्ररशना साक्षात् वसूनि धारयतीति व

सुंधरा भूमिः स्वचिन्हस्वइति ह्रस्वः प्रादुरासीत्॥८३॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सेति। सा वसुंधराभर्त्तरि प्रहितेक्षणां दत्तदृष्टिः सीतामंकमारोप्य तस्मिन्भर्त्तरि रामे मा द्दृशमिति व्याहरति वदत्येव व्याहरंतं जना दृष्टा इत्यर्थः। षष्ठी चानादरे इति सप्तमी पातालमभ्यगात्॥८४॥ धरायामिति। सीतात्रस्यर्पणमिच्छतीति तस्य तथोक्तस्य धान्विनः आतधनुष स्तस्य रामस्य धरायां विषये संरंभं विधिबलापेक्षी दैवशक्तिदर्शी विबलवान्विधिः किमत्र करणीयमिति गुरुर्ब्रह्मा शमयामास अवश्यंभावी इति भावः॥८५॥ ऋषीनिति। रामोयज्ञांते पुरस्कृतान् पूजितान्सुहृदश्च विसृज्य सीतागतं स्नेहं तदपत्ययोः कुशलवयोर्निदधे धत्ते। किंच धृतप्रजः। स रामो युधाजित

सा सीतामंकमारोप्य भर्त्तरि प्रहितेक्षणां॥ मा मेति व्याहरत्येव तस्मिन्पातालमभ्यगात्॥८४॥
धरायां तस्य संरंभं सीताप्रत्यर्पणैषिणः॥ गुरुर्विधिबलापेक्षी शमयामास धन्विनः॥८५॥
ऋषीन्विसृज्य यज्ञांते सुहृदश्च पुरस्कृतान्॥ रामः सीतागतं स्नेहं निदधे तदपत्ययोः॥८६॥
युधाजिश्च संदेशात्स देशं सिंधुनामकं॥ ददौ दत्तप्रभावाय भरताय धृतप्रजः॥ ॥८७॥
भरतस्तत्र गंधर्वान्युधि निर्जित्य केवलं॥ आतोद्यं ग्राहयामास समत्याजयदायुधं॥ ॥८८॥
स तक्षपुष्कलौ पुत्रौ राजधान्योस्तदाख्ययोः॥ अभिषिच्याभिषेकार्हौ रामांतिकमगात्पुनः॥८९॥

स्य भरतमातुलस्य संदेशात्सिंधुनामकं देशं दत्तप्रभावाय दत्तैश्वर्याय रामेणेति शेषः। भरताय ददौ॥८७॥ भरत इति भरतो युधि गंधर्वान्निर्जित्य केवलं आतोद्यं वाद्यं ग्राहयामास। आयुधं समत्याजयत् त्याजितवान्। यदित्यन्योरर्थयोर्द्विकर्मकत्वं नित्यमित्यनुसंधेयं॥८८॥ स इति। स भरतोऽभिषेकार्हौ तक्षपुष्कलौ नाम पुत्रौ तदाख्ययोस्तक्षपुष्कलाख्ययोरित्यर्थः। पुष्कलपुष्करावत्यां तक्षतक्षशिलायामिति राजधान्योर्नगर्योरभिषिच्य पुनः रामांतिकमगात्॥ १०
॥८९॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

431/1947

अंगदमिति। लक्ष्मणो रघुनाथस्य शासनात् अंगदं चंद्रकेतुं च तदाख्यौ आत्मसंभवौ पुत्रौ कारापथो नाम देशस्तस्येश्वरौ चक्रे॥१०॥ इतीति। इत्यारोपितपुत्रास्ते जनेश्वराः रामादयो भर्तृलोकप्रपन्नानां स्वर्यातानां जननीनां निवापान् श्राद्धादीन् क्रमात् विदधुश्चक्रुः॥११॥ उपेत्येति। अथ कालोंतको मुनिवेषः सन् उपेत्य राघवं प्रोवाच। किमिति। रहस्यैकांते संवादिनौ संभाषिणौ आवां यः पश्येत् रहस्यभंगं कुर्यादित्यर्थः। तं त्यजेरिति॥१२॥ अथ स कालस्त

अंगदं चंद्रकेतुं च लक्ष्मणोध्यात्मसंभवौ॥ शासनाद्रघुनाथस्य चक्रे कारापथेश्वरौ॥१०॥
इत्यारोपितपुत्रास्ते जननीनां जनेश्वराः॥ भर्तृलोकप्रपन्नानां निवापान्विदधुः क्रमात्॥११॥
उपेत्य मुनिरूपेण कालः प्रोवाच राघवं॥ रहः संवादिनौ पश्येदावां यस्तं त्यजेरिति॥१२॥
तथेति प्रतिपन्नाय विवृतात्मा नृपाय सः॥ आचख्यौ दिवमध्यास्व शासनात्परमेष्ठिनः॥१३॥
विद्वानपि तयोर्द्वास्थः समयं लक्ष्मणोभिनत्॥ भीतो दुर्वाससः शापाद्रामसंदर्शनार्थिनः॥१४॥
स गत्वा सरयूतीरं देहत्यागेन योगवित्॥ चकारावितथां भ्रातुः प्रतिज्ञां पूर्वजन्मनः॥ ॥१५॥

थेति प्रतिपन्नाय नृपाय रामाय विवृतात्मा प्रकाशितनिजस्वरूपः सन् परमेष्ठिनो ब्रह्मणः शासनात्। दिवमध्यास्वेति। आचख्यौ॥१३॥ विद्वानिति। द्वास्थो — रि नियुक्तो लक्ष्मणो विद्वानपि पूर्वश्लोकोक्तं जानन्नपि रामदर्शनार्थिनो दुर्वाससो मुनेः शापाद्भीतः सन्। तयोः कालरामयोः समयं संवादं अभिनत् बिभेद॥१४॥ स इति। योगवित् योगमार्गवेदी स लक्ष्मणः सरयूतीरं गत्वा देहत्यागेन पूर्वजन्मनो भ्रातुः प्रतिज्ञां अवितथां सत्यां चकार॥१५॥ ॥

र·मू·टी· तस्मिन्निति। चतुर्थो भागश्चतुर्भागः संख्याशब्दस्य वृत्तिविषये पूरणार्थत्वं। शतांशवत्। आत्मचतुर्भागे तस्मि स १५
३१ न् लक्ष्मणे प्राक् नाकमधितस्थुषि सति पूर्वं स्वर्गं जग्मुषि सति राघवो रामः। भुवि त्रिपाद्धर्म इव शिथिलत्वं स्थे॥
पादविकलो हि शिथिलं घ्नतीति भावः। त्रेतायां धर्मस्त्रिपादित्याहुः पादश्चतुर्थांशः अंघ्रिश्च ध्वन्यते पादोर श्म्यंघ्रि
तुर्यांश इत्यमरः। त्रयः पादाः यस्यासौ त्रिपात्। संख्यासुपूर्वस्येति आकारलोपः समासांतः॥९६॥ स इति। स्थि
रधीः स रामो रिपव एव नागा गजास्तेषां अंकुशं निवारकं कुशं कुशावत्यां पूर्यां निवेश्य स्थापयित्वा स्वकैः सनाज

तस्मिन्नात्मचतुर्भागे प्राक् नाकमधितस्थुषि। राघवः शिथिलं तस्थौ भुवि धर्मस्त्रिपादिव
॥९६॥ स निवेश्य कुशावत्यां रिपुनागांकुशं कुशं। शरावत्यां सतां सूक्तैर्जनिताश्रुलवं लवं।।९७॥
उदक्प्रतस्थे स्थिरधीः सानुजोऽग्निपुरःसरः॥ अन्वितः पतिवात्सल्याद्गृहवर्ज्यमयोध्यया॥९८॥
युग्मं॥ जगृहुस्तस्य चित्तज्ञाः पदवीं हरिराक्षसाः॥ कदंबमुकुलस्थूलैरभिवृष्टां प्रजाश्रुभिः॥९९॥

भिता अश्रुलवा अश्रुलेशा यस्य तं लवं लवाख्यं लवो लेशे विलसे च छेदने रामनंदने इति विश्वः शरावत्यां पुर्यां शरादिना
चेति शरकुशशब्दयोर्दीर्घः निवेश्य॥९७॥ उदगिति। सानुजः अग्निपुरःसरः मन्त्रपत्यो भर्त्तरि वात्सल्यात् अनुरा
गात् गृहान् वर्जयित्वा गृहवर्जं द्वितीयायां चेति णमुल् प्रत्ययः। अयं क्वचिदपरिसमाप्तायामपीष्यते अनुदात्तं पदमे
वमित्येक शेषं तथाख्यानत्वात् परिमानुवरान् अयोध्यया अन्वितोऽनुगतः उदक्प्रतस्थे॥९८॥ युग्मं॥ जगृहु ३१
रिति। चित्तज्ञाः हरिराक्षसाः कदंबमुकुलस्थूलैः प्रजाश्रुभिरभिवृष्टां तस्य रामस्य पदवीं जगृहुः तेऽप्यनुजग्मुरित्यर्थः॥९९॥

433
1947

उपेति। उपस्थितं प्राप्तं विमानं यस्य तेन भक्तानुकंपितः इति भक्तानुकंतेन रामेण अनुयायिनां सरयूः त्रिदिवनिःश्रेणीः
स्वर्गारोहिणी चक्रे निःश्रेणी स्वर्गारोहिणीत्यमरः॥१००॥ यदिति। यद्यस्मात्तत्र मज्जतां सम्मर्दो गोप्रतरो गोप्रतरणं त
त्कल्पोऽभूत् अतस्तदाख्यया गोप्रतराख्यया पावनं शोधकं तीर्थं भुवि प्रपथे॥१०१॥ स इति। स विभुः प्रभुः रामः विबुधाना
मंशेषु सुग्रीवादिषु प्रतिपन्नात्ममूर्तिषु सत्सु त्रिदशीभूताः देवभुवनं नीताः ये पौरास्तेषां नूतनं सुराणां स्वर्गांतरं कल्प

उपस्थितविमानेन तेन भक्तानुकंपिना॥ चक्रे त्रिदिवनिःश्रेणीः सरयूरनुयायिनां॥१००॥ यद्गो
प्रतरकल्पोऽभूत्संमर्दस्तत्र मज्जतां॥ अतस्तदाख्यया तीर्थं पावनं भुवि पप्रथे॥१०१॥ स विभुर्विबु
धांशेषु प्रतिपन्नात्ममूर्तिषु॥ त्रिदशीभूतपौरार्थं स्वर्गांतरमकल्पयत्॥१०२॥ निर्वर्त्यैवं दश
मुखभयच्छेदिकार्यं सुराणां विष्वक्सेनः स्वतनुमविशत्सर्वलोकप्रतिष्ठां॥ लंकानाथं पवनतनयं
चोभयं स्थापयित्वा कीर्तिस्तंभद्वयमिव गिरौ दक्षिणे चोत्तरे च॥१०३॥ इति रघुवंशे पंचदशः सर्गः समाप्तः
॥१५॥

यत्॥१०२॥ निर्वर्त्येति। विष्वक्सेनो विष्णुरेव सुराणां दशमुखच्छेदिकार्यं निर्वर्त्य निष्पाद्य लंकानाथं विभीषणं पवनत
नयं चोभयं कीर्तिस्तंभद्वयमिव दक्षिणे गिरौ त्रिकूटे उत्तरे गिरौ हिमवति स्थापयित्वा सर्वलोकप्रतिष्ठां सर्वलोकाश्रय
भूतां स्वतनुं मूर्तिमविशत्॥१०३॥ ॥इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंश
टीकायां संजीवनीसमाख्यायां रामस्वर्गारोहणं नाम पंचदशः सर्गः॥ ॥१५॥ ॥ ५ ॥ श्रीराम॥ ॥ ५ ॥

435
1947

र॰ म॰ टी॰ ॥श्रीः॥ ॥ वृंदारकायस्य भवंति भृंगा मंदाकिनी यन्मकरंदबिंदुः। तवारविंदाक्षपदारविंदं वंदे चतुर्वर्गचतुष्पदं तं ॥१॥ स३६
१ अथेति। अथ रामनिर्वाणानंतरं इतरे लवादयः सप्त रघुवीराः यतश्च निधारणमिति षष्ठीसमासनिषेधः। पुरः पूर्वं जन्म यस्य तस्य भावस्तत्ता तया गुणैश्च ज्येष्ठं कुशं रत्नविशेषभाजं तच्छ्रेष्ठवसुभागिनं चक्रुः तदुक्तं। जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयत इति। तथाहि। सुभ्रातृणां भावः सौभ्रात्रं हायनांतत्यादिना युवादित्वादण्प्रत्ययः। एषां कुशलवादीनां कुशीलानुसारि कुशलानुगतं हि॥१॥ तइति। सतु जलबंधः वार्त्ता कृषिगोरक्षणादिः वार्ता कृष्याद्युदंत योः जगबंध आकरेभ्यो

अथेतरे सप्त रघुप्रवीरा ज्येष्ठं पुरोजन्मतया गुणैश्च। चक्रुः कुशं रत्नविशेषभाजं सौभ्रात्र
मेषां हि कुलानुसारि॥१॥ ते सेतुवार्तागजबंधमुख्यैरभ्युच्छ्रिताः कर्मभिरप्यवंध्यैः॥
अन्योन्यदेशप्रविभागसीतां वेलां समुद्रा इव न व्यतीयुः॥२॥ ॥ ॥ ॥

जगग्रहणं तेमुख्यं येषां तैरवंध्यैः सफलैः कर्मभिरभ्युच्छ्रिता अतिसमर्था अपीत्यर्थः। ते कुशलवादयः प्रविभज्यंत इति प्रविभागाः। अन्योन्यदेशानां प्रविभागास्तेषां सीमा तां वेलां समुद्रा इव न व्यतीयुः नातिचक्रमुः अत्र कामंदकः ऋषिर्व णिक्पथो दुर्गः सेतुः कुंजरबंधरबंधनं खन्याकरवनादानं शून्यानां च निवेशनं अष्टवर्गमिमं साधुः सुसंवृद्धोपि वर्धये ?
दिति॥२॥ ॥ ॥२॥ ॥२॥ ॥ ॥ ॥ ॥ ॥ ॥

437
19147

चतुर्भुजेति। चतुर्भुजो विष्णुस्तस्यांशा रामादयः ते प्रभवाः कारणानि यस्य तथोक्तः दानं त्यागो मदश्च दानं गजदेत्यागश तिथिस्थेः प्रवृत्ति व्यापारः प्रवाहश्च। दानप्रवृत्ते स्त्यागव्यापारानुपारतानामविरतानां तेषां कुशलवादीनां स वंशः सामयोनिं सामवेदप्रभवो दानप्रवृत्तेरनुपारतानां सुरद्विपानां दिग्गजानां वंश इव अष्टधाभिन्नः सन् विप्रससार विस्तृतोभूत्। सामयोनिरित्यत्र पालकाव्यः। सूर्यस्यांडकापाले द्वे समानीय प्रजापतिः हस्ताभ्यां परिगृह्याथ सप्तसामान्यगायत गायतो ब्रह्मणस्तस्मात्समत्स्येत्तु मतंगजा इति॥३॥ अथेति। अथ अर्धरात्रेः अर्द्धरात्रः अर्धेनपुंसकमिति एकदेशः

चतुर्भुजांशप्रभवः स तेषां दानप्रवृत्तेरनुपारतानां। सुरद्विपानामिव सामयोनिर्भिन्नोष्टधा विप्र ससार वंशः॥३॥ अथार्धरात्रे स्तिमितप्रदीपे शय्यागृहे सुप्तजने प्रबुद्धः। कुशः प्रवासस्थकलत्रवे [illegible]
जेतुः परेषां जयशब्दपूर्वं तस्यांजलिं बंधुमतो बबंध॥४॥ ॥२॥ ॥२॥ ॥२॥

समासः। अह्नः सर्वैकदेशेत्यादिना समसात्ततो च प्रत्ययः रात्रान्हाहाः पुंसीति नियमात्पुल्लिंगत्वं अर्द्धरात्रे निशीथे स्तिमितप्रदीपे सुप्तजने शय्यागृहे प्रबुद्धः न तु प्रसुप्तः कुशः प्रवासस्थकलत्र येषां प्रोषितभर्तृकविषां अदृष्टपूर्वमिति अदृष्टपूर्वां तां सुप्सुपेति समासः वनितामपश्यत्॥४॥ सेति। सा वनिता साधु साधारणपार्थिवर्द्धेः सज्जनसाधारणराज्यश्रियः पुरुहूतभासः इंद्रतेजसः परेषां शत्रूणां जेतुः बंधुमतेस्तस्य कुशस्य पुरस्तान्निरस्त्विता जयशब्दपूर्वं यथा तथांजलिं बबं धे॥५॥ ॥ ॥२॥ ॥ ॥२॥ ॥ ॥२॥ ॥२॥ ॥

अथेति। अथदर्शनानंतरंसविस्मयःपूर्वार्धेन शरीरपूर्वभागेनविसृष्टतल्पःत्यक्तशय्योदशरथेस्तनूजःकुशःअनपोवार्गलंजनुद्घाटितविष्कंभमपि। तद्विष्कंभेर्गलंनेत्यमरः अगारंआदर्शतलंइवप्रविष्टांवनितांप्रोवाचअवदत्॥६॥ ल
ब्धेति। सावर्णेपिगेहे लब्धांतरा लब्धावकाशात्वमिति शेषः। योगप्रभावश्चनलक्ष्यते। मृणालिनीहैमंहिमकृतमुपरागमुपद्रवमिव। अनिर्वृतानांदुःखितानांआकारंबिभर्षि,चनहियोगिनांदुःखमस्तीतिभावः॥७॥ कात्वमिति। किंचहेशु

अथानयोरागजमप्यगारछायामिवादर्शतलंप्रविष्टां॥ सविस्मयोदाशरथेस्तनूजःप्रोवाचपूर्वार्धविसृष्टतल्पः॥६॥ लब्धांतरासावरणेपिगेहेयोगप्रभावोनचलक्ष्यतेते॥ बिभर्षिचाकारमनिर्वृतानांमृणालिनीहैममिवोपरागं॥७॥ कात्वंशुभेकस्यपरिग्रहोवाकिंवामदभ्यागमकारणंते॥ आचक्ष्वमत्वावशिनांरघूणांमनःपरस्त्रीविमुखप्रवृत्ति॥८॥ तमब्रवीत्सागुरुणानवद्यायानीतपौरास्वपदोन्मुखेन॥ तस्याःपुरःसंप्रतिवीतनाथांजानीहिराजन्नधिदेवतांमां॥९॥ ॥

भेत्वंकाकस्यवापरिग्रहःपत्नीतेतवमदभ्यागमकारणंकिं वशिनांरघूणांमनःपरस्त्रीषुविषयेविमुखाप्रवृत्तिर्व्यापारोयस्यतत्तथाभूतंमत्वाआचक्ष्व॥८॥ तमिति। सावनितातंकुशमब्रवीत् अनवद्याअदोषायापूःस्वपदोन्मुखेनविष्णुपदोन्मुखेनगुरुणात्वत्पित्रानीतपौरादि। राजन्मांसंप्रतिवीतनाथा तस्याःपुरःनगर्याःअयोध्यायाअधिदेवतांजानीहि॥९॥ ॥ श्रीराम॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ ॥ २

439
1947

वस्वौकसारमिति। साहंसौराज्येनराजन्वतयाहेतुनाबद्धोत्सवयाविभूत्यावस्वौकसारामलंकांपुरीं। पुरीवस्वौकसारास्यादिमानंपुष्पकौस्त्रियामित्यमरः। अथवामानसोत्तरशैलशिखरवर्तिनीशक्रस्यनगरी। वस्वौकसाराशक्रस्येविष्णुपुराणवचनात्॥ तामभिभूयसमग्रशक्तौत्वयिसूर्यवंश्येसतिकरुणामवस्थांदीनांदशांप्रपन्नाप्राप॥१०॥ विशीर्णेति। तल्पान्यट्टाकिलाः। तल्पंशय्याट्टदारेष्वित्यमरः। अट्टास्तुगृहभेदाः। अट्टनक्तेचतुष्केचक्षौनेत्यधेर

वस्वौकसारामभिभूयसाहंसौराज्यबद्धोत्सवयाविभूत्या॥ समग्रशक्तौत्वयिसूर्यवंश्येसतिप्रपन्नाकरुणामवस्थां॥१०॥ विशीर्णतल्पाट्टशतोनिवेशःपर्यस्तशालःप्रभुणाविनामे॥ विडंबयत्यस्तनिमग्नसूर्यंदिनांतमुग्रानिलभिन्नमेघं॥११॥

द्दांतरइतिविश्वः। विशीर्णानितल्पानामट्टानांचशतानियस्यसतथोक्तः। अथवाविशीर्णकल्पेतिपाठः। अट्टाःक्षौमाःस्याट्टःक्षौममस्त्रियामित्यमरः। ईषदपरिसमाप्तविशीर्णानिविशीर्णकल्पानिअट्टशतानियस्यसतथोक्तः पर्यस्तशालःस्वस्तप्राकारः। प्राकारोवरणःशालइत्यमरः प्रभुणास्वामिनाविनाएवंभूतोमेगृहसन्निवेशोनिवेशनं। अस्तनिमग्नसूर्यंअस्ताद्रिलीनार्कंउग्रानिलेनाभिन्नमेघंदिनांतंविडंबयतिअनुकरोति॥११॥ ॥छ॥ ॥छ॥

निशास्विति। निशासु भास्वंति दीप्तिमंति कलानि अव्यक्तानि मधुराणि नूपुराणि यासां तासां अभिसारिकाणां। कांता
र्थिनी तु या याति संकेतं साभिसारिकेत्यमरः। यो राजपथः संचरत्यनेनेति संचारः संचारसाधनमभूत् गोचसंचरेत्या
दिना घञ्प्रत्ययांतो निपातः नवह्रस्वमुखेषु या उल्का स्ताभिर्विचिताभिषाभिः अन्विष्टमांसाभिः शिवाभिः क्रोष्टुभिः
वाह्यते गम्यते वहेरन्ये वहिधातुरस्तीत्यपदेशः॥१२॥आस्फालितमिति। यदंभः प्रमदा कराग्रैरास्फालितं ताडि
तं सत्। जलक्रीडास्विति शेषः। मृदंगानां यो धीरध्वनिस्तमन्वगच्छत् अन्वकरोत् तद्दीर्घिकाणामंभः इदानीं वन्यै

निशासु भास्वत्कलनूपुराणां यः संचरोभूदभिसारिकाणां॥नवन्मुखोल्काविचितामिषा
भिः स वाह्यते राजपथः शिवाभिः॥१२॥आस्फालितं यत्प्रमदाकराग्रैर्मृदंगधीरध्वनितामन
गच्छत्॥वन्यैरिदानीं महिषैस्तदंभः शृंगाहतं क्रोशति दीर्घिकाणां॥१३॥वृक्षेशया यष्टिनिवास
भंगान्मृदंगशब्दापगमादलस्याः॥प्राप्ता दवोल्काहतशेषबर्हाः क्रीडामयूरा वनबर्हिणत्वं॥१४॥

महिषैः कर्तृभिः शृंगैर्विषाणैराहतं सत् क्रोशतीव तु मृदंगध्वनिमनुकरोतीत्यर्थः॥१३॥वृक्षेशया इति। यष्टिरेव निवासः
स्थानं तस्य भंगात् वृक्षे शेरते इति वृक्षेशयाः अधिकरणे शेतेरित्यच् प्रत्ययः शयवासवासिष्वकालादित्यलुक्।
मृदंगशब्दानामपगमात् अभावात् अलस्याः मृत्यशून्याः दवो दावो वनारण्यवह्नी दवो दाव वनारण्यवह्नि--इत्यमरः त
स्योल्काभिः स्फुलिंगैः हतानि शेषाणि बर्हाणि येषां ते क्रीडामयूरा वनबर्हिणत्वं वनमयूरत्वं प्राप्ताः॥१४॥ ॥ ॥ ३

441
1947

सोपानेति। किंच येषु सोपानमार्गेषु रामा रमण्यः सरागात् लक्षारसाद्रान् निक्षिप्तवंत्यः तेषु मार्गेषु अद्य सद्यो हतन्यं
कुभिर्मारितमृगैर्व्याघ्रैरस्त्रदिग्धं रुधिरलिप्तं पदं निधीयते॥१५॥चित्रेति। पद्मवनावतीर्णाः प्रविष्टाः तथालिखिता इ
त्यर्थः। करेणुभिः करिणीभिः चित्रगताभिरेव करेणुरिभ्यां स्त्री नेभ इत्यमरः दत्तमृणालभंगाश्चित्रद्विपा आलेख्यमातंगाः
नखा एवांकुशाः तेषामाघातैर्विभिन्नकुंभाः संतः संरब्धसिंहप्रहृतं कुपितसिंहप्रहारं वहंति॥१६॥ स्तंभेष्विति। उ
त्क्रांतवर्णक्रमा वर्ण्यवर्णश्चन्यां श्च ताधूसरा या सांतासां स्तंभेषु योषित्प्रतियातनानां स्त्रीप्रतिकृतीनां दारुमयीणां

सोपानमार्गेषु च येषु रामा निक्षिप्तवत्यश्चरणान्सरागान्॥सद्यो हतन्यंकुभिरस्रदिग्धं व्याघ्रैः पदं
तेषु निधीयते मे॥१५॥चित्रद्विपाः पद्मवनावतीर्णाः करेणुभिर्दत्तमृणालभंगाः॥नखांकुशाघात
विभिन्नकुंभाः संरब्धसिंहप्रहृतं वहंति॥१६॥स्तंभेषु योषित्प्रतियातनानामुत्क्रांतवर्णक्रमधूसरा
णां॥स्तनोत्तरीयाणि भवंति संगान्निर्मोकपट्टाः फणिभिर्विमुक्ताः॥१७॥कालांतरश्यामसुधेषु न
क्तमितस्ततो रूढतृणांकुरेषु॥त एव मुक्तागणशुद्धयोपि हर्म्येषु मूर्छंति न चंद्रपादाः॥१८॥

प्रतिमा प्रतियातना प्रतिच्छाया प्रतिकृतिरित्यमरः। फणिभिर्विमुक्ता निर्मोकाः कंचुका एव पट्टाः समौ कंचुकनिर्मो
कावित्यमरः। संगात् स्तनोत्तरीयाणि भवंति॥१७॥कालेति। कालांतरेण कालभेदवशेन श्यामसुधेषु मलिनचूर्णेषु इत
स्ततो रूढतृणांकुरेषु हर्म्येषु नक्तं मुक्तागणानां शुद्धिरिव शुद्धिः स्वाच्छ्यं येषां ते तादृशाः तत्पूर्वं ये मूर्छंति त एव चंद्र
पादाः चंद्ररश्मयः पादा रश्म्यंघ्रितुर्यांशा इत्यमरः। न मूर्छंति न प्रतिफलंतीत्यर्थः॥१८॥ ॥५॥ ॥५॥

आवर्ज्येति। किंचविलासिनीभिः सदयं शाखालतावयवानावर्ज्य अनमय्य यासांलतानांपुष्पाण्युपात्तानि गृहीतानितामदीयाउद्यानलतावन्यैः पुलिंदैः म्लेछविशेषैरिवबानरैः उभयेरित्यर्थः। क्लिश्यंतेपीड्यंते क्लिश्नातेः कर्मणिलट् भिल्लः किरातशबरपुलिंदाम्लेछजातयइत्यमरः॥१९॥ रात्राविति। रात्रवनाविष्कृतदीपभसः दीपप्रभाश्चन्याइत्यर्थः। दिवापिदिवसेपिकांतामुखानाश्रियांकांत्याविमुक्ताः रहिता विछिंनानष्टोधूमप्रसरोये

आवर्ज्यशाखाः सदयंचयासांपुष्पाण्युपात्तानिविलासिनीभिः॥ वन्यैः पुलिंदैरिववानरैः
स्ताः क्लिश्यंतउद्यानलतामदीयाः॥१९॥ रात्रावनाविष्कृतदीपभासः कांतामुखश्रीवियु
तादिवापि॥ तिरस्क्रियंते कृमितंतुजालैर्विछिन्नधूमप्रसरागवाक्षाः॥२०॥ बलिक्रिया
वर्जितसैकतानिस्नानीयसंसर्गमनप्नुवंति॥ उपांतवानीरगृहाणिदृष्ट्वाशून्यानिदूयेसरयूज
लानि॥२१॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

षांतेगवाक्षाः कृमितंतुजालैः लूतातंतुवितानैःतिरस्क्रियंते॥२०॥ बलिक्रियेति। बलिः पूजोपहारस्याक्रितिशास्त्रतः बलिक्रियावर्जितानियेषांतानि स्नानीयानिस्नानसाधनानि कृसल्मुष्टोबकुलमिति करणेनीयप्रत्ययः स्नानीयानांसंसर्गमनाप्नुवंतिसरयूजलानिशून्यानिरिक्तानिउपांतेषुवानीरगृहाणिवदृष्ट्वादूयेपरितप्ये॥२१॥ ॥ ॥ ४

443
1947

तदिति। तत्तस्मादिमांवसतींकुशावंतींविसृज्यकुलराजधानींअयोध्यामभ्युपेतुमर्हसि। कथमि। तेगुरुः पितारामः तांप्रतिष्ठांकारणवशान्मानुषींतनुंमानुषमूर्तिं हित्वापरमात्ममूर्तिंयथाविष्णुमूर्तिंव॥२२॥ तथेति रघूणांभाग्यरः श्रेष्टः कुशः तस्याः पुरः प्रणयंयाच्ञांमतीतोहृष्टः सन्प्रत्यग्रहीत् स्वीकृतवान्सीपूरधीदेवतापि। अभिव्यक्तमुखप्रसादाइष्टलाभादितिभावः शरीरबंधेनशरीरयोगेनकरणतिरोबभूवांतर्दधो॥२३॥ तदिति। नृपतिः तदद्भुतंरा

तदर्हसीमांवसतिंविसृज्यमामभ्युपेतंकुशराजधानीं॥ हित्वातनुंकारणमानुषींतां
यथागुरुस्तेपरमात्ममूर्तिं॥२२॥ तथेतितस्याः प्रणयंप्रतीतः प्रत्यग्रहीत्प्राग्रहरो
रघूणां॥ पूरप्यभिव्यक्तमुखप्रसादाशरीरबंधेनतिरोबभूव॥२३॥ तदद्भुतंसंस
दिरात्रिवृत्तंप्रातर्द्विजेभ्योनृपतिः शशंस॥ श्रुत्वातएनंकुशराजधान्यासाक्षात्पति
त्वेवृत्तमभ्यनंदत्॥२४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

त्रिवृत्तंवृत्तांतंप्रातः संसदिसभायांद्विजेभ्यः शशंस। तेद्विजाः श्रुत्वाएनंकुशंकुलराजधान्योसाक्षात्स्वयमेवपतित्वे विषयेवृत्तमभ्यनंदत्। पतित्वेनवृतोसिइत्यम्रजयन्। आशीभिर्भिरितिशेषः। अत्रगार्ग्यः। दृष्ट्वास्वयंशोभनंवसुप्यात्। दृष्टयः संमार्कविधतेशंसेदितत्रसाधुद्विजेभ्यस्तेचाशीर्भिः प्रीणयेयुर्नरेंद्रइदमपिस्वमतुल्यमितिभावः
॥२४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कुशावतीमिति। कुशः कुशावतीं श्रोत्रियेषु छांदसेषु अधीनां श्रोत्रियसात्। तदधीनमिति साति प्रत्ययः। श्रोत्रियश्छांद
सौ समावित्यमरः। यात्रानुकूले ऽहनि सावरोधः। सांतःपुरः सन् वायुरभ्रवृंदैरिव सैन्यैरनुगतः सन्। अयोध्यामभि
मुखः प्रतस्थे॥२५॥ सेति। साकेतुमाला एव उपवनानि यस्याः सा बृहद्भिर्नागैर्गजैर्विहारशैलैः क्रीडाशैलैः अनु
तेवास्थितारथा एव उदारागृहा यस्यां सा सेना तस्य प्रयाणे जंगम राजधानीं संचारिणी नगरीवाभवत्। बभूव॥२६॥
तेनेति। आतपत्रमेवमलं मंडलं बिंबं यस्य तेन कुशेन पूर्वनिवासभूमिं प्रतिप्रस्थापितो बलौघः। आतपत्रवदम

कुशावतीं श्रोत्रियसात्स कृत्वा यात्रानुकूलेऽहनि सावरोधः॥ अनुद्रुतो वायुरिवाभ्रवृंदैः सैन्यैरयो
ध्याभिमुखप्रतस्थे॥२५॥ साकेतुमालोपवना बृहद्भिर्विहारशैलानुजगतेव नागैः॥ सेनारथोदा
रगृहा प्रयाणे तस्याभवज्जंगमराजधानी॥२६॥ तेनातपत्रामलमंडलेन प्रस्थापितः पूर्वनिवासभू
मिं॥ बभौ बलौघः शशिनोदितेन वेलामुदन्वानिव नीयमानः॥२७॥ तस्य प्रयातस्य वरूथिनीनां
पीडामपर्याप्तवतीव सोढुं॥ वसुंधरा विष्णुपदं द्वितीयमध्यारुरोहेव रजश्छलेन॥२८॥ ॥ ॥

लमंडलेनोदितेन शशिना वेलां नीयमानः प्राप्यमाणः उदकमस्यास्तीति उदन्वान्। उदधिरिव बभौ। उदन्वानुदधौ
चेति निपातात्साधुः॥२७॥ तस्येति। प्रयातस्य प्रस्थितस्य तस्य कुशस्य वरूथिनीनां सेनानां कर्तॄणां कर्तृकर्मणोः
कृतीति कर्मणि षष्ठी। पीडां सोढुमपर्याप्नुवतीव अत एव वसुंधरा रजःछलेन द्वितीयं विष्णुपदमाकाशं अध्यारुरोहे ९
वेत्युत्प्रेक्षा॥२८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

445/1947

उद्यच्छमानेति। पश्चात्कुशावत्यागमनाय प्रयाणाय तथा पुरो ऽग्रे निवेशे निमित्ते विवेष्णं विवेत्यर्थः। उद्यच्छमाना उद्युक्ता सा
अत्र पुराद्धोपयमेग्रंथइत्यस्य सकर्मकादधिकारत्वादात्मनेपदं पार्थिववाहिनी नृपस्य सा सेना यत्र पुरो मध्ये वा दृदृशे
तत्रैव सामग्र्यमतिं कृत्स्नातां बुद्धिं चकार। अपरिमिता तस्य सेनेत्यर्थः॥२८॥ तस्येति। नेतुस्तस्य कुशस्य द्विपानां मदवा
रिभिः सेकात्। तुरंगमाणां खुराभिघातात् यथासंख्यं पथि रेणुरजः पंकभावं पंकतां प्रपेदे। पंको पि रेणुत्वमियाय। त
स्य तावत्यस्तीत्यर्थः॥२९॥ मार्गेति। वैंध्येषु विंध्यसंबंधिषु कटकांतरेषु नितंबावकाशेषु कटकास्त्री नितंबोद्रेरित्यम

उद्यच्छमानागमनाय पश्चात्पुरो निवेशे पथि च व्रजंती॥ सा यत्र सेना ददृशे नृपस्य तत्रैव सामग्र्य
मतिं चकार॥२९॥ तस्या द्विपानां मदवारिसेकात्खुराभिघाताच्च तुरंगमाणां॥ रेणुः प्रपेदे पथि पंक
भावं पंको पि रेणुत्वमियाय नेतुः॥३०॥ मार्गैषिणी सा कटकांतरेषु वैंध्येषु सेना बहुधा विभिन्ना॥ च
कार रेवेव महाविरावा बद्धप्रतिश्रुंति गुहामुखानि॥३१॥ तीर्थे तदीये गजसेतुबंधात्प्रतीपगामुत्तर
तोस्य गंगां॥ अयत्नवालव्यजनीबभूवुर्हंसा नभोलंघनलोलपक्षाः॥३२॥ ॥ ॥ ॥

रः। मार्गैषिणी मार्गावलोकिनी अत एव बहुधा भिन्ना महाविरावा दीर्घशब्दा सा सेना रेवेव नर्मदेव। रेवा तु नर्मदा
सोमोद्भवा मेखलकन्येत्यमरः। गुहामुखानि बद्धप्रतिश्रुंति प्रतिध्वनिवंति चकार अकरोत्॥३०॥ तीर्थ इति। तदीये वैं
ध्ये तीर्थे अवतारे गजा एव सेतुः तस्य बंधाद्धेतोः प्रतीपगां गंगामुत्तरतोऽस्य कुशस्य नभोलंघनेन लोलपक्षा हंसाः अय
त्नेन वालव्यजनी बभूवुः चमरा एव भूवन्। अभूततद्भावे च्विप्रत्ययः॥३१॥ ॥ ॥ ॥ ॥ ॥

सधात्विति। भातृनां गैरिकादीनां भेदेन जरुणयानानेमिः प्रयाणेयेध्वनयः क्ष्वेडुदे घादयस्तन्मिश्राणितूर्याणि यस्यसएवंविधः सप्रभुः कुशः पुलिंदैः किरातैरुपपादितानि समर्पितानिउपायनानिपश्यन्विंध्यं शालंघयत्॥
॥२२॥ सेति। सकुशः कपिलमुनिनारोषाद्भस्मावशेषीकृताविग्रहादेहायेषांतेषां पूर्वजानां वृद्धानां सगराणां सुरालयस्यस्वर्गस्यप्राप्तेर्निमित्तं नौभिर्कुलितं क्षुभितं त्रिस्रोतसइदं त्रैस्रोतसंगांगमंभोववंदे॥२२॥ इतीति। इ

सधातुभेदारुणयाननेमिः प्रभुः प्रयाणध्वनिमिश्रतूर्यः॥ व्यलंघयद्विंध्यमुपायनानिपश्य
न्पुलिंदैरुपपादितानि॥२२॥ सा पूर्वजानां कपिलेनरोषाद्भस्मावशेषीकृतविग्रहाणां॥ सुरा
लयप्राप्तिनिमित्तमंभस्त्रैस्रोतसं नौलुलितंववंदे॥२३॥ इत्यध्वनः कैश्चिदहोभिरंते कूलंस
मासाद्यकुशः सरय्वाः॥ वेदिप्रतिष्ठान्वितताध्वराणांयूपानपश्यत्शतशोरघूणां॥२४॥ आ
धूयशाखाः कुसुमद्रुमाणांस्पृष्ट्वाचशीतान्सरयूतरंगान्॥ तं क्लांतसैन्यं कुलराजधान्याः
प्रत्युज्जगामोपवनांतवायुः॥२५॥

तिकैश्चिदहोभिः अध्वनोंऽतेऽवसाने कुशः सरय्वाः कूलमासाद्य वितताध्वराणां विस्तृतमखानां रघूणां वेदिः प्रतिष्ठा आस्पदं येषां तान् यूपान् शतशः अपश्यत्॥२४॥ आधूयेति। कुलराजधान्या उपवनांतवायुः कुसुमद्रुमाणां शाखा आधूय ईषत् कंपयित्वा सुरभिर्मंदश्चेत्यर्थः। शीतान् सरयूतरंगान् स्पृष्ट्वा अनेन शैत्योक्तिः। क्लांतं तस्येन्यं तं कुशं प्रत्युज्जगाम॥२५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

4447
1947

अथेति। रिपुषु मग्नं शल्यं शंकुः शरो वा यस्य सः शल्यं शंकौ शरे वंश इति विश्वः पौराणां सखः पौरसखः कुलस्य ध्वज श्चिन्हभूतः बली सराजा चलाश्चलंतो ध्वजा येषां तानि बलानि सैन्यानि तस्याः पुरः पुर्याः उपशल्ये ग्रामांते ग्रामांत उपशल्यं स्यादित्यमरः। निवेशयामास॥२६॥ तामिति। प्रभुणा नियुक्ताः शिल्पिनां तक्षादीनां संघाः संभृतसाधनत्वात् मिलितोपकरणत्वात् तां तथागतां श्रांत्यामित्यर्थः। पुरमयोध्यां मेघा निदाघग्लपितां ग्रीष्मतप्तामुर्वीमिव नवीचक्रुः परिपूरयांचक्रुः॥२७॥ ततइति। ततो रघुप्रवीरः कुशः प्रतिमादेवताः प्रतिकृतयः आच्याइत्यर्थः प

अथोपशल्ये रिपुमग्नशल्यस्तस्याः पुरः पौरसखस्सराजा। कुलध्वजस्तानिचलध्वजानि निवेश
यामासबली बलानि॥२६॥ तां शिल्पिसंघाः प्रभुणानियुक्तास्तथागतां संभृतसाधनत्वात्। पुन
र्नवीचक्रुरपांविसर्गैर्मेघानिदाघग्लपितामिवोर्वीं॥२७॥ ततः सपर्यां सपशूपहारां पुरः पुराघ्र्यः प्रति
मागृहायाः॥ उपोषितैर्वास्तुविधानविद्भिर्निर्वर्तयामासरघुप्रवीरः॥२८॥ तस्याः सराजोपपदं निशां
तंकामीवकांता हृदयं प्रविश्य॥ यथार्हमन्यैरनुजीविलोकं संभावयामास गृहैस्तदीयैः॥२९॥ ॥

रर्च्यप्रतिमागृहायाः प्रशस्तदेवतायतनायाः पुरः उपोषितैः वास्तुविधाविद्भिः प्रयोज्यैः सहपशूपहारैः सपशूपहारां सपर्यां निवर्तयामास। अत्र एयंतात् णिनुपुनरित्यनुसंधेयं। अन्यथावर्तेरकर्मकत्वकरोत्यर्थत्वेकारयत्यर्थाभावप्रसंगात् भविष्यंतं तेरण्यंतकर्त्तापि कारैः प्रयोज्यस्यैवननिर्देशात् प्रयोगात्। प्रयोगांतरस्यापेक्षितत्वात्॥२८॥ तस्याइति तस्याः पुरः संबंधि राजोपपदं राजशब्दपूर्वकं निशांतं राजभवनं। निशांभवनोपस्तोरिति विश्वः। कामी कांता हृदयमिव प्रविश्य अन्यैर्निशांतैरनुजीविलोकममात्यादिकं यथाप्रधानं मान्यानुसारेण यथार्हं यथोचितं तत्तदुचितगृहैरित्यर्थः। संभावयामास। कामीवतत्सहृदयानित्यं संभावयामासेतिध्वनिः॥२९॥ ॥ ॥ ॥ ॥ ॥

सेति। विपणिस्थानि पण्यानि क्रयविक्रयार्हवस्तूनि यस्याः सापि पणिः पण्यवीथिकेत्यमरः। पुरयोध्या मंदुरासंश्र यिभिः अश्वशाला संश्रयशीलैः वाजिशाला तु मंदुरेत्यमरः। शिदक्षीत्यादिना इनि प्रत्ययः। कुरंगैः शालासु येविधि नास्थापिताः स्तंभाः ता न्गतैः प्रासैर्नागैश्च सर्वाणुन द्धानि आभरणानि यस्याः सा नारीव बभौ॥ ४०॥ वसन्निति। समैथिलेयः कुशः पुराणशोभां पूर्वशोभां अधिरोपितायां तस्यां रघूणां वसतावयोध्यायां वसन् दिवौ भर्त्रे देवेंद्रा यतथा अलकेश्वराय कुबेराय न स्पृहयां बभूव ताव पिन गठायामासेत्यर्थः। स्पृहेरीप्सित इति संप्रदानताच्चतुर्थी। अ

सामंदुरासंश्रयिभिस्तुरंगैः शालाविधिस्तंभगतैश्च नागैः॥ पूराबभासे विपणिस्थपण्या सर्वांगिनद्धा भरणेव नारी॥ ४०॥ वसन्स तस्यां वसतौ रघूणां पुराणशोभामधिरोपितायां॥ न मैथिलेयः स्पृह यांबभूव भर्त्रे दिवो नाप्यलकेश्वराय॥ ४१॥ अथास्य रत्नग्रथितोत्तरीयमेकांतपांडुस्तनलंबिहारं॥ निश्वासहार्यांशुकमाजगाम घर्मः प्रियावेषमिवोपदेष्टुं॥ ४२॥ अगस्त्यचिन्हादयनात्समीपं दि ग्युत्तरा भास्वति सन्निवृत्ते॥ आनंदशीतामिव बाष्पवृष्टिं हिमस्रुतिं हैमवती ससर्ज॥ ४३॥ ॥

नेऽयध्यायां अन्यनगरातिशायित्वं गम्यते॥ ४१॥ कुशस्य कुमुद्वतीसंगमं प्रस्तौति। अथेति। अथास्य कुशस्य प्रियायाः रत्नै र्मुक्तामणिभिर्ग्रथितानि उत्तरीयाणि यस्मिंस्तत् एकांतमत्यंतं पांडुः स्तनयोः लंबिनो हारा यस्मिंस्तं निश्वासहार्याणि अतिसू क्ष्माणि अंशुकानि यत्र तं एवं शीतलप्रायं वेषं नेपथ्यं उपदेष्टुमिव बुभिसमर्थत्वात् द्विकर्मकत्वं ग्रीष्म आजगाम॥ ४२॥ अगस्त्येति। अगस्त्यस्य चिह्नं यस्य तस्मादयनात् मार्गात् दक्षिणायनात्। भास्वति समीपं प्रतिनिवृत्ते सति उत्तरा दिक् आनंदशीतां बाष्पवृ ष्टिमिव हैमवती हिमवत्संबंधिनी हिमश्रुतिं हिमनिस्यंदं ससर्ज। अत्र प्रोषितप्रियसमागमसमाधिर्व्यगम्यते॥ ४३॥ ॥ ७

449
1947

प्रवृद्धेति। अतिमात्रं प्रवृद्धतापो दिवसः अत्यर्थमेव नाल्पं नन्वी कृशा क्षणाचेत्येताबुभौ विरोधस्य क्रियया प्रणयकलहा दिना विरोधावरणेन सानुशयौ सानुतापौ जायापती दंपती वास्तां तयोरपि तायकार्श्यसंभावात् तत्सदृशा बभूतामित्यर्थः ॥ ४४॥ दिने दिन इति। दिने दिने प्रतिदिनं शैवलवंति अधस्तात् यानि सोपानानां पर्वाणि भाग्यस्तानि विमुंचन् अतएवो दंडपद्मं गृहदीर्घिकाणां अंभो नारीनितंबप्रमाणमस्य नारीनितंबद्वयसं बभूव विहारयोग्यमभूदित्यर्थः। प्रमाणे द्वय सज्जितिद्वयसच् प्रत्ययः॥ ४५॥ वनेष्विति। वनेषु विजृंभमाणेन विनाशेनोद्गाधिषु उत्कटसौरभेषु गंधस्येत्यादिना स

प्रवृद्धतापो दिवसोऽतिमात्रमत्यर्थमेव क्षणदा च तन्वी॥ उभौ विरोधक्रियया विभिन्नौ जायापती सानुशयाविवास्तां॥ ४४॥ दिने दिने शैवलवंत्यधस्तात्सोपानपर्वाणि विमुंचदंभः॥ उद्दंडपद्मं गृह दीर्घिकाणां नारीनितंबद्वयसं बभूव॥ ४५॥ वनेषु सायंतनमल्लिकानां विजृंभणोद्गंधिषु कुड्मलेषु॥ प्रत्येकनिक्षिप्तपदः सशब्दं संख्यामिवैषां भ्रमरश्चकार॥ ४६॥ स्वेदानुविद्धार्द्रनखक्षतांकेभूयि ष्ठसंदिष्टशिखं कपोले॥ च्युतं न कर्णादपि कामिनीनां शिरीषपुष्पं सहसा पपात॥ ४७॥ ॥ ॥

मासां ते इकारादेशः॥ सायंतनमल्लिकानां कुड्मलेषु सशब्दं यथा स्यात्तथा प्रत्येकमेकैकस्मिन् निक्षिप्तपदो मकरंद लोभादित्यर्थः। भ्रमर एषां कुड्मलानां संख्यां गणनां चकारेव॥ ४६॥ स्वेदेति। स्वेदानुविद्धा आर्द्रा नूतनं नखक्षतं अं को यस्मिन् तस्मिन् कामिनीनां कपोले भूयिष्ठं संदष्टं शिखं श्लिकष्टेसरं। अतएव कर्णच्युतमपि शिरीषपुष्पं सहसा न प पात॥ ४७॥ ॥ ५॥ ॥ ५॥ ॥ ५॥ ॥ ५॥ ॥ ५॥ ॥ ५॥ ॥

यंत्रेति। ऋद्धिमंतो धनिकाः धारागृहेषु यंत्रधाराणां गृहेषु शिशिरैर्यंत्रसंचारितसलिलपूरैः परितान्व्याप्तान्मलयो
द्भवस्य रसेन चंदनोदकेन धौतान्क्षालितान् शिलाविशेषान् मणिमयासनान्यधिशय्य तेषु शयित्वा आतपं निन्युः
परिहरयांचक्रुः॥४८॥ स्नानेति। वसंतस्यात्मसहकारिणो त्यनेन मंदवीर्यो ऽतिदुर्बलः। कामः स्नानार्द्रैश्च ते मुक्ता
श्च। धूपवाससंचारणार्थमित्यर्थः। तेषु अनुधूपवासं धूपवासानं विन्यस्ताः सायंतनमल्लिकायेषु तेष्वंगनानां केशेषु ब
लं लेभे तैरुद्दीपित इत्यर्थः॥४९॥ आपिंजरेति। बद्धरजः करणत्वात् आपिंजरानुदारां द्राघीयसीं अर्जुनस्य ककुभस्य

यत्रप्रवाहैः शिशिरैः परीतान्रसेन धौतान्मलयोद्भवस्य॥ शिलाविशेषानधिशय्य निन्युर्धारागृहेष्व
तपमृद्धिमंतः॥४८॥ स्नानार्द्रमुक्तेष्वनुधूपवासं विन्यस्तसायंतनमल्लिकेषु॥ कामो वसंतात्ययमंद
वीर्यः केशेषु लेभे बलमंगनानां॥४९॥ आपिंजराबद्धरजः कणत्वां मंजरीमुदारामशुभेर्जुनस्य। द
ग्धापि देहं गिरिशेन रोषात्खंडीकृताज्येव मनोभवस्य॥५०॥ मनोज्ञगंधं सहकारभंगं पुराणशीधुं
नवपाटलं च॥ संबध्नता कामिजनेषु दोषाः सर्वे निदाघावधिना प्रमृष्टाः॥५१॥ ॥ ॥ ॥

स्य। इंद्रद्रुः ककुभोर्जुन इत्यमरः। मंजरी देहं दग्ध्वापि रोषाद्गिरिशेन खंडीकृता मनोभवस्य ज्यामौर्वीव शुशुभे॥५०॥ म
नोज्ञेति। मनोज्ञगंधमिति सहकारभंगं पुराणसीधुं सर्वत्र संबध्यते। सहकारभंगं चूतपल्लवखंडं पुराणसीधुं निर्वापि
तं शीरते। नेनेति सीधुः पक्वेक्षुरसप्रकृतिकं मद्यं औणादिको धुक्प्रत्ययः। पक्वेरिक्षुरसैः सीधुः शीपकरसः शिव इति
यादवः पाटलायाः पुष्पं पाटलं संबध्नता परस्परं संघट्टयता निदाघावधिना ग्रीष्मकालेन। अवधिस्त्ववसाने स्यादिति वि
श्वः कामिजनेषु विषये सर्वे दोषाः तापादयः प्रमृष्टाः परिहृता इत्यर्थः॥५१॥ ॥ ॥ ॥ ॥ ॥ ८

451
1947

जनस्येति। तस्मिन्समये ग्रीष्मे विगाढे कठिने सति जनस्य सविशेषं सातिशयं यथा तथा कांतो बभूवतुः। कौ द्वौ। तापाप
नोदक्षमा पादयोः रंध्रयोः पादानां रश्मीनां सेवा ययोस्तौ उदयस्थाः सन्नृपतिः शशी च॥५२॥ अथेति। अथोर्मिपुलो
— सतृष्णाः उन्मदाः राजहंसा यस्मिन् लोलश्चलसतृष्णयोरित्यमरः। रोधो लतानां पुष्पाणां वहे प्रापके पचाद्यच्
ग्रीष्मे सुखे सुखकरे सरय्वा अंभसि पयसि तस्य कुशस्य वनितासखस्य वनिताभिः सहेत्यर्थः। विहर्तुमिच्छा बभूव॥

जनस्य तस्मिन्समये विगाढे बभूवतुर्द्वौ सविशेषकांतौ॥ तापापनोदक्षमपादसेवौ सचोदयस्थौ नृपतिः शशी च॥५२॥ अथोर्मिलोलोन्मदराजहंसे रोधोलतापुष्पवहे सरय्वाः॥ विह
र्तुमिच्छा वनितासखस्य तस्यांभसि ग्रीष्मसुखे बभूव॥५३॥ स तीरभूमौ विहितोपकार्यामानाय
िभिस्तामपकृष्टनक्रां॥ विगाहितुं श्रीमहिमानुरूपं प्रचक्रमे चक्रधरप्रभावः॥५४॥ ॥

॥५२॥ स ज्ञातचक्रधरप्रभावः स कुशः तीरभूमौ विहिता उपकार्या यस्यास्तां आनायो जालमेषामस्तीति आनायिनो
जालिकाः। जालमानाय इति निपातः। आनायः पुंसि जालं स्यादित्यमरः। तैरपकृष्टनक्रां अपनीतग्राहां तां सरयूं
श्रीमहिम्नोः संपत्प्रभावयोः अनुरूपं विगाहितुं प्रचक्रमे। अत्र कामंदकः परितापिषु वासरेषु पश्यत् तटे लेखास्थि
तमाप्तसैन्यचक्रं सुविशोधितनक्रमीनजालं व्यवगाहेत जलं सुहृत्समेत इति॥५४॥ ॥ ॥ ॥ ॥

र॰मू॰टी॰ ९

सेति। सासरित्सरयूस्तीरसोपानपथेनावतारादवतरणादन्योन्यकेयूरविघट्टिनीभिः सन्नद्धांगसंघर्षिणीभिः सनूपुरक्षो स१६
भाणिसनूपुरचला निपदानियासां नाभिरंगनाभिर्हेतुभिरुद्विग्नहंसाभीतहंसा आसीत्।।९९।। परस्परेति। नौसंश्रयः पर
स्परमभ्युक्षणेसेचने तत्पराणामासक्तानां तासां स्त्रीणां मज्जनेरागोभिलाषस्तद्दर्शी नृपः पार्श्वगतामुपात्तबालव्यज
नां गृहीतचामरां किरातीं चामरग्राहिणीं बभाषे किरातस्त्वयवस्त्रियां चामरवाहिन्यां मत्स्यजात्यंतरे द्वयोरिति केशवः
।।९६।। पश्येति। गलितांगरागैर्मदीयैः शतशोवरोधैः विगाह्यमानः विलोड्यमानः एषसरयूप्रवाहः। साभ्रः समेघः

> सातीरसोपानपथावतारादन्योन्यकेयूरविघट्टिनीभिः।। सनूपुरक्षोभपदाभिरासीद्द्विग्नहंसासरिदंगनाभिः।।९५।। परस्पराभ्युक्षणतत्पराणां तासां नृपोमज्जनरागदर्शी।। नौसंश्रयः पार्श्वगतां किरातीमुपात्तबालव्यजनां बभाषे।।९६।। पश्यावरोधैः शतशोमदीयैर्विगाह्यमानोगलितांगरागैः।। संध्योदयः साभ्रइवैषवर्णं पुष्यत्यनेकं सरयूप्रवाहः।।९७।। विलुप्तमंतः पुरसुंदरीणां यदंजनं नौलुलिताभिरद्भिः।। तद्बध्नतीभिर्मदरागशोभां विलोचनेषु प्रतिमुक्तमासां।।९८।। ।।

संध्योदयः संध्याविर्भावइवअनेकं। नानाविधं वर्णं रक्तपीतादिकं पुष्यति पश्य वाक्यार्थः कर्म।।९७।। विलुप्त
मिति। नौलुलिभिः नौक्षुभिताभिरद्भिः अंतःपुरसुंदरीणां यदंजनं कज्जलं विलुप्तं तत्तदंजनं विलोचनेषु मदेन ९
यारागशोभा तां बध्नतीभिरद्भिः प्रतिमुक्तं प्रत्यर्पितं आसां प्रतिनिधिदानमपि तत्कार्यकारित्वात्प्रत्यर्पितमेवेति भावः।।९८।।

453
1947

एताइति। गुरुदुर्वहं श्रोणिपयोधरं यस्यात्मनइति। गुरुश्रोणिपयोधरत्वात्तादात्मानं शरीरमुद्वोढुमशक्नुवंत्यः एतबा
लागाढांगदैः श्लिष्टांगदैः बाहुभिः क्लेशोत्तरं दुःखप्रायं यथातथा रागवशात्क्रीडाभिनिवेशात्परतंत्र्यात्प्लवंते तरंति।।६०।।
अमीति। वारिविहारिणीनामासामभ्रंशिनोभ्रष्टानिम्नगायाः स्रोतसि पारिप्लवाः चंचलाः चंचलंतरलं चैव पारिप्लव
परिप्लवइत्यमरः। अमीशिरीषप्रसवाएवावतंसाः कर्णभूषाः शैवाललोलान्। जलनीलीप्रियान् जलनीलीतुशैवा
लंइत्यमरः। मीनान्इति छलयंति प्रादुर्भावयंति शैवालप्रियत्वात् शिरीषेषु शैवालभ्रमात्। प्रादुर्भावयंतीत्यर्थः।

> एतागुरुश्रोणिपयोधरत्वादात्मानमुद्वोढुमशक्नुवंत्यः।। गाढांगदैर्बाहुभिरप्सुबालाः क्लेशोत्तरं रागवशात्प्लवंते।।९९।। अमीशिरीषप्रसवावतंसाः प्रभ्रंशिनोवारिविहारिणीनां।। पारिप्लवाः स्रोतसिनिम्नगायाः शैवाललोलांश्छलयंति मीनान्।।६०।। आसां जलास्फालनतत्पराणां मुक्ताफलस्पार्द्धिषु शीकरेषु।। पयोधरोत्सर्पिषु शीर्यमाणः संलक्ष्यते न च्छिदुरोपि हारः।।६१।।

।।६१।। आसामिति। जलास्फालने तत्पराणामासक्तानामासां स्त्रीणां मुक्ताफलस्पर्धिषु मौक्तिकानुकारिषु पयधरे
षुस्तनेषुउत्सर्पतिउत्संतियेतेषुयेशीकराणामध्येशीर्यमाणोगलन्हारः। अतएवच्छिदुरोपिस्वयंछिन्नोपि न संलक्ष्य
ते। अनेनविदिभिदिच्छिदेः कुरजिति कुरच्प्रत्ययः। शीकरसंसर्गाच्छिन्नइति न ज्ञायत इति भावः।।६२।। ।। ।।

आवर्तेति। विलासिनीनांविलासनशीलानांस्त्रीणां। वौकसकस्यस्तभ्रइतिघिनुण् प्रत्ययः। रूपावयवानांउपमे
यानांयन्युपमानानिलोकप्रसिद्धानितान्यदूरवर्त्तीनिअंतिकगतानिजातानिकस्यकिमुपमानमित्यत्राह। नत
नाभिकांतेः निम्ननाभिशोभायाः आवर्त्तशोभा। स्यादावर्त्तोऽम्भसांभ्रम इत्यमरः। भ्रुवांभंग्यस्तरंगाः स्तनानांद्वंद्ववरा
राः श्चक्रवाकाः उपमानानिसर्वत्र संबध्यते।। ६२।। तीरेति। उत्कलापैः। उच्चबर्हैः। प्रस्निग्धामधुराः केकायेषांतैस्ती
रस्थलीषुवर्हिभिर्मयूरैरभिनंद्यमानंरक्तंश्राव्यंगीतानुगंगीतानुसारिआसांस्त्रीणांसंबंधिवार्यैवमृदंगस्तस्यवाद्य

अवर्तशोभानतनाभिकांतेर्भंग्योभ्रुवांद्वंद्वचरास्तनानां।। जातानुरूपावयवोपमानान्यदूरवर्त्ती
निविलासिनीनां।। ६२।। तरस्थलीवर्हिभिरुत्कलापैः प्रस्निग्धकेकैरभिनंद्यमानं।। श्रोत्रेषुसं
मूर्छतिरक्तमासांगीतानुगंवारिमृदंगवाद्यं।। ६४।। संदष्टवस्त्रेष्वबलानितंबेष्विंदुप्रका
शांतरितोडुकल्पाः।। अमीजलापूरितसूत्रमार्गामौनंभजंतिरसनाकलापैः।। ६५।। ।।

वाद्यध्वनिः श्रोत्रेषुसंमूर्छतिव्याप्नोति।। ६४।। संदष्टेति। संदष्टवस्त्रेषुजलसेकात्श्लिष्टांशुकेषुअबलानां
नितंबेषुअधिकरणेषुइंदुप्रकाशेनज्योत्स्नया अंतरितानिआवृत्तानियानिउडुनिनक्षत्राणितुल्याः मुक्ताम
यत्वादितिभावः। अमीजलापूरितसूत्रमार्गानिश्चलाइत्यर्थः। रशनाएवकलापाः भूषाः कलोभूषणबर्हइत्य
मरः। मौनंनिःशब्दतामित्यर्थः।। ६५।। ।। ।। ७।। ।। ७।। ।। ७।। ।। ७।।

455
1947

एताइति। दर्पात्सखीजनंप्रतिकरैरुत्पीडितउत्सारितावारिधारायाभिस्ताभिः स्वयमपिपुनस्तथैवसखीभिर्वद
नेषुसिक्ताएतास्तरुण्योवक्रेतरागैः जलसेकाद्दुर्न्वयैः अलकैः करणैः चूर्णैः कुंकुमादिभिररुणान्बानू उदक
बिंदून्वमंतिवर्षं।। ६६।। उद्बंधेति। उद्बंधाउद्गृष्टाः केशाः यस्मिन्स्च्युतपत्रलेखः क्षरितपत्ररचनः विश्लेषिणो
विस्त्रंसिनः मुक्ताफलपत्रवेष्टामुक्तामयताटंका यस्मिन्स्तएवमंभोविहाराकुलितोपिप्रमदामुखानांवेषोनेप
थ्यंमनोज्ञएवारम्याणांविकृतिरपिश्रियंतनोतीतिभावः।। ६७।। सइति। सकुशः नौर्विमानमिवनौविमानं

एताः करोत्पीडितवारिधारादर्पात्सखीभिर्वदनेषुसिक्ताः।। वक्रेतरागैरलकैस्तरुण्यश्चूर्णार
णान्वारिजलान्वमंति।। ६६।। उद्बंधकेशश्च्युतपत्रलेखोविश्लेषिमुक्ताफलपत्रवेष्टः।। मनोज्ञए
वप्रमदामुखानामंभोविहाराकुलितोपिवेषः।। ६७।। सनौविमानादवतीर्यरेमेविलोलमाल्यः
सहताभिरप्सु।। स्कंधावलग्नोद्धृतपद्मिनीकः करेणुभिर्वन्यइवद्विपेंद्रः।। ६८।। ततोनृपेणानुगताः स्त्रियस्ता
भ्राजिष्णुनात्यतिशयंविरेजुः।। प्रागेवमुक्तानयनाभिरामाः प्राप्येंद्रनीलंकिमुतोन्मयूखं।। ६९।। ।।

उपमितसमासः। तस्मादवतीर्यलोलहारः सन्ताभिस्त्रीभिः सहकारेणुभिः करिणीभिः सहस्कंधावलग्नात्धृतपद्मि
नीउत्पीडितनलिनीयस्यतथोक्तः सन्नधृतश्चेतिकप्रत्ययः। वन्यद्विपइवाप्सुरेमे।। ६९।। ततइति। ततोभ्राजिष्णुनाप्रका
नशीलेनभुवश्चेतिचकारादिष्णुचप्रत्ययः। नृपेणानुगताः संगतास्ताः स्त्रियः सातिशयंयथातथाविरेजुः।। प्रागेवेंद्रनील
योगात्पूर्वमेवकेवलाअपीत्यर्थः। मुक्तामणयोनयनाभिरामाः उन्मयूखमिंद्रनीलंप्राप्यकिंअभिरामाकिंवक्तव्यमि
त्यर्थः।। ६९।। ।। ।। ७ ।। ।। ७।। ।। ७ ।। ।। ।। ।। ।। ।।

वर्णोदकैरिति। तं कुशमायताक्ष्यः कांचनस्य शृंगैर्मुक्तानि तैर्वर्णोदकैः कुंकुमादिवर्णद्रव्यसहितोदकैः प्रणयात् स्नेहात्। असिंचन्। तथा तत्र गतः स्थितो धातः वर्णोदकसिक्त इत्यर्थः। स कुशः सधातुनिष्यंदो गैरिकद्रव्ययुक्त अद्रिराज इव बभासे अत्यर्थं चकासे॥७०॥ तेनेति। अवरोधप्रमदासखेन सुंदरीसहचरेण तां सरिद्वरां सरयूं विगाहमानेन तेन कुशेन आकाशगंगायां रतिः क्रीडा यस्य स अप्सरोभिर्वृतः आवृतः मरुत्वानिंद्रः अनुयातलीलः अनुकृतश्रीरभूदिति शेषः। इंद्रमनु

वर्णोदकैः कांचनशृंगसंस्थैस्तमायताक्ष्यः प्रणयादसिंचन्॥ तथागतः सोतितरां बभासे सधातुनिस्यंद इवाद्रिराजः॥७०॥ तेनावरोधप्रमदासखेन विगाहमानेन सरिद्वरां तां॥ आकाशगंगारतिरप्सरोभिर्वृतो मरुत्वाननुयातलीलः॥७१॥ यत्कुंभयोनेरधिगम्य रामः कुशाय राज्येन समं दिदेश॥ तदस्य जैत्राभरणं विहर्तुरज्ञातपातं सलिले ममज्ज॥७२॥ स्नात्वा यथाकाममसौ सदारस्तीरोपकार्यां गतमात्र एव॥ दिव्येन शून्यं वलयेन बाहुमपोढनेपथ्यविधिर्ददर्श॥७३॥ ॥ ॥

कृतवानित्यर्थः॥७१॥ यदिति। यदाभरणं रामः कुंभयोनेरगस्त्यादधिगम्य प्राप्य कुशाय राज्येन समं दिदेश राज्यसमंमूल्य मित्यर्थः। सलिले विहर्तुः क्रीडितुः अस्य कुशस्य तज्जैत्राभरणं जयनशीलं आभरणं अज्ञातपातं सत् ममज्ज॥७२॥ स्नात्वेति। असौ कुशः सदारः सन् यथाकामं यथेष्टं स्नात्वा विगाह्य तीरे या उपकार्या पूर्वोक्ता तां गतमात्रो गत एव अपठनेपथ्य
विधिः अकृतप्रसाधन एव दिव्येन वलयेन शून्यं बाहुं ददर्श॥७३॥ ॥८॥ ॥८॥ ॥८॥ ॥

457
1947

जयेति। यतः कारणात्तदाभरणं जयः श्रियः संवननं वशीकरणं। वशक्रिया संवननमित्यमरः। यस्माद्गुरुणा पित्रा आमुक्तपूर्वं पूर्वमामुक्तं धृतमित्यर्थः सुप्सुपेति समासः। अतो हेतोरस्याभरणस्य स नाशं न सेहे। लोभात्तत्र कुतः। हि यस्माद्धीरः धीमान् कुशः फुलानि पुष्पाण्याभरणानि यस्य स पुष्पेष्विवाभरणेषु धनेषु निर्माल्याबुद्धिं करोतीत्यर्थः॥७४॥ तत इति। नद्यां स्नांति कौशलेनेति नदीष्णाः तान् संप्रतियोगविभागात्कप्रत्ययः। नन्नदीभ्यां स्नातेः कौशल इति षत्वं सर्वानानायिनो जालिकान्तस्याभरणस्य विचये अन्वेषणे अभिन्ने आशु समाज्ञापयत्। ते च आनायिनः सरयूं विगाह्य विलोड्य बंध्यश्र

जयः श्रियः संवननं यतस्तदामुक्तपूर्वं गुरुणा च यस्मात्॥ सेहेन तद्भ्रंशमतो न लोभात्स तुल्यपुष्पाभरणो हि धीरः॥७४॥ ततः समाज्ञापयदाशु सर्वानानायिनस्तद्विचये नदीष्णान्॥ वंध्यश्रमास्ते सरयूं विगाह्य तमूचुरम्लानमुखप्रसादः॥७५॥ कृतः प्रयत्नो न च देव लब्धं मग्नं पयस्याभरणोत्तमं ते॥ नागेन लौल्यात्कुमुदेन नूनमुपात्तमंतर्ह्रदवासिना तत्॥७६॥ ततः स कृत्वा धनुराततज्यं धनुर्धरः कोपविलोहिताक्षः॥ गारुत्मतं तीरगतस्तरस्वी भुजंगनाशाय समाददेस्त्रं॥७७॥ ॥ ॥ ॥

माः विफलप्रयासाः। तथापि तद्रतिज्ञत्वादम्लानमुखारविंदाः संतः तं कुशं ऊचुः॥७५॥ कृत इति। हे देव प्रयत्नः कृतः पयसि निमग्नं ते आभरणोत्तमं न लब्धं किंतु तदाभरणमंतर्ह्रदवासिना कुमुदेन कुमुदाख्येन नागेन पन्नगेन लौल्यात् लोभादुपात्तं नूनमिति वितर्कः॥७६॥ तत इति। ततो धनुर्धरः कोपविलोहिताक्षः तरस्वी बलवान् स कुशः धनुराततज्यमधिज्यं कृत्वा भुजंगस्य कुमुदस्य नाशाय गारुत्मतं गरुडदेवताकमस्त्रमाददे॥७७॥ ॥ ॥ ॥ ॥ ॥ ॥

र॰मू॰टी॰ १२ तस्मिन्निति। तस्मिन्नन्हे संहितमात्रे सत्येव ह्रदः क्षोभाद्धेतोः समाविद्धाः संघट्टितास्तरंगाएव हस्ता यस्य स रोधांसि भिंदन् अ स१६
वपातेन ग्रहणगर्तेन मग्नः। अवपातस्तु हस्त्यर्थं गर्तः छन्नस्तृणादिनेति यादवः वन्यः करीव परुषं घोरं रसं दधान॥७८॥त
स्मादिति। मथ्यमानात्समुद्रादिवाद्धूत्तनक्रात् क्षुभितग्राहात् तस्मात् ह्रदात् लक्ष्म्या सार्धं सुरराजस्येंद्रस्य वृक्षः पारि
जात इव कन्यां पुरस्कृत्य भुजंगराजः कुमुदः सह सोन्ममज्ज॥७९॥ विभूषणेति। विशांपतिर्मनुजपतिः कुशः द्वौ विशौ
वैश्यमनुजाविस्यमरः। विभूषणं प्रत्युपहरति प्रत्यर्पयतीति विभूषणप्रत्युपहारः कर्मण्यण्। विभूषणप्रत्युपहारो हस्तोय

तस्मिन्ह्रदः संहितमात्रएव क्षोभात्समाविद्धतरंगहस्तः॥ रोधांसि भिंदन्नवपातमग्नः करीव वन्यः परुषं
ररास॥७८॥ तस्मात्समुद्रादिव मथ्यमानादुद्धृत्तनक्रात्सह सोन्ममज्ज॥ लक्ष्म्येव सार्धं सुरराजवृक्षः
कन्यां पुरस्कृत्य भुजंगराजः॥७९॥ विभूषणप्रत्युपहारहस्तमुपस्थितं वीक्ष्य विशांपतिस्तं॥ सौपर्ण
मस्त्रं प्रतिसंजहार प्रह्वेष्वनिर्बंधरुषो हि संतः॥८०॥ त्रैलोक्यनाथप्रभवं प्रभावात्कुशं द्विषामंकुशमास्त्र
विद्वान्॥ मानोन्नतेनाप्यभिवंद्य मूर्ध्ना मूर्धाभिषिक्तं कुमुदो बभाषे॥८१॥ ॥ ॥ ॥ ॥

स्यतं प्रत्युपस्थितं प्राप्तं कुमुदं वीक्ष्य सौपर्णं गारुत्मतमस्त्रं प्रतिसंजहार। तथाहि। संतः प्रह्वेषु नम्रेषु अनिर्बंधरुषः अनियत
कोपा हि॥८०॥ त्रैलोक्येति। अस्त्रविद्वान् अस्त्रविद्वान्न लोकेत्यादिना षष्ठीनिषेधः। श्रितादिगमिगम्यादीनामुपसं
ख्यानात् द्वितीयासमासः गारुडास्त्रमहिमाभिज्ञ इत्यर्थः। कुमुदः त्रयो लोकाः त्रैलोक्यं चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्प्रत्य
यः। त्रैलोक्यनाथो रामः प्रभवो जनको यस्य तं अतएव प्रभवात् द्विषामंकुशं मूर्धाभिषिक्तं राजानं कुशं मानोन्नतेनापि मू १२
र्ध्ना अभिवंद्य प्रणम्य बभाषे॥८१॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

459
1947

अवैमीति। त्वां ओदनांतरस्तंडुल इति किं कार्यांतरः कार्यार्थिः स्थानात्मीयान्यतादर्थ्यं रंध्रान्तरीयेषु चांतरमिति। शाश्वतः
स चासौ मानुषश्चेति तस्य विष्णोः रामस्य सुताख्यां पुत्रसंज्ञां अपरां तनुं मूर्तिमिवेति आत्मा वै पुत्रनामासीतिश्रुतिरित्य
र्थः। सं जानन् अहमाराधनीयस्य उपास्यस्य तव वृद्धेः प्रीतेः ध्रुअप्रीताविति धातोः स्त्रियां क्तिः। विघातं कथं नामाचरेयं
असंभावितमित्यर्थः॥८२॥ करेति। कराभिघातेनोत्थितं उर्ध्वंगतः कंदुको यस्याः सा कंदुकार्थमूर्ध्वं पश्यंतीत्यर्थः
। सेयं बालाजवदंतरिक्षात्पततत् ज्योतिर्नक्षत्रमिव ज्योतिर्भोद्योत दृष्टिष्विस्यमरः। यतस्त्वदीयं जैत्राभरणं आलोक्य आ

अवैमि कार्यांतरमानुषस्य विष्णोः सुताख्यामपरां तनुं त्वां॥ सोहं कथं नाम तवाचरेयमारा
धनीयस्य धृतेर्विघातं॥८२॥ कराभिघातोत्थितकंदुकेयमालोक्य बाला तिकुतूहलेन॥ अ
वातज्योतिरिवांतरिक्षाददात्त जैत्राभरणं त्वदीयं॥८३॥ तदेतदाजानुविलंबिना ते ज्याघा
तलेखाकिरलांछनेन॥ भुजेन रक्षापरिघेन भूमेरुपैतु योगं पुनरंसलेन॥८४॥ ॥

हृताग्रहादत्॥८३॥ तदिति। तदेतदाभरणं आजानुविलंबिना ज्याघाताः ज्यारेखाकारा ग्रंथयः तेलांछनं यस्य ते
न भूमेः रक्षायाः परिघेन रक्षार्गलेन परिघो योगभेदस्तु मुद्गरेर्गलघातयोरित्यमरः। अंसलेन बलवता तव भुजेन पुन
र्योगं संगतिं उपैतु। एतैर्विशेषणैर्महाभाग्यसौंदर्यधरंधरत्वबलवत्त्वादि गम्यते॥८४॥ ॥ ॥ ॥

इमामिति। हे पार्थिव तव पादयोः शुश्रूषया परिचर्यया। शुश्रूषा श्रोतुमिच्छायां परिचर्याप्रदानयोरिति विश्वः। आत्मा
पराधमाभरणरूपं नुदतीं परिजिहीर्षतीमित्यर्थः। आशंसायां भूतवच्चेति चकाराद्वर्तमानार्थप्रत्ययः। आछीनद्योर्नु
मित्यस्य वैकल्पिकत्वान्नुमभावः। इमां मे यवीयसीं कनिष्ठां स्वसारं भगिनीं कुमुद्वतीं अनुमंतुं नार्हसि इति न अर्हस्येवे
त्यर्थः॥८५॥ इतीति। इति पूर्वश्लोकोक्तमूचिवान् उक्तवान्। अथ कुसुः उपहृताभरणः प्रत्यर्पिताभरणः कुमुदः हे कुमु
द भवान् श्लाघ्यः स्वजनो बंधुरित्यनुभाषितारमनुवक्तारं क्षितीशं कुशं समेतबंधुर्युक्तबंधुः सन् कन्याभयेन कन्या
रत्नेन कुलभूषणेन संयोजयामास। न केवलं तदीयमेव किंतु स्वकीयमपि भूषणं तस्मै दत्तवानिति ध्वनिः। अनू

इमां स्वसारं च यवीयसीं मे कुमुद्वतीं नार्हसि नानुमंतुं॥ आत्मापराधं नुदतीं चिराय शुश्रूषया पा
र्थिव पादयोस्ते॥८५॥ इत्यूचिवानुपचिताभरणं क्षितीशं श्लाघ्यो भवान्स्वजन इत्यभिभाषितारं॥
संयोजयां विधिवदास समेतबंधुः कन्यामयेन कुमुदः कुलभूषणेन॥८६॥ तस्यास्पृष्टे मनुजपतिना
साहचर्याय हस्ते मांगल्योर्णावलयिनि पुरः पावकस्योच्छिखस्य॥ दिव्यस्तूर्यध्वनिरुदचरद्व्य
श्नुवानो दिगंतान् गंधोदग्रं तदनु ववृषुः पुष्पमाश्चर्यमेघाः॥८७॥ ॥ ॥ ॥ ॥

प्रत्ययानुप्रयोगयोर्व्यवधानं तु प्रागेव समाहितं॥८६॥ तस्या इति। मनुजपतिना कुशेन साहधर्माचरणायेत्यर्थः मांगल्या मं
गलसाधुर्या कुर्णा मेषादिलोम कूर्णा मेषादिलोम्नि स्यादित्यमरः अत्र लक्षणया तन्निर्मितं सूत्रमुच्यं। तथा वल
यिनि वलयवति तस्याः कुमुद्वत्याः हस्ते पाणौ उच्छिखस्य उदर्चिषः पावकस्य पुरोग्रे स्पृष्टे गृहीते सति दिगंतान् व्यश्नुवा
न् दिव्यस्तूर्यध्वनिरुदचरत्। उच्छ्रितः तदनु आश्चर्याद्भुतान् मेघा गंधेनोदग्रं उत्कटं पुष्पं पुष्पाणि जात्यानि प्राणो कव
चनं। ववृषुः आश्चर्यशब्दस्य रोहंनु गममर्त्रिपुच तु दृशेत्यनुवचनात्स्त्रीलिंगत्वं॥८७॥ ॥ ॥ ॥

461
1947

इत्थमिति। इत्थं नागः कुमुदः त्रयाणां भुवनानां समाहारस्त्रिभुवनं। तद्धितार्थेत्यादिना तत्पुरुषः अदंतात् द्विगु
पात्राद्यंतत्वान्न नपुंसकत्वं पात्राद्यंतैरनेकार्थो द्विगुर्लक्ष्यानुसारत इत्यमरः। तस्य गुरुः रामस्तस्योरस्यं धर्मप
त्नीजं पुत्रं। औरसो धर्मपत्नीज इति याज्ञवल्क्यः मैथिलेयं कुशं बंधुं लब्ध्वा कुशोपि तक्षकस्य पंचमं पुत्रं तं कुमु

इत्थं नागस्त्रिभुवनगुरोरौरसं मैथिलेयं लब्ध्वा बंधुं तमपि च कुशः
पंचमं तक्षकस्य॥ एकः शंकां विषधररिपोस्त्यजहैनतेयाच्छांतव्यालाम
वनिमपरः पौरकांतः शशास॥८८॥ ॥ ॥ श्री इति रघुवं
शे महाकाव्ये श्रीकालिदासकृतौ षोडशः सर्गः॥१६॥ ॥ ॥

दं बंधुं लब्ध्वा एकस्तयोरन्यतरः कुमुदः विषधररिपोर्वैनतेयात् गरुडात् गुरुणा वैष्णवेनांशेन त्याजितक्रौर्यादि
ति भावः। शंकां भयमत्यजत्। अपरः कुशः शांतव्यालां कुमुदाख्ययातीतसर्पभयामवनिमत एव पौरकांतः पौरा
णां प्रियः सन् शशास॥८८॥ इति श्रीमहोपाध्यायकोला॰ रघुवंशटीकायां संजीवनी समाख्यायां षोडशः स
र्गः॥१६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

र-म्रू-टी-
३४

स१६

१४

463
1947

॥श्रीः॥ ॥नमो रामपदांभोजरेणवो यत्र संततं॥ कुर्वंति कुमुदप्रीतिमरण्यगृहमेधिनः॥१॥ अतिथिमिति॥
कुमुद्वती काकुत्स्थात् कुशाच्चेतना बुद्धिः पश्चिमाद्यामिनी यामाद्रात्रिप्रहरात् द्वौ यमौ प्रहरौ समाविस्यमरः॥
प्रसादं वैशद्यमिव अतिथिं नाम पुत्रमाप प्राप। ब्राह्म्ये समये सर्वेषां बुद्धिर्वैशद्यं भवतीति प्रसिद्धमेव॥१॥ सइति॥
पितृमान्वंशं सार्थमृतुप्र अनुपमद्युतिः सवितुश्चेदं विशेषणं सोऽतिथिः पितुः कुशस्य वंशं मातुः कुमुद्वत्याः वंशं च
सविता उत्तरदक्षिणौ मार्गाविव अपुनात् पवित्रीकृतवान्॥२॥ तमिति॥ अर्थान् शब्दार्थान् दारसंग्रहादिक्रियान् प्रयो
जनानि वा वदंतीत्यर्थः। श्रेष्ठः पिता कुशस्तमतिथिं आदौ प्रथमं कुशलधियां। आन्विक्षकी त्रयी वार्ता दंडनीत्यादिव
ह

॥अतिथिं नाम काकुत्स्थात्पुत्रमाप कुमुद्वती॥ पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना॥१॥ स पितुः पितृमा
न्वंशं मातुश्चानुपमद्युतिः॥ अपुनात्सवितेवोभौ मार्गावुत्तरदक्षिणौ॥२॥ तमादौ कुलविद्यानामर्थमर्थविदां
वरः॥ पश्चात्पार्थिवकन्यानां पाणिमग्राहयत्पिता॥३॥ जात्यस्तेनाभिजातेन शूरः शौर्यवता कुशः॥ अमन्यतै
कमात्मानमनेकं वशिना वशी॥४॥ स कुलोचितमिंद्रस्य साहायकमुपेयिवान्॥ जघान समरे दैत्यं दुर्जयं तेन
चावधि॥५॥

चनात्॥ गृहेणां तस्य सर्वत्र वृद्धिकर्मकर्तृत्वं अस्तीत्युक्तं प्राक्॥३॥ जात्य इति जातो भवो जात्यः कुलीनः शूरो वशी कुशः
अभिजातेन कुलीनेन अभिजातः कुलीनः स्यादित्यमरः। शौर्यवता वशिना अतिथिना करणेन एकमात्मानं एको न भ
वतीत्यनेकममन्यत। सर्वगुणसमग्र्यादात्मजमात्मन एव रूपांतरममंस्तेत्यर्थः॥४॥ सइति। स कुशः कुलोचितं कु
लाभ्यस्तं इंद्रस्य साहायकं सहकारित्वं योपधादिना वुञ् उपेयिवान् प्राप्तः। समरे नाम नोर्यतश्च दुर्जयं दैत्यं जघान
वधीत्। तेन दैत्येनावधि हतश्च लुङि चेति हनो वधादेशः॥५॥ ॥ ॥ ॥ ॥ ॥ ॥

465
1947

तामिति। कुमुदस्य नाम नागराजस्य स्वसा कुमुद्वती कुशपत्नी कुमुदानंदं शशांकं कौमुदी ज्योत्स्नेवातं कुशं अन्व
गात् कुशस्तु कुः पृथ्वी तस्यां मुत्प्रीतिः सेवानंदो यस्येति कुमुदानंदः परानंदेन स्वयमानंदतीत्यर्थः॥६॥ तयोरि
ति। तयोः कुशकुमुद्वत्योर्मध्ये एकः कुशो दिवस्पतेरिंद्रस्यारात्सिंहासनार्द्धभाक् तद्भागासीनः आसीत् द्वितीया कुमुद्व
त्यपि शच्या इंद्राण्याः पारिजातांशभाजिनी ग्राहिणी संवर्वेस्यादिना भजेर्ण्विनुण् प्रत्ययः सखी आसीत्। कारस्करा

तां स्वसा नागराजस्य कुमुदस्य कुमुद्वती॥ अन्वगात्कुमुदानंदं शशांकमिव कौमुदी॥६॥ तयोर्दिव
स्पतेरासीदेकः सिंहासनार्धभाक्॥ द्वितीयापि सखी शच्याः पारिजातांशभाजिनी॥७॥ तदात्म
संभवं राज्ये मंत्रिवृद्धाः समादधुः॥ स्मरंतः पश्चिमामाज्ञां भर्तुः संग्राम यायिनः॥८॥ ते तस्य कल्प
यामासुरभिषेकाय शिल्पिभिः॥ विमानं नवमुद्वेदि चतुःस्तंभप्रतिष्ठितं॥९॥ ॥. ॥ ॥

दिवाद्दिवस्पतिः साधुः॥७॥ तदिति संग्रामयायिनो यास्यतः अवश्यकार्येति णिनिः अकमोभविष्यदाधमर्ण्ययोरि
ति षष्ठी निषेधः भर्तुः स्वामिनः कुशस्य पश्चिमामंति — — माज्ञां विपर्यये पुत्रोऽभिषेक्तव्य इत्येव रूपां स्वरं तो
मंत्रिवृद्धाः तदात्मसंभवमतिथिं राज्ये समादधुः निदधुः॥८॥ ते मंत्रिणस्तस्यातिथेरभिषेकाय शिल्पिभिरु
द्वेदि उन्नतवेदिकं चतुःस्तंभप्रतिष्ठितं नवं विमानं मंडपं कल्पयामासुः कारयामासुः॥९॥ ॥ ॥ ॥

र॰मू॰टी॰ २

तत्रेति। तत्रविमाने भद्रपीठे पीठविशेषउपवेशितमेनमतिथिं हेमकुंभेषु संभृतैः संगृहीतैस्तीर्थवारिभिः करणैः प्रकृत स१७
यो मंत्रिणउपतस्थुः॥१०॥ नदद्भिरिति। आहतं पुष्करं मुखं येषां तैः पुष्करं करिहस्ताग्रे वाद्यभांडमुखेपि चेत्यमरः॥
स्निग्धं मधुरं गंभीरं स्वनवद्भिस्तूर्यैस्तस्यातिथेरविच्छिन्नसंततिं अविच्छिन्नपारंपर्यं कल्याणं भाविशुभमन्वमीय
तानुमितं॥११॥ दूर्वेति। सोतिथिर्दूर्वाश्च यवांकुराश्च प्लक्षत्वचश्च अभिन्नपुटाबालपल्लवाश्च नराणां मधा
नानि येषु ते अभिन्नपुटानि मधुकपुष्पाणीति केचित्। कमलानीत्यन्ये। ज्ञातिषु ये वृद्धास्तैः प्रयुक्तान्नीरज

तत्रैनं हेमकुंभेषु संभृतैस्तीर्थवारिभिः॥ उपतस्थुः प्रकृतयो भद्रपीठोपवेशनं॥१०॥ नदद्भिः स्निग्ध
गभिरं तूर्यैराहतपुष्करैः॥ अन्वमीयत कल्याणं तस्याविच्छिन्नसंततेः॥११॥ दूर्वायवांकुरप्लक्षत्वग
भिन्नपुटोत्तरान्॥ ज्ञातिवृद्धप्रयुक्तान्स भेजे नीराजनाविधीन्॥१२॥ पुरोहितपुरोगास्तं जिष्णुं जै
त्रैरथर्वभिः॥ उपचक्रमिरे पूर्वमभिषेकं द्विजातयः॥१३॥ तस्यौघमहती मूर्ध्नि निपतंती व्यरोचत
॥ सशब्दमभिषेकश्रीर्गंगेव त्रिपुरद्विषः॥१४॥ स्तूयमानः क्षणे तस्मिन्नलक्ष्यत स वंदिभिः॥ प्रवृद्ध इव
पर्जन्यश्चातकैरभिनंदितः॥१५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नाविधीन्॥१२॥ पुरोहितेति। पुरोहितपुरोगाः पुरोहितप्रमुखा द्विजातयो ब्राह्मणा जिष्णुं जयनशीलं तमतिथिं जै
त्रैर्जयनशीलैरथर्वभिर्मंत्रविशेषैः करणैः पूर्वमभिषेकमुपचक्रिरे॥१३॥ तस्येति। तस्यातिथेर्मूर्ध्नि सशब्दं निपतंती ओघे
न महती महाप्रवाह अभिषिच्यतेनेनेत्यभिषेकः जलं स एव श्रीः समृद्धिस्त्रिपुरद्विषः शिवस्य मूर्ध्नि निपतंती गंगे
व व्यरोचत। त्रयाणां द्विषतीति विग्रहः॥१४॥ स्तूयमान इति। तस्मिन्क्षणे अभिषेककाले वंदिभिः स्तूयमानः सो २
तिथिः प्रवृद्धः प्रवर्द्धमानः कीर्तिः अत एव चातकैरभिनंदितः संस्तुतः पर्जन्यो मेघ इवालक्ष्यत॥१५॥ ॥ ॥

467
1947

तस्येति। सन्मंत्रैः पूताभिः शुद्धाभिरद्भिः स्नानं प्रतीच्छतः कुर्वतः वृष्टिसेकाद्विद्युतोयं वैद्युतस्तस्य वह्नेरिवाग्नेरि
वद्युतिर्ववृधे॥१६॥ स इति। सोतिथिरभिषेकांते स्नातकेभ्यो गृहस्थेभ्यः तावत्परिमाणं वसु धनं ददौ। याव
द्युतिर्ववृधे॥ ... यावता स्नातकानां पर्याप्तदक्षिणाः समग्रदक्षिणा यज्ञाः समाप्येरन् तावद्ददाविति निश्चयः॥१७॥ तइति। प्री
तमनसस्ते स्नातकास्तस्मै अतिथये यामाशिषं शुभवाचमुदीरयत्। सा आशीस्तस्यातिथेः कर्मनिर्वृत्तैः पूर्वपुण्य

तस्य सन्मंत्रपूताभिः स्नानमद्भिः प्रतीच्छतः॥ ववृधे वैद्युतस्याग्नेर्वृष्टिसेकादिव द्युतिः॥१६॥
स तावदभिषेकांते स्नातकेभ्यो ददौ वसु॥ यावत्तेषां समाप्येरन्यज्ञाः पर्याप्तदक्षिणाः॥१७॥
ते प्रीतमनसस्तस्मै यामाशिषमुदीरयन्॥ सा तस्य कर्मनिर्वृत्तैर्दूरं पश्चात्कृता फलैः॥१८॥
बंधच्छेदं स बद्धानां वधार्हाणामवध्यतां॥ धुर्याणां च धुरो मोक्षमदोहं चादिशद्गवां॥ ॥१९॥
क्रीडापतत्रिणोप्यस्य पंजरस्थाः शुकादयः॥ लब्धमोक्षास्तदादेशाद्यथेष्टगतयोभवन्॥२०॥

निर्वृत्तैः फलैः सम्राज्यादिभिः दूरं दूरतः पश्चात्कृता स्वफलदानस्य तदानीमनभिवकाशात्कालांतरोदीक्षणं च कारेत्य
र्थः॥१८॥ बंधेति। सोतिथिर्बद्धानां बंधच्छेदं वधार्हाणामवध्यतां। धुरं वहंतीति धुर्या बलीवर्दादयस्तेषां धुरो भारान्मोक्षं
गवामदोहं वत्सानां पानार्थं दोहवृत्तिं चादिशत् दिदेश॥१९॥ क्रीडेति। पंजरस्थाः शुकादयोस्यातिथेः क्रीडाप
तत्रिणोपि किमुतान्ये इत्यपिशब्दार्थः तदादेशात्तस्यातिथेरादेशाल्लब्धमोक्षाः संतो यथेष्टं गतिर्येषां ते स्वैरचारिणो
भवन्॥२०॥ ॥ ॥ ॥ ॥ ॥ ॥

ततइति। सोतिथिर्नेपथ्यग्रहणाय प्रसाधनस्वीकाराय कक्षांतरं हर्म्यांगणविशेषः कक्षाप्रकोष्ठे हर्म्यादेरित्यमरः।
तत्र न्यस्तं स्थापितं शुचि निर्मलं सोत्तरच्छदं आस्तरणसहितं गजदंतस्यासनं पीठमध्यास्त तत्रोपविष्ट इत्यर्थः॥२१॥
तमिति। तोयेन निर्णिक्तपाणयः क्षालितहस्ताः प्रसाधकाः अलंकर्तारः धूपेन गंधद्रव्यधूपेनाश्यानान् केशांतान् शोषि
तकेशपाशांतैस्तैराकल्पस्य नेपथ्यस्य साधनैर्गंधमाल्यादिभिरुपसेदुरुपतस्थुः॥२२॥ तस्येति। मुक्तागणेन मौक्ति
कसमूहेन उन्नद्धं उद्बद्धं अंतर्गतस्रजं तं तस्य मौलिं धम्मिल्लं प्रभामंडलशोभिना पद्मरागेण माणिक्येन प्रत्यूपुः प्रत्यु

ततः कक्षांतरन्यस्तं गजदंतासनं शुचि॥ सोत्तरच्छदमध्यास्त नेपथ्यग्रहणाय सः॥२१॥ तं धूपाश्यानकेशांतं तोयनिर्णिक्तपाणयः॥ आकल्पसाधनैस्तैस्तैरुपसेदुः प्रसाधकाः॥२२॥ तस्य मुक्तागणेनद्धं मौलिमभ्यंतरस्रजं॥ प्रत्यूपुः पद्मरागेण प्रभामंडलशोभिना॥२३॥ चंदनेनांगरागं च मृगनाभिसुगंधिना॥ समापय्य ततश्चक्रुः पत्रं विन्यस्तरोचनं॥२४॥ आमुक्ताभरणः स्रग्वी हंसचिन्हदुकूलवान्॥ आसीदतिशयप्रेक्ष्यः स राज्यश्रीवधूवरः॥२५॥

श्वं चक्रुः॥२३॥ चंदनेनेति। ततो मृगनाभ्या कस्तूर्या सुगंधिना चंदनेनांगरागं विलेपनं समापय्य समाप्य विन्यस्ता रो
चना गोरोचना यस्मिंस्तत्पत्रं पत्ररचनं चक्रुः॥२४॥ आमुक्तेति। आमुक्ताभरणः आसंजिताभरणः स्रजोस्य संतीति स्र
ग्वी अस्मायामेधास्रजो विनिरिति विनिप्रत्ययः। हंसाश्चिन्हमस्येति हंसचिन्हं यद्दुकूलं तद्वान् अत्र बहुव्रीहि
णैवार्थसिद्धेर्मतुवानर्थक्येपि सर्वधनीत्यादिनात्कर्मधारयादपि मत्वर्थीयप्रत्ययमिच्छंति एवमन्यत्रापि द्रष्टव्यं
श्रीरेव वधूर्नवोढा स्तस्याः वरो वोढा वधूः स्नुषा नवोढा स्त्री वरो जामातृनिन्दयोरिति विश्वः। सोतिथिरतिशयेन प्रेक्ष्यो
॥ दर्शनीय आसीत् वरोप्येवं विशेषणः॥२५॥

469
1947

नेपथ्येति। हिरण्मये सौवर्णे आदर्शे दर्पणे नेपथ्यादर्शिनो वेषं पश्यतस्तस्यातिथेः छाया प्रतिबिंबं यथा उदिते सूर्ये
दर्पणकल्पे मेरौ याः कल्पतरुस्तस्य छायेव विरराज। तस्य सूर्यसंक्रांतबिंबत्वात्संभवान्मेराविपुक्तं॥२६॥ सइति। सो
तिथी राजककुदानि राजचिन्हानि छत्रचामरादीनि प्राधान्ये राजलिंगे च वृषांसे ककुदोस्त्रियामित्यमरः। तेषु व्य
ग्राः पाणयो येषां तैः पार्श्ववर्त्तिभिर्जनैरुदीरितालोकउच्चारितजयशब्दः सुधर्मा या देवसभा जनवमामन्यूनो
सभामास्थानीययोस्यास्क धर्मा देवसभा इत्यमरः॥२७॥ वितानेति। तत्र सभायां वितानेनोपरिवस्त्रेण। आस्त्री वि

नेपथ्यदर्शिनः छाया तस्यादर्शे हिरण्मये॥ विरराजोदिते सूर्ये मेरौ कल्पतरोरिव॥२६॥
स राजककुदव्यग्रपाणिभिः पार्श्ववर्त्तिभिः॥ ययावुदीरितालोकः सुधर्मानवमां सभां॥२७॥
वितानसहितं तत्र भेजे पैतृकमासनं॥ चूडामणिभिरुद्घृष्टपादपीठं महीक्षितां॥२८॥
शुशुभे तेन चाक्रांतं मंगलायतनं महत्॥ श्रीवत्सलक्षणं वक्षः कौस्तुभेनेव केशवं॥२९॥

तानमुल्लोचमित्यमरः। सहितं महीक्षितां राज्ञां चूडामणिभिरुद्घृष्टं उल्लेख्यं पादपीठं यस्य तत् पितुरिदं पैतृकं
तत्र स्भीत्तिटप्रत्ययः आसनं सिंहासनं भेजे॥२८॥ शुशुभेति। तेनाक्रांतं श्रीवत्सो ग्रहविशेषः तल्लक्षणं श्रीवत्स
रूपं श्रीवत्सो न भावर्त्तादिविच्छंदा बहवो द्वयोरिति सज्जनः। महदधिकं मंगलायतनं मंगलगृहं सभारूपं कौस्तुभे
नमणिनाक्रांतं श्रीवत्सलक्षणं केशवस्येदं केशवं वक्ष इव शुशुभे॥२९॥ ॥ ॥ ॥ ॥ ॥

वभाविति। सोतिथिः कुमारत्वाद्यौवराज्यादनंतरं अधिराज्यस्य भावमाधिराज्यमवाप्य लेखाभावात्साम
र्थ्यपूर्णतांगतश्चंद्रमाइव बभाविति व्याख्यानं। तदपि यौवराज्याभावनिश्चये ज्यायएव।।३०।। यस्मिन्निति
।। प्रसन्नोमुखरागोमुखकांतिर्यस्य तस्मिन्स्मितपूर्वं यथा तथाभाषिणं भाषणशीलं अनुजीविनो भृत्यैर्वि
ग्रहवंतं विश्वासं विश्रंभं अमन्यंत। समौविश्रंभविश्वासावित्यमरः।।३१।। सइति। पुरुहूतः श्रीः सोतिथिः क
ल्पद्रुमाणांनिभाः समाना ध्वजायस्यां तां पुरमयोध्यां ऐरावतस्य ओज — ओजोबलं यस्य तेनना गेनकुंजरे

बभौभूयः कुमारत्वादधिराज्यमवाप्य सः।। रेखाभावादुपारूढः सामग्र्यमिव चंद्रमाः।।३०।
प्रसन्नमुखरागंतंस्मितपूर्वाभिभाषिणं।। मूर्तिमंतममन्यंत विश्वासमनुजीविनः।।३१।।
सपुरंपुरुहूतःश्रीः कल्पद्रुमनिभध्वजां।। क्रममाणश्चकार द्यांनागेनैरावतौजसा।।३२।।
तस्यैकस्योच्छ्रितं छत्रंमूर्ध्नि तेनामलत्विषा।। पूर्वराजवियोगोष्माकृत्स्नस्यजगतोहृतः।।३३।।

ण क्रममाणश्चरन् अनुपसर्गाद्वेति वैकल्पिकमात्मनेपदं द्यां चकार स्वर्गलोकसदृशीं चकारेत्यर्थः। द्यौः
स्वर्गसुरवर्त्मनोरित्यमरः।।३२।। तस्येति। तस्यैकस्य मूर्ध्नि उच्छ्रितमुन्नतं अमलत्विषा तेन छत्रेण कृत्स्नस्य
जगतः पूर्वराजस्य कुशस्य वियोगेन यदौष्ण्यं संतापं तद्धृतं अत्र छत्रात्तमनसंतापहरणालक्षणयोः कार्या 4
कारणयोर्भिन्नदेशत्वादसंगतिरलंकारः। तदुक्तं कार्यकारणयोर्भिन्नदेशत्वे सत्यसंगतिरिति।।३३।। ।। ।।

471/1947

धूमादिति। अग्नेर्धूमात्पश्चादनंतरमित्यर्थः। शिखाज्वाला रवेरुदयानंतरं अंशवनुष्ठितं तत्र इतिशेषः। सोऽति
थिस्तेजसामग्र्यादीनां वृत्तिंस्वभावमतीत्य गुणैः समं सहैवोत्थितः उदितः अपूर्वमिदमित्यर्थः।।३४।। तमिति
पौरयोषितः प्रीत्या विशदैर्निर्मलैर्नेत्रैः करणैस्तमतिथिं अनुजग्मुरनुययुः।। येदृष्टिप्रसारमद्राक्षुरिकथमि
व। शरदि प्रसन्नैर्ज्योतिर्भिर्नक्षत्रैर्विभावर्यो रात्रयउडुपं नक्षत्रमिव।।३५।। अयोध्येति। प्रशस्तेषा — यत
तेनषालयेषु अर्चिताः अयोध्यादेवताश्च अनुध्येय मनुग्राह्यमेनमतिथिं प्रतिमार्गितैर्ईयांसंक्रांतैः सां

धूमादग्नेः शिखापश्चादुदयादंशवोरवेः।। सोतीत्यतेजसांवृत्तिसममेवोत्थितोगुणैः।।३४।।
तंप्रीतिविशदैर्नेत्रैरन्वयुः पौरयोषितः।। शरत्प्रसन्नैर्ज्योतिर्भिर्विभावर्यइवोडुपं।।३५।।
अयोध्यादेवताश्चैनंप्रशस्तायतनार्चिताः।। अनुदध्युरनुध्येयंसांनिध्यैः प्रतिमागतैः।।३६।।
यावंनाश्यायतेवेदिरभिषेकजलाप्लुता।। तावदेवास्यवेलांप्रतापः प्रापदुःसहः।।३७।।

निध्यैरनुग्रहः अनुध्यानमनुग्रहइत्युत्पलमालायां तदनुग्रहबुध्या सान्निध्युरित्यर्थः।।३६।। यावदिति। अ
भिषेकजलैराप्लुता वेसिक्ता वेदिरभिषेकवेदिर्याविन्नाश्यायते नशुष्यति कर्तरिलिट्। तावदेवास्यराज्ञोदुःस
हः प्रतापोवेलांतं वेलापर्यंतंप्राप।।३७।। वसिष्ठस्येति। गुरोर्वसिष्ठस्य मंत्राधान्विनस्तस्योतिथेः सायकाश्चोभये
संगताः संतोयत्साध्यं नसाधयेयुस्तत्तादृक्साध्यं नकिंचिदित्यर्थः। तेषामसाध्यं नास्तीति भावः।।३८।। ।।

र·भू·टी· सइति। धर्मेनितिष्ठंतीति धर्मस्थाः सभ्याः राज्ञासभासदः कार्यारिपौ मित्रेचयेसमाइत्युक्तलक्षणास्तेषांसखा स १७
४ धर्मस्थसखः तत्सहित इत्यर्थः अतंद्रितोऽनातःससन्नृपशाश्वदन्वहमित्यर्थः अर्थिनां साध्यार्थवतांप्रत्यर्थिनां
तद्विरोधिनांच संशयच्छेद्यान् संशयाद्धेतोः छेद्यानपरिच्छेद्यान् संदिग्धत्वादवश्यनिर्णेयानित्यर्थः व्याणादी
न्व्यवहारान् स्वयंपश्यत्सभ्यैः परिवृतोऽन्वहमिति॥ ३९॥ ततइति। ततः परव्यवहारदर्शनात् तरंभ्रस्यान्नुजी

वासिष्ठस्यगुरोर्मंत्राःसायकास्तस्यधन्विनः॥ किंतत्साध्यंयदुभयेसाधयेयुर्न
संगता॥ ३८॥ सधर्मस्थसखःशश्वदर्थिप्रत्यर्थिनांस्वयं॥ ददर्शसंशयच्छेद्यान्व्य
वहारानतंद्रितः॥ ३९॥ ततःपरमभिव्यक्तसौमनस्यनिवेदितैः॥ युयोजपा
काभिमुखैर्भृत्यान्विज्ञापनाफलैः॥ ४०॥ ॥ ॥ ॥ ॥ ॥

विनः अभिव्यक्तं मनःप्रसादाद्विलिंगैः सैरुदीभूतयेत्सौमनस्यस्माभिनःप्रसन्नवत्त्वंतेननिवेदितैः सूचितैः
पाकाभिमुखैः सिध्युन्मुखैर्विज्ञापनाफलैः प्रेषितोऽर्थियुजोयाजयामास अत्रबृहस्पतिः नित्यंकर्मवि
निष्पन्नोविज्ञप्तश्चयदृच्छयान्नृत्यान्धनैमानियंस्तनवोप्यक्षोभ्यतां व्रजेदितिकविश्चवक्ष्यति। अक्षोभ्य ४
इति। अत्रसोमस्यफलयोजनाभिन्नृपस्यवृक्षसमाधिध्वन्यत इत्यनुसंधेयं॥ ४०॥ ॥ ॥ ॥

473
1947

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017